॥ श्रीः ॥

प्रातर्वार्षिकपूजाकथासंग्रहः ।

प्रकाशक :

वेदाचार्य विनायक हरि घैसास

प्रधान विश्वस्त

वेदाचार्य घैं... ...गी वेदपाठशाळा,

... ००४

1075

1075

॥ श्रीः ॥

प्रातिवार्षिकपूजाकथासङ्ग्रहः ।

प्रथमो भागः

Hold ID – 3220
Cat no – 1812
Book no – 1
Location · 17 · B · 3

इदं पुस्तकं घैसासोपाव्हहरिशर्मतनुजनुषा वेदाचार्यविनायकशर्मणा स्वीयघैसासगुरुजीवेदपाठशालाद्वारा प्रकाशितम् ।

शके १९०७, सन १९८६

॥ श्रीगणेशायनमः ॥

प्रस्तावना

हा पूजासंग्रह प्रसिद्ध करताना आम्हास समाधान होत आहे. भारतीय संस्कृति वेदप्रामाण्य मानते. तशा वेदांनी सूचित केलेल्या वेगवेगळ्या उपासना करण्याचेही पवित्र कर्म आज हजारो वर्षे आपल्या देशातील आबालवृद्ध स्त्री-पुरुष करीत आलेले आहेत. चैत्र मासातील गुढी उभारण्याच्या मंगलमय कर्मापासून तो फाल्गुनातील रंगपंचमीपर्यंत विविध सण अत्यंत भक्तिभावाने आपण करीत असतो.

या सणांत पुष्कळ पूजांचा अंतर्भाव आहे. प्रत्येक महिन्यात येणाऱ्या पूजा वेगवेगळ्या, पण देशभर त्या केल्या जातात. अशा तऱ्हेच्या पूजा कोणत्या आणि त्या कशा कराव्या याबद्दल सहाय्य करणारा ग्रंथ महाराष्ट्र ग्रंथजगात असणे आवश्यक वाटले आणि ही दुर्मिळ पोथी छापण्याची कल्पना मनात आली.

या पोथीतील विविध पूजांचा एकंदर आवाका पाहिला की, नित्य-नैमित्तिक व काम्य अशा अनेक पूजा या ग्रंथात समाविष्ट असल्याचे दिसून येईल. साधारण पूजाविधीची माहिती माहितगाराकडून करून घेतल्यास कोणासही ही पोथी वापरून इष्टकार्यसिद्धि करता येईल. त्यामुळे हा ग्रंथ कुटुंबा-कुटुंबात संग्राह्य वाटावा यात संशय नाही. विशेषतः परदेशस्थ बंधु-भगिनींना आपल्या रीतिरिवाजांना सांभाळण्याचे दृष्टीने ही पोथी म्हणजे मोठीच सोय झाली आहे.

त्याचप्रमाणे ह्या व्यवसायात असलेल्या लोकांससुद्धा वेगवेगळ्या कारणांनी वेगवेगळ्या पूजांची गरज पडते आणि त्या यथासांग मिळविणे पुष्कळदा दुरापास्त ठरते. त्यांनाही हा ग्रंथ खात्रीपूर्वक उपयोगी पडेल.

इतिहासाचे अभ्यासक, दैवतशास्त्राचे अभ्यासक, संस्कृतीचे अभ्यासक इ० अभ्यासकांसही या ग्रंथात विचाराला पुष्कळ खाद्य मिळेल.

तात्पर्य, असा हा लोकोपयोगी ग्रंथ शक्य तो अल्प किंमतीत आणि दर्जेदार स्वरूपात जनताजनार्दनाचे हाती देता येणे ही खरोखर आम्ही आमच्या भाग्याची गोष्ट मानतो.

या आमच्या उपक्रमाचे स्वागतही मोठ्या उत्साहाने अभ्यासक करतील अशी आशा व्यक्त करून विराम पावतो.

श्रावण शुक्ल पंचमी, १९०८ — विनायक हरि घैसास
(दि. १०-८-८६) — प्रधान विश्वस्त

प्रकाशक :
वेदाचार्य विनायक हरि घैसास
प्रधान विश्वस्त
वेदाचार्य घैसास गुरुजी वेदपाठशाळा,
२/११ एरंडवणा, कर्वे रस्ता,
पुणे ४११ ००४

卐

मूल्य रुपये ६०-००

卐

मुद्रक :
वसंत गोविंद मोघे
वसंत प्रिंटिंग प्रेस,
५२६/३ चतु:शृंगी रस्ता,
पुणे ४११ ०१६

॥ श्रीः ॥

॥ उपोद्घातः ॥

इह किल सन्ति यद्यपि प्राचीनप्रामाणिकविद्वद्वरनिर्मिता भूयांसो निबन्धा येषु तिथिविशेषादिकृत्यानि विस्तरेण न्यरूप्यन्त, तथापि तेषामेकैकमेवातिविस्तृततया साम्प्रतिकानामालस्योपहतचेतसामल्पमतीनां दुरधिगमं व्ययाधिक्यसम्पाद्यसङ्ग्रहश्च। न चैकमात्रे सङ्गृहीते निबन्धे साम्प्रतमस्मासु प्रचरितानां प्रातिवर्षिकसकलपूजाकथादीनां ग्रन्थान्तरगवेषणनैरपेक्ष्येण कृत्स्नभावेनावगमः सम्भवति। न च शक्यते सर्वनिबन्धसङ्ग्रहः सर्वैः सम्पादयितुमिति। व्रतराजव्रतकौमुदीनिर्णयसिन्धुधर्मसिन्धुप्रभृतिनिबन्धान् समाहृत्य तेभ्योऽस्मदाद्यनुष्ठीयमानप्रातिवर्षिकपूजाकथादिभागमेकीकृत्य संयोज्य च तत्तत्स्थलेषु तत्तदुचितसङ्कल्पवाक्यानि क्रियमाणोऽयं लघुतरो निबन्धोऽन्यनैरपेक्ष्येण सकलकार्यनिर्वाहक्षमः सुकरसङ्ग्रहश्च न व्यर्थतां गच्छेदित्याशासे। प्रार्थये च विद्वद्वरान् प्राथमिकरचनागोचरेऽत्र बुध्यपराधजनितानि स्खलितानि सोढुं पूरयितुं च न्यूनांशान् भगवन्तं श्रीकाशीविश्वेश्वरं निष्प्रत्यूहमेतत्प्रचारणायेति शम्।

॥ पौराणिकाख्यननाशास्त्री ॥

श्रीगुरुःशरणम् ।

किञ्चिन्निवेदनम् ।

विदितमेव विदुषां यत् सुगृहीतनामभिर्विद्वद्वरैः पुराणिकेत्युपाह्वनानाशास्त्रिभिर्ग्रथितं प्रकाशितं च सकलास्तिकजनोपकाराय भागद्वयात्मकं प्रातिवर्षिकपूजाकथासङ्ग्रहनामकं पुस्तकम् ।

तस्य च पूर्वसंस्करणस्य समाप्तत्वेन पुस्तकानां दौर्लभ्यदुःखमनुभवद्भिरनेकमान्यैः द्वितीयावृत्तिप्रकाशनाय दत्तोत्साहाः शास्त्रिवराणामनुजा वेदवेदाङ्गपारगाः कर्मकाण्डधुरीणाः पुराणिकेत्युपाह्वकृष्णंभट्टाः प्रकाशनार्थं प्रवृत्ताः ।

अस्मिन् संस्करणे सत्यनारायणकथाहलषष्ठीपूजाकथावरलक्ष्मीपूजाकथेत्यादिसमुचितपूजाकथानां सङ्ग्रहस्तथा यत्र यत्र ऋचः संक्षिप्ताः पूर्वमासन् ताः प्रतिभागमादौ तत्तद्भागोपयुक्ताः साकल्येन लिखिता इति विशेषः ।

अस्य संस्करणस्य संशोधनसमये सन्दिग्धस्थलविशेषेषु कृतसहायाः प्रातःस्मरणीयाः पण्डिताग्रगण्याः गुरुवराः श्री १०८ गोपालशास्त्रिनेने महोदयास्तथा मम सुहृद्वराः ज्योतिर्विदः ह्मसकरेत्युपाह्वबालकृष्णशास्त्रिणः सहायकाः सन्तो मामनुगृहीतवन्त इति तान् प्रति चिरकृतज्ञोऽहम् । संशोधनसमये दृष्टिदोषेणाज्ञानेन यन्त्रदोषेण वा याः काश्चित् त्रुटयस्ताः सर्वा हंसक्षीरन्यायेन विद्वांसः क्षाम्यन्त्वित्यभ्यर्थये

विदुषामनुचरः—
चिन्तामणिशास्त्री ।

॥ श्रीः ॥

॥ अनुक्रमणिका ॥

प्रकरणानि	पृष्ठ
मङ्गलाचरणम् ।	१
॥ चैत्रमासः ॥	२
ब्रह्मध्वजपूजनम् ।	२
संवत्सरमुहूर्ताः ।	२
गौर्याः दोलोत्सवः ।	२
दमनकसमर्पणविधिः ।	३
अशोककलिकाप्राशनविधिः ।	३
॥ वैशाखमासः ॥	४
वैशाखस्नानसङ्कल्पः ।	४
अक्षय्यतृतीयानिमित्तउदकुम्भदानविधिः ।	४
॥ ज्येष्ठमासः ॥	४
दशहरानिमित्तस्नानपूजनविधिः ।	४
निर्जलानिमित्तशर्करायुक्तउदकुम्भदानविधिः ।	५
वटसावित्रीव्रतनिर्णयः ।	५
व० त्रिरात्रव्रतसङ्कल्पः ।	६
वटसावित्रीपूजाविधिः ।	६
चन्द्रार्घ्यदानविधिः ।	११
वटसावित्रीकथा ।	१२
॥ आषाढमासः ॥	२२
विष्णुशयनोत्सवः ।	२२
चातुर्मास्यव्रतारम्भः ।	२२
तिथिपालनव्रतम् ।	२३
गोपद्मव्रतविधिः ।	२४
अमायां दीपपूजनम् ।	२५
॥ श्रावणमासः ॥	२६
(रविवासरे)	
सूर्यपूजाविधिः ।	२६
(सोमवासरे)	
शिवपूजाविधिः ।	२७
षोडशसोमवारव्रतारम्भकालः, पूजनविधिश्च ।	२९
षोडशसोमवारकथा ।	२९
षोडशसोमवारप्राकृतकथा ।	३८
शिवामुष्टिव्रतविधिः ।	४६
(मङ्गलवासरे)	
मङ्गलागौरीव्रतग्रहणम् ।	४७
मङ्गलागौरीपूजावि० ।	४७
मङ्गलागौरीकथा ।	५२
(बुधगुरुवासरे)	
बुधगुरुपूजाविधिः ।	५६
(भृगुवासरे)	
जीवन्तिकापूजावि० ।	५७
वरलक्ष्मीपूजावि० ।	५८
वरलक्ष्मीकथा ।	६२
(शनिवासरे)	
नृसिंहपूजाविधिः ।	६५
शनिपूजाविधिः ।	६६
हनुमत्पूजाविधिः ।	६६

नागपूजाविधिः।	६७
सूपौदनदानविधिः।	६६
दध्योदनदानवि०।	७०
पवित्रारोपणवि०।	७१
सभादीपदानवि०।	७२
रक्षाबन्धनमन्त्रः।	७४
हलषष्ठीपूजाविधिः।	७४
हलषष्ठीकथा।	७५
गोकुलाष्टमीपूजा।	८०
अष्टोत्तरशतनामावलिः।	८३
जन्माष्टमीकथा।	८७
पिठोराव्रतविधिः।	९१
चतुःषष्ठीपूजनवि०।	९१
पिठोराव्रतकथा।	९५
पिठोराव्रताङ्गगोवृषपूजनविधिः।	९७
पिठोराउमामहेश्वरपूजनविधिः।	९८
॥ भाद्रपदमासः ॥	
हरितालिकापूजा।	९८
हरितालिकाकथा।	१०३
सिद्धिविनायकपूजा।	११२
पुरुषसूक्तन्यासाः।	११३
सि० प्राणप्रतिष्ठावि०।	११३
आरती गणपतीची।	११८
सि० उत्तरपूजनम्।	११९
चन्द्रदर्शननिषेधः, परिहारश्लोकश्च।	१२०
स्यमन्तकोपाख्यानम्।	१२०
ऋषिपञ्चमीपूजावि०	१२९
ऋषिपञ्चमीकथा।	१३३
सूर्यषष्ठी०।	१३८
मुक्ताभरणपूजा।	१३८
मुक्ताभरणकथा।	१४०
ज्येष्ठावाहनपूजनवि०।	१४३
षोडशदिनात्मकमहालक्ष्मीव्रतारम्भपूजनवि०।	१४६
म० दोरकपूजनवि०।	१४७
कृष्णाष्टम्यां महालक्ष्मीपूजनविधिः।	१४७
लक्ष्मीसूक्तन्यासाः।	१४८
आरती लक्ष्मीची।	१५२
महालक्ष्मीकथा।	१५५
दूर्वाष्टमीपूजावि०।	१६४
अदुखनवमीपूजावि०।	१६५
अदुखनवमीकथा।	१६८
विष्णुपरिवर्तनवि०।	१७३
श्रवणद्वादश्यांजनार्दनपूजाविधिः।	१७३
शिक्यदानविधिः।	१७५
वामनपूजाविधिः।	१७६
श्रवणद्वादशीकथा।	१७९
अनन्तपूजाविधिः।	१८६
अनन्तअष्टोत्तरशतनामावलिः।	१९८
अनन्तकथा।	२०१
कपिलाषष्ठीयोगः।	२०९
क० स्नानसूर्यपूजनकपिलादानविधिः।	२०९

॥ अथ प्रातिवर्षिकपूजाकथासङ्ग्रहस्य प्रथमद्वितीय-भागयोर्मन्त्रानुक्रमणिका ॥

॥ ॐ गणानांत्वागणपतिंहवामहेकविंकवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतऽआनःशृण्वन्नूतिभिःसीदसादनम् ॥

ॐ निषुसीदगणपतेगणेषुत्वामाहुर्विप्रतमंकवीनाम् ।
नऽऋतेत्वत्क्रियतेकिंचनारेमहामर्कंमघवन्चित्रमर्च ॥

ॐ आयंगौःपृश्निरक्रमीदसदन्मातरंपुरः ।
पितरंचप्रयन्त्स्वः ॥

ॐ नमोऽस्तुसर्पेभ्योयेकेचपृथिवीमनु ।
येऽअंतरिक्षेयेदिवितेभ्यःसर्पेभ्योनमः ॥

ॐ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ।
सभूमिंविश्वतोवृत्वाऽत्यतिष्ठद्दशांगुलम् ॥

ॐ पुरुषऽएवेदंसर्वं यद्भूतंयच्चभव्यम् ।
उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥

ॐ एतावानस्यमहिमाऽतोज्यायाँश्चपूरुषः ।
पादोऽस्यविश्वाभूतानित्रिपादस्यामृतंदिवि ॥

ॐ त्रिपादूर्ध्वऽउदैत्पुरुषःपादोऽस्येहाभवत्पुनः ।
ततोविष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥

ॐ तस्माद्विराळजायतविराजोऽअधिपूरुषः ।

सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ १ ॥

ॐ यत्पुरुषेणहविषादेवायज्ञमतन्वत ।

वसंतोऽअस्यासीदाज्यंग्रीष्मऽइध्मःशरद्धविः ॥

ॐ तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः ।

तेनदेवाअयजंतसाध्याऽऋषयश्चये ॥

ॐ तस्माद्यज्ञात्सर्वहुतःसंभृतंपृषदाज्यम् ।

पशूंस्ताँश्चक्रेवायव्यानारण्यान्ग्राम्याश्चये ॥

ॐ तस्माद्यज्ञात्सर्वहुतऽऋचःसामानिजज्ञिरे ।

छन्दांसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ॥

ॐ तस्मादश्वाऽअजायंतयेकेचोभयादतः ।

गावोहजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः ॥ २ ॥

ॐ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयंन् ।

मुखंकिमस्यकौबाहूकाऽऊरूपादाऽउच्येते ॥

ॐ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृतः ।

ऊरूतदस्ययद्वैश्यःपद्भ्यांशूद्रोऽअजायत ॥

ॐ चन्द्रमामनसोजातश्चक्षोःसूर्योऽअजायत ।

मुखादिंद्रश्चाग्निश्चप्राणाद्वायुरजायत ॥

॥ ६ ॥ ॐ नाभ्याऽआसीदंतरिक्षंशीर्ष्णोद्यौःसमवर्तत ।

पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकाँ२ऽअकल्पयन् ॥

ॐ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधःकृताः ।

देवायद्यज्ञंतन्वानाऽअबध्नन्पुरुषंपशुम् ॥

ॐ यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन् ।

तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः ॥ ३ ॥ इति पुरुषसूक्तम् ।

ॐ अतोदेवाअवंतुनोयतोविष्णुर्विचक्रमे ।

पृथिव्याःसप्तधामभिः ॥

ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ।

समूळ्हमस्यपांसुरे ॥

ॐ त्रीणिपदाविचक्रमेविष्णुर्गोपाऽअदाभ्यः ।

अतोधर्माणिधारयन् ॥

ॐ विष्णोःकर्माणिपश्यतयतोव्रतानिपस्पशे ।

इंद्रस्ययुज्यःसखा ॥

ॐ तद्विष्णोःपरमंपदंसदापश्यंतिसूरयः ।

दिवीवचक्षुराततम् ॥

ॐ तद्विप्रासोविपन्यवोजागृवांसःसमिंधते ।

विष्णोर्यत्परमंपदम् ।। इति विष्णुसूक्तम् ।

॥१०॥

ॐ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामग्नेस्तेजसा

सूर्यस्यवर्चसेंद्रस्येंद्रियेणाभिषिंचामि ।। बलायश्रियैयशसेन्नाद्याय ।।

ॐ भूर्भूवःस्वः ।। अमृताभिषेकोऽस्तु ।। शांतिःपुष्टिस्तुष्टिश्चास्तु ।।

ॐ आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यम् ।

भवावाजस्यसंगथे ।। दुग्धं ।।

ॐ दधिक्राव्णोऽअकारिषंजिष्णोरश्वस्यवाजिनः ।

सुरभिनोमुखाकरत्प्रणऽआयूँषितारिषत् ।। दधि० ।।

ॐघृतंमिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतम्वस्यधाम ।

अनुष्वधमावहमादयस्वस्वाहाकृतंवृषभवक्षिहव्यम् ।। घृतं० ।।

ॐमधुवाताऽऋतायतेमधुक्षरंतिसिन्धवः ।

माध्वीर्नःसंत्वोषधीः ।। मधु० ।।

ॐ स्वादुःपवस्वदिव्यायजन्मनेस्वादुरिन्द्रायसुहवीतुनाम्ने ।

स्वादुर्मित्रायवरुणायवायवेबृहस्पतयेमधुमाँऽअदाभ्यः ।। शर्क० ।।

ॐ कनिक्रदज्जनुषंप्रब्रुवाणऽइयर्तिवाचमरितेवनावम् ।

सुमंगलश्चशकुनेभवासिमात्वाकाचिदभिभाविश्व्याविदत ।।

ॐ मात्वाश्येनऽउद्वधीन्मासुपर्णोमात्वाविददिषुमान्वीरोऽअस्ता ।

पित्र्यामनुप्रदिशंकनिक्रदत्सुमंगलोभद्रवादीवदेह ॥

॥११॥ ॐ अवक्रंददक्षिणतोगृहाणांसुमंगलोभद्रवादीशकुंते ।

मानःस्तेनईशतमाघशंसोबृहद्वदेमविदथेसुवीराः ॥१॥

ॐ प्रदक्षिणिदभिगृणंतिकारवोवयोवदंतऽऋतुथाशकुंतयः ।

उभेवाचौवदतिसामगाऽइवगायत्रंचत्रैष्टुभंचानुराजति ॥

ॐ उद्गातेवशकुनेसामगायसिब्रह्मपुत्रऽइवसवनेषुशंससि ।

वृषेववाजीशिशुमतीरपीत्यासर्वतोनःशकुनेभद्रमावदविश्वतोनः-

शकुनेपुण्यमावद ॥

ॐ आवदंस्त्वंशकुनेभद्रवदतूष्णीमासीनःसुमतिंमाचिकिद्धिनः ।

यदुत्पतन्वदसिकर्करिर्यथाबृहद्वदेमविदथेसुवीराः ॥२॥ मांगलिक० ॥

ॐ श्रियेजातःश्रियऽआनिरियायश्रियंवयोजरितृभ्योदधाति ।

श्रियंवसानाऽअमृतत्वमायन्भवंतिसत्यासमिथामितद्रौ ॥

ॐ श्रियएवैनंतच्छ्रियामादधाति । संततमृचावषट्कृत्यं ।

संतत्यैसंधीयते । प्रजयापशुभिर्यऽएवंवेद ॥ आर्तिक्यदीपं० ॥

ॐ महीद्यौःपृथिवीचनंऽइमंयज्ञंमिमिक्षताम् ।

पिपृतांनोभरीमभिः ॥ भूमिं स्पृशेत् ।

ॐ ओषधयःसंवदंतेसोमेनसहराज्ञा ।

यस्मैकृणोतिब्राह्मणस्तंराजन्पारयामसि ॥ व्रीहीन्क्षिपेत् ।

॥१२॥

ॐ आकलशेषुधावतिपवित्रेपरिषिच्यते ।

उक्थैर्यज्ञेषुवर्धते ॥ कलशस्थापनम् ।

ॐ इममेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या ।

असिक्न्यामरुद्वृधेवितस्तयाऽऽर्जीकीयेश्रृणुह्यासुषोमया ॥ उदकमापूरणम् ।

ॐ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम् ।

ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम् ॥ गंधं० ॥

ॐ याऽओषधीःपूर्वाजातादेवेभ्यस्त्रियुगंपुरा ।

मनैनुबभ्रूणामहंशतंधामानिसप्तच ॥ सर्वौषधी० ॥

ॐ कांडात्कांडात्प्ररोहंतीपरुषःपरुषःपरि ।

एवानोदूर्वेप्रतनुसहस्रेणशतेनच ॥ दूर्वापुष्पे० ॥

ॐ अश्वत्थेवोनिषदनंपर्णेवोवसतिष्कृता ।

गोभाजऽइत्किलासथयत्सनवथपूरुषम् ॥ पंचपल्लवानि ॥

ॐ स्योनापृथिविभवाऽनृक्षरानिवेशनी ।

यच्छानःशर्मसप्रथः ॥ सप्तमृदः ॥

ॐ याःफलिनीर्याअफलाऽअपुष्पायाश्चपुष्पिणीः ।

बृहस्पतिप्रसूतास्तानोमुंचन्त्वंहसः ॥ फलानि ॥

ॐ सहिरत्नानिदाशुषेसुवातिसविताभगः ।

तंभागंचित्रमीमहे ॥ रत्नानि० ॥

॥१३॥

ॐ हिरण्यरूपःसहिरण्यसंदृगपांनपात्सेदुहिरण्यवर्णः ।

हिरण्ययात्परियोनेर्निषद्याहिरण्यदाददत्यन्नमस्मै ॥ हिर० ॥

ॐ युवासुवासाःपरिवीतऽआगात्सऽउश्रेयान्भवतिजायमानः ।

तंधीरासःकवयऽउन्नयन्तिस्वाध्योऽमनसादेवयंतः ॥ वस्त्रं० ॥

ॐ पूर्णादर्विपरापतसुपूर्णापुनरापत ।

वस्नेवविक्रीणावहाऽइषमूर्जंशतक्रतो ॥

तत्वायामिशुनःशेपोवरुणस्त्रिष्टुप् । वरुणावाहने विनियोगः ॥

ॐ तत्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः ।

अहेळमानोवरुणेहवोध्युरुशंसमानऽआयुःप्रमोषीः ॥

ॐ याःप्रवतोनिवतऽउद्वतऽउदन्वतीरनुदकाश्चयाः ।

ताऽअस्मभ्यंपयसापिन्वमानाःशिवादेवीरशिपदाभवंतुसर्वानद्योऽअशि-

मिदाभवंतु ॥

ॐ असुनीतेपुनरस्मासुचक्षुःपुनः प्राणमिहनोधेहिभोगम् ।

ज्योक्पश्येमसूर्यमुच्चरंतमनुमतेमृळयानःस्वस्ति ॥

ॐ तच्चक्षुर्देवहितंशुक्रमुच्चरत् ।

पश्येमशरदःशतंजीवेमशरदःशतम् ॥

ॐ याज्ययायजतिप्रात्तेर्वैयाज्या । पुण्यैवलक्ष्मीः । पुण्यामेवतंल्लक्ष्मीं

संभावयति । पुण्यांल्लक्ष्मींसंस्कुरुते ॥ आर्त्तिक्यदीपम् ॥

ॐ उत्तिष्ठब्रह्मणस्पतेदेवयंतस्त्वेमहे ।

उपप्रयंतुमरुतःसुदानवऽइंद्रप्राशूर्भवासचा ॥ उत्थानमंत्रः ॥

ॐ राजाधिराजायप्रसह्यसाहिने । नमोवयंवैश्रवणायकुर्महे ।

समेकामान्कामकामायमह्यं ॥ कामेश्वरोवैश्रवणोददातु ॥

कुबेरायवैश्रवणाय । महाराजायनमः ॥

ॐ स्वस्ति । साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्यमाधिपत्यमयं समंतपर्यायीस्यात्सार्वभौमः सार्वायुष आंतादापरार्धात् । पृथिव्यै समुद्रपर्यन्तायाएकराळिति । तदप्येषश्लोकोभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन्गृहे आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति ।

ॐ विश्वतःश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् ।

संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएकः ॥

ॐ तदस्तुमित्रावरुणातदग्नेशंयोरस्मभ्यमिदमस्तुशस्तम् ।

अशीमहिगाधमुतप्रतिष्ठांनमोदिवेबृहतेसादनाय ॥

गृहावैप्रतिष्ठासूक्तं तत्प्रतिष्ठिततमयावाचाशंस्तव्यं तस्माद्यद्यपिदूरइव पशूंल्लभते गृहानेवैनानाजिगमिषति गृहाहिपशूनांप्रतिष्ठाप्रतिष्ठा ॥

ॐ अहिरिवभोगैःपर्येतिबाहुंज्यायाहेतिंपरिबाधमानः ।

हस्तघ्नोविश्वावयुनानिविद्वान्पुमान्पुमांसंपरिपातुविश्वतः ॥

॥१८॥

॥ अथश्रीसूक्तप्रारम्भः ॥

ॐ हिरण्यवर्णांहरिणींसुवर्णरजतस्रजाम् ।

चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह ॥

ॐ तांमआवहजातवेदोलक्ष्मीमनपगामिनीम् ।

यस्यांहिरण्यंविन्देयंगामश्वंपुरुषानहम् ॥

ॐ अश्वपूर्वांरथमध्यांहस्तिनादप्रमोदिनीम् ।

श्रियंदेवीमुपह्वयेश्रीर्मादेवीजुषताम् ॥

ॐ कांसोस्मितांहिरण्यप्राकारामार्द्रां ज्वलंतींतृप्तांतर्पयंतीम् ।

पद्मेस्थितांपद्मवर्णांतामिहोपह्वयेश्रियम् ॥

ॐ चंद्रांप्रभासांयशसाज्वलंतींश्रियंलोकेदेवजुष्टामुदाराम् ।

तांपद्मनेमींशरणमहंप्रपद्येअलक्ष्मीर्मेनश्यतांत्वांवृणोमि ॥ १ ॥

ॐ आदित्यवर्णेतपसोधिजातोवनस्पतिस्तववृक्षोथबिल्वः ।

तस्यफलानितपसानुदंतुमायांतरायाश्चबाह्याअलक्ष्मीः ॥

ॐ उपैतुमांदेवसखःकीर्तिश्चमणिनासह ।

प्रादुर्भूतोसुराष्ट्रेस्मिन्कीर्तिंवृद्धिंददातुमे ॥

ॐ क्षुत्पिपासामलांज्येष्ठाअलक्ष्मीर्नाशयाम्यहम् ।

अभूतिमसमृद्धिंचसर्वान्निर्णुदमेगृहात् ॥

॥१६॥

ॐ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम् ।

ईश्वरींसर्वभूतानांतामिहोपव्हयेश्रियम् ॥

ॐ मनसःकाममाकूतिंवाचःसत्यमशीमहि ।

पशूनांरूपमन्यस्यमयिश्रीःश्रयतांयशः ॥ २ ॥

ॐ कर्दमेनप्रजाभूतामयिसंभ्रमकर्दमा ।

श्रियंवासयमेकुलेमातरंपद्ममालिनीम् ॥

ॐ आपःस्रजंतुस्निग्धानिचिक्लीतवसमेगृहे ।

नीचदेवींमातरंश्रियंवासयमेकुले ॥

ॐ आर्द्रांयःकरिणींयष्टींसुवर्णांहेममालिनीम् ।

सूर्यांहिरण्मयींलक्ष्मींजातवेदोममावह ॥

ॐ आर्द्रांपुष्करिणींपुष्टींपिंगलांपद्ममालिनीम् ।

चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह ॥

ॐ तांमआवहजातवेदोलक्ष्मीमलपगामिनीम् ।

यस्यांहिरण्यंप्रभूतिंगावोदास्योश्वान्विन्देयंपुरुषानहम् ॥ ३ ॥

ॐ यःशुचिःप्रयतोभूत्वाजुहुयादाज्यमन्वहम् ।

सूक्तंपंचदशर्चंश्चश्रीकामःसततंजपेत् ॥

पद्माननेपद्मनिपद्मपत्रेपद्मप्रियेपद्मदलायताक्षि ।

विश्वप्रियेविश्वमनोनुकूलेत्वत्पादपद्मंह्रदिसंनिधत्स्व ॥

पद्माननेपद्मऊरूपद्माक्षीपद्मसंभवे ।

॥ १७ ॥ तन्मेभजसिपद्माक्षियेनसौख्यंलभाम्यहम् ।

अश्वदायैगोदायैधनदायैमहाधने ।

धनंमेलभतांदेवींसर्वकामांश्चदेहिमे ॥

पुत्रपौत्रधनंधान्यंहस्त्यश्वादिगवेरथम् ।

प्रजानांभवसीमाताआयुष्मंतंकरोतुमे ॥ ४ ॥

धनमग्निर्धनंवायुर्धनंसूर्योधनंवसुः ।

धनमिंद्रोबृहस्पतिर्वरुणंधनमश्विना ॥

वैनतेयसोमंपिबसोमंपिबतुवृत्रहा ।

सोमंधनस्यसोमिनोमह्यंददातुसोमिनः ॥

नक्रोधोनचमात्सर्यंनलोभोनाशुभामतिः ।

भवंतिकृतपुण्यानांभक्तानांश्रीसूक्तंजपेत् ॥

सरसिजनिलयेसरोजहस्तेधवलतरांशुभगंधमाल्यशोभे ।

भगवतिहरिवल्लभेमनोज्ञेत्रिभुवनभूतिकरिप्रसीदमह्यम् ॥

महालक्ष्मीचविद्महेविष्णुपत्नीचधीमहि ।

तन्नोलक्ष्मीःप्रचोदयात् ॥ ५ ॥

ग विष्णुपत्नींक्षमांदेवींमाधवींमाधवप्रियाम् ।

विष्णोःप्रियसखींदेवींनमाम्यच्युतवल्लभाम् ॥

आनंदः कर्दमश्चैव चिक्लीत इव विश्रुता ।
ऋषयः श्रियः पुत्राश्च स्वयं श्रीर्देवि देवता ॥
ऋणरोगादि दारिद्र्यं पापक्षुदपमृत्यवः ।
भयशोकमनस्तापं नश्यंतु मम सर्वदा ॥
श्रीवर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते ।
धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥ ६ ॥

॥ इति श्रीसूक्तं समाप्तम् ॥

॥ अथाग्न्युत्तारणविधिः ॥

आचम्य प्राणानायम्य देशकालौ स्मृत्वा अस्याः प्रतिमायाः अङ्गप्रत्यङ्गसंधिसमुत्पन्न वास्याग्निकुद्दालाग्निटङ्काग्न्यातपनिरासार्थं अग्न्युत्तारणं करिष्ये । अग्निःसप्तिमिति सूक्तेन अग्निपदरहितेन पठितेन पुनरग्निपदसहितेन पठितेनैकमावर्तनं भवति एवं अष्टशतवारमष्टाविंशतिवारं वा पठित्वा संतत जलधारां कुर्यात् । यथा—अग्निः सप्तिमिति सप्तर्चस्य सूक्तस्य सोचिको वैश्वानरस्त्रिष्टुप् । अग्न्युत्तारणे विनियोगः ।

॥ ॐ सप्तिं वाजं भरं ददाति वीरं श्रुत्यं कर्मनिष्ठाम् ।
रोदसी विचरत्समंजन्नारीं वीरकुक्षिं पुरंधिम् ॥
अप्नसः समिदस्तु भद्रा मही रोदसी आविवेश ।
एकं चोदयत्समत्सु वृत्राणि दयते पुरूणि ॥
हत्यं जरतः कर्णमावाद्भ्यो निरदहज्जरूथम् ।
अत्रिं घर्म उरुष्यदंतर्नृमेधं प्रजया सृजत्सम् ॥

दाद्रविणंवीरपेशाऋषिंयःसहस्रासनोति ।

॥ १६ ॥ दिविहव्यमाततानधामानिविभृतापुरुत्रा ॥

उक्थैऋषयोविह्वयंतेनरोयामनिबाधितासः ।

वयोअंतरिक्षेपतंतःसहस्रापरियातिगोनाम् ॥

विशईळतेमानुषीर्यामनुषोनहुषोविजाताः ।

गाधर्वीं पथ्यामृतस्यगव्यूतिर्घृतआनिषत्ता ॥

ब्रह्मऋभवस्ततक्षुर्महामवोचामासुवृक्तिम् ।

प्रावजरिता रयिविष्ठमहिद्रविणमायजस्व ॥

ॐ अग्निःसप्तिंवाजंभरंददात्यग्निर्वीरंश्रुत्यंकर्मनिष्ठाम् ।

अग्नीरोदसीविचरत्समंजन्नग्निर्नारींवीरकुक्षिंपुरंधिम् ॥

अग्नेरप्नसःसमिदस्तुभद्राऽग्निर्महीरोदसीआविवेश ।

अग्निरेकंचोदयत्समत्स्वग्निर्वृत्राणिदयतेपुरूणि ॥

अग्निर्हत्यंजरतःकर्णमावाग्निरद्भ्योनिरदहज्जरूथम् ।

अग्निरत्रिंघर्मउरुष्यदंतरग्निर्नृमेधंप्रजयासृजत्सम् ॥

अग्निर्दाद्रविणंवीरपेशाऽग्निर्ऋषिंयः सहस्रासनोति ।

अग्निर्दिविहव्यमाततानाग्नेर्धामानिविभृतापुरुत्रा ॥

अग्निमुक्थैर्ऋषयोविह्वयंतेऽग्निंनरोयामनिबाधितासः ।

अग्निंवयोअंतरिक्षेपतंतोऽग्निःसहस्रापरियातिगोनाम् ॥

अग्निर्विशईळतेमानुषीर्याऽअग्निंमनुषोनहुषोविजाताः ।

अग्निर्गांधर्वीं पथ्यामृतस्याग्निर्गव्यूतिर्घृतऽआनिषत्ता ॥

अग्नयेब्रह्मऽऋभवस्ततक्षुरग्निंमहामवोचामासुवृक्तिम् ।

अग्नेप्रावजरितारंयविष्ठाग्नेमहिद्रविणमायजस्व ॥

॥ इत्यग्न्युत्तारणविधिः ॥

ॐ ऋषभंमासमानानांसपत्नानांविषासहिम् ।

हंतारंशत्रूणांकृधिविराजंगोपतिंगवाम् ॥

ॐ आपोहिष्ठामयोभुवस्तानऊर्जेदधातन ।

महेरणायचक्षसे ॥

योवःशिवतमोरसस्तस्यभाजयतेहनः ।

उशतीरिवमातरः ॥

तस्माअरंगमामवोयस्यक्षयायजिन्वथ ।

आपोजनयथाचनः ॥ ३ ॥

ॐ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यां

पूष्णोहस्ताभ्यांप्रतिगृह्णामि ॥

वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभो ।

निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।

त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

॥ २१ ॥

अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ।
सर्वेषामविरोधेन पूजाकर्म समारभे ॥
तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यं अनुज्ञां दातुमर्हसि ॥
समुद्रवसने देवि पर्वतस्तनमण्डले ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥
ॐ यत्पुरुषं० हृदयायनमः ।
ॐ ब्राह्मणोस्य० शिरसेस्वाहा ॥
ॐ चन्द्रमामनसो० शिखायैवषट् ।
ॐ नाभ्याआसी० कवचायहुम् ॥
ॐ सप्तास्या० नेत्रत्रयायवौषट् ।
यज्ञेनयज्ञ० अस्त्रायफट् ॥ इतिषडङ्गन्यासाः ।
कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥
कुक्षौ तु सागरास्सर्वे सप्तद्वीपा वसुन्धरा ॥
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ।
अङ्गैश्च सहितास्सर्वे कलशं तु समाश्रिताः ॥
अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा ।
आयान्तु देवपूजार्थं दुरितक्षयकारकाः ॥
गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन्सन्निधिं कुरु ॥

सरितः सागराः शैलाः तीर्थानि जलदा नदाः ।
॥ २२ ॥ आयान्तु देवपूजार्थं दुरितक्षयकारकाः ॥
शङ्खादौ चन्द्रदैवत्यं कुक्षौ वरुणदेवता ।
पृष्ठे प्रजापतिश्चैव अग्रे गङ्गा सरस्वती ॥
त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।
निर्मितः सर्वदेवानां पाञ्चजन्यं नमोऽस्तु ते ॥
ॐ पाञ्चजन्याय विद्महे पावमानाय धीमहि ।
तन्नः शङ्खः प्रचोदयात् ॥
आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ।
कुरु घण्टारवं तत्र देवताह्वानसिद्धये ॥
अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥
ध्याये नित्यमितिश्लोकः २७ पृष्ठे द्रष्टव्यः ।
शान्ताकारं भुजगशयनं पद्मनाभं सुरेशम् ।
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यम् ।
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

पुष्पदन्त उवाच ।

महिम्नः पारन्ते परमविदुषो यद्यसदृशी स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः । अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन् ममाप्येषः स्तोत्रे हरनिरपवादः परिकरः ॥ १ ॥ अतीतः पन्थानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्या यं चकितमभिधत्ते श्रुतिरपि । स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥ २ ॥ मधुस्फीता वाचः परमममृतं निर्मितवतस्तव

ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदम् । ममत्वेतां वाणीं गुणकथनपुण्येन भवतः पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता ॥ ३ ॥ तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु । अभव्यानामस्मिन्वरद रमणीयामरमणीं विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः ॥ ४ ॥ किमीहः किं कायः स खलु किमुपायस्त्रिभुवनं किमाधारो धाता सृजति किमुपादान इति च । अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ॥५॥

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥
अक्षताश्च सुरश्रेष्ठाः कुङ्कुमाक्ताः सुशोभनाः ।
मया निवेदिता भक्त्या गृहाण परमेश्वर ॥
माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयाऽऽहृतानि पूजार्थं पुष्पाणि प्रतिगृह्यताम् ॥
वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥
आज्यं च वर्तिसंयुक्तं वन्हिना योजितं मया ।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापह ॥
अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् ।
दध्याज्यमधुसंयुक्तं नैवेद्यं प्रतिगृह्यताम् ॥
पूगीफलं महद्दिव्यं नागवल्यादलैर्युतम् ।
कर्पूरैलासमायुक्तं ताम्बूलं प्रतिगृह्यताम् ॥
इदं फलं मया देव स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥
हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

चक्षुर्दं सर्वलोकानां तिमिरस्य निवारणम् ।
आर्तिक्यं कल्पितं भक्त्या गृहाण परमेश्वर ॥
चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च ।
त्वमेव सर्वज्योतींषि आर्तिक्यं प्रतिगृह्यताम् ॥
यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि तानि विनश्यन्ति प्रदक्षिणपदे पदे ॥
अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात्कारुण्यभावेन रक्ष रक्ष परमेश्वर ॥
आवाहनं न जानामि न जानामि तवार्चनम् ।
पूजां चैव न जानामि क्षम्यतां परमेश्वर ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥
यस्य स्मृत्या च नामोक्त्या तपःपूजाक्रियादिषु ।
न्यूनं सम्पूर्णतां यातु सद्यो वन्दे तमच्युतम् ॥
विप्राय वेदविदुषे श्रोत्रियाय कुटुम्बिने ।
नरकोत्तारणार्थाय अच्युत प्रीयतामिति ॥
यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् ।
इष्टकामप्रसिध्यर्थं पुनरागमनाय च ॥

"सुरास्त्वामभिषिञ्चन्तु" इत्यादिश्लोकाः ४९ पृष्ठे द्रष्टव्याः ।

लघुन्यासप्रारम्भः। ॐ प्रजने ब्रह्मा तिष्ठतु । पादयोः विष्णुस्तिष्ठतु । हस्तयोर्हरस्तिष्ठतु । बाह्वोरिन्द्रस्तिष्ठतु । जठरे अग्निस्तिष्ठतु । हृदये शिवस्तिष्ठतु । कण्ठे वसव स्तिष्ठन्तु । वक्त्रे सरस्वती तिष्ठतु । नासिकयोर्वायुस्तिष्ठतु । नयनयोः सूर्याचन्द्रमसौ तिष्ठेताम् । कर्णयोरश्विनौ देवौ तिष्ठे-

ताम् । ललाटे रुद्रास्तिष्ठन्तु । मूर्ध्न्यादित्यास्तिष्ठन्तु । शिरसि महादेवस्ति-
॥ २५ ॥ ष्ठतु । शिखायां चामुण्डा तिष्ठतु । पृष्ठे पिनाकी तिष्ठतु । पुरतः शूली ति-
ष्ठतु । पार्श्वयोः शिवाशङ्करौ तिष्ठेताम् । सर्वतो वायुस्तिष्ठतु । सर्वेष्वङ्गेषु
सर्वा देवता यथा यथा स्थानानि तिष्ठन्तु । माँ रक्षतु । यजमानँ रक्षतु ।
अग्निर्मे वाचिश्रितः । वाग्हृदये । हृदयं मयि । अहममृते । अमृतंब्रह्मणि ।
वायुर्मे प्राणे श्रितः । प्राणोहृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्म-
णि । सूर्योमे चक्षुषिश्रितः । चक्षुर्हृदये । हृदयंमयि । अहममृते । अमृतं
ब्रह्मणि । चन्द्रमा मे मनसिश्रितः । मनोहृदये० । दिशो मे श्रोत्रेश्रिताः ।
श्रोत्रँ हृदये० । आपो मे रेतसिश्रिताः । रेतोहृदये० । पृथिवी मे शरीरे श्रि-
ता । शरीरँ हृदये० । ओषधिवनस्पतयो मे लोमसु श्रिताः । लोमानि
हृदये० । इन्द्रो मे बलेश्रितः । बलँ हृदये० । पर्जन्यो मे मूर्ध्निश्रितः ।
मूर्धाहृदये० । ईशानो मे मन्यौश्रितः । मन्युर्हृदये० । आत्मा म आत्म-
निश्रितः । आत्माहृदये । हृदयंमयि । अहममृते । अमृतंब्रह्मणि । पुनर्म
आत्मा पुनरायुरागात् । पुनःप्राणः पुनराकूतमागात् । वैश्वानरो रश्मिभि-
र्वावृधानः । अन्तस्तिष्ठत्वमृतस्यगोपाः । सर्वेष्वङ्गेषु सर्वादेवता यथा यथा
स्थानानि तिष्ठन्तु । माँ रक्षन्तु । यजमानँ रक्षन्तु । अथात्मानँ श्री
रुद्ररूपं ध्यायेत् । शुद्धस्फटिकसङ्काशं त्रिनेत्रं पञ्चवक्त्रकम् । गङ्गाधरं
दशभुजं सर्वाभरणभूषितम् ॥ नीलग्रीवं शशाङ्काकं नागयज्ञोपवीतिनम् ।
७ व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदम् ॥ कमण्डल्वक्षसूत्राभ्यामन्वितं
शूलपाणिनम् । ज्वलन्तं पिङ्गलजटाशिखामुद्योतकारिणम् ॥ अमृतेनाप्लुतं

हृष्टमुमादेहार्धधारिणम् । दिव्यसिंहासनासीनं दिव्यभोगसमन्वितम् ॥ दिग्देवतासमायुक्तं सुरासुरनमस्कृतम् । नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम् ॥ सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणम् । एवं ध्यात्वा द्विजः सम्यक् ततो यजनमारभेत् ॥ आराधितो मनुष्यैस्तु सिद्धैर्देवासुरादिभिः । आराधयामि भक्त्या त्वां मां गृहाण महेश्वर ॥ आत्वावहन्तु हरयः सचेतसः श्वेतैरश्वैः सहकेतुमद्भिर्वाताजवैर्बलवद्भिर्मनोजवैरायाहिशीघ्रं ममहव्यायशर्वोम् । स्वामिन्सर्वजगन्नाथ यावत्पूजावसानकम् । तावत्त्वं प्रीतिभावेन लिङ्गेऽस्मिन्सन्निधो भव ॥ ईश्वरदेवता सुप्रसन्नो भव । वरदोभव । शान्तोभव ॥ इति लघुन्यासः ॥

॥ अथ गणपत्यथर्वशीर्षप्रारम्भः ॥

हरिः ॐ सहनाववतु ॥ सहनौ भुनक्तु ॥ सहवीर्यं करवावहै ॥ तेजस्विनावधीतमस्तुमाविद्विषावहै ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ ॐ नमस्तेगणपतये ॥ त्वमेवप्रत्यक्षंतत्त्वमसि ॥ त्वमेवकेवलंकर्त्तासि ॥ त्वमेवकेवलंधर्त्तासि ॥ त्वमेवकेवलंहर्त्तासि ॥ त्वमेवकेवलंसर्वंखल्विदंब्रह्मासि ॥ त्वंसाक्षादात्मासिनित्यं ॥ ऋतंवच्मि ॥ सत्यंवच्मि ॥ अवत्वंमाम् ॥ अववक्तारम् ॥ अवश्रोतारम् ॥ अवदातारम् ॥ अवधातारम् ॥ अवानूचानमवशिष्यम् ॥ अवपश्चात्तात् ॥ अवपुरस्तात् ॥ अवोत्तरात्तात् ॥ अवदक्षिणात्तात् ॥ अवचोर्ध्वात्तात् ॥ अवाधरात्तात् ॥ सर्वतोमां पाहिपाहिसमन्तात् ॥ त्वंवाङ्मयस्त्वंचिन्मयः ॥ त्वमानन्दमयस्त्वंब्रह्ममयः ॥ त्वंसच्चिदानन्दाद्वितीयोसि ॥ त्वंप्रत्यक्षंब्रह्मासि ॥ त्वंज्ञानमयोविज्ञानमयोसि ॥ सर्वं जगदिदं त्वत्तो जायते ॥ सर्वं जगदिदं त्वत्तस्तिष्ठति ॥ सर्वंजगदिदंत्वयिलयमेष्यति ॥ सर्वंजगदिदंत्वयिप्रत्येति ॥ त्वंभूमिरापोनलोनिलोनभः ॥ त्वंचत्वारिवाक्पदानि ॥ त्वंगुणत्रयातीतः ॥ त्वंदेहत्रयातीतः ॥ त्वंकालत्रयातीतः ॥ त्वंमूलाधारस्थितोसिनित्यं ॥ त्वंशक्तित्रयात्मकः ॥ त्वांयोगिनोध्यायन्तिनित्यं ॥ त्वंब्रह्मात्वंविष्णुस्त्वंरुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वंवायुस्त्वंसूर्यस्त्वंचन्द्रमास्त्वंब्रह्मभूर्भुवः स्वरोम् ॥ गणादीन् पूर्वमुच्चार्य वर्णादींस्तदनन्तरम् ॥ अनुस्वारःपरतरः ॥ अर्धेन्दुलसितम् ॥ तारेणरुद्धम् ॥ एत-

त्तवमनुस्वरूपम् ॥ गकारः पूर्वरूपम् ॥ अकारोमध्यमरूपम् ॥ अनुस्वार-
श्चान्त्यरूपम् ॥ विन्दुरुत्तररूपम् ॥ नादःसन्धानम् ॥ सँहितासन्धिः ॥
सैषागणेशविद्या ॥ गणकऋषिः ॥ निचृद्गायत्रीछन्दः ॥ गणपतिर्देवता ॥
ॐ गंगणपतयेनमः ॥ एकदन्ताय विद्महे वक्रतुण्डाय धीमहि ॥ तन्नो दन्ती
प्रचोदयात् ॥ एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् ॥ रदं च वरदं
हस्तैर्बिभ्राणं मूषकध्वजम् ॥ रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् ॥
रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् ॥ भक्तानुकम्पिनं देवं जगत्कारण-
मच्युतम् ॥ आविर्भूतं च सृष्ट्यादौ प्रकृतेःपुरुषात्परम् ॥ एवं ध्यायति
यो नित्यं स योगी योगिनां वरः ॥ नमोव्रातपतयेनमोगणपतयेनमः
प्रमथपतयेनमस्तेअस्तुलम्बोदरायैकदन्तायविघ्ननाशिनेशिवसुतायश्रीवरद-
मूर्तयेनमः ॥ एतदथर्वशीर्षंयोधीते ॥ सब्रह्मभूयायकल्पते ॥ ससर्वतः
सुखमेधते ॥ ससर्वविघ्नैर्नबाध्यते ॥ सपञ्चमहापापात्प्रमुच्यते ॥ सायम-
धीयानोदिवसकृतंपापंनाशयति ॥ प्रातरधीयानोरात्रिकृतंपापंनाशयति ॥
सायंप्रातःप्रयुञ्जानोअपापोभवति ॥ सर्वत्राधीयानोऽपविघ्नोभवति ॥
धर्मार्थकाममोक्षंचविन्दति ॥ इदमथर्वशीर्षमशिष्यायनदेयम् ॥ योयदि
मोहाद्दास्यति ॥ सपापीयान्भवति ॥ सहस्रावर्तनात् ॥ यंयंकाममधीते ॥
तंतमनेनसाधयेत् ॥ अनेनगणपतिमभिषिञ्चति ॥ सवाग्मीभवति ॥ च-
तुर्थ्यामनश्नन्जपति ॥ सविद्यावान्भवति ॥ इत्यथर्वणवाक्यम् ॥ ब्रह्म-
द्याचरणंविद्यात् ॥ नबिभेतिकदाचनेति ॥ योदूर्वाङ्कुरैर्यजति ॥ स वै-
श्रवणोपमोभवति ॥ योलाजैर्यजति ॥ सयशोवान्भवति ॥ समेधावान्भ-
वति ॥ योमोदकसहस्रेणयजति ॥ सवाञ्छितफलमवाप्नोति ॥ यःसाज्य-
समिद्भिर्यजति ॥ ससर्वंलभतेससर्वंलभते ॥ अष्टौब्राह्मणान्सम्यग्ग्राह-
यित्वा ॥ सूर्यवर्चस्वीभवति ॥ सूर्यग्रहेमहानद्यांप्रतिमासन्निधौवाजप्त्वा ॥
सिद्धमन्त्रोभवति ॥ महाविघ्नात्प्रमुच्यते ॥ महादोषात्प्रमुच्यते ॥
महापापात्प्रमुच्यते ॥ महाप्रत्यवायात्प्रमुच्यते ॥ ससर्वविद्भवतिससर्व-
विद्भवति ॥ यएवंवेद ॥ इत्युपनिषत् ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

॥ इति गणपत्यथर्वशीर्षं समाप्तम् ॥

—:०:—

मन्त्रसूची ।

	पृ०	पं०
अग्न्युत्तारणविधिः	१८	८
अतोदेवा०	६	८
अन्यथाश०	२४	७
अपवित्रः०	२२	११
असुनीते०	१३	१३
अहिरिव०	१४	१७
आगमार्थं०	२२	६
आपोहिष्ठा०	२०	९
आप्यायस्व०	१०	५
आयंगौः पृ०	७	७
आवाहनं०	२४	६
उत्तिष्ठब्र०	१४	१
ऋषभं मा०	२०	६
कनिक्रद०	१०	१५
कलशस्य०	२१	१५
गणपत्यथर्वशीर्षम्	२६	१०
गणानांत्वा	७	३
घृतंमिमिक्षे०	१०	६
चन्द्रादित्यौ०	२४	३
चक्षुर्दस०	२५	१
तच्चक्षुर्दे०	१३	१५
तत्वायामि	१३	८
तदुस्तुमि०	१४	१३
दधिक्राव्णो०	१०	७
देवस्यत्वा०	१०	२
देवस्यत्वा०	२०	१४
ध्यायेन्नित्यं०	२२	१३
नमो अस्तु०	७	६
नमोदेव्यै०	२४	१३
निषुसीद०	७	५
पृथिवित्वया०	२०	१६
मधुवाता०	१०	११
मन्त्रहीनं०	२४	११
महिम्नः पा०	२२	१६
महीद्यौः०	११	१५
यस्यस्मृत्या०	२४	१५
याज्ययाय०	१३	१७
यान्तुदेव०	२५	१६
यानिकानि०	२४	५
याःप्रवतो०	१३	१०
राजाधिरा०	१४	३
लघुन्यासः	२४	२२
वक्रतुण्ड०	२०	१४
विप्रायवे०	२४	१७
विश्वतश्च०	१४	११
शङ्खादौ०	२२	३
शान्ताकारं०	२२	१४
श्रीखण्डंच०	२३	८
श्रियेजातः०	११	११
षडङ्गन्यासः०	२१	६
सहस्रशीर्षा०	७	११
सुरास्त्वाम०	२४	२१
स्वादुः०	१०	१३
हिरण्यवर्णां०	१५	२

॥ श्रीः ॥

॥ श्रीगणेशाय नमः ॥

॥ श्रीसङ्कष्टनाशिन्यै नमः ॥

श्रीलक्ष्मीकेशवौ नत्वा गणेशानं सरस्वतीम् ।
अन्नपूर्णाविश्वनाथौ गङ्गाभैरवषण्मुखान् ॥ १ ॥
ध्यात्वा च सङ्कटां देवीं वीरेश्वरसमन्विताम् ।
तातं विनायकं पूज्यं लक्ष्मीदां मातरं सतीम् ॥ २ ॥
बालशास्त्रिगुरूंश्चापि नत्वा तत्कृपयाऽधुना ।
प्रातिवर्षिकपूजायाःकथायाश्चैव सङ्ग्रहः ॥ ३ ॥
संक्षेपान्नित्यकृत्यस्य विधेश्चापि प्रदर्शनम् ।
तत्तत्पूजादिनस्यापि निर्णयः क्रियते मया ॥ ४ ॥
पौराणिकेत्युपाह्वेन रामचन्द्रेण शर्मणा ।
नानाशास्त्रीतिख्यातेन बालबोधार्थमेव हि ॥ ५ ॥

अस्ति यद्यप्यनेकेषु व्रतराजनिर्णयसिन्ध्वादिप्रभृतिग्रन्थेषु पूजाकथासङ्ग्रहस्तथाप्यल्पबुद्धीनामालस्ययुतानामनेकग्रन्थावलोकनासमर्थानां जनानामुपकाराय रच्यमानोऽयं लघुतरो ग्रन्थः सर्वानानन्दयत्विति बद्धाञ्जलिपुटो नक्तंदिवं परमेश्वरं प्रार्थयते ॥

॥ अथ चैत्रमासः ॥

मध्यदेशेऽमान्त एव मासः सर्वकृत्येषु । माघकार्तिकवैशाखस्नानेषु तु पूर्णान्त एवेति सर्वसिद्धान्तः । तत्र शुक्लप्रतिपद् सूर्योदयव्यापिनी ग्राह्या । दिनद्वये तद्व्याप्तावव्याप्तौ वा पूर्वैव, तस्यां ब्रह्मध्वजपूजनम् । तच्चेत्थं प्रातस्तैलाभ्यङ्गपूर्वकं मङ्गलस्नानं विधाय कृतनित्यक्रियो नूतनवस्त्रालङ्कारभूषितो गृहद्वारप्रदेशे पुष्पमालाभूषितमारक्तवस्त्रनिर्मितं ध्वजमुच्छ्रित्य देशकालौ स्मृत्वा० प्राप्त्यर्थं मम सकुटुम्बस्य सपरिवारस्यायुरारोग्यपुत्रपौत्राद्यैश्वर्याभिवृद्ध्यर्थं संवत्सरारम्भे ब्रह्मध्वजपूजनमहं करिष्ये । ओं ब्रह्मध्वजाय नम इति नाममन्त्रेण षोडशोपचारैः सम्पूज्य प्रार्थयेत् । ब्रह्मध्वज नमस्तेऽस्तु सर्वाभीष्टफलप्रद । प्राप्तेऽस्मिन् वत्सरे नित्यं मद्गृहे मङ्गलं कुरु ॥ इति सम्प्रार्थ्य, अनेन ब्रह्मध्वज० प्रीयताम् । तत आरोग्यावाप्तये निम्बपत्राणि भक्षयित्वा दैवज्ञं सम्पूज्य तन्मुखाद्वत्सरफलपूर्वकं पञ्चाङ्गं श्रुत्वा तं दक्षिणादिभिः परितोष्य विप्रसुहृद्युतो मधुरमन्नं भुञ्जीयादिति । अस्यामेव नवरात्रारम्भः । संवत्सरे सार्धत्रयो मुहूर्ताः । ते च–प्रतिपद्वत्सरादिर्या तृतीयाऽक्षय्यसंज्ञिका । दशमी विजयाख्या च मुहूर्तास्त्रय ईरिताः ॥ प्रतिपत्कार्तिके शुक्ला समुहूर्तोऽर्धसंज्ञकः । स्वयं सिद्धा इमे ज्ञेयाः सर्वकार्यप्रसाधकाः ॥ इति वाराहसंहितायां दर्शनात्सर्वकार्यारम्भोऽत्र शुभप्रदः ॥

चैत्रशुक्लतृतीयायां गौरीपूजनम् । तृतीया च मुहूर्तमात्रापि परा ग्राह्या, गौरीदेवताकत्वात् । मासपर्यन्तमान्दोलनमपि कार्यम् । देशकालौ स्मृत्वा० प्राप्त्यर्थमखण्डितसौभाग्यपुत्रपौत्राद्यभिवृद्ध्यर्थं चैत्रशुक्लतृतीयामारभ्य वैशाखशुक्लतृतीयापर्यन्तं प्रत्यहं गौरीपूजनं दोलोत्सवं च

करिष्ये। तत्राद्यगौर्याः स्थापनपूजनादि करिष्ये। कुङ्कुमागरुलिप्ताङ्गां सर्वाभरणभूषिताम्। नीलकण्ठप्रियां गौरीं वन्देऽहं मङ्गलाभिधाम्॥ श्रीगौर्यै नम इति ध्यानादिषोडशोपचारैः सम्पूज्य प्रार्थयेत्। पुत्रान् देहि धनं देहि सौभाग्यं देहि मङ्गले। अन्यांश्च सर्वकामांश्च देहि देवि नमोऽस्तु ते॥ ततः सुवासिनीं पूजयित्वा तस्यै खाद्यादि वाणकं दद्यादित्याचारः। अनेन मया कृतेन पूज० गौरी प्रीयताम्॥

॥ अथ दमनकसमर्पणविधिः॥

यस्य देवस्य यो भक्तः सोऽर्पयेद्देवतातिथौ। सर्वेषां यदि भक्तश्चेत्सर्वास्वपि समर्पयेत्। समर्पणदिनात्पूर्वेद्युर्दमनकमानीय प्रक्षाल्य वस्त्राच्छादितं देवागारे निधायापरेद्युः कृतनित्यक्रियो देशकालौ सङ्कीर्त्य मया कृतायां संवत्सरावधि अमुकदेवतापूजायां न्यूनातिरेकादिजनितवैगुण्यपरिहारपूर्वकसम्पूर्णपूजाफलप्राप्तिद्वारा श्रीप० अमु० दमनार्पणं करिष्ये। इति सङ्कल्प्य देवं विविधोपचारैः सम्पूज्य सचन्दनं दमनकमादाय देवतानाममन्त्रेण समर्प्य प्रार्थयेत्। जानताऽजानतावापि मत्कृतं यत्तवार्चनम्। तत्सर्वं पूर्णतां यातु त्वत्प्रसादात्सुरेश्वर। ततः पूजावशिष्टं दमनकं गुरुविप्रादिभ्यो दत्वा स्वयं प्रसादबुद्ध्या धृत्वा यथाशक्ति ब्राह्मणान् भोजयेत्॥

अष्टम्यामशोककलिकाप्राशनम्। मम सर्वदाऽशोकत्वप्राप्तिद्वारा श्री०र्थं चैत्रशुक्लाष्टम्यामष्टाशोककलिकाप्राशनं करिष्ये, इति सङ्कल्प्य मन्त्रस्तु–त्वामशोकहराभीष्टं मधुमाससमुद्भवम्। पिबामि शोकसन्तप्तो मामशोकं सदा कुरु॥ इदं काम्यम्।

॥ ४ ॥

॥ अथ वैशाखमासः ॥

तत्रादौ वैशाखस्नानम् । तत्प्रारम्भकालश्चैत्रशुक्लैकादश्यां पौर्णमास्यां मेषसङ्क्रमणे वा । तत्रादौ सङ्कल्पमन्त्रः–वैशाखं सकलं मासं मेषसङ्क्रमणे रवेः । प्रातः सनियमः स्नास्ये प्रीयतां मधुसूदनः ॥ मधुहन्तुः प्रसादेन ब्राह्मणानामनुग्रहात् । निर्विघ्नमस्तु मे पुण्यं वैशाखस्नानमन्वहम् ॥ माधवे मेषगे भानौ मुरारे मधुसूदन । प्रातः स्नानेन मे नाथ फलदो भव पापहम् ॥ अयं मन्त्रः प्रथमदिन एव । देशकालौ स्मृत्वा ममानेकजन्मार्जितसमस्तपापक्षयपूर्वक-श्रीमधुसूदनदेवताप्री० अमुकतीर्थे स्नानमं० । अशक्तं प्रतिदिनत्रयं स्नानम् । तत्र प्रथमदिनेऽयं मन्त्रः-त्रयोदश्यां चतुर्दश्यां वैशाख्यां च दिनत्रयम् । प्रातः सनियमः स्नास्ये प्रीयतां मधुसूदनः ॥

वैशाखशुक्लतृतीयाऽक्षय्यतृतीया । तस्यामुदकुम्भदानविधिः । देशकालौ० धर्मक्षय्यपितृतृप्तिपूर्वकशिवलोकमहीयमानत्वसिद्धि० श्री० ब्राह्मणाय उदकुम्भदानं करिष्ये । कुम्भं विप्रं च सम्पूज्य, एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः । अस्य प्रदानात्तृप्यन्तु पितरोऽपि पितामहाः॥ गन्धोदकतिलैर्मिश्रं सान्नं कुम्भं फलान्वितम् । पितृभ्यः सम्प्रदास्यामि ह्यक्षय्यमुपतिष्ठतु ॥ इतिमन्त्राभ्यां दत्वा अनेन उद० पितरः प्रीयन्ताम् ॥

॥ अथ ज्येष्ठमासः ॥

ज्येष्ठशुक्लदशमी दशहरा । तत्र दशयोगा उक्ताः-ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः । गरानन्दे व्यतीपाते कन्याचन्द्रे वृषे रवौ । दशयोगे नरः स्नात्वा स-

र्वपापैः प्रमुच्यते ॥ ज्येष्ठे मलमासे सति तत्रैव दशहरा-
॥ ५ ॥ कार्या, नतु शुद्धे इति सकलसिद्धान्तः। शुद्धेऽपि कर्तव्य-
मिति केचित्। अत्र गङ्गास्नानपूजनादि अवश्यं कार्यम्।
गङ्गाया अलाभे नद्यन्तरेऽपि गङ्गां ध्यात्वा स्नानपू-
जादि कार्यम्। देश० ममानेकजन्मार्जितदशविधपापक्षय-
पूर्वकविष्णु० प्राप्त्यर्थं अमु० नद्यां स्नानं पूजनं च करिष्ये।
ओंनमः शिवायै नारायण्यै दशहरायै गङ्गायै नमो नम
इति मन्त्रेण पूजनं कार्यम्। दशपापान्युक्तानि-अदत्ताना-
मुपादानं हिंसा चैवाविधानतः। परदारोपसेवा च कायिकं
त्रिविधं स्मृतम्॥ पारुष्यमनृतं चैव पैशून्यं चापि स-
र्वशः। असम्बद्धप्रलापश्च वाङ्मयं स्याचतुर्विधम्। परद्रव्ये-
ष्वभिध्यानं मनसानिष्टचिन्तनम्। वितथाभिनिवेशश्च
मानसं त्रिविधं स्मृतम्। एतानि दशपापानि हर त्वं मम
सर्वदा॥

ज्येष्ठशुक्लैकादशी निर्जला। तस्यां निर्जलमुपोषणं कृत्वा शर्करायुक्तं जलकुम्भदानं विहितम्। तद्यथा-देश० प्राप्त्यर्थं निर्जलैकादशीनिमित्तं श्रीमहाविष्णुप्री० शर्करायुक्तजलकुम्भदानं करिष्ये। तदङ्गं कुम्भपू० ब्राह्मणपू० करि०। कुम्भदेवताभ्यो नम इति गन्धा० पूज०। ब्राह्मणं सम्पू०, महाविष्णुस्वरू० ब्राह्मणाय इदमासनं० इत्यादि। स्वस्त्यस्तु०। दानमन्त्रः-देव देव हृषीकेश संसारार्णवतारक। उदकुम्भप्रदानेन यास्यामि परमां गतिम्॥ इमं शर्करायुक्तमुदकुम्भममुकश०सम्प्रददे। दान०दक्षिणां० प्रति० प्र०। अनेन० महाविष्णुः प्रीयताम्॥

ज्येष्ठशुक्लपूर्णिमायां वटसावित्रीव्रतम्। दाक्षिणात्यास्त्वस्यामेव कुर्वन्ति, पाश्चात्यास्त्वमावास्यायाम्। अत्र

व्रते त्रयोदश्यादिदिनत्रयमुपवासः। अत्र पूर्णिमानिर्णयानुसारेण यथा त्रिरात्रं भवेत् तथा त्रयोदश्यादिदिनत्रयं ग्राह्यम्। पूर्णिमा तु सूर्यास्तमयात्पूर्वं त्रिमुहूर्ताधिकव्यापिनी चतुर्दशीविद्धा ग्राह्या। त्रिमुहूर्तन्यूनत्वे परैव। यत्तु अशक्तौ केवलं पूर्णिमायामेव पूजनमुपवासं च सर्वत्र स्त्रियः कुर्वन्त्याचारात्। तत्तु परपूर्णिमायामेव कर्तव्यम्।

॥ अथ त्रिरात्रव्रतसङ्कल्पः ॥

वटसमीपे गत्वा आचम्य तिथ्यादिसङ्कीर्त्य मम भर्तुः पुत्राणां चायुरारोग्यप्राप्तये जन्मजन्मन्यवैधव्यप्राप्तये च सावित्रीव्रतमहं करिष्ये। नियममन्त्रः–त्रिरात्रं लङ्घयित्वा तु चतुर्थे दिवसे त्वहम्। चन्द्रायार्घ्यं प्रदत्वा च पूजयित्वा कृतां सतीम्॥ मिष्टान्नानि यथाशक्त्या भोजयित्वा द्विजोत्तमान्। भोक्ष्येऽहं तु जगद्धात्रि निर्विघ्नं कुरु मे शुभे॥ ततः कलशस्थापनम्। गृहे लिखितवटसमीपे भूमिं गोमयेनोपलिप्य रङ्गवल्यादिभिरलङ्कृत्य मही द्यौरित्यादिकलशं संस्थाप्य तदुपरि वंशपात्रं निधाय तत्समीपे सप्तधान्यानि पृथक् पृथक् स्थापयित्वा तदुपरि वस्त्रं निधाय तस्योपरि ब्रह्मणा सहितां हैमीं सावित्रीप्रतिमां साङ्गां सपरिवारां स्थापयेत्। अथ पूजाविधिः। आचम्य, वटसिञ्चामि ते मूलं सलिलैरमृतोपमैः। सुखिनं कुरु मां नाथ पतिपुत्रसमन्विताम्॥ सूत्रेण वेष्टयेद्भक्त्या गन्धपुष्पाक्षतैः शुभैः। मम सन्तानवृद्धिं च कुरु त्वं वटनायक॥ इति सूत्रेण वटं वेष्टयेत्। ततः देशकालौ स्मृत्वा ममेहजन्मनि जन्मान्तरे च भर्तुः पुत्राणामायुरारोग्यधनसम्पदादिप्राप्तये अवैधव्यप्राप्तये च सावित्रीव्रतप्रधानत्वेन विहितं ब्रह्मणा

सह सावित्रीसत्यवद्यमनारदपूजनमहं करि० । आदौ निर्विघ्नता० गणपति० कलशपूजनादि विधाय अपवित्रः० इति पूजासम्भारान् प्रोक्ष्य । अथ ध्यानम् । पद्मपत्रसमासीनं ब्रह्माणं च चतुर्मुखम् । उपवीतधरं देवं साक्षसूत्रकमण्डलुम् ॥ वामोत्सङ्गगता तस्य सावित्री ब्रह्मणः प्रिया। आदित्यवर्णां धर्मज्ञां साक्षमालाकरां तथा ॥ धर्मराजं पितृपतिं भूतानां कर्मसाक्षिणम् । कालदण्डधरं देवं महिषारूढमेव च ॥ चिन्तयामि च देवेशं सर्वप्राणिहिताय वै । वीणां दधानं देवर्षिं नारदं चिन्तयाम्यहम् ॥ ध्यानं० । ब्रह्मणा सहितां देवीं सावित्रीं लोकमातरम् । नारदं सत्यवन्तं च यमं चावाहयाम्यहम् ॥ आवाहनं० । ब्रह्मणा सह सावित्रि सत्यवत्सहिते प्रिये । हेमासनं गृह्यतां मे धमराज सुरेश्वर ॥ आसनं० । गङ्गाजलं समानीतं पाद्यार्थं ब्रह्मणः प्रिये । भक्त्या दत्तं धर्मराज सावित्रि प्रतिगृह्यताम् ॥ पाद्यं० । भक्त्या समाहृतं तोयं फलपुष्पसमन्वितम् । अर्घ्यं गृहाण सावित्रि मम सत्यव्रतप्रिये ॥ अर्घ्यं० । सुगन्धिसहकर्पूरसुरभिस्वादुशीतलम् । पत्या सह त्वं सावित्रि कुरुष्वाचमनीयकम् ॥ आचमनीयं० । पयो दधि घृतं चैव शर्करा मधुसंयुतम् । पञ्चामृतं मयाऽऽनीतं स्वीकुरुष्व वरानने ॥ पञ्चामृतस्नानं० । अभ्यङ्गार्थं मयाऽऽनीतं तैलं पुष्पादिवासितम् । प्रयत्नेनार्चितं शुद्धं स्नानार्थं प्र० ॥ अभ्यङ्गस्नानं० । अङ्गोद्वर्तनकं देव कस्तूर्या कुङ्कुमेन च । अन्यैः सुगन्धद्रव्यैश्च निर्मितं प्रतिगृ० ॥ अङ्गोद्वर्तनं स० । नानातीर्थादाहृतं च तोयमुष्णं मया कृतम् । स्नानार्थं च प्रयच्छामि गृह्यतां परमेश्वरि ॥ उष्णोदकस्नानं स० । मन्दाकिन्याः समानीतमुदकं सत्यवत्प्रिये । सावित्रि धर्मराज

त्वं स्नानार्थं प्रतिगृह्यताम् ॥ स्नानं० ॥ स्नानानन्तरेण आचमनीयं० । पञ्चोपचारपूजां कृत्वा अभिषेकं कुर्यात् । सुरास्त्वा०❋ सूक्ष्मतन्तुमयं वस्त्रं युग्मं कार्पाससम्भवम् । सावित्रि सत्यवत्कान्ते धर्मराज सुरेश्वर ॥ सावित्रि ब्रह्मणा सार्द्धमुपवीतं प्रगृह्यताम् ॥ यज्ञोपवीतं० ॥ भूषणानि च दिव्यानि मुक्ताहारयुतानि च । त्वदर्थमुपक्लृप्तानि गृहाण शुभलोचने ॥ भूषणानि स० ॥ हरिद्रारञ्जिते देवि हरिद्रां सर्वकामदाम् । सावित्रि ते मया दत्तां त्वं गृहाण शुचिस्मिते ॥ हरिद्रां स० ॥ कुङ्कुमेनार्चिते देवि सर्वान्कामान्प्रयच्छ मे । अतस्त्वामर्चयिष्यामि कुङ्कुमेन सुमध्यमे ॥ कुङ्कुमं स० ॥ अञ्जनेनाञ्जिता देवी चक्षुषोः प्रतिवासरम् । कज्जलं ते मया दत्तं चक्षुर्भ्यां प्रतिगृह्यताम् ॥ कज्जलं स० ॥ कुङ्कुमागरुकर्पूरकस्तूरीरोचनायुतम् । चन्दनं ते मया दत्तं सावित्रि प्रतिगृ० ॥ चन्दनं स० ॥ अक्षताश्च सुरश्रेष्ठाः कुङ्कुमाक्ताः सुशोभनाः । मया निवेदिता भक्त्या गृहाण परमेश्वरि ॥ अक्षतान् स० ॥ नानापरिमलद्रव्यं चूर्णीकृत्य समर्पितम् । भक्त्या देवि मया दत्तं सावित्रि प्र० ॥ नानापरिमलद्रव्यं स० ॥ माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो । मयाऽऽहृतानि पूजार्थं पुष्पाणि प्रतिगृ० ॥ पुष्पाणि० ॥

॥ अथाङ्गपूजा ॥

१ सावित्र्यै नमः पादौ पूजयामि	२ प्रसावित्र्यै नमः जङ्घे पूजयामि ॥
३ कमलपत्राक्ष्यै० कटी पूज०	४ भूतधारिण्यै० उदरं पूज० ॥
५ गायत्र्यै० कण्ठं पू०	६ ब्रह्मणः प्रियायै० मुखं पूज० ॥
७ सौभाग्यदात्र्यै० शिरः पूज०	॥ ब्रह्मसत्यवतोः पूजा ॥

❋ इत्यादि मङ्गलागौरीपूजायां लिखितं द्रष्टव्यम् ।

॥ ६ ॥

८ धात्रे नमः पादौ पूजया०	९ विधात्रे नमः जङ्घे पूज० ॥
१० त्वष्ट्रे नमः ऊरू पूजया०	११ प्रजापतये न० मेढ्रं पूज० ॥
१२ परमेष्ठिने० कटी पूजया०	१३ अग्निरूपाय० नाभिं पूज० ॥
१४ पद्मनाभाय० हृदयं पूज०	१५ वेधसे नमः बाहू पूज० ॥
१६ विधये नमः कण्ठं पूज०	१७ हिरण्यगर्भा० मुखं पूज० ॥
१८ ब्रह्मणे नमः शिरःपूज०	१९ विष्णवे न० सर्वाङ्गं पूज० ॥

देवद्रुमरसोद्भूतः कालागरुसमन्वितः ॥ आघ्रेयतामयं धूपः सावित्रि प्रतिगृ० ॥ धूपं० ॥ चक्षुर्दं सर्वलोकानां तिमिरस्य निवारणम् । आर्तिक्यं कल्पितं भक्त्या गृहाण परमेश्वरि ॥ दीपं दर्श० ॥ अन्नं चतुर्विधं स्वादु रसैःषड्भिः समन्वितम् ॥ दुग्धदध्याज्यसंयुक्तं नैवेद्यं प्र० ॥ नैवेद्यं० ॥ आचमनं० ॥ करोद्वर्तनं० ॥ इदं फलं मया देव स्थापितं पुरतस्तव ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ फलं स० ॥ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ॥ कर्पूरैलासमायुक्तं ताम्बूलं प्र० ॥ ताम्बूलं० ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ दक्षिणां० ॥ चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च ॥ त्वमेव सर्वज्योतींषि आर्तिक्यं प्र० ॥ आर्तिक्यदीपं० ॥ कर्पूरदीपं० ॥ यानि कानि च पापानि जन्मान्तरकृतानि च । तानि तानि विनश्यन्ति प्रदक्षिणपदे पदे ॥ प्रदक्षिणां० । सावित्रि च प्रसावित्रि सततं ब्रह्मणः प्रिये ॥ पूजितासि द्विजैःसर्वैः स्त्रीभिर्मुनिगणैस्तथा ॥ नमस्कारान् स० त्रिसन्ध्यं देवि भूतानां वन्दनीयासि सुव्रते ॥ मया दत्ता च पूजेयं त्वं गृहाण नमोऽस्तु ते ॥ मन्त्रपुष्पाञ्जलिं० । ततः फलहिरण्योदकगन्धपुष्पसहितमर्घ्यत्रयं दद्यात् । ओंकारपूर्वके देवि सर्वदुःखनिवारिणि । देवि मातर्नमस्तुभ्यमवैधव्यं प्रयच्छ मे ॥ पतिव्रते महाभागे वह्निजाते

शुचिस्मिते । दृढव्रते दृढमते भर्तुश्च प्रियवादिनि ॥
॥ १० ॥ अवैधव्यं च सौभाग्यं देहि त्वं मम सुव्रते ॥ पुत्रान्
पौत्रांश्च सौख्यं च गृहाणार्घ्यं नमोऽस्तु ते ॥ ब्रह्मणा
सह सावित्र्यै नमः इदमर्घ्यं स० ॥ त्वं कर्मसाक्षी लोकानां
शुभाशुभविवेककृत् । वैवस्वत गृहाणार्घ्यं धर्मराज
नमोऽस्तु ते ॥ यमाय नमः इदमर्घ्यं स० ॥ नारायण नमस्तुभ्यं वीणावादनतत्पर । देवर्षे त्वं महाभाग ह्यर्घोऽयं
प्रतिगृ० ॥ नारदाय नमः इदमर्घ्यं स० ॥ प्रार्थना, त्वं गौरी
त्वं शची लक्ष्मीस्त्वं प्रभा चन्द्रमण्डले । त्वमेव च जगन्माता मामुद्धर वरानने ॥ सौभाग्यं कुलवृद्धिं च देहि
त्वं मम सुव्रते । दुष्कृतं भस्मवत्सर्वमवैधव्यं प्रयच्छ मे ॥
अवियोगो यथा देव सावित्र्या सहितस्य ते । अवियोगस्तथास्माकं भूयाज्जन्मनि जन्मनि ॥ यमप्रार्थना, कर्मसाक्षी
जगत्पूज्यः सर्ववन्द्य प्रसीद मे । दिनत्रयव्रतं सर्वं परिपूर्णं
तदस्तु मे ॥ नारदप्रार्थना, कलिप्रिय नमस्तेऽस्तु ब्रह्मपुत्र
प्रसीद मे । तव प्रसादाद्देवर्षे व्रतं सम्पूर्णमस्तु मे ॥ यस्य
स्मृत्या च नामोक्त्या तपःपूजाक्रियादिषु । न्यूनं सम्पूर्णतां
याति सद्यो वन्दे तमच्युतम् ॥ अनेन पूजनेन श्रीब्रह्मणा
सह सावित्रीदेवता प्रीयताम् ॥ अद्य० त्त्यर्थं पूजासाङ्गतासिध्यर्थं ब्राह्मणपूजनं वायनदानं च करिष्ये । गन्धाः
पान्तु० । स्वस्त्यस्तुदी० । फलवस्त्रसमायुक्तं सौभाग्यद्रव्यसंयुतम् । वंशपात्रे निधायादौ ब्राह्मणाय निवेदयेत् ॥
उपायनमिदं तुभ्यं व्रतसम्पूर्णहेतवे । वायनं द्विजवर्याय
सहिरण्यं ददाम्यहम् ॥ इदं सौभाग्यवायनं दक्षिणाताम्बूलवस्त्रधान्यसहितम् अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । प्रति० प्र० । दान० दक्षिणां० । त्रिरात्रपूजने रात्रौ प्रतिपदि

अरुन्धतीसहितचन्द्रायार्घ्यदानविधिः ॥ आचम्य, अद्य० थं त्रिरात्रव्रताङ्गभूतं अरुन्धतीसहितशशिदेवताप्रीत्यर्थं अर्घ्यदानं तदङ्गत्वेन पञ्चोपचारपूजनं च करिष्ये । अरुन्धतीसहितशशिदेवताभ्यो नम इति मन्त्रेण पञ्चोपचारपूजां कृत्वा फलपुष्पगन्धहिरण्ययुतमर्घ्यं दद्यात् । अरुन्धति नमस्तेऽस्तु वसिष्ठस्य प्रिये शुभे । सर्वदेवनमस्कार्ये पतिव्रतपरायणे ॥ अर्घ्यमेतन्मयादत्तं फलपुष्पसमन्वितम् । पुत्रान्देहि सुखं देहि गृहाणार्घ्यं नमोऽस्तु मे ॥ अरुन्धत्यै नमः इदमर्घ्यं स० ॥ क्षीरोदार्णवसम्भूत अत्रिगोत्रसमुद्भव । गृहाणार्घ्यं मया दत्तं रोहिण्या सहित: शशिन् ॥ चन्द्रमसे नमः इदमर्घ्यं समर्पयामि । अनेन अर्घ्यदानेन अरुन्धतीसहितशशिदेवता प्रीयताम् । स्थापितदेवतानां उत्तरपूजनं पीठदानं च करिष्ये । तदङ्गत्वेन ब्राह्मणपूजनं करिष्ये । पञ्चोपचारैः उत्तरपूजां कृत्वा ब्राह्मणं सम्पूज्य देवतां विसृज्य, यान्तुदेव० । प्रतिमासहितं पीठदानं कुर्यात् । दानमन्त्रः, सावित्री जगतां माता सावित्री जगतःपिता । मया दत्ता च सावित्री ब्रह्मणा सह गृह्यताम् ॥ इदं पीठं सदक्षिणाकं सताम्बूलम् अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्र० । प्र० दानसाङ्गतासिध्यर्थं इमां दक्षिणां तुभ्यमहं सम्प्रददे । प्रतिग्रहीतृमन्त्रः—मया गृहीता सावित्री त्वया दत्ता सुशोभने । यावच्चन्द्रश्च सूर्यश्च सह भर्त्रा सुखो भव ॥ कृतस्य कर्मणः साङ्गतासिध्यर्थं यथाशक्ति दम्पती भोजयिष्ये ॥ यस्य स्मृत्या च० ॥ अनेन त्रिरात्रव्रताख्येन कर्मणा श्रीब्रह्मणा सह सावित्रीदेवता प्रीयताम् ॥

॥ अथ सावित्रीकथाप्रारम्भः ॥

सनत्कुमार उवाच । कुलस्त्रीणां व्रतं देव महाभाग्यं तथैव च । अवैधव्यकरं स्त्रीणां पुत्रपौत्रप्रदायकम् ॥ ईश्वर उवाच । आसीन्मद्रेषु धर्मात्मा ज्ञानी परमधार्मिकः । नाम्ना चाश्वपतिर्वीरो वेदवेदाङ्गपारगः ॥ अनपत्यो महाबाहुः सर्वैश्वर्यसमन्वितः । सपत्नीकस्तपस्तेपे समाराधयते नृपः ॥ सावित्रीं च प्रसावित्रीं जपन्नास्ते महामनाः । जुहोति चैव सावित्रीं भक्त्या परमया युतः ॥ ततस्तुष्टा तु सावित्री सा देवी द्विजसत्तम । सा विग्रहवती देवी तस्य दर्शनमागता ॥ भूर्भुवःस्वरिवेत्येषा साक्षसूत्रकमण्डलुः । तां तु दृष्ट्वा जगद्वन्द्यां सावित्रीं च नृपोत्तमः ॥ प्रणिपत्य नृपो भक्त्या प्रहृष्टेनान्तरात्मना । तं दृष्ट्वा पतितं भूमौ तुष्टा देवी जगाद ह ॥ सावित्र्युवाच । तुष्टाऽहं तव राजेन्द्र वरं वरय सुव्रत । एवमुक्तस्तया राजा प्रसन्नान्तामुवाच ह ॥ अनपत्यो ह्यहं देवि पुत्रमिच्छामि शोभने । नान्यं वृणोमि सावित्रि पुत्रमेव जगन्मये ॥ अन्यदस्ति समग्रं मे क्षितौ यच्चापि दुर्लभम् । प्रसादात्तव देवेशि तत्सर्वं विद्यते गृहे ॥ एवमुक्ता तु सा देवी प्रत्युवाच नराधिपम् ॥ सावित्र्युवा० । पुत्रस्ते नास्ति राजेन्द्र कन्यका ते भविष्यति । कुलद्वयं तु सा राजन्नुद्धरिष्यति भामिनी ॥ मन्नाम्ना राजशार्दूल तस्या नाम भविष्यति । इत्युक्त्वा तं मुनिश्रेष्ठ राजानं ब्रह्मणःप्रिया ॥ अन्तर्धानं गता देवी सन्तुष्टोऽसौ महीपतिः । ततःकतिपयाहोभिस्तस्य राज्ञी महीभुजः ॥ ससत्वा समजायेत पूर्णे काले सुखावहे । सावित्र्या तुष्टया दत्ता सावित्र्या जप्तया तथा ॥

सावित्री तेन वरदा तस्या नाम बभूव ह । राजते देव-
गर्भाभा कन्या कमललोचना ॥ तां दृष्ट्वा हेमगर्भाभां
राजा चिन्तामुपेयिवान् । अयाच्यमानां च वरै रूपेणाप्र-
तिमा भुवि ॥ तस्या रूपेण ते सर्वे सन्निरुद्धा महीभुजः ।
ततः स राजा चाहूय उवाच कमलेक्षणाम् ॥ पुत्रि प्रदानका-
लस्ते न च याचन्ति केचन । स्वयं वरय हृद्यन्ते पतिं
गुणसमन्वितम् ॥ मनःप्रल्हादकरणं शीलेनाभिजनेन च ।
इत्युक्त्वा तां च राजेन्द्रो वृद्धामात्यैः सहैव तु ॥ वस्त्रा-
लङ्कारसहितां धनरत्नैः समन्विताम् । विसृज्य च क्षणं
तत्र यावत्तिष्ठति भूमिपः ॥ तावत्तत्र समागच्छन्नारदो
भगवान् ऋषिः । सम्पूज्य च ततो राजा अर्घ्यपाद्येन तं
मुनिम् ॥ आसने च सुखासीनः पूजितस्तेन भूभुजा ।
पूजयित्वा मुनिं राजा प्रोवाचेदं द्विजोत्तमम् ॥ पावितोऽहं
त्वया विप्र दर्शनेनाद्य नारद । यावदेवं वदेद्राजा तावत्सा
कमलेक्षणा ॥ आश्रमादागता देवी वृद्धामात्यैः सम-
न्विता । अभिवाद्य पितुः पादौ ववन्दे सा मुनिं ततः ॥
नारदेन तु तुष्टां तां दृष्ट्वा प्रोवाच भूमिपम् । कन्यां च
देवगर्भाभां किमर्थं न प्रयच्छसि ॥ वराय त्वं महाबाहो
वरयोग्यां हि सुन्दरीम् । एवमुक्तस्तदा तेन मुनिना नृप-
सत्तमः ॥ उवाच तं मुनिं वाक्यमनेनार्थेन प्रेषिता । आग-
तेयं विशालाक्षी मया सम्प्रेषिता सती ॥ अनया च वृतो
भर्ता पृच्छ त्वं मुनिसत्तम । सा पृष्टा तेन मुनिना तस्मै
चाचष्ट भामिनी ॥ सावित्र्यु० । द्युमत्सेनस्य राज्यं वै वैरिणा
रुक्मिणा हृतम् । दैवादन्धः स्त्रीसहितः सत्यवान् तत्सुतो
वने ॥ आश्रमे सत्यवान्नाम द्युमत्सेनसुतो मुने । भर्तेति
मनसा विप्र वृतोऽसौ राजनन्दनः ॥ नारद उवा० । कष्टं कृतं

॥ १४ ॥

महाराज दुहित्रा तव सुव्रत। अजानन्त्या वृतो भर्त्ता गुणवानिति विश्रुतः॥ सत्यं वदत्यस्य पिता सत्यं माता प्रभाषते। स्वयं सत्यं प्रभाषेत सत्यवानिति तेन सः॥ तथा चाश्वाः प्रियास्तस्य अश्वैः क्रीडति मृन्मयैः। चित्रेऽपि विलिखत्यश्वान् चित्राश्वस्तेन चोच्यते॥ रूपवान् गुणवांश्चैव सर्वशास्त्रविशारदः। न तस्य सदृशो लोके विद्यते चेह मानवः॥ सर्वैर्गुणैश्च सम्पन्नो रत्नैरिव महार्णवः। एको दोषो महानस्य गुणानावृत्य तिष्ठति॥ संवत्सरेण क्षीणायुर्देहत्यागं करिष्यति॥ अश्वपतिरु०। अन्यं वरय भद्रं ते वरं सावित्रि गम्यताम्। विवाहस्य तु कालोऽयं वर्तते शुभलोचने॥ सावित्र्युवा०। नान्यमिच्छाम्यहं तात मनसापि वरं प्रभो। यो मया च वृतो भर्त्ता समेनान्यो भविष्यति॥ विचिन्त्य मनसा पूर्वं वाचा पश्चात्समुच्चरेत्। क्रियते च ततः पश्चाच्छुभं वा यदि वा शुभम्॥ तस्मात्पुमांसं मनसा कथं चान्यं वृणोम्यहम्। सकृज्जल्पन्ति राजानः सकृज्जल्पन्ति पण्डिताः॥ सकृत्कन्याः प्रदीयन्ते त्रीण्येतानि सकृत्सकृत्। पतिं मत्वा न मे बुद्धिर्विचलेच्च कथञ्चन॥ सगुणो निर्गुणो वापि मूर्खः पण्डित एव च। दीर्घायुरथवाल्पायुः स वै भर्ता मम प्रभो॥ नान्यं वृणोमि भर्तारं यदि वा स्याच्छचीपतिः। इति मत्वा त्वया तात यत्कर्तव्यं सुखेन च॥ नारद उवा०। स्थिरा बुद्धिश्च राजेन्द्र सावित्र्याः सत्यवान्प्रति। त्वरयस्व विवाहाय भर्त्रा सह कुरु त्विमाम्॥ ईश्वर उ०। निश्चितां तु मुनिर्ज्ञात्वा स्थिरा बुद्धिश्च निश्चला। सावित्र्याश्च महाराजा प्रतस्थेऽसौ वनं प्रति॥ गृहीत्वा तु धनं राजा द्युमत्सेनस्य सन्निधौ। स्वल्पानुगो महाराजो वृद्धामात्यैः समन्वितः॥ नारदस्तु ततः

खे वै तत्रैवान्तरधीयत । स गत्वा राजशार्दूलो द्युमत्से-
॥ १५ ॥ नेन सङ्गतः॥ वृद्धश्चान्धश्च राजाऽसौ वृक्षमूलमुपाश्रितः।
नत्वाऽश्वपतिराजाऽसौ पादौ जग्राह वीर्यवान् ॥ स्वनाम
च समुच्चार्य तस्थौ तस्य समीपतः। उवाच राजा तं भूपं
किमागमनकारणम् ॥ पूजयित्वाऽर्घ्यदानेन वन्यमूलफलैश्च
सः । ततः पप्रच्छ कुशलं तं राजा मुनिसत्तम ॥ अश्वपति० ।
कुशलं दर्शनेनाद्य तव राजन्ममाद्य वै । दुहिता मम सावि-
त्री तव पुत्रमभीप्सति ॥ भर्तारं राजशार्दूलमाप्नोत्वि-
यमनिन्दिता । ममेदं काङ्क्षितं पूर्वं भर्तारमनया विभो ॥
आवयोश्चैव सम्बन्धो भवत्वद्य ममेप्सितः ॥ द्युमत्सेन उ-
वा० । वृद्धश्चान्धश्च राजेन्द्र फलमूलाशनो नृप । राज्या-
च्च्युतश्च मे पुत्रो वन्येनाद्य च जीवति ॥ सा कथं सहते
दुःखं दुहिता तव कानने । अनभिज्ञा च दुःखानामित्यहं
नाभिकाङ्क्षये ॥ अश्वपतिरुवा० । अनया च वृतो भर्ता
जानन्त्या राजसत्तम । अनेन सह वासस्ते तव पुत्रेण मा-
नद ॥ स्वर्गतुल्यो महाराज भविष्यति न संशयः । एव-
मुक्तस्तदा तेन राजा राजर्षिसत्तमः ॥ तथेति स प्रतिज्ञाय
चकारोद्वाहमुत्तमम् । कृत्वा विवाहं राजेन्द्रं सम्पूज्य विवि-
धैर्धनैः ॥ अभिवाद्य द्युमत्सेनं जगाम नगरं प्रति । सा-
वित्री तु पतिं लब्ध्वा इन्द्रं प्राप्य शची यथा ॥ सत्यवानपि
ब्रह्मर्षिस्तया पत्न्याभिनन्दितः। क्रीडते तद्वनोद्देशे पौलोम्या
मघवा इव ॥ नारदस्य च तद्वाक्यं हृदये तु मनस्विनी ॥
वहन्ती नियमं चक्रे व्रतस्यास्य च भामिनी । गणयन्ती दिना-
न्येव न लेभे हर्षमुत्तमम्॥ ज्ञात्वा तद्दिवसं विप्र भर्तुर्मरणका-
रणम्। व्रतं त्रिरात्रमुद्दिश्य दिवारात्रौ स्थिराऽभवत् ॥ तत-
स्त्रिरात्रं निर्वर्त्य सन्तर्प्य पितृदेवताः। अस्यान्ते नियमं कृत्वा

त्रिदिनस्थमनस्विनी ॥ अस्मिन्दिने च मर्तव्यमिति सत्यवता मुने। कुठारं संपरिगृह्य पिटकं चैव दारुकम् । प्रस्थितं च वनायैव सावित्रीवाक्यमब्रवीत् ॥ न गन्तव्यं वनं त्वद्य मम वाक्येन मानद । अथवा गम्यते साधो मया सह वनं व्रज ॥ संवत्सरं भवेत्पूर्णमाश्रमेऽस्मिन्मम प्रभो । तद्वनं द्रष्टुमिच्छामि प्रसादं कुरु मे प्रभो ॥ सत्यवा० । नाहं स्वतन्त्रः सुश्रोणि पृच्छस्व पितरौ मम । ताभ्यां प्रस्थापिता गच्छ मया सह शुचिस्मिते ॥ एवमुक्ता तदा तेन भर्त्रा सा कमलेक्षणा । श्वश्रूश्वशुरयोः पादावभिवाद्येदमब्रवीत् ॥ वनं द्रष्टुं गमिष्यामि आज्ञा मह्यं प्रदीयताम् । उवाच वचनं साध्वी वरमेकं प्रयच्छ मे ॥ भर्त्रा सह वनं गन्तुमेतत्त्वरयते मनः । तस्यास्तद्वचनं श्रुत्वा द्युमत्सेनोऽब्रवीदिदम् ॥ व्रतं कृतं त्वया भद्रे पारणां कुरु सुव्रते । पारणान्ते ततो भीरु वनं गन्तुं त्वमर्हसि ॥ सावित्र्युवा० ॥ नियमश्च कृतोऽस्माभी रात्रौ चन्द्रोदये सति । जाते मया प्रकर्तव्यं भोजनं तात मे शृणु ॥ वनदर्शनकामोऽस्ति भर्त्रा सह ममाद्य वै । न मे तत्र भवेद्ग्लानिर्भर्त्रा सह नराधिप ॥ इत्युक्तस्तु तया राजा द्युमत्सेनो महीपतिः । यत्तेऽभिलषितं पुत्रि तत्कुरुष्व सुमध्यमे ॥ नमस्कृत्वा तु सावित्री श्वश्रूं च श्वशुरं तथा । सहिता राजशार्दूल तेन सत्यवता विभो ॥ विलोकयन्ती भर्तारं प्राप्तकालं मनस्विनी । वनं च फलितं दृष्ट्वा पुष्पितं द्रुमसङ्कुलम् ॥ द्रुमाणां चैव नामानि मृगाणां चैव भामिनी । पश्यन्ती मृगयूथानि हृदयेन प्रवेपती ॥ तत्र गत्वा सत्यवान्वै फलान्यादाय सत्वरम् । काष्ठानि च समादाय बबन्ध भारकं तदा ॥ काष्ठभारं क्षणात्कृत्वा वटशाखावलम्बि-

नम् । वटवृक्षस्य सा साध्वी उपविष्टा महासती ॥ काष्ठा-
॥ १७ ॥ न्यावृणुतस्तस्य जाता शिरसि वेदना । ग्लानिश्च महती
जाता गात्राणां वेपथुस्तदा ॥ आगत्य वृक्षसामीप्यं
सावित्रीमिदमब्रवीत् । मम गात्रेतिकम्पश्च जाता शिरसि
वेदना । कण्टकैर्भिद्यते भद्रे शिरो मे शूलसम्मितैः ॥
उत्सङ्गे तव सुश्रोणि स्वप्तुमिच्छामि सुव्रते । अभिज्ञा सा
विशालाक्षी तस्य मृत्योर्मनस्विनी ॥ प्राप्तकालं मन्यमाना
तस्य तत्रैव भामिनी ॥ सत्यवानपि सुप्तस्तु कृत्वोत्सङ्गे
शिरस्तदा । तावत्तत्र समागच्छत्पुरुषः कृष्णपिङ्गलः । जा-
ज्वल्यमानो वपुषा ददर्शाऽथ मनस्विनी ॥ उवाच वाक्यं
वाक्यज्ञा कस्त्वं लोकभयङ्करः । नाहं धर्षयितुं शक्या पुरु-
षेणापि केनचित् ॥ इत्युक्तः प्रत्युवाचेदं यमो लोकभय-
ङ्करः ॥ यम उवाच ॥ क्षीणायुस्तु वरारोहे भर्ता तव मन-
स्विनि । नेष्याम्येनमहं बध्वा ह्येतन्मे च चिकीर्षितम् ॥
इत्युक्त्वा पितृराजस्तां भगवान् सञ्चिकीर्षितम् । यथाव-
त्सर्वमाख्यातुं सत्क्रियार्थं प्रचक्रमे ॥ अयं हि धर्मसंयुक्तो
रूपवान् गुणसागरः । नार्हो मत्पुरुषैर्नेतुमतोऽस्मि स्वय-
मागतः ॥ ततः सत्यवतः कायात्पाशबद्धं च सत्वरम् ।
अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात् ॥ ततः समुद्धृतप्राणं
गतश्वासं हतप्रभम् । निर्विचेष्टं शरीरं तद्बभूवाप्रियद-
र्शनम् ॥ यमस्तु तं तथा बध्वा प्रययौ दक्षिणामुखः । सा-
वित्री चापि दुःखार्ता यममेवान्वगच्छत ॥ नियमव्रतस-
म्पन्ना महाभागा पतिव्रता ॥ यम उवा० । निवर्त्य गच्छ
३ सावित्रि कुरुष्वास्यौर्ध्वदेहिकम् । कृतं भर्तुस्त्वयाऽऽनृण्यं
यावद्गम्यगतं त्वया ॥ सावित्र्युवा० । यत्र मे नीयते भर्ता
स्वयं वा यत्र गच्छति । मयापि तत्र गन्तव्यमेषधर्मः स-

नातनः ॥ तपसा गुरुवृत्त्या च भर्तृस्नेहाद्व्रतेन च । तव
॥१८॥ चैव प्रसादेन न मेऽप्रतिहतागतिः ॥ प्राहुः सप्तपदं मैत्रं
बुधास्तत्वार्थदर्शिनः । मित्रतां तु पुरस्कृत्य किञ्चिद्वक्ष्यामि
तच्छृणु ॥ नानात्मवन्तो हि वने चरन्ति धर्मं च सत्यं च
परिश्रमं च । विज्ञानतो धर्ममुदाहरन्ति तस्मात्सन्तो धर्ममाहुः
प्रधानम् ॥ यम उवा० । निवर्त्य तुष्टोऽस्मि तवानया गिरा
स्वराक्षरव्यञ्जनहेतुयुक्तया । वरं वृणीष्वेह विनास्य जी-
वितं ददामि ते सर्वमनिन्दिते वरम् ॥ सावित्र्युवा० ॥
च्युतः स्वराज्याद्वनवासमाश्रितो ह्यलब्धचक्षुः श्वशुरो
ममाश्रमे । सलब्धचक्षुर्बलवान्भवेन्नृपस्तव प्रसादाज्ज्वल-
नार्कसन्निभः ॥ यम उवा० ॥ ददामि ते सर्वमनिन्दिते वरं
यथा त्वयोक्तं भविता च तत्तथा । तवाध्वनो ग्लानिमि-
वोपलक्षये निवर्त्य गच्छस्व न ते श्रमो भवेत् ॥ सावि-
त्र्युवा० । कुतः श्रमो भर्तृसमीपतोऽद्य मे यतो हि भर्ता मम
सा गतिर्ध्रुवा । यतः पतिं नेष्यसि तत्र मे गतिः सुरेश भूयश्च
वचो निबोध मे ॥ सतां सकृत्सङ्गतमीप्सितं परैस्ततः परं
मित्रमिति प्रचक्षते । नचाफलं सत्पुरुषेण सङ्गतं ततः
सतः सन्निवसेत्समागमे ॥ यम उवा० ॥ मनोऽनुकूलं बुधबुद्धि-
वर्धनं त्वया यदुक्तं वचनं हिताश्रयम् । विना पुनः सत्यव-
तो हि जीवितं वरं द्वितीयं वरयस्व भामिनि ॥ सावित्र्युवा० ॥
हृतं पुरा मे श्वशुरस्य धीमतः स्वमेव राज्यं स लभेत पार्थि-
वः । न च स्वधर्मं प्रजहीत मे गुरुर्द्वितीयमेवं वरयामि
ते वरम् ॥ यम उवा० ॥ स्वमेव राज्यं प्रतिपत्स्यते चिरान्न च
स्वधर्मात्परिहास्यते नृपः । कृतेन कामेन मया नृपात्मजे निव-
र्त्य गच्छस्व न ते श्रमो भवेत् ॥ सावित्र्यु० । प्रजास्त्वयैता
नियमेन संयता नियम्य चैता नयसे न काम्यया । अतो

यमत्वं तव देवविश्रुतं निबोधयेमां गिरमीरितां मया ॥
॥ १६ ॥ अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा । अनुग्रहश्च दानं
च सतां धर्मः सनातनः ॥ एवं प्रायश्च लोकोऽयं मनुष्याः
शक्तिपेशलाः । सन्तः स्वेवाप्यमित्रेषु दयां प्राप्तेषु कुर्वते ॥
यम उवा० । पिपासितस्येव यथा भवेत्पयस्तथा त्वया
वाक्यमिदं समीरितम् । विना पुनः सत्यवतोऽस्य जीवितं वरं
वृणीष्वेह शुभे यदीच्छसि ॥ सावित्र्युवा० । ममानपत्यः
पृथिवीपतिः पिता भवेत्पितुः पुत्रशतं च औरसम् ।
कुलस्य सन्तानकरं च तद्भवेत्तृतीयमेवं वरयामि ते व-
रम् ॥ यम उवा० । कुलस्य सन्तानकरं सुवर्चसं शतं
सुतानां पितरस्तु ते शुभे । कृतेन कामेन नराधिपात्मजे
अतीव दूरं हि पथस्त्वमागता ॥ सावित्र्युवाच ॥
न दूरमेतन्मम भर्तृसन्निधौ मनो हि मे दूरत-
रं प्रधावति । अथ व्रजन्नेव गिरा समुन्नतं मयोच्यमानं
शृणु धर्म मे वचः ॥ विवस्वतस्त्वं तनयः प्रतापवान् ततो
हि वैवस्वत उच्यते बुधैः । समेन धर्मेण च रञ्जिताः
प्रजास्ततस्तवेहेश्वरधर्मराजताम् ॥ आत्मन्यपि न विश्वा-
सस्तावद्भवति सत्सु यः । तस्मात्सत्सु विशेषेण सर्वप्रण-
यमृच्छति ॥ सौहृदात्प्रणयाच्चापि विश्वासो नाम जायते ।
तस्मात्सत्सु विशेषेण विश्वासं कुरुते जनः ॥ यम उवा० ॥
उदाहृतं ते वचनं यदङ्गने शुभं न तादृक् त्वदृते मया
श्रुतम् । अनेन तुष्टोऽस्मि विनाऽस्य जीवितं वरं चतुर्थं
वरयस्व गच्छ च ॥ सावित्र्युवा० । ममात्मजं सत्यवतस्त-
थौरसं भवेदुभाभ्यामिह यत्कुलोद्भवम् । शतं सुतानां
बलिनां महात्मनामिमं चतुर्थं वरयामि ते वरम् ॥ यम
उवा० । शतं सुतानां बलवीर्यशालिनां भविष्यति प्रीति-

करं तवाबले । परिश्रमस्तेन भवेन्नृपात्मजे निवर्त दूरं हि
॥२०॥ पथस्त्वमागता ॥ सावित्र्युवा० । सतां हि या शाश्वतधर्म-
वृत्तिः सन्तो न सीदन्ति न च व्यथन्ति ते । सतां सद्भिर्नाम
फलं सम्प्रयाति सद्भ्यो भयं नानुभवन्ति सन्तः ॥ सन्तो हि
सत्येन यजन्ति सूर्यं सन्तो भूमिं तपसा धारयन्ति । सन्तो
गतिर्भूतभव्यस्य राजन्सतां मध्ये नावसीदन्ति सन्तः ॥
आयुर्जुष्टमिदवृत्तमिति विज्ञाय शाश्वतम् । सन्तः परार्थं
कुर्वाणा नावेक्षन्ते प्रतिक्रियाम् ॥ न च प्रसादः सत्पुरुषेषु
मोघो न च व्यर्थो तपस्यति चाभिमानः । यस्मादेतन्नि-
यतं सत्सु नित्यं तस्मात्सन्तो रक्षितारो भवन्ति ॥ यम
उवा० । यथा यथा भाषसि धर्मसंहितं मनोनुकूलं सुपदं म-
हार्थवत् । तथा तथा मे त्वयि भक्तिरुत्तमा वरं वृणीष्वाप्र-
तिमं पतिव्रते ॥ सावित्र्युवा० । न तेऽपवर्गः सुकृताद्विना
कृतस्तथान्यथान्येषु वरेषु मानद । वरं वृणे जीवतु स-
त्यवानयं यथा मृतो ह्येवमहं विना पतिम् ॥ न कामये भ-
र्तृविना कृतं सुखं न कामये भर्तृविना कृतां दिवम् । न
कामये भर्तृविना गतां श्रियं न भर्तृहीना व्यवसामि
जीवितुम् ॥ वरोऽपि वैवस्वत ह्यौरसात्मजशते च दत्तो
भवता कृपालुना । वरं वृणे जीवतु सत्यवानयं तवैव सत्यं
वचनं भविष्यति ॥ तथेत्युक्त्वा तु तान् पाशान्मुक्त्वा
वैवस्वतो यमः । धर्मराजः प्रहृष्टात्मा सावित्रीमिदमब्रवीत् ॥
एष भद्रे मया मुक्तो भर्ता ते कुलनन्दिनि । आरोग्यं
वयसि प्राप्य सिद्धार्थश्च भविष्यति । चतुर्वर्षशतं चायुस्त्व-
या सार्धमुपेष्यति ॥ सा गता वटसामीप्यं कृत्वोत्सङ्गे
शिरस्ततः । प्रबुद्धस्तु ततो ब्रह्मन् सत्यवानिदमब्रवीत् ॥
मया स्वप्नो वरारोहे दृष्टोऽद्यैव च भामिनी । तत्सर्वं

॥ २१ ॥ कथितं तस्यै यद्वृत्तं सर्वमेव तत् ॥ तया च कथितः सर्वः संवादश्च यमेन हि । अस्तङ्गते ततः सूर्ये द्युमत्सेनो महीपतिः ॥ पुत्रस्यागमनाकाङ्क्षी इतश्चेतश्च धावति । आश्रमादाश्रमं गच्छन् पुत्रदर्शनकाङ्क्षया ॥ आवयोरन्धयोर्यष्टिः क्व गतोऽसि विना वयोः । एवं स विविधं क्रोशन् सपत्नीको महीपतिः ॥ चकार दुःखसन्तप्तः पुत्र पुत्रेति चासकृत् । अकस्मादेव राजेन्द्रो लब्धचक्षुर्महीश्वरः ॥ तद् दृष्ट्वा परमाश्चर्यं चक्षुष्प्राप्तिं द्विजोत्तमाः । सान्त्वपूर्वं तदा वाक्यमूचुस्ते तापसा भृशम् ॥ चक्षुष्प्राप्त्या महाराज सूचितं ते महीपते । पुत्रेण च समं योगं प्राप्स्यसे नृपसत्तम ॥ ईश्वर उवा० । यावदेवं वदन्त्येते तापसा द्विजसत्तम । सावित्रीसहितः प्राप्तः सत्यवान् द्विजसत्तम ॥ नमस्कृत्य द्विजान्सर्वान्मातरं पितरं तथा । सावित्री च ततो ब्रह्मन्ववन्दे चरणावति ॥ श्वश्रूश्वशुरयोर्ब्रह्मन्सावित्री कमलेक्षणा ॥ मुनय ऊचुः । वरं सावित्रि जानासि कारणं वरवर्णिनि । वृद्धयोश्चक्षुषः प्राप्तेः श्वश्रूश्वशुरयोः शुभे ॥ सावित्र्युवा० ॥ न जानामि मुनिश्रेष्ठाश्चक्षुषः प्राप्तिकारणम् । चिरं सुप्तस्तु मे भर्ता तेन कालव्यतिक्रमः ॥ सत्यवानुवा० । अस्याः प्रभावात्सञ्जातं दृश्यते कारणं न च । तत्सर्वं विद्यते विप्राः सावित्र्यास्तपसः फलम् ॥ व्रतस्यैव तु माहात्म्यं दृष्टमेतन्मयाधुना ॥ ईश्वर उवा० । एवं तु वदतस्तस्य तदा सत्यवतः प्रभो । पौराः समागतास्तस्य आचरन्नृपतेर्हितम् ॥ येन राज्यं बलाद्राजन् हृतं क्रूरेण मन्त्रिणा । अमात्येन हतः सोऽपि इति पौराः समागताः ॥ पौरा ऊचुः । उत्तिष्ठ राजशार्दूल स्वं राज्यं पालय प्रभो । अभिषिञ्चस्व राजेन्द्र पुरे मन्त्रिपुरोहितैः ॥ ईश्वर उवा० । स गत्वा राजशार्दूलः

स्वपुरं जनसंवृतः। पितृपैतामहं राज्यं सम्प्राप्तं च महात्मना ॥ सावित्री सत्यवांश्चैव परां मुदमवापतुः। जनयामास पुत्राणां शतं वै बाहुशालिनाम् ॥ व्रतस्यैव तु माहात्म्यात्तस्याः पितुरजायत। पुत्राणां च शतं ब्रह्मन् प्रसन्नाच्च यमात्तथा ॥ एतत्ते कथितं सर्वं व्रतमाहात्म्यमुत्तमम्। दीर्घायुर्जीवितो भर्ता व्रतस्यास्य प्रभावतः ॥ कर्तव्यं सर्वनारीभिरवैधव्यफलप्रदम् ॥

॥ इति श्रीस्कन्दपुराणे सावित्रीकथासमाप्ता ॥

॥ अथाषाढमासः ॥

आषाढशुक्लैकादश्यां रात्रौ विष्णुशयनोत्सवः। द्वादश्यां पारणाहे रात्रौ अनुराधायाः प्रथमे पादे वा यथाचारं कार्यः। तत्र सन्ध्यायां कृतनित्यक्रियो देशकालौ स्मृत्वा, मम महापातकाद्यशेषपातकनिवृत्तिपूर्वकश्रीमहाविष्णुप्रसादसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं आषाढशुक्लैकादश्यां विष्णुशयनोत्सवं करिष्ये। इति सङ्कल्प्य, देवं विविधोपचारैः सम्पूज्य घण्टामङ्गलवाद्यमन्त्रघोषपुरःसरं स्वास्तृते सोपधाने शुभ्रवस्त्राच्छन्ने रम्ये पर्यङ्के देवं शाययित्वा प्रार्थयेत्। वासुदेव जगद्योने प्राप्तेयं द्वादशी तव। भुजङ्गशयनेऽब्धौ च सुखं स्वपिहि माधव ॥ इयं तु द्वादशी देव शयनार्थं विनिर्मिता। अस्यां सुप्ते जगन्नाथे जगत्सुप्तं भवेदिदम्॥ सुप्ते त्वयि जगन्नाथे जगत्सुप्तं भवेदिदम्। विबुद्धे त्वयि बुध्येत सर्वमेतच्चराचरम् ॥ इति सम्प्रार्थ्य पुष्पाञ्जलिं दद्यात्। ततः पुराणश्रवणादिना रात्रौ जागरणं कुर्यादिति॥

अस्यामेवैकादश्यां द्वादशीपौर्णमासीकर्कसङ्क्रमणदिनान्यतमदिनेषु वा चातुर्मास्यव्रतारम्भः। समाप्तिस्तु

कार्तिकशुक्लद्वादश्यामेवेति। अथ व्रतग्रहणप्रकारः। जातीकुसुममालाभिर्विष्णोर्महापूजां कृत्वा प्रार्थयेत्। श्वेतद्वीपे भोगितल्पे स्थिते त्वयि जनार्दन। चातुर्मास्यव्रतेऽनुज्ञां देहि लक्ष्मीपते मम॥ इति प्रार्थ्य देशकालौ स्मृत्वा, मम सर्वपापक्षयपूर्वकश्रीमहाविष्णुप्रीतिद्वारा श्रीपरमेश्वरप्रीत्यर्थं आषाढशुक्लैकादशीमारभ्य कार्तिकशुक्लद्वादशीपर्यन्तममुकचातुर्मास्यव्रतं करिष्ये। ततः कृताञ्जलिर्देवमीक्षमाणो मन्त्रान् पठेत्। चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि। इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत॥ इदं व्रतं मया देव गृहीतं पुरतस्तव॥ निर्विघ्नं सिद्धिमायातु प्रसादात्तव केशव॥ गृहीतेऽस्मिन् व्रते देव पञ्चत्वं यदि मे भवेत्। तदा भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्दन॥ अत्र इममित्यस्य स्थाने करिष्यमाणव्रतनिर्देशः कार्यः। नियमाश्च ग्रन्थान्तरे द्रष्टव्याः।

अथ सर्वेषु मासेषु तिथिवर्ज्यान्युक्तानि तथापि विशेषतश्चातुर्मास्ये तिथिवर्ज्यान्याह-प्रतिपदादितिथिषु इमे पदार्था न भक्षणीया इति तत्तिथिपालनव्रतमुच्यते। भाषया तत्तत्पदार्थनामानि वक्ष्यन्ते।

१ कूष्माण्डम् कोंहळा।	९ तुम्बीफलम् दुधाभोंपळा।
२ बृहतीफलम् डोर्ली।	१० पटोलकम् पडवळ, परवर।
३ लवणम् मीठ।	११ निष्पावाः पावटे।
४ मूलकम् मुळा।	१२ मसूरिका मसुरी।
५ पनसम् फणस।	१३ वृन्ताकम् वांगी।
६ तैलम् तेल।	१४ मधु मध।
७ आमलकम् आंवळे।	१५ द्यूतम् सोंगटी।
८ नारिकेलम् खोबरं।	१६ मैथुनम् स्त्रीसंग।

आषाढशुक्लैकादशीमारभ्य कार्तिकशुक्लद्वादशीपर्यन्तं गोपद्मव्रतं पञ्चवर्षपर्यन्तं स्त्रीणां विहितं तल्लेखनपूजनप्रकारः। भूमिं गोमयेनोपलिप्य हरिद्रामिश्रितव्रीहिपिष्टैस्त्रयस्त्रिंशत् गोपद्मानि विलिख्य गोपालं पूजयेत्। तत्सङ्ख्यया नमस्कारप्रदक्षिणा अपि कुर्यात्। अथ पूजाविधिः। आचम्य देशकालौ स्मृत्वा, मम यमदण्डनिरसनपूर्वकपुत्रपौत्राखण्डितसौभाग्याभिवृद्धिद्वारा श्रीगोपालप्रीत्यर्थं त्रयस्त्रिंशत्सङ्ख्याकगोपद्मलेखनपूर्वकश्रीगोपालपूजनं तावन्नमस्कारप्रदक्षिणाश्च करिष्ये। तदङ्गं कलशपूजनं घण्टापू० इत्यादिसम्भारप्रोक्षणान्तं कृत्वा ध्यायेत्। चतुर्भुजमहाकायं जाम्बूनदसमप्रभम्। शङ्खचक्रगदापद्मरमागरुडशोभितम्॥ सेवितं मुनिभिर्देवैर्यक्षगन्धर्वकिन्नरैः। एवं विधं हरिं ध्यात्वा ततो यजनमारभेत्॥ श्रीगोपालकृष्णं ध्यायामि। आवाहयामि देवेश भक्तानामभयप्रद। सस्निग्धं वरदं शान्तं मनसाऽऽवाहयाम्यहम्॥ श्री० आवाहनं०। सुवर्णमणिभिर्दिव्यैः खचिते देवनिर्मिते। दिव्यसिंहासने स्निग्धे प्रविश त्वं सुराधिप॥ आसनं०। गङ्गोदकं सुरश्रेष्ठ सुवर्णकलशस्थितम्। गन्धपुष्पाक्षतैर्युक्तं गृहाण रमया सह॥ पाद्यं०। अष्टगन्धसमायुक्तं स्वर्णपात्रे स्थितं जलम्। अर्घ्यं गृहाण भो देव भक्तानामभयप्रद॥ अर्घ्यं०। देव देव नमस्तुभ्यं पुराणपुरुषोत्तम। मया दत्तमिदं तोयं कुरुष्वाचमनीयकम्॥ आचमनीयं०। पयोदधिघृतैः स्नानं मधुशर्करया युतैः। मध्ये मध्ये च पूजा तु कर्तव्या व्रतिभिः सदा॥ पञ्चामृतस्ना०॥ नदीनां चैव सरसां मयाऽऽनीतं जलं शुभम्। स्नानं कुरु महाभाग वारुणैर्मन्त्रसम्भवैः॥ स्नानं०। अभिषेकः। वस्त्रयुग्मं मया-

ऽऽनीतं पट्टसूत्रेण निर्मितम् । सूक्ष्मं कार्पासतन्तूनां सुवर्णेन
॥ २५ ॥ विराजितम् ॥ वस्त्रं० । नारायण नमस्तेऽस्तु त्राहि मां
भवसागरात् । ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम ॥
यज्ञो० । केयूरमुकुटैश्चैव नूपुरैरङ्गुलीयकैः । पूजितोऽसि
प्रयत्नेन रत्नैराभरणैर्विभो ॥ भूषणानि० । चन्दनं मलयोद्-
भूतं कस्तूर्यगुरुसंयुतम् । कर्पूरेण च सम्मिश्रं स्वीकुरुष्वानु-
लेपनम् ॥ चन्दनं० । शतपत्रैः कर्णिकारैश्चम्पकैर्मल्लिकादिभिः ।
पुष्पैर्नानाविधैश्चैव पूजयामि सुरेश्वर ॥ पुष्पाणि० । दशा-
ङ्गो गुग्गुलोद्भूतः सुगन्धिश्च मनोहरः । आघ्रेयो देव-
देवेश धूपोऽयं प्रतिगृह्यताम् ॥ धूपं० । एकार्तिकं सुरश्रेष्ठ
गोघृतेन सुवर्तिना । संयुक्तं तेजसा कृष्ण गृहाणादित्य-
दीपित ॥ दीपं० । अन्नं च पायसं भक्ष्यं सितालेह्यसमन्वि-
तम् । दधिक्षीरघृतैर्युक्तं गृहाण सुरपूजित ॥ नैवेद्यं० ।
करोद्वर्तनं० । नागवल्लीदलैर्युक्तं पूगीफलसमन्वितम् ।
कर्पूरखदिरैर्युक्तं ताम्बूलं प्रतिगृ० ॥ ताम्बूलं० । हिर-
ण्यगर्भेति दक्षिणां० । नीराजनं गृहाणेश पञ्चवर्ति-
भिरावृतम् । तेजोराशे मया दत्तं लोकानन्दकर प्रभो ॥
नीराजनं० । अञ्जलिस्थानि पुष्पाणि अर्पयामि जगत्पते ।
गृहाण सुमुखो भूत्वा जगदानन्ददायक ॥ पुष्पाञ्जलिं० ।
यानि कानीति प्रदक्षिणां० ॥ नमस्ते देवदेवेश नमस्ते
गरुडध्वज । नमस्ते विष्णवे तुभ्यं व्रतस्य फलदायक ॥
नमस्कारान्० । मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ।
व्रतेनानेन सुप्रीतः सम्पूर्णफलदो भव ॥ प्रार्थनां० ॥
यस्य स्मृत्या च० । अनेन गोपद्मपूजनेन श्रीगोपालकृष्णः
४ प्रीयताम् ॥

आषाढकृष्णामायां दीपपूजनविधिः । केचित् गोधू-

मपिष्टस्य दीपं कृत्वा पूजयन्ति । केचिद्दीपिकासु निर्म-लासु दीपं प्रज्वाल्य पूजयन्तीति । यथाकुलाचारं कर्त्त-व्यम् । अमायां प्रातः कृतनित्यक्रियो देशकालौ स्मृत्वा मम सकु० सर्वापच्छान्तिपूर्वकधनधान्यैश्वर्यपुत्रपौत्राद्य-भिवृध्द्यर्थं दीपपूजनं करिष्ये । दीपदेवताभ्यो नम इति षोडशोपचारैः सम्पूज्य लाजान् चणकांश्च समर्प्य, ओ दीप ब्रह्मरूपस्त्वं ज्योतिषां प्रभुरव्ययः । आरोग्यं देहि पुत्रांश्च ह्यवैधव्यं प्रयच्छ मे ॥ इति सम्प्रार्थ्य, यस्य स्मृ० । अनेन दीपपू० दीपदेवताः प्रीयन्ताम् ॥ ततः सुवासिनीं ब्राह्मणां-श्च मिष्टान्नेन भोजयित्वा स्वयमपि भुञ्जीतेति । इति दीपपूजाविधिः ॥

॥ अथ श्रावणमासः ॥

तत्र प्रति रविवासरे मौनेनोत्थाय शीतजलेन स्नात्वा नित्यकर्म सम्पाद्य नागवल्लीदले रक्तचन्दनेन द्वादशपरिधि-युतमर्कवद्वर्तुलं मण्डलं विलिख्य तत्र संज्ञायुतं सूर्यं पूजयेत् । नारिकेलबीजं शर्कराखण्डयुतं नैवेद्यार्थं सम्पाद-येत् । अथ पूजाविधिः । आचम्य देशकालौ स्मृत्वा, मम निखिलदुरितदौर्भाग्यदुःस्वप्नदैन्यादिपीडापरिहारद्वारा सु-खसौभाग्यसन्तत्यारोग्यैश्वर्याभिवृद्ध्यर्थं श्रीसंज्ञासहित-सूर्यप्रीत्यर्थं श्रावणरविवारे सूर्यपूजनमहं करिष्ये । कलश-घण्टापूजनादि प्रोक्षणान्तं कृत्वा, ध्येयः सदा सवितृम-ण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः । केयू-रवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशङ्ख-चक्रः ॥ श्रीसूर्यं ध्यायामि । श्रीसंज्ञासहितसूर्याय नम इति नाममन्त्रेण षोडशोपचारैः रक्तचन्दनरक्ताक्षताजपापुष्पैः

सम्पूज्य भूमौ जानुनी निधाय रक्ताक्षतारक्तचन्दनमिश्रितजपापुष्पसहितजलेन द्वादशार्घ्यान् दद्यात् । मित्राय नम इदमर्घ्यं स०, इत्यादि । द्वादशप्रदक्षिणा द्वादशनमस्कारांश्च कुर्यात् । ततः षट्तन्तुनिर्मितं षड्ग्रन्थियुतं सूत्रं सूर्यायार्पयित्वा दक्षिणकरे बध्नीयात् । स्त्री तु वामकरे । ततो द्वादशफलयुतं वायनं ब्राह्मणाय दद्यात् । यस्य० । अनेन० प्रीयताम् ॥

श्रावणे प्रति सोमवासरे प्रदोषे शिवपूजनमुपवासो नक्तं वेत्यादि विहितम् । प्रदोषे स्नात्वा सायं सन्ध्यावन्दनादि विधाय देशकालौ स्मृत्वा आत्मनः अशेषपापक्षयपूर्वकसत्पुत्रप्राप्तिधनधान्यैश्वर्याद्यभिवृद्धिद्वारा (अमुककामनया वा) श्रावणसोमवारनिमित्तं श्रीउमामहेश्वरप्री० उमामहेश्वरपूजनमहं करिष्ये । आसनविध्यादिसम्भारप्रोक्षणान्तं कृत्वा, ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं रत्नाकल्पो ज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् । पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥ १ ॥ बन्धूकसन्निभं देवं त्रिनेत्रं चन्द्रशेखरम् । त्रिशूलधारिणं देवं चारुहासं सुनिर्मलम् ॥ २ ॥ कपालधारिणं देवं वरदाभयहस्तकम् । उमया सहितं शम्भुं ध्यायेत्सोमेश्वरं सदा ॥३॥ श्रीउमामहेश्वराभ्यां० उमामहेश्वरौ ध्यायामि । आयाहि भगवन् शम्भो शर्व त्वं गिरिजापते । प्रसन्नो भव देवेश नमस्तुभ्यं हि शङ्कर ॥ त्रिपुरान्तकरं देवं चन्द्रचूडं महद्युतिम् । गजचर्मपरीधानं सोमं चावाहयाम्यहम् ॥ श्रीउमा० आवाहनं० । विश्वेश्वर महादेव राजराजेश्वरप्रिय । आसनं दिव्यमीशान दास्येऽहं

तुभ्यमीश्वर ॥ श्रीउमा० आसनं० । महादेव महेशान महानन्द परात्पर । पाद्यं गृहाण मद्दत्तं पार्वतीश महेश्वर ॥ पाद्यं० । त्र्यम्बकेश सदाचार जगदादिविधायक । अर्घ्यं गृहाण देवेश साम्ब सर्वार्थदायक ॥ अर्घ्यं० । त्रिपुरान्तक दीनार्तिनाश श्रीकण्ठ शाश्वत । गृहाणाचमनीयं च पवित्रोदककल्पितम् ॥ आचमनीयं० । पयो दधि घृतं चैव शर्करा मधुसंयुतम् । पञ्चामृतं मयानीतं गृहाणेदं जगत्पते ॥ पञ्चामृतस्नानं० । गङ्गा गोदावरी रेवा पयोष्णी यमुना तथा । ताभ्यः स्नानार्थमानीतं जलं स्वीक्रियतां प्रभो ॥ स्नानं० । पञ्चोपचारैः सम्पूज्याभिषेकं कुर्यात् । महिम्नः पारन्ते० इत्यादिभिः । वस्त्राणि पट्टकूलानि विचित्राणि नवानि च । मयाऽऽनीतानि देवेश प्रसन्नो भव शङ्कर ॥ वस्त्रं० । सौवर्णं राजतं शुभ्रं कार्पासस्य विनिर्मितम् । उपवीतं मया दत्तं प्रीत्यर्थं प्रतिगृह्यताम् ॥ यज्ञोपवीतं० । सर्वेश्वर जगद्वन्द्य दिव्यासनसमन्वित । गन्धं गृहाण देवेश सुरराज नमोऽस्तु ते ॥ चन्दनं० । अक्षताश्च सुरश्रेष्ठ शुभ्राधूताश्च निर्मलाः । मया निवेदिता भक्त्या गृहाण परमेश्वर ॥ अक्षतान्स० ॥ माल्यादीनि० पुष्पाणि० ।

॥ अथाङ्गपूजा ॥

१ शिवाय० पादौ पू० ।	२ महेश्वराय० जङ्घे पू० ।
३ शम्भवे० जानुनी पू० ।	४ पिनाकिने० ऊरू० पू० ।
५ शशिशेखरा० कटी पू० ।	६ शूलपाणये० नाभिं पू० ।
७ वामदेवाय० उदरं पू० ।	८ विरूपाक्षाय० कण्ठं पू० ।
९ नीललोहिताय० मुखं पू० ।	१० शङ्कराय० नेत्रे पू० ।
११ रुद्राय० कर्णौ पू० ।	१२ शर्वाय० ललाटं पू० ।
१३ सदाशिवाय० शिरः पू० ।	१४ महादे० सर्वाङ्गं पू० ।

वनस्पति० धूपं० । आज्यं च वर्ति० दीपं दर्शयामि । अपूपानि च पक्वानि मण्डलावटकानि च । पायसं पूपमन्नं च नैवेद्यं प्रतिगृह्यताम् ॥ नैवेद्यं० । नैवेद्यान्ते आचम० । करोद्वर्तनं० । कूष्माण्डं मातुलिङ्गं च नारिकेलफलानि च । गृहाण पार्वतीकान्त सोमेशान नमोऽस्तु ते ॥ फलं० । पूगीफलं० ताम्बूलं० । हिरण्यगर्भ० दक्षिणां० । अग्निर्ज्योती रविर्ज्योतिर्ज्योतिर्नारायणो विधुः । नीराजयामि सोमेशं पञ्चदीपैः सुरेश्वर ॥ कर्पूरदीपं० । हेतवे जगतामेव संसारार्णवसेतवे । प्रभवे सर्वविद्यानां शम्भवे गुरवे नमः ॥ नमस्कारान्० । यानि कानि च० प्रदक्षिणां० । हर विश्वाखिलाधार निराधार निराश्रय । पुष्पाञ्जलिं गृहाणेश सोमेश्वर नमोऽस्तु ते ॥ पुष्पाञ्जलिं० । बिल्वपत्रं सुवर्णस्य त्रिशूलाकारमेव च । मयार्पितं तु तच्छम्भो गृहाण परमेश्वर ॥ बिल्वपत्रं० । यस्य स्मृत्या० । अनेन मया० श्रीउमा० पू० उमामहेश्वरौ प्रीयेताम् ॥

श्रावणे कार्तिके माघे वा शुक्लपक्षे सोमवारे शुभे तिथौ षोडशसोमवारव्रतारम्भः कार्यः । श्रावणसोमवारे शिवपूजनवदत्रापि पूजनं कार्यम् । सङ्कल्पे तु अद्य पू० प्राप्त्यर्थं पूर्वसङ्कल्पितामुककामनयाऽऽचरितषोडशसोमवारव्रताङ्गत्वेन विहितं श्रीउमामहेश्वरप्रीत्यर्थं यथामिलितोपचारद्रव्यैः श्रीउमामहेश्वरपूजनमहं क० । इति विशेषः ।

॥ अथ षोडशसोमवारकथा ॥

श्रीगणेशाय नमः ॥ ऋषय ऊचुः । सूत सूत महाभाग व्रतानि सुबहून्यपि । श्रुतानि त्वन्मुखाद् ब्रूहि पुण्यदं व्रतमुत्तमम् ॥ सूत उ० ॥ शृणुध्वं ब्राह्मणा यूयं पवित्रं पापनाशनम् । सोमवारव्रतं वक्ष्ये सेतिहासं पुरातनम् ॥

वैदर्भदेशे नगरममरावतिनामकम् । तस्मिन् शिवालयं
॥ ३० ॥ रम्यं नानावृक्षैः सुशोभितम् ॥ कस्मिंश्चित्समये तत्र
ह्यागतौ पार्वतीशिवौ । दृष्ट्वा स्थानं सुरुचिरं वासं
चक्रतुरञ्जसा ॥ उवाच शङ्करं गौरी द्यूतक्रीडां चकार
सः । तत्रस्थं पूजकं दृष्ट्वा प्रत्युवाच ह्युमा सती ॥ सत्यं
ब्रूह्यावयोर्मध्ये पणं जेष्यति कोऽत्र वै । उवाच पूजको
गौरीं शिवो जेष्यत्यसंशयम् ॥ एवं द्यूते समारब्धे
पार्वत्या विजितः पणः । पूजकं शापवचनमुवाच
जगदम्बिका ॥ असत्यं भाषसे यस्मात्तस्मात्कुष्ठी भवा-
धम । शैवस्य सर्वगात्रेषु कुष्ठोऽभूच्छापवाक्यतः ॥ ततस्तौ
जग्मतुः शीघ्रं कैलासं तु निजालयम् । शैवस्तु परमां चिन्ता-
मवाप च कुरूपतः ॥ तत्रैव वसतिं चक्रेऽहर्निशं तदघं
स्मरन् । एकस्मिन् दिवसे तत्र ह्यप्सरो गण आगतः ॥
शिवस्य दर्शनं कर्तुं तेन दृष्टस्तु शैवकः । ऊचुस्ताः सकला
देव्यः शक्रलोकविभूषणाः ॥ केन कर्मविपाकेन दशां प्राप्तो
वदस्व नः ॥ शैव उ० । स्ववृत्तान्तं समाचष्टे पार्वत्याः
शापकारणम् । श्रुत्वा वाक्यं तु शैवस्य दृष्ट्वा तस्य कुरू-
पताम् ॥ आहुः स्वर्लोकवासिन्यः कृपया परया युताः ॥
अप्सरस ऊचुः ॥ भो भो पूजक चिन्तां त्वं मा कुरुष्व
स्थिरो भव । उपायं कथयामो वै सोमवारव्रतं कुरु ॥ तेन
व्रतप्रभावेण गतकुष्ठो भविष्यसि ॥ शैव उ० ॥ व्रतराज-
विधिं ब्रूत येन स्याच्छापमोचनम् । विधानं किं फलं पुण्यं
कथं कार्यं मयाधुना ॥ अप्सरस ऊ० । श्रावणे कार्तिके
माघे वैशाखे वा शुभे दिने । प्रारम्भयेद् व्रतं भक्त्या शिव-
सन्तुष्टिकारकम् ॥ स्वयं भवेन्निराहारो दिनयामचतुष्टयम् ।
ततस्तु लोहिते भानौ स्नात्वा सनियमो व्रती ॥ सायंकाले

सोमवारे शिवपूजां समारभेत् । उपचारैः षोडशभिः पूजां
॥ ३१ ॥ कुर्यादतन्द्रितः ॥ नानापुष्पैस्तथा बिल्वैर्धूपैर्दीपैः सकर्पूरैः ।
शेटकार्धं समानीय पिष्टं गोधूमसम्भवम् ॥ अङ्गारकत्रयं
कुर्याद्भर्जयेदनलोपरि । घृतं गुडं च संयोज्य कर्तव्यं लड्डु-
कत्रयम् ॥ तस्मादेकं शङ्कराय गवे चैकं समर्पयेत् । लव-
णेन विना चैव स्वयमेकं तु भक्षयेत् ॥ अजस्रं नियमेनैवं
सोमवारांस्तु षोडश । कृत्वा सप्तदशे प्राप्ते सोमवारे शृणुष्व
तत् ॥ गोधूमपिष्टमानीय चतुःशेटकसम्मितम् । तुर्यपा-
देन सहितं कुर्यादङ्गारकांस्तथा ॥ भर्जयित्वा तु तान् स-
र्वान् सम्यक् चूर्णं प्रकल्पयेत् । युक्तं घृतगुडाभ्यां वै कृत्वा
भागत्रयं कुरु ॥ पात्रे गृहीत्वा तच्चूर्णं गीतवाद्यपुरःसरम् ।
शिवालयं ततो गत्वा शिवपूजनमारभेत् ॥ एकाग्रेण तु
चित्तेन पूजां कुर्यात्समाहितः । एकं भागं तु चूर्णस्य शिव-
स्याग्रे निवेदयेत् ॥ द्वितीयभागं तत्स्थेभ्यः सर्वेभ्यः प्रति-
पादयेत् । शेषं तृतीयभागं तमानयेत्स्वगृहं प्रति ॥ सुहृद्युतः
स्वयं कुर्याद्भक्षणं परमादृतः । अनेन विधिना सम्यक्
व्रतं कुरु यथोदितम् ॥ अनेन व्रतचीर्णेन गतकुष्ठो भवि-
ष्यसि । इति तासां वचः श्रुत्वा पूजको हृष्टमानसः ॥
व्रतं चकार भावेन गतकुष्ठोऽभवत्तदा । रूपं सुनिर्मलं
जातं देवानामपि दुर्लभम् ॥ तत्रैव वासं कृतवान् पूजां
कुर्वन् समाहितः । एकस्मिन् दिवसे तत्र पार्वतीपरमेश्वरौ ॥
यदृच्छया समायातौ विमानेनार्कवर्चसा । दृष्ट्वा शैवं
कुष्ठहीनं विस्मितं परमं गतौ ॥ ऊचे परमया प्रीत्या पूजकं
तत्र पार्वती । केन व्रतप्रभावेण जातोऽसि गतकुष्ठकः ॥
पूजक उवाच । जगन्मातर्नमस्तेऽस्तु त्राहि मां कृपया शुभे ।
सोमवारव्रतेनैव गतः कुष्ठो ममाशु वै ॥ सूत उ० । इति

॥ ३२ ॥ तस्य वचः श्रुत्वा विस्मिता मनसि ह्यभूत् । करिष्ये व्रतमेतद्धि गुहकोपोपशान्तये ॥ ततः प्रीत्या जगद्धात्री प्रचक्रे विधिवद्व्रतम् । तेन व्रतप्रभावेण स्वामी जातो विमत्सरः ॥ विचारं कृतवान् ह्येवं कोपो मातरि नोचितः । अनाहूतो गतः स्वामी मातृदर्शनलालसः ॥ आगतं स्वामिनं दृष्ट्वा हर्षेण महतान्विता । अङ्कमारोप्य पुत्रं तं चुचुम्बे मुखपङ्कजम् ॥ केन योगेन मे मातः कोपो नष्टो वदस्व तत् ॥ पार्वत्युवाच । शिवव्रतप्रभावाच्च कोपो नष्टस्तवात्मज । स्वाम्युवाच । कश्यपो ब्राह्मणःकश्चिन्मम मित्रं तु वल्लभम् । अहं व्रतं करिष्यामि तस्य दर्शनकाङ्क्षया ॥ ततः स्वामी व्रतं चक्रे मित्रदर्शनलालसः । मित्रप्राप्तिस्तस्य जाता व्रतस्यास्य प्रभावतः ॥ मित्रस्तु स्वामिनं दृष्ट्वा ऊचे मधुरया गिरा । केन पुण्यप्रभावेण जातं दर्शनमावयोः ॥ स्वाम्यु० । सोमवारव्रतेनैव तव मित्र समागमः । तद्व्रतं कृतवान् विप्रो विवाहोत्सुकमानसः ॥ व्रतस्य पूर्णतां कृत्वा विदेशे गतवान् द्विजः । मार्गे गच्छन् स विप्राग्र्यो ददर्श नगरं महत् ॥ प्रविश्य नगरं तत्र दृष्टवान् कौतुकाद् द्विजः । तत्र राजा महानासीत्तस्य कन्या स्वयंवरः ॥ तस्याः स्वयंवरार्थं हि मिलिताः सर्वभूभुजः । पणं चकार राजासौ कन्यायाश्च स्वयंवरे ॥ करेणुका रत्नमालां यस्य कण्ठेऽर्पयिष्यति । सर्वलक्षणसम्पन्ना तस्मै कन्या प्रदीयते ॥ स्वयंवरोत्सवं द्रष्टुं गतोऽसौ द्विजपुङ्गवः । तदा विधिवशात्सर्वान्नृपान्मुक्त्वा करेणुका ॥ तां मालां विप्रकण्ठे च समर्पयत दैवतः । वाद्यघोषेण विप्रोऽसौ प्रविष्टो राजसद्मनि ॥ यथोक्तविधिना बध्वा विवाहं कृतवान्नृपः । सम्प्राप्य राजकन्यां स जगाम स्वगृहं प्रति ॥ एकदा राजकन्या सा विस्मिता

प्रेमभावतः । उवाच मधुरं वाक्यं भर्तारं विप्रपु-
॥ ३३ ॥ ङ्गवम् ॥ केन पुण्यप्रभावेण प्राप्ता राजसुता त्वया ।
पथिकेन दरिद्रेण मार्गे बहु धनं यथा ॥ कथयामि स्ववृ-
त्तान्तं तव प्राप्तेश्च कारणम् । सोमवारव्रतेनैव प्राप्ता
त्वं राजकन्यके ॥ व्रतप्रभावं सा ज्ञात्वा चक्रे व्रतमनु-
त्तमम् । मानसं पुत्रमिच्छन्ती राजकन्या वृषध्वजात् ॥
व्रते सम्पूर्णतां याते शिवोऽदान्मानसं सुतम् । दीर्घायुः
कुलवान् ज्ञानी गुणवान् रूपवान् शुचिः ॥ दान्तः क्षमी च
शूरश्च पुण्यशीलः प्रतापवान् । एतादृशं सुतं प्राप्य मानसं
वृषभध्वजात् ॥ स्वमातरमुवाचाथ पुत्रस्तु विनयान्वितः ।
केन पुण्यप्रभावेण पुत्रप्राप्तिस्तवानघे ॥ मातापुत्रमुवाचेदं
कारणं तु शिववृतम् । पुत्रस्तु मातरं प्राह ह्यस्ति मे राज्य-
कामना ॥ तत्र राज्ञःसुतो नासीत्कन्या चैका शुभानना ।
तां कन्यां यौवनप्राप्तां दृष्ट्वाऽथ वरवर्णिनीम् ॥ वरावलो-
कने यत्नमकरोन्नृपतिस्तदा । योग्यं वरमिमं दृष्ट्वा सर्व-
लक्षणलक्षितम् ॥ प्रधानं प्रेषयित्वा तु वरमानीतवान् प्रभुः ।
विवाहमकरोद्राजा महोत्सवपुरःसरम् ॥ सा कन्या विधिना
दत्ता स्वराज्येन समन्विता । दत्वा राज्यं तु जामात्रे गतो
राजा तपोवनम् ॥ राज्यं चकार जामाता प्रजापालन-
तत्परः । सोमवारवृतेनैव राज्यं प्राप सुदुर्लभम् ॥ सम्पू-
र्णवृतसङ्कल्पस्तस्य राज्ञो महात्मनः । सोमवारः सप्तदशः
सम्प्राप्तस्तद्दिने तदा ॥ उवाच राजा स्वां पत्नीं वृतस्य विधि-
मुत्तमम् । गोधूमपिष्टं पादोर्ध्वं चतुःशेटकमानतः ॥ गृहीत्वा
भर्जयेदग्नौ कृत्वाङ्गारत्रयं शुभे । तस्य चूर्णं पुनः कृत्वा घृते-
५ न गुडसंयुतम् ॥ शिवालये च तच्चूर्णं शीघ्रं प्रेषय कामि-
नि । इति भर्तृवचः श्रुत्वा विस्मिता राजकन्यका ॥ एत-

स्मिन् क्रियमाणे तु राज्ञामनुचितं भवेत् । इत्थं विचार्य
॥ ३४ ॥ मनसि कथं कार्यं मयाधुना ॥ ततश्च राजपत्नी तु पूजापात्रे
निधाय च । रौप्यमुद्राः पञ्चशतं प्रेषितास्तु शिवालये ॥
ज्ञात्वा स्वव्रतभङ्गं तु रुष्टोऽभूच्चन्द्रशेखरः । स्वप्नमध्ये तदा-
ऽऽगत्य शिवो राजानमब्रवीत् ॥ तव पत्न्या महाराज व्रत-
भङ्गः कृतो मम । व्रतभङ्गाद्राज्यनाशो भविष्यति न
संशयः ॥ त्यज भार्यां महाराज कुरु राज्यस्य रक्षणम् ।
ततः प्रबुद्धो राजा तु प्रातराहूय मन्त्रिणम् ॥ तेन साकं
विचार्याथ प्रधानो नृपमब्रवीत् । राज्यमस्याः पितुः प्राप्तं
पत्नीत्यागो हि गर्हितः ॥ इति तस्य वचः श्रुत्वा राजाऽभू-
च्चिन्तयान्वितः । पुनस्तथा शिवाज्ञप्तः प्रधानं वाक्यमब्रवीत् ॥
उचितस्त्याग एवास्या नोचेद्राज्यं विनश्यति । इत्थं द्वाभ्यां
विनिश्चित्य त्यक्ता सा राजकन्यका ॥ निष्कासिता बहिः
सा तु नगराच्च वनं गता । शोचन्ती दीनवदना एकासी-
त्पादचारिणी ॥ भ्रमन्ती वनमध्ये सा ददर्श नगरं ततः ।
तत्र गत्वा च वृद्धस्त्रीगृहे वासं चकार ह ॥ वृद्धस्त्री तामु-
वाचेदमापणे गच्छ भामिनि । विक्रयं तन्तुपुञ्जस्य कृत्वा
मौल्यं समानय ॥ तद् गृहीत्वा गता मार्गे महावात्या
समागता । हृत्वा कराद्राजपत्न्यास्तन्तुपुञ्जं वियद्गतम् ॥
तद्गृहं पुनरागत्य दीना तूष्णीमवस्थिता । ज्ञात्वा सा
जरठा सर्वमितो गच्छेति चाब्रवीत् ॥ तद्गृहादागता
साध्वी तैलकारस्य वेश्मनि । तैलपूर्णाः पञ्चकुम्भा भग्ना-
स्तद्दर्शनात्तदा ॥ उवाच तां तैलकार इतो गच्छ कृपां कुरु ।
तेन निष्कासिता सा तु नदीतीरं समागता ॥ सा नदी
निर्जला जाता गहना कर्मणो गतिः । वने वासं चकाराथ
दुःखेन च महावृता ॥ इतस्ततो भ्रमन्ती च सा ददर्श सरोव-

वरम् । नानापक्षिगणैर्युक्तं नानावृक्षोपशोभितम् ॥ कुमुदोत्पलकल्हारैः शोभितं जलपूरितम् । तस्या दर्शनमात्रेण
॥ ३५ ॥ तज्जले कृमयोऽभवन् ॥ गोभिः सह समायाता गोपास्तस्मिन् सरोवरे । तज्जलं पातुकामास्ते ददृशुस्ते जले कृमीन् ॥ तत्र दृष्ट्वा राजपत्नीमूचुस्ते गोपबालकाः । अस्या दर्शनमात्रेण कीटा जाताः सहस्रशः ॥ इति कोलाहलो जातो गोपबालैः कृतस्तदा । कोलाहलमुपश्रुत्य जटिलः कश्चिदागतः ॥ शिवालये सुखासीनो नातिदूरं शिवालयम् । गृहीत्वा राजपत्नीं तां जटिलोऽगाच्छिवालयम् ॥ दीनामश्रुमुखीं भीतां दृष्ट्वोवाच कृपामनाः । निःशङ्कं राजपुत्रि त्वं वासं कुरु ममाश्रमे ॥ कन्यासमं पालयिष्ये दत्वाऽन्नाच्छादनं तव । श्रुत्वा वाक्यं कृपायुक्तमुवास कृपणा सती ॥ सर्वं चकार दासीवत्सेकसंमार्जनादिकम् । दुःखमीदृक् तया प्राप्तं व्रतभङ्गाच्छिवस्य च ॥ राजपत्न्याः करस्पर्शान्नदीशुष्का जलेष्वपि । अभवन् कीटका नित्यमीश्वरक्षोभकारणात् ॥ इत्यद्भुततमं दृष्ट्वा जटिलो विस्मितोऽभवत् । अस्याः शरीरे पापानां बाहुल्यं वर्तते ध्रुवम् ॥ तत्पापपरिहारार्थमनुष्ठानं करोम्यहम् । इति सञ्चिन्त्य मनसा शिवमन्त्रं जजाप सः ॥ जपानुष्ठानमात्रेण प्रसन्नोऽभूत्सदाशिवः । वरं ब्रूहि महायोगिन् किं ते मनसि वर्तते ॥ इत्युक्तः शङ्करेणाशु प्रार्थयामास वै जटी । अनया किं कृतं पापं तद्वदस्व सदाशिव ॥ शिव उ० ॥ शिवयोगिन् सोमवारव्रतभङ्गस्तया कृतः । तेन दोषेण महता दुःखिता राजकन्यका ॥ तद्दोषपरिहारार्थं सोमवारव्रतं शुभम् । कर्तव्यमनया शीघ्रं मम सन्तोषकारकम् ॥ व्रतस्याचरणाद्योगिन् भविता पापसङ्क्षयः । अचिरेणैव

कालेन स्वभर्त्तारमुपैष्यति ॥ इत्युक्त्वा जटिलं शम्भुः कैलासं
॥ ३६ ॥ गतवान् प्रभुः । ततः सम्बोधिता तेन जटिलेन कृपालुना ॥
सोमवारव्रतं चक्रे भक्त्या परमया युता । व्रतप्रभावा-
त्सञ्जाता भर्तुस्तस्याः स्मृतिस्तदा ॥ मम पत्नी राजकन्या
क्व गता पादचारिणी । सिंहव्याघ्रादिभिर्दुष्टैर्भक्षिता
वा मृता सती ॥ वने वा नगरे ग्रामे अस्ति वा यत्र
कुत्रचित् । अन्वेषणे ततो राज्ञा चाराः सम्प्रेषिता-
स्तदा ॥ ततः सर्वेषु देशेषु वनेषु नगरेषु च । चक्रुस्ते मार्गणं
तस्या दिवानिशमतन्द्रिताः ॥ भ्रमित्वा सर्वदेशेषु परि-
श्रान्ताः सुदुःखिताः । आगतास्ते ततश्चारा जटिलस्याश्रमं
प्रति ॥ तत्र दृष्ट्वा राजपत्नीं हर्षोद्भरितमानसाः । नम-
स्कृत्वाऽथ जटिलमूचुस्ते विनयान्विताः ॥ नृपाज्ञया त्विमां
नेतुमागताः स्म तवाश्रमम् । दातुमर्हसि योगीन्द्र राजपत्नीं
पतिव्रताम् ॥ इति चारवचः श्रुत्वा जटिलो वाक्यमब्रवीत् ।
नाहं दास्यामि युष्माकं राजपत्नीं कदाचन ॥ निवेदयत
राजानं स च युक्तं करोतु तत् । इति तस्य वचः श्रुत्वा
चारास्ते पुनरागताः ॥ राजानं कथयामासुःसर्वं वृत्तान्त-
मञ्जसा । जटिलस्याश्रमे राजन् वर्तते तव वल्लभा ॥
भवद्दर्शनमिच्छन्ती शिवाराधनतत्परा । तामानेतुं समा-
गच्छ त्वमेव नृपसत्तम ॥ योगिराजस्य राजेन्द्र दर्शनं
ते भविष्यति । इति चारवचःश्रुत्वा राजाऽभूद्धृष्टमानसः ॥
चाराणां वेतनं दत्वा कर्तव्यार्थं व्यचिन्तयत् । ततः
प्रधानमाहूय विचारं कृतवान्नृपः ॥ मया पत्नीं समानेतुं
गन्तव्यं भवता सह । इति निश्चित्य राजासौ निर्जगाम ततः
पुरात् ॥ जटिलस्याश्रमं गन्तुं सामात्यः सर्वसैनिकः ।
गत्वा तस्याश्रमं पुण्यं ददर्श जटिलं नृपः ॥ उवाच

वल्गुवाक्येन पवित्रोऽहं त्वयानघ । अद्य मे सफलं जन्म
॥ ३७ ॥ अद्य मे सफलं तपः ॥ अद्य मे सफलं तीर्थं सफलाश्च
मनोरथाः । दर्शनात्तव योगीन्द्र कृतकृत्योऽस्मि सर्वदा ॥
इति राज्ञो वचः श्रुत्वा प्रसन्नो जटिलस्तदा । पस्पर्श
स्वकरेणैव राजानं विनयान्वितम् ॥ पृष्ट्वा निरामयं सर्व-
मुक्तवान्नृपसत्तमम् । ज्ञातं मया महाराज तवागमनका-
रणम् ॥ मया तव प्रिया ह्येषा पालिता पुत्रिका समा ।
गृहाण पत्नीं सुभगां तव दर्शनमिच्छति ॥ पुत्रानुत्पाद्य
नीतिज्ञान् भुङ्क्ष्व भोगान्यथेप्सितान् । पुत्रे राज्यं समा-
धाय परं पदमवाप्स्यसि ॥ इत्युक्त्वा प्रददौ पत्नीं राज्ञस्तस्य
महातपाः । ततो नृपः प्रहृष्टात्मा पुरतः प्राञ्जलिः स्थितः ॥ पू-
जयामास जटिलं बहुमानपुरःसरम् । सुवर्णै रत्नमणिभिर्व-
स्त्रालङ्कारभूषणैः ॥ नमस्कृत्वा मुनीन्द्राय पत्नीं जग्राह
चादृतः । विनता राजकन्या सा ननाम चरणौ मुनेः ॥
गृहीत्वा तु मुनेराज्ञामाशिषं समवाप्य च । पृष्ट्वा सर्वा-
नाश्रमस्थानागता भर्तृसन्निधौ ॥ शिबिकां तां समारोप्य
ययौ स्वनगरं नृपः । प्रविवेश पुरं राजा हर्षेण महतान्वि-
तः ॥ ध्वजैर्हैमपताकाभिः काञ्चनैः कलशैस्तथा । मुक्ताजालै-
र्वितानैश्च तोरणैः समलङ्कृतम् ॥ सिक्तं चन्दनसेकाद्यैर्न-
रनारीसुशोभितम् । ततः स्वगृहमागत्य ब्राह्मणान्दक्षिणा-
दिभिः ॥ तोषयित्वा तथा पौरान् ताम्बूलैर्वस्त्रभूषणैः ।
बहु कालं तया रेमे यथा शच्या दिवस्पतिः ॥ राज्यं चकार
नित्यं च प्रजापालनतत्परः । भुक्त्वा भोगांस्तथा पुत्रा-
नुत्पाद्य कुलभूषणान् ॥ इष्ट्वा बहुविधैर्यज्ञैः कव्यैः स्तोष्य
पितॄनपि । पुत्रे राज्यं समास्थाय जगाम तपसे वनम् ॥
तस्मिन् शिवं समाराध्य प्राप्तवान् परमं पदम् । सूत

चाच ॥ इत्येतत्कथितं विप्रा व्रतानामुत्तमं व्रतम् । सुगुप्तं पुत्रदं सोमवारषोडशनामकम् ॥ धर्मकामार्थमोक्षाणां साधनं शिवतोषकृत् । एतद् व्रतं यः कुरुते सर्वान्कामानवाप्नुयात् ॥ पुत्रार्थी पुत्रमाप्नोति धनार्थी धनमाप्नुयात् । बहुना किमिहोक्तेन वन्ध्यापि लभते सुतम् ॥ एवं व्रतस्य महिमा कथितः सेतिहासकः । करोति व्रतकर्तारं शिवो भक्तं सदा शिवम् ॥ एतद् व्रतं या कुरुते च नारी भर्त्रा समेता रमते सुखेन । पुत्रान् समाप्नोति व्रतप्रभावादन्ते च मुक्तिं लभते ध्रुवं सा ॥ अश्वमेधेन यत्पुण्यं वाजपेयेन यद्भवेत् । कथाश्रवणमात्रेण तत्पुण्यं लभते नरः ॥ इत्येतत्कथितं विप्रा रहस्यं सविधानकम् । यस्यानुष्ठानमात्रेण कोटियज्ञफलं लभेत् ॥ इति श्रीषोडशसोमवारकथा समाप्ता ।

अथ प्राकृतकथा ।

श्रीगणेशाय नमः ॥ श्रीसाम्बसदाशिवाय नमः ॥ वैदर्भदेशीपरमपवित्र ॥ अमरावतीनामेंएकनगर ॥ तेथेंशिवालयमहाथोर ॥ जेंकाअपूर्वत्रिभुवनीं ॥ १ ॥ तेथें कोणेएकेवेळीं ॥ शिवपार्वतिएकस्थळीं ॥ उभयतायेवोनि देउळीं ॥ सहजस्थितीक्षणएक ॥ २ ॥ स्थळरमणीयदेखोनि ॥ पार्वतिह्मणेशूलपाणि ॥ सारिपाटमांडोनि ॥ खेळोंऐसेंवाटतसे ॥ ३ ॥ मगशिवह्मणेआवश्यक ॥ डावमांडिलासम्यक ॥ तेथेंगुरवपुजारीहोताएक ॥ तयाप्रतिगिरिजाकायबोले ॥ ४ ॥ ह्याडावकोणीजिंकिला ॥ सत्यसांगयेवेळा ॥ तवतोगुरवबोलिला ॥ शिवेंजिंकिलाह्मणोनि ॥ ५ ॥ मगदूसराडावमांडिला ॥ खेळतापार्वतीनेंजिंकिला ॥ अंबाह्मणेअसत्यगुरवबोलिला ॥ तरीतूंकोडीहोशील ॥ ६ ॥ असत्यबोलसीपापराशि ॥ वेगीघेईममशापासी ॥ कुष्ठहोई-

लसर्वांगासी ॥ विलंबयासोनलागे ॥७॥ यापरोगुरवशापुनी ॥ उभयतागेलोकैलासभुवनी ॥ गुरवपाहेअवलोकुनी ॥ तवअंगोचीकान्तिपालटली ॥८॥ गुरवमनोचिंताकरी ॥ हाजाईलकैशापरी ॥ कोडआंगीदुःखकरी ॥ कवणउपाययासी ॥ ९ ॥ तंवतेथेअप्सरासुंदरी ॥ घेवोनिपूजासामुग्री ॥ पूजावयाशिवगौरी ॥ देउळाभीतरींपातली ॥१०॥ तिणेंपाहिलेंगुरवातें ॥ तुजकोडजाहलेंकवण्याअर्थें ॥ गुरवबोलेभयभीतचित्तें ॥ गिरिजेनंमजशापिलें ॥११॥ हेंऐकोनिअप्सरासुंदरी ॥ ह्मणेगुरवातूंचिंतानकरी ॥ सोळासोमवारव्रतनिर्धारी ॥ करितांव्यथाजाईल ॥१२॥ मगतोउठोनिपुजारी ॥ करजोडोनिविनंतीकरी ॥ मातेहंव्रतभ्रडकरी ॥ मजउकलोनिसांगिजे ॥ १३ ॥ अप्सराह्मणेअवधारीं ॥ तूंसोमवाराचेंव्रतकरीं ॥ दिवसाअसावेंनिराहारी ॥ सायंकाळपावेतों ॥ १४ ॥ मगत्यादिवशींसायंकाळीं ॥ सांगपूजावाचंद्रमौळी ॥ धूपदीपइत्यादिसकळीं ॥ षोडशोपचारें पूजावा ॥ १५ ॥ मगअर्धशेरकणिकघेइंजे ॥ त्याचेभागअंगारेतीनकीजे ॥ घृतगुळेंसहितभक्षिजे ॥ लवणारहितजाणपां ॥ १६ ॥ ऐसेंसोळासोमवारव्रत ॥ चालविजेयथास्थित ॥ हेंजाहलियासमाप्त ॥ सत्रावेसोमवारींकरावें ॥ १७ ॥ कणिकघेइंजेपांचशेर ॥ त्याचेभागअंगारेसमग्र ॥ घृतगूळेंसींपरिकर ॥ चुर्मातयांचाकरावा ॥ १८ ॥ तोचुर्मादेउळींन्यावा ॥ भावेंचंद्रमौळीपूजावा ॥ तिसराभागअर्पावा ॥ सदाशिवासीतेंधवां ॥ १९ ॥ दुसराभागदेउळीं वांटिजे ॥ उरलाएकघराआणिजे ॥ तोआपणस्वतःभक्षिजे ॥ कुटुंबासमवेतआदरं ॥ २० ॥ अप्सराह्मणेअवधारीं ॥ गुरवाहेंव्रततूंभावेंकरीं ॥ कुष्ठजाईलनिर्धारीं ॥ सत्यस-

त्यन्निवाचा ॥ २१ ॥ ऐकतांगुरवघरिताजाहला ॥ अंतःकरणापासोनिआचरला ॥ पूर्वदशाअंगपावला ॥ समासिद्धोतांकुष्ठजाय ॥ २२ ॥ याउपरीएकेदिनीं ॥ ईश्वरपार्वतीमिळोनी ॥ फिरतफिरतमागुत्यानी ॥ त्याचदेउळींपातली ॥२३॥ पूर्वींगुरवासीशापदीधला॥ तेंस्मरणजालेंपार्वतीला ॥ साक्षेपेंपाहेगुरवाला ॥ तंवकुष्ठअंगींदिसेना ॥ २४ ॥ पार्वतीपुसेगुरवाप्रती ॥ तुझेंकुष्ठगेलेंकवणेरीतीं ॥ येरुबोलेयथार्थनिगुती ॥ श्रेष्ठव्रतासीआचरलों ॥ २५ ॥ सोळासोमवारव्रतकरोनी ॥ तोषविलींशिवमत्रानी ॥ त्याचियेकृपावलोकुनीं ॥ आंगींचेंकुष्ठलोपलें ॥ २६ ॥ उमाएकोनीआश्चर्यकरी ॥ एवढीयाव्रताचिथोरी ॥ मीहेंव्रतआचरीननिर्धारी ॥ षण्मुखरुसलाह्मणोनियां ॥२७॥ मगहिमनगजाव्रतआचरो॥पूर्णव्रताचेअवसरी ॥ स्वामीकार्तिकमनींविचारी॥ मातेसीरुसणेंअयोग्य ॥ २८ ॥ स्वामीउठोनीतत्काळीं ॥ धांवोनिआलामातेजवळी ॥ पाहोनिउमासंतोषली ॥ आनंदचित्तींनसमाये ॥ २९ ॥ स्वामीबोलेजननीसी ॥ माझेमनींनराहावेंतुजपासीं ॥ ह्मणोनिअसतांअरण्यवासी॥ दिवसकांहींलोटले ॥३०॥ आतांउद्भवलीकल्पना॥ जावेंमातेच्यादर्शना ॥ ऐसोव्हावयामनकामना ॥ कारणकायसांगिजे ॥ ३१ ॥ मगशैलजाह्मणेपुत्रश्रेष्ठा ॥ सोळासोमवारींधरिलीनिष्ठा ॥ तेणेंतुजजाहलीउत्कंठा ॥ माझेभेटीचोसत्यपैं ॥ ३२ ॥ ऐकोनिव्रताचेंमहिमान ॥ स्वामीबोलेस्वयेंआपण ॥ जननोव्रतहेंमीकरीन ॥ कामनाचित्तींचीसांगतों ॥ ३३ ॥ माझामित्रएकब्राह्मण ॥ देशांतरागेलाबहुतदिन ॥ त्याचीभेटीव्हावयालागुन ॥ इच्छापोटींवसतसे ॥ ३४ ॥ याउद्देशेंस्वामीकार्तिक ॥ व्रतआरंभि-

तदेख ॥ संपूर्णहोतांतात्काळिक ॥ फळाधीशपावला ॥३५॥
॥४१॥ रम्यवनींसहजगती ॥ स्वामीनेदेखिलापंथीं ॥ मित्रबोळ-
खोनिब्रह्ममूर्ती ॥ अष्टांगभावेंभेटला ॥ ३६ ॥ विप्रन-
वलकरीचित्ता ॥ स्वामीप्रतिह्मणेयपुसता ॥ तुह्मीआह्मी-
मार्गीचालतां ॥ भेटीउभयतांनवलहें ॥ ३७ ॥ मित्रा-
सिह्मणेधिवसुत ॥ मीव्रतआचरलोंअद्भुत ॥ तेणेंतुझीभे-
टीसत्य ॥ अकस्मातपैंजाहली ॥ ३८ ॥ द्विजह्मणेचमत्का-
रव्रताचा ॥ तरीमीकरीनकायावाचा ॥ मजस्वार्थआहे-
लग्नाचा ॥ ह्मणोनिमजसांगिजे ॥ ३९ ॥ शिवसुतसांगे-
यथायुक्ती ॥ तेंचिब्राह्मणधरीचित्तीं ॥ व्रतचालवीयथा-
निगुती ॥ विदेशींगमनकरीतसे ॥ ४० ॥ व्रतहोतांचिसं
पूर्ण ॥ विचित्रकर्माचीगतीगहन ॥ मार्गीएकनगरशोभा-
यमान ॥ रम्यअपूर्वदेखिलें ॥ ४१ ॥ तेथीलराजापुण्य-
पवित्र ॥ त्यासिएककन्यासुंदर ॥ तिचेंमांडिलेंस्वयंवर ॥
पणदुर्धरकरोनी ॥ ४२ ॥ मिळालेराजेअतिअद्भुत ॥
अठरावर्णादिसमस्त ॥ तयांमाजीद्विजतोतेथ ॥ तेंकौ-
तुकपाहूंपातला ॥ ४३ ॥ रायेंहस्तिनीश्रृंगारुनी ॥ तिचे-
सोंडीमाळदेउनी ॥ यथाविधीकरोनी ॥ मंडळामाजीसो-
डिली ॥ ४४ ॥ तीहस्तिनीफिरतफिरत ॥ आलीजेथेंद्वि-
जनाथ ॥ गळांमाळघालोनित्वरित ॥ निजमस्तकींबैस-
विला ॥४५॥ पाहोनिराजाआनंदघन ॥ सुखसोहळालग्न-
विधान ॥ करूनिवधुवरेंदोघेंजण ॥ स्वगृहासीबोळविलीं ॥
॥ ४६ ॥ उभयतांएकचित्तेंकरोनी ॥ नांदतअसतांआपु-
लेसदनीं ॥ प्रभुत्वपावलीराजनंदिनी ॥ पूर्ववृत्तांतजाण-
विला ॥ ४७ ॥ एकांतस्थळींसमाधानी ॥ उभयतांअसतां-
सुखसदनीं ॥ निवांतसमयपाहोनी ॥ राजकन्याप्रश्न-

६

करी ॥ ४८ ॥ मार्गस्थअसतांद्विजोत्तमा ॥ मीकैसेनि-
प्राप्तजाहलेंतुम्हां ॥ कोणत्यासुकृताचामहिमा ॥ हेंमजला-
गींसांगिजे ॥ ४९ ॥ द्विजह्मणेऐकसाचार ॥ व्रतकेलेंसो-
ळासोमवार ॥ त्यापुण्येंमजसुंदर ॥ भार्याप्राप्तजाहलीस ॥
॥ ५० ॥ राजकन्याआश्चर्यकरी ॥ व्रतऐकिलेंनवलपरी ॥
हेंआचरोनिनिर्धारीं ॥ चमत्कारपाहूंयाचा ॥ ५१ ॥ घरों-
निपुत्रार्थीकामना ॥ व्रतआरंभिलेंजाणा ॥ संपूर्णहोतां-
पुत्ररत्ना ॥ सदाशिवकृपेंपावली ॥ ५२ ॥ शतायुषीआ-
णिशुचिष्मंत ॥ ज्ञानीअनुभवीविरक्त ॥ पुण्यशीलप्रताप-
वंत ॥ पितृसेवेसीसादरजो ॥ ५३ ॥ आज्ञापालकपुत्रजा-
हला ॥ देखोनिद्विजसंतोषला ॥ ह्मणेव्रताचाप्रतापआ-
गळा ॥ तोमजवर्णिलानवजाय ॥ ५४ ॥ पुत्रज्ञानदशेसी-
येतां ॥ मातेलागींहोयपुसता ॥ मीसर्वगुणसंपन्नतत्वतां ॥
प्राप्तकैसेनीतुम्हांतें ॥ ५५ ॥ माताह्मणेपुत्रराया ॥ उत्तम-
शिवव्रतकरोनियां ॥ शूलपाणीतोषवूनियां ॥ मनकामना-
पुरविली ॥ ५६ ॥ पुत्रह्मणेमातेलागुनी ॥ हेंव्रतसांगेंकृ-
पाकरोनी ॥ भक्तिभावेंआचरोनी ॥ कामनापूर्णव्हावया
॥ ५७ ॥ माझेमनींचाइत्यर्थ ॥ राज्यासनींबैसावेंत्वरित ॥
क्लेशरहितदुःखरहित ॥ कांहींसायासनकरितां ॥ ५८ ॥
मातेसीपुसोनिव्रताविचार ॥ यथोक्तआचरेद्विजवर ॥
तंवएकेनगरींराजाथोर ॥ वृद्धापकाळतयाचा ॥ ५९ ॥
तयासीपोटींपुत्रसंतान ॥ नसतांएककन्यारत्न ॥ तिजला-
गींतोब्राह्मणनंदन ॥ वरविचारूनेंमिळा ॥ ६० ॥ कन्या-
अर्पोनिसाचार ॥ विधियुक्तकेलेंस्वयंवर ॥ राज्यदेवोनीं-
समग्र ॥ पदींआपुलेनेमिला ॥ ६१ ॥ ब्राह्मणराज्यकरूंला-
गला ॥ व्रतसंकल्पपूर्णजाहला ॥ तंवसतरावासोमवार-

आला ॥ स्त्रियेसीसांगूनपाठविलें ॥ ६२ ॥ कणिकपांच-
शेरघेउनी ॥ त्याचेतीनआंगारेकरूनी ॥ तुपगुळाचाचुर्मा-
करोनी ॥ सत्वरदेउळींपाठवीजे ॥ ६३ ॥ तिणेंऐकोनीसमा-
चार ॥ म्हणेएवढाराजाथोर ॥ देउळीचुर्मानेतांविचार ॥
थोरपणाकैंचेनिवाढे ॥ ६४ ॥ पांचशेंरुपयेतबकीं भरोनी ॥
पाठविलेदेउळालागोनी ॥ तेणेंव्रतभंगलेंतत्क्षणीं ॥ शूलपा-
णीक्षोभला ॥ ६५ ॥ शिवम्हणेराजाला ॥ तुम्हेस्त्रीनेव्रत-
भंगकेला ॥ राज्यालागींक्षयआला ॥ प्रत्ययायेईलतुज-
लागीं ॥ ६६ ॥ तूंयास्त्रियेसीघरीठेवितां ॥ सर्वक्षयहोईल-
तत्वतां ॥ तुजराज्यरत्निणेंआतां ॥ तरीस्त्रीससर्वथाठेवूं-
नको ॥ ६७ ॥ मगबोलेप्राचीनप्रधान ॥ तिचेबापाचेंरा-
ज्यअसोन ॥ तिसीद्यावेंकाढोन ॥ हेंतवनिंद्यआम्हांतें ॥
॥ ६८ ॥ ईश्वरबोलेप्रधानासी ॥ तरीतूंहोशीलअधमरा-
शी ॥ राज्यबुडेलनिश्चयेंसीं ॥ स्त्रियेसीघरीठेवितां ॥६९॥
मगउभयवर्गींविचारकरोनी ॥ राजकन्यादीधलीकाढोनी ॥
तीचाललीदीनवदनी ॥ बहुतखेदकरीतची ॥ ७० ॥
दुःखीतमानसींचिंताक्रांत ॥ चरणींचाललीदूरपंथ ॥ नगर-
देखिलेंअकस्मात ॥ माजीसुंदराप्रवेशली ॥ ७१ ॥ दुर्बळ-
म्हातारीचेघरीं ॥ तेथेंराहिलीकुमारी ॥ म्हातारीम्हणेएक-
नारी ॥ एककार्यतुजप्रतीसांगतें ॥ ७२ ॥ चिवटेंआणावीं-
विकोनी ॥ तुजमीकांहीदेईनसाजणी ॥ अवश्यम्हणोनि-
राजनंदिनी ॥ चिवटेंविकूंनिघूंलागे ॥ ७३ ॥ शिरींचिवटें-
ठेविलींबांधोन ॥ अकस्मातअद्भुतप्रभंजन ॥ वारियानें-
चिवटेंगेलींउडोन ॥ आलीपरतोनघरासी ॥ ७४ ॥ म्हाता-
रीसम्हणोंलागली ॥ कींचिवटेंअवघींउडालीं ॥ मगम्हाता-
रीकायबोलिली ॥ तूंजायशीघ्रयेथोनी ॥ ७५ ॥ तेथूनरा-

णीचालली ॥ तेलियाचेघरींराहिली ॥ तेथेंहीहोणारगती-
जाहली ॥ तेचतुरींपरिससिजे ॥ ७६ ॥ चारघागरीभरोनि
तेलियानें ॥ ठेविल्याहोत्यातेलानें ॥ तिणेंपाहतांरितेपणें।
तेलअवघेंउडालें ॥ ७७ ॥ मगतेलीह्मणेभडकरी ॥ तूंजा-
यआतांकृपाकरीं ॥ तूंअसतांआह्मीभिकारी ॥ होऊंऐसें-
वाटतसे ॥ ७८ ॥ तेलीमनींआश्चर्यकरी ॥ तेलउडालेंकैशा-
परी ॥ हीबाईयेतांचघरीं ॥ इच्यानेंनाहींसेंदिसतसे ॥७९॥
तेलियानेंबाहेरघातली ॥ तीनदीतीराचालली ॥ तंवन-
दीसर्वआटोनिगेली ॥ पापयोगेंजाणपां ॥ ८० ॥ मगती-
हिंडेवनांत ॥ तंवसरोवरदेखिलेंअकस्मात ॥ जलनिर्मळउ-
चंबळत ॥ पोहूनसन्निधपातली ॥ ८१ ॥ दृष्टीपडतांजलाव-
र ॥ माजीकिडेपडलेसमग्र ॥ आसमंतींचेगुराखीसत्वर ॥
गाईआणितीजलप्राशनार्थ ॥ ८२ ॥ गोपाळजलप्राशनक-
रिती ॥ तंवकिडेदेखिलेअवचितीं ॥ तेहीजलत्यागुनीजा-
ती ॥ किडेपडिलेह्मणोनी ॥ ८३ ॥ गोसावीराहतहोताव-
नीं ॥ तोआलाउदकालागुनी ॥ एकटीपाहूनिराजनंदिनी ॥
घेऊनिगेलाआश्रमा ॥ ८४ ॥ गोसावीबोलेतिजलागून ॥
तूंमजलागींकन्येसमान ॥ तुजनाहींअन्नवस्त्राचीवाण ॥
स्वस्थचित्तेंरहावें ॥ ८५ ॥ मगतेथेंराहिलीसुंदरी ॥ घरधं-
दासर्वकरी ॥ व्रतभंगाचीऐसीथोरी ॥ नानादुःखभोगवी-
तसे ॥ ८६ ॥ अन्नोदकासीहातलागतां ॥ त्यामाजीकिडे-
होतीतत्वतां ॥ पाहोनिगोसावींचित्ता ॥ आश्चर्यकरूंला-
गला ॥ ८७ ॥ आतांकवणउपायकरावा ॥ इचेपदरींकोण-
दोषजाणावा ॥ काहींएकयत्नकरावा ॥ जेणेंपरिहारहोईल
॥ ८८ ॥ मगआरंभिलेंअनुष्ठान ॥ तेणेंशिवजाहलाप्रसन्न ॥
मागह्मणेवरदान ॥ जीकांअपेक्षातुझेमनीं ॥ ८९ ॥ मग-

गोसावीविनवीईश्वरास ॥ इचेपदरींकायआहेदोष ॥
॥ ७५ ॥ तोमजसांगिजेअवश्य ॥ कृपाकरोनीस्वामिया ॥ ९० ॥
शिवह्मणेसोळासोमवारव्रत ॥ इणेंभंगिलेंमाझेंसत्य ॥
त्यादोषास्तवदुःखप्राप्त ॥ दशाऐसीजाणपां ॥ ९१ ॥
गोसावीह्मणेउमापती ॥ तूंकृपाळुहोउनोनिश्चिती ॥ दोष-
परिहारोनीमहासती ॥ पूर्वस्थितिंकरावी ॥ ९२ ॥ शिव
ह्मणेसोळासोमवारकेलिया ॥ इचेदोषपावतीललया ॥ ही-
निर्दोषहोऊनियां ॥ आपुल्यास्वामीसभेटेल ॥ ९३ ॥ ऐसें-
बोलोनिशूलपाणी ॥ गेलाआपुलियास्थानीं ॥ व्रतकरिती-
जाहलीकामिनी ॥ कांहींएकदिवस ॥ ९४ ॥ तंवतिचे-
भ्रतारासी ॥ स्मरणझालेंबहुतांदिवशीं ॥ स्त्रीकोठेंअसेल-
वनवासी ॥ शोधतिचाकरावा ॥ ९५ ॥ देशोदेशींहेरपाठ-
विले ॥ हिंडतहिंडतत्यावनासीआले ॥ त्यांनींराजस्त्रियें-
तेंओळखिलें ॥ मागोंलागलेगोसावियासी ॥ ९६ ॥ तोकां-
हींनबोलेवचन ॥ हेरगेलेपरतोन ॥ राजापाशींवर्तमान ॥
सांगतांराजाहर्षला ॥ ९७ ॥ आपणआणिप्रधान ॥ दोघे-
चालिलेनलगतांक्षण ॥ थोरसमारंभेंयेऊन ॥ गोसावीन-
मिलासाष्टांगीं ॥ ९८ ॥ परस्परेंप्रेमालिंगन ॥ वस्त्रेंभूषणें-
देऊन ॥ मृदुभाषणेंसमाधान ॥ योगीश्वरतोषविला ॥ ९९ ॥
ह्मणेराजेंद्राअवधारीं ॥ माझीकन्याहेनिर्धारीं ॥ आज-
वरोपाळिलीमीमाहेरीं ॥ आतांतूंहीपाळिजे ॥ १०० ॥
ऐसेंबोलोनितेअवसरीं ॥ सतीदीधलीराजाचेकरीं ॥ राजा-
उठोनिनमस्कारी ॥ गोसावियासीतेधवां ॥ १०१ ॥ आ-
पुलीस्त्रीहातींधरोनी ॥ बैसविलीसुखासनीं ॥ आपणतुरं-
गींआरुढोनी ॥ निजनगरापरतले ॥ १०२ ॥ वाजतगाज-
तआपुल्यास्थळा । येवोनिमहोत्सवकेला ॥ दानदक्षिणा-

तेवेळां ॥ देऊनब्राह्मणतोषविले ॥ १०३ ॥ राजाराणीचीभेटजाहली ॥ आनंदेंराज्यकरूंलागलीं ॥ सकळप्रजाआनंदपावली ॥ महिमाअगाधनेणवे ॥ १०४ ॥ ऐसेंजोव्रतकरीलवरिष्ठ ॥ त्यासीकृपाळूहोऊनिनीलकंठ ॥ दोषदरिद्रक्लेशसंकट ॥ निवारीलक्षणार्धें ॥ १०५ ॥ जोकोणीमनकामनाधरून ॥ आदरेंव्रतकरीलसंपूर्ण ॥ त्याचेमनोरथहोतीलपूर्ण ॥ शिवकृपेनेंसत्यत्वें ॥ १०६ ॥ ह्मणेराघवव्यंकटेशसाचार । मजसीजाहलाचमत्कार ॥ भावधरित्यासाचार ॥ सर्वकामनासिद्धहोती ॥ १०७ ॥ आरोग्यवृद्धिआणिधन ॥ पुत्रपौत्रकन्यारत्न ॥ इच्छिलीइच्छापरिपूर्ण ॥ व्रतकरितांपावेल ॥ १०८॥ सोळासोमवारकथाअनेक ॥ श्रवणपठणकरतीदेख ॥ त्यांसिप्रसन्नउमानायक ॥ निःसंशयजाणपां ॥१०९॥ श्रीव्यासविनवीश्रोतयांप्रती ॥ हीकथापूर्वापारनिश्चिती ॥ नूतननव्हेकवणकल्पिती ॥ चतुरींसत्यजाणिजे ॥११०॥ इति श्रीसोळासोमवारकथा संपूर्णा ॥ श्रीशंकरार्पणमस्तु ॥ श्लोक ॥ विभूतीच्यालेपेंशरिरअवघेंशुभ्रविलसे ॥ स्मशानींजोराहेकटिंरुचिरव्याघ्रांबरदिसे ॥ स्वभावेंनिर्वाणीसुरवरमुनीज्यासिजपती ॥ अशाशंभोध्याहोसकळतुमचेअर्थपुरती ॥ १ ॥

॥ श्रीसांबसदाशिवार्पणमस्तु ॥

॥ अथ शिवामुष्टिव्रतविधिः ॥

विवाहानन्तरमाद्ये श्रावणे प्रतिसोमवासरे शिवामुष्टिव्रतं पञ्चवर्षपर्यन्तं स्त्रीणां विहितम् । तत्र प्रातर्नद्यादौ स्नात्वा शिवालय गत्वा पूजनं कुर्यात् ॥ अथ पूजाविधिः— आचम्य, देशकालौ स्मृत्वा मम अवैधव्यपुत्रपौत्राद्यैहिक-

नानाविधभोगप्राप्तिपूर्वकशिवलोकप्राप्तिद्वारा मयाऽऽचरितशिवामुष्टिव्रताङ्गभूतं श्रीउमामहेश्वरप्रीत्यर्थं यथामिलितोपचारद्रव्यैः तण्डुलादिधान्यसमर्पणपूर्वकं उमामहेश्वरपूजनं करिष्ये ॥ इति सङ्कल्प्य, ओंनमः शिवाय शान्ताय पञ्चवक्त्राय शूलिने । नन्दिभृङ्गिमहाकालगणयुक्ताय शम्भवे॥ इति मन्त्रेण गन्धैः पुष्पैर्धूपैर्दीपैर्नानाविधैर्नैवेद्यैश्च तण्डुलादिधान्यानां सार्धमुष्टिं च कर्कटीनारिकेलादिफलैः सह समर्प्य सम्पूजयेत् । अनेन पू० श्रीउमा० प्रीयेताम् ॥ समर्पणीयधान्यानि तु प्रथमे सोमवासरे रौप्यमयतण्डुलसहिताः शालितण्डुलाः । द्वितीये, सुवर्णमययवैस्तिलैर्वा सहिता यवास्तिला वा । तृतीये, सुवर्णमयगोधूमसहिता गोधूमाः । चतुर्थे, सुवर्णमयमुद्गसहिता मुद्गाः ॥ प्रतिवर्षमेवं कुर्यात् । ततो ब्राह्मणान् सम्भोज्य स्वयं मौनेन भुञ्जीयात् ॥

अथ विवाहानन्तरमाद्ये श्रावणे प्रथमे भौमवारे मङ्गलागौरीव्रतग्रहणसङ्कल्पः । भर्ता पत्न्या सहोपविश्य, आचम्य प्राणा०मम सपत्नीकस्य पुत्रपौत्राद्यैहिकनानाविधभोगप्राप्तिपूर्वकावैधव्यप्राप्तये च श्रीगौरीलोकप्राप्त्यर्थं पञ्चवर्षपर्यन्तं मङ्गलागौरीव्रतग्रहणं करिष्ये॥ प्रथमे वत्सरे मातुर्गेहे कर्तव्यमेव च। ततो भर्तृगृहे कार्यमवश्यं स्त्रीभिरादरात् ॥ पञ्चमे वत्सरे प्राप्ते कुर्यादुद्यापनं शुभे॥

॥ अथ मङ्गलागौरीपूजाविधिः ॥

आचम्य, देशकालौ स्मृत्वा हस्तेऽक्षतोदकं गृहीत्वा, ममेह जन्मनि जन्मान्तरे च पुत्रपौत्रादिवृद्ध्येऽवैधव्या-

युरारोग्यैश्वर्याद्यभीष्टसकलसिद्ध्यर्थं श्रीमङ्गलागौरी-
देवताप्रीत्यर्थं मयाऽऽचरितपञ्चवर्षात्मकमङ्गलागौरीव्रता-
ङ्गत्वेन विहितं यथामिलितोपचारैः श्रीमङ्गलागौरीपूजन-
महं करिष्ये। आदौ निर्वि० महागणपतिपू० कलशघण्टा-
पूजनं च करिष्ये ॥ श्रीमहागणपतये० इति सम्पूज्य।
वक्रतुण्ड० इति प्रार्थयेत्। अनया० महा० प्रीयताम्।
कलशस्य०। वरुणाय० गन्धपु०। आगमार्थं तु०। घण्टा-
देव्यै० गन्ध० ॥ अपवित्रः० कलशोदकेन पूजासम्भारान्
प्रोक्ष्य, ध्यायेत्। कुङ्कुमागरुलिप्ताङ्गां सर्वाभरणभूषि-
ताम्। नीलकण्ठप्रियां गौरीं वन्देऽहं मङ्गलाह्वयाम् ॥
श्रीमङ्गलागौर्यै नमः मङ्गलागौरीं ध्यायामि। अत्रागच्छ
महादेवि सर्वलोकसुखप्रदे। यावद् व्रतमहं कुर्वे पुत्र-
पौत्रादिवृद्धये ॥ श्रीमङ्गलागौर्यै० आवाह० ॥ रौप्येण
चासनं दिव्यं रत्नमाणिक्यशोभितम्। मयाऽऽनीतं
गृहाण त्वं गौरि कामारिवल्लभे ॥ आसनं० ॥ गन्धपुष्पा-
क्षतैर्युक्तं पाद्यं सम्पादितं मया। गृहाण पुत्रपौत्रादीन्
सर्वान् कामांश्च पूरय ॥ पाद्यं०। गन्धपुष्पाक्षतैर्युक्तमर्घ्यं
सम्पादितं मया। गृहाण मङ्गले गौरि प्रसन्ना भव सर्वदा ॥
अर्घ्यं०। कामारिवल्लभे देवि कुर्वाचमनमम्बिके। निर-
न्तरमहं वन्दे चरणौ तव पार्वति ॥ आचमनीयं० ॥ काम-
धेनुसमुद्भूतं दुग्धं चामृतमुत्तमम्। पावनं सर्वलोकानां
स्नानार्थं प्र० ॥ पयस्नानं० ॥ गोदुग्धं विकृतं देवि दधिरूपं
गुणालयम्। स्नानार्थं च मया दत्तं गृह्यतां परमेश्वरि ॥
दधिस्नानं० ॥ गोघृतं च मयाऽऽनीतं देवानां हविरुत्तमम्।
पावनं सर्वलोकानां स्नानार्थं प्र० ॥ घृतस्नानं०। पुष्पसा-
रसमुद्भूतं मक्षिकाभिः कृतं मधु। स्नानार्थं च प्रयच्छामि

गृहाण परमेश्वरि ॥ मधुस्नानं० ॥ शर्करा च सिता श्रेष्ठा
इक्षुसारसमुद्भवा। मया निवेदिता भक्त्या गृ० ॥ शर्करा-
स्नानं० । जाह्नवीतोयमानीतं शुभ्रं कर्पूरसंयुतम् ॥ स्नप-
यामि सुरश्रेष्ठे त्वां पुत्रादिफलप्रदाम् ॥ स्नानं० । अभ्य-
ङ्गार्थं मयाऽऽनीतं तैलं पुष्पादिवासितम् । प्रयत्नेनार्चितं
शुद्धं स्नानार्थं प्र० ॥ अभ्यङ्गस्नानं० ॥ अङ्गोद्वर्तनकं देवि
कस्तूर्या कुङ्कुमेन च । अन्यैः सुगन्धद्रव्यैश्च निर्मितं प्र० ॥
अङ्गोद्वर्तनं० ॥ नानातीर्थादाहृतं च तोयमुष्णं मया कृतम् ।
स्नानार्थं च प्रयच्छामि गृ०॥ उष्णोदकस्नानं० ॥ श्रीमङ्गला-
गौर्यै नम इति मन्त्रेण गन्धादिपञ्चोपचारपूजां कृत्वा,
निर्माल्यं विसृज्य । अथाभिषेकः । सुरास्त्वामभिषिञ्चन्तु
ब्रह्मविष्णुमहेश्वराः । वासुदेवो जगन्नाथस्तथा सङ्कर्षणो
विभुः ॥ १ ॥ प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ।
आखण्डलोऽग्निर्भगवान्यमो वै निर्ऋतिस्तथा ॥ २ ॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः । ब्रह्मणा सहिताः
सर्वे दिक्पालाः पान्तु ते सदा ॥ ३ ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा
पुष्टिः श्रद्धा क्रिया मतिः। बुद्धिर्लज्जा वपुः शान्तिः कान्ति-
स्तुष्टिश्च मातरः ॥ ४ ॥ एतास्त्वामभिषिञ्चन्तु देवपत्न्यः
समागताः । आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः
॥ ५ ॥ ग्रहास्त्वामभिषिचन्तु राहुः केतुश्च तर्पिताः। देव-
दानवगन्धर्वा यक्षराक्षसपन्नगाः ॥ ६ ॥ ऋषयो मुनयो
गावो देवमातर एव च । देवपत्न्यो द्रुमा नागा दैत्याश्चा-
प्सरसां गणाः ॥ ७ ॥ अस्त्राणि सर्वशस्त्राणि राजानो
वाहनानि च । औषधानि च रत्नानि कालस्यावयवाश्च ये
७ ॥ ८ ॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः। एते
त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥ ९ ॥ अमृताभिषे-

कोऽस्तु । वस्त्रं च सोमदेवत्यं लज्जायास्तु निवारणम् । मया निवेदितं भक्त्या गृहाण परमेश्वरि ॥ वस्त्रं० ॥ कञ्चुकीमुपवस्त्रं च नानारत्नैः समन्वितम् । गृहाण त्वं मया दत्तं पार्वति जगदीश्वरि ॥ कञ्चुकीवस्त्रं० । भूषणानि च दिव्यानि मुक्ताहारयुतानि च । त्वदर्थमुपक्लृप्तानि गृहाण परमेश्वरि ॥ भूषणा० ॥ षोडश तण्डुलान् स० । षोडश चणकशकलान् स० ॥ कुङ्कुमागरुकर्पूरचन्दनं कस्तुरीं तथा । विलेपनं महादेवि गन्धं दास्यामि भक्तितः ॥ गन्धं० ॥ हरिद्रां कुङ्कुमं चैव सिन्दूरं कज्जलान्वितम् । सौभाग्यद्रव्यसंयुक्तं गृहाण परमेश्वरि ॥ सौभाग्यद्रव्याणि स० ॥ रञ्जिताः कुङ्कुमाद्येन अक्षताश्चातिशोभनाः । ममैषां देवि दानेन प्रसन्ना भव पार्वति ॥ अक्षतान्० ॥ सेवन्तिकाबकुलचम्पकपाटलाब्जैः पुन्नागजातिकरवीररसालपुष्पैः । बिल्वप्रवालतुलसीदलमालतीभिस्त्वां पूजयामि जगदीश्वरि मे प्रसीद ॥ पुष्पाणि० ॥

॥ अथाङ्गपूजा ॥

१ उमायै० पादौ पू० ।	२ गौर्यै नमः जङ्घे पू० ।
३ पार्वत्यै० जानुनी पू० ।	४ जगद्धात्र्यै न० उरू पू० ।
५ जगत्प्रतिष्ठा० कटी पू० ।	६ शान्तिरूपिण्यै० नाभिं पू० ।
७ देव्यै० उदरं पू० ।	८ लोकवन्द्या० स्तनौ पू० ।
९ काल्यै० कण्ठं पू० ।	१० शिवायै न० मुखं पू० ।
११ भवान्यै न० नेत्रे पू० ।	१२ रुद्राण्यै न० कर्णौ पू० ।
१३ महादेव्यै० ललाटं पू० ।	१४ मङ्गलदात्र्यै० शिरः पू० ।
१५ पुत्रदायिन्यै० सर्वाङ्गं पू० ।	

अपामार्गस्य पत्रैश्च दूर्वा धत्तूरसंज्ञकैः ।
दूर्वा षोडशसङ्ख्याकैर्बिल्वपत्रैश्च पञ्चभिः ॥

।। अथ पत्रपूजा ।।

१ अम्बिकायै० अर्कपत्रं स०।	२ कात्यायन्यै० दाडिमीप०।
३ मङ्गलायै० धत्तूरप० ।	४ सुभद्रायै न० जातीप० ।
५ भवान्यै० बदरीप० ।	६ शिववल्लभायै० देवदारु०।
७ पार्वत्यै० भृङ्गिराज० ।	८ कल्याण्यै० अगस्तिप० ।
९ मन्मथमात्रे० बिल्वप० ।	१० शिवायै न० शतप० ।
११ दक्षयज्ञविध्वंसिन्यै० करवीर०।	१२ महिषासुरमर्दिन्यै० दूर्वाप० ।
१३ परमेश्वर्यै० शमीप० ।	१४ वाराह्यै० तुलसीप० ।
१५ वृषभवाहिन्यै० अर्जुन०।	१६ भक्तवत्सला० विष्णुक्रां०।
१७ उमायै न० अपामार्ग० ।	१८ भक्तिप्रियायै० आम्रप० ।
११ गिरिजायै० ताडप० ।	२० गौर्यै० बिल्वपत्रं० ।

देवद्रुमरसोद्भूतः कृष्णागरुसमन्वितः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रति० ।। धूपं० ।। त्वं ज्योतिः सर्वदेवानां तेजसां तेज उत्तमम् आत्मज्योतिः परं धाम दीपोऽयं प्रति०।।दीपं०। अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् । भक्ष्यभोज्यसमायुक्तं नैवेद्यं प्र० ।। नैवेद्यं० ।। आचमनीयं० ।। इदं फलं मया० फलं० ।। पूगीफलं म० ताम्बूलं० ।। हिरण्यगर्भ० दक्षिणां० ।। वज्रमाणिक्यवैडूर्यमुक्ताविद्रुममण्डितम् । पुष्परागसमायुक्तं भूषणं प्र० ।। पिष्टमयभूषणानि स० ।। आर्तिक्यं गिरजे तुभ्यं मया दत्तं शिवप्रिये । तेन सन्तानवृद्धिं मे कुरु कल्याणकारके ।। गोधूमपिष्टनिर्मितषोडशदीपसहितमार्तिक्यदीपं० ।। यानि कानि च० प्रदक्षिणां० ।। अन्यथा शर० । नमो देव्यै म० नमस्कारान् ।। पुष्पाञ्जलिमिमं देवि नानापुष्पैर्मनोहरम् । समर्पयामि देवेशि

गृहाण जगदम्बिके ॥ पुष्पाञ्जलिं० ॥ पुत्रान्देहि धनं देहि सौभाग्यं देहि मङ्गले । अन्यांश्च सर्वकामांश्च देहि देवि नमोऽस्तु ते ॥ प्रार्थनां० ॥ आवाहनं न जा० क्षमार्पणं० ॥ ततो विशेषार्घः । पूजा सम्पूर्णतार्थं तु गन्धपुष्पाक्षतैः सह । विशेषार्घ्यं मया दत्तं मम सौभाग्यहेतवे ॥ श्रीमङ्गलागौर्यै नमः विशेषार्घ्यं स० ॥ यस्य स्मृत्या० । अनेन पूजनेन तेन श्रीमङ्गलागौरी प्रीयताम् ॥ ततो वैणवपात्रे तु सौभाग्यद्रव्यमाक्षिपेत् ॥ अद्य० र्थं पूजासाङ्गतासिध्यर्थं सौभाग्यवायनदानं ब्राह्मणपूजनं च करिष्ये । आसनादिना विप्रं सम्पूज्य, अन्नं कञ्चुकिसंयुक्तं सवस्त्रं फलदक्षिणम् । वायनं गौरि विप्राय ददामि प्रीतये तव ॥ सौभाग्यारोग्यकामानां सर्वसम्पत्समृद्धये । गौरीगिरीशतुष्ट्यर्थं वायनं ते ददाम्यहम् ॥ इदं वाय० प्र० दानसां० । तेन श्रीमङ्गलागौरी प्रीयताम् ॥ अद्य० र्थं मम सौभाग्याद्यभिवृद्ध्यर्थं मात्रे वायनदानं क० । ताम्रे वा वैणवे पात्रे सौभाग्यद्रव्यमाक्षिपेत् । लड्डुकञ्चुकिसंयुक्तं सवस्त्रं फलदक्षिणम् ॥ इदम् अमुकद्रव्यसहितं वायनं मात्रे तुभ्यमहं सम्प्रददे ॥ प्र० दानसां० इमां दक्षि० । अनेन वायनदानेन श्रीमङ्ग० प्रीयताम् ॥ कृतस्य क० यथाशक्ति सुवासिनीः भोजयिष्ये ॥ स्वयं मौनेन भुञ्जीयात् ॥ रात्रौ पञ्चोपचारपूजां कृत्वा, जागरणं कार्यम् । ततः प्रभाते पञ्चोपचारपूजां कृत्वा विसर्जयेत् ॥ इति मङ्गलागौरीपूजाविधिः समाप्तः ॥

॥ अथ मङ्गलागौरीकथाप्रारम्भः ॥

आसीत्कापिलनगरे सुमन्तो नाम वै द्विजः । धनधान्यसमायुक्त आत्मकर्मरतोऽभवत् ॥ अनपत्यस्य

तस्याथ कालो भूरि गतस्ततः । योगी कश्चिद्धि तद्द्वारि
॥ ५३ ॥ भिक्षां देहीत्ययाचत ॥ भिक्षामगृह्णन् संयात अपुत्र
इति शङ्कया । तस्य वै चेष्टितं भार्या कथयामास भर्तरि ॥
तत्सर्वं स विचार्याथ भार्यां प्रति वचोऽब्रवीत् । पुनरा-
याति चेत्स त्वमन्नानि भूरि चाक्षिप ॥ तत्सर्वं सा चकारा-
थ भिक्षां त्यक्त्वा जगाद च । अपुत्रस्य गृहाद्भिक्षा नैव
ग्राह्या कदाचन ॥ पात्रं भित्वा च तद्द्वारि निर्गतस्तु
यथाऽऽगतः । भर्ता तच्चेष्टितं ज्ञात्वा देव्याः स्थानमुपागम-
त् ॥ तत्र गत्वा निराहारमेकविंशद्दिनानि वै । पुत्रार्थं
क्लिश्यतस्तस्य दृष्ट्वा देवी जगाद ह ॥ पुत्रस्ते भविता
विप्र गच्छ षोडशवार्षिकः । ततः पञ्चत्वमायच्छेत्पुत्रस्ते
भविता चिरात् ॥ तत्सर्वमकरोद्विप्रः पत्नीगर्भमधारयत् ।
नवमे मासि सञ्जातः पुत्रो रूपगुणान्वितः ॥ जातकर्मादि-
संस्कारान् चकार च मुदान्वितः । व्रतादेशे ततः कृत्वा
स्थितः स तु यथाविधि ॥ १० ॥ तस्य माता तु भर्तार-
मन्वहं प्रार्थयत्यहो । विवाहः क्रियतामस्य बालस्य गुण-
शालिनः ॥ सोऽब्रवीद्भार्यया सार्धमभीष्टं किञ्चिदस्ति वै ।
काशीं प्रेष्यानयिष्यामि ततोद्वाहं करोम्यहम् ॥ काशीं
प्रस्थापयामास मातुलेन समन्वितम् । पथि गच्छन्
शनैर्ग्रामानतिक्रम्य च भूरिशः ॥ कस्मिंश्चिन्नगरे स्थित्वा
दृष्ट्वा कन्यासमूहकम् । क्रीडन्तं चूतवृक्षेषु नानाभावैरनेक-
धा ॥ क्रोधयुक्ता तयोर्मध्ये विधवेत्यवदद् भृशम् । तच्छ्रु-
त्वाऽन्या तु तां प्राह दुष्टे वदसि किं मम ॥ मम माता
व्रतं चक्रे मङ्गलागौरिनामकम् । जिघ्रन्ति या धूपगन्धं विधवा
न भवन्ति ताः ॥ तच्छ्रुत्वा मातुलस्तस्याः प्रययौ कन्यका-
गृहम् । उषित्वा तु ततो रात्रीं सुमुखेन समन्वितः ॥

तस्मिन् दिने गृहस्वामी कन्यामुद्वाहयत् कृती । तैलादि-
॥५४॥ रोपणं चक्रे मण्डपस्थापनं तथा ॥ मुहूर्तसमये तस्य ज्वरेण
पीडितो वरः । वरमाता समागम्य तन्मातुलमयाचत ॥
घटिकाद्वयपर्यन्तं कुमारं देहि मे प्रभो । पाणिं जग्राहया-
मास वध्वाः सा च यथाविधि ॥ २० ॥ विवाहहोममक-
रोत्स विवेश ततः परम् । प्रोत्थाय च ततः पत्नीमुवाच
क्षुधितोऽस्म्यहम् ॥ सा चत्वरितमुत्थाय लड्डुकादीन्
सुसंस्कृतान् । पात्रे निक्षिप्य तान्सर्वान् भोजयामास तं
पतिम् ॥ याचयामास तच्चिह्नं दत्वा चाचमनीयकम् ।
दत्वा तस्यै स्वाङ्गुलीयं ययौ वाराणसीं पुरीम् ॥ वधू-
माता पूर्ववत्तं शय्यायामुपवेशयत् । ततः प्रभाते विमले
प्रबुद्धा सा तु सुन्दरी ॥ सुप्तं वरं विलोक्याथ को-
ऽसाविति व्यचिन्तयत् । विवाहोत्सवकाले तु आ-
हूता सा तु कन्यका ॥ नायाति मातः कोऽत्रासौ
भर्ता मे न भवेदयम् । यद्यसौ स्यात्तु भर्ता मे वृत्तान्तं
रात्रिसम्भवम् ॥ कथयिष्यति चेत्सर्वमागमिष्याम्यहं
ततः । एवं निराकृतः सोऽथ जगाम स्वां पुरीं प्रति ॥
पिता तु चिन्तयाविष्टो जननी चातिदुःखिता । तस्य
चान्वेषणार्थाय पिता सत्रं चकार ह ॥ माता च तामुवा-
चेदं मङ्गलागौरिसंज्ञकम् । व्रतं कुरु प्रयत्नेन सौभाग्यवर्धनं
परम् ॥ कन्योवाच । कथं व्रतं मया कार्यं भो मातर्ब्रूहि
मां प्रति । उद्यापनविधिं चैव को विधिः का च देवता ॥ ३० ॥
मातोवाच । श्रावणस्य सिते पक्षे प्रथमे भौमवासरे ।
तद्दिने नियमं कुर्याद्दन्तधावनपूर्वकम् ॥ स्नात्वा मङ्गलतैलेन
शुचिर्भूत्वा समाचरेत् । श्रावणे प्रतिभौमं तु पूजयेत्
पञ्चवर्षकम् ॥ उद्यापनं ततः कुर्यात्सम्पूर्णफलहेतवे ।

॥ ५५ ॥

सौवर्णीं प्रतिमां कृत्वा मङ्गलागौरिसंज्ञिताम् ॥ द्वात्रिंश-
न्मोदकान् कृत्वा दूर्वाश्चानीय षोडश । नानाफलानि
पुष्पाणि विविधान् पल्लवांस्तथा ॥ सुगन्धं चन्दनं चैव
कुङ्कमं च हरिद्रकम् । ताडपत्रं कण्ठसूत्रं कटकं वस्त्रसंयु-
तम् ॥ षोडशैस्तन्तुभिर्युक्तं दीपं दद्याद् घृतेन च । सोपलां
दृषदं चैव शुभ्रवस्त्रद्वयं तथा ॥ पञ्चामृतादिसम्भारानाना-
हृत्याथ प्रपूजयेत् । धान्यराश्युपरि स्थाप्य दृषदं सोपलां
तथा ॥ तत्र वस्त्रोपरि न्यस्य सौवर्णीं प्रतिमां ततः । एवं
पूजा प्रकर्तव्या उपचारैः पृथक् पृथक् ॥ फलैः षोडशभि-
र्युक्तं वायनं च द्विजाय तु । मूर्तिं सोपलसंयुक्तां दद्या-
त्सोपस्करां तथा॥ दम्पती पूजयेत्पश्चाद्वस्त्रालङ्करणादिभिः।
एवमुद्यापनं कृत्वा दम्पती भोजयेत्ततः ॥ ४० ॥ स्वयं च
बन्धुभिः सार्धं भुञ्जीयादुत्सवान्वितः । एवं सोद्यापनं
पुत्रि व्रतं सौभाग्यवर्धनम् ॥ अवैधव्यस्य सम्प्राप्त्यै कुरु
त्वं वर्षपञ्चकम् । व्रतं प्रगृह्य सा बाला मात्रादिष्टं शुभं
च यत् ॥ ततः सत्रे समारब्ध अन्नदानं च भूरिशः ।
भुक्तेभ्यो ब्राह्मणेभ्यश्च ताम्बूलं सा प्रयच्छति ॥ सपुत्रो
मातुलः काशीं बहुकालेन जग्मिवान् । कृत्वा तीर्थविधिं
सर्वं स्थितस्तद्दिवसावधि ॥ प्राप्य मृत्युदिनं चाथ प्रययौ
मणिकर्णिकाम् । नाभिमात्रे जले स्थाप्य विधानमकरोत्ततः॥
मृत्युञ्जयविधिं चान्यमुपायमकरोत्तदा । गौरीव्रतप्रभावेण
पार्वत्या नोदितः शिवः ॥ तत्रागत्य शिवःसाक्षाद् दृष्ट्वा
तं द्विजपुङ्गवम् । मृतबालस्य निकटे विलपन्तमनेकधा ॥
कस्त्वं कोऽसौ मृतः पुत्र इति पृष्टः शिवेन वै । प्रोवाच
ब्राह्मणस्तस्मै देव्या वरसमुद्भवः ॥ अपुत्रस्य सुमन्तस्य
बालः षोडशवार्षिकः । कालधर्ममनुप्राप्तमेनं शोचामि

मातुलः ॥ तयोः कष्टं दशां गौरी दृष्ट्वा प्रोवाच शङ्करम् । बालोऽसौ जीव्यतां नाथ मद्व्रतस्य प्रभावतः ॥ ५० ॥ तथैव कृतवान् देवो भवानिप्रेमवत्सलः । उत्थाय बालः शनकैर्गौरीव्रतप्रभावतः ॥ मातुलो हर्षसंयुक्तो निर्गत्य स्वपुरं प्रति । नगरीं तां तु सम्प्राप्तौ यत्र पूर्वमवस्थितौ ॥ दृष्ट्वा तु पथिकौ दूतैर्नीतौ सत्रगृहं प्रति । तत्र स्थितौ विप्रवर्यौ भुक्तौ ताम्बूलमर्थिनौ ॥ ताम्बूलं मातुले दत्वा ततो लज्जापराङ्मुखी । रात्रौ भुक्तपतिं ज्ञात्वा ततो रोमान्विताऽभवत् ॥ मात्रा दृष्टा तु सा कन्या उवाच पतिमात्मनः । सङ्केतः कथ्यतां नाथ रजन्यां यदभूत्पुरा ॥ स पृष्टः सोऽतिनिर्बन्धमुवाच पूर्वचेष्टितम् । वृतं ज्ञात्वा तु जनकः पत्न्यै सर्वं न्यवेदयत् ॥ ततो महोत्सवं कृत्वा दायादं प्रददौ मुदा । मातुलोऽप्यगमद् ग्राममादाय द्विजकन्यकाम् ॥ ग्रामसीमामनुप्राप्तं पुत्रं तं भार्यया युतम् । जनैः कथितवृत्तान्तं पिता द्रष्टुं समागतः ॥ प्राप्तः पुत्रः सपत्नीको मातुलेन समन्वितः । अलिकं तर्कयामास त्यक्ता पुत्रं समागतः ॥ शपथैर्बहुनिर्बन्धैः सत्यं ज्ञात्वा मुदान्वितः । महोत्सवं ततः पित्रोर्जातं दृष्ट्वा च दम्पती ॥ ६० ॥ ततः पृष्टा तु सा सर्वं कथयामास पूर्वतः । गौरीदेव्याः प्रभावेण जीवितोऽपि पतिर्मम ॥ मात्रा दत्तं व्रतं मह्यं मङ्गलागौरिसंज्ञितम् । सापि चक्रे व्रतं देव्या मङ्गलागौरिसंज्ञितम् ॥ अवैधव्यं वंशवृद्धिः पुत्रपौत्रादिसन्ततिः । शृण्वतां जायते चात्र अन्ते मुक्तिर्भवेद् ध्रुवम् ॥ ६२ ॥ इति श्रीभविष्योत्तरपुराणे मङ्गलागौरीव्रतकथा समाप्ता ॥

॥ श्रावणे प्रतिबुधगुरुवासरे बुधगुरुपूजाप्रकारः ॥

कामनाभेदेनानेकस्थले तौ विलिख्य पूजयेत् । यथा

सन्ततिकामनायाम्, बालान्दोलनोपरि विलेख्यौ। धन-
॥ ५७ ॥ वृद्धिकामनायाम्, कोशागारे। पाकवृद्धिकामनायाम्,
पाकागारे। देवकृपाकामनायाम्, देवागारे। स्त्र्यवियोग-
कामनायाम्, शय्यागारे। धान्यवृद्धिकामनायाम्, धान्या-
गारे हरिद्रादिना विलिख्य पूजामारभेत्। देशकालौ
स्मृत्वा मम (अमुककामना) सिद्धिद्वारा श्रीबुधगुरुप्री-
त्यर्थं बुधगुरुपूजनमहं करिष्ये। कलशपूजनादि विधाय
पूजासम्भारान् प्रोक्ष्य, प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं
बुधम्। सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम्॥ देवानां
च ऋषीणां च गुरुं काञ्चनसन्निभम्। बुद्धिभूतं त्रिलोकेशं
तं गुरुं प्रणमाम्यहम्॥ ध्यानं०। श्रीबुधगुरुभ्यां नम
इति आवाहनादिषोडशोपचारैः सम्पूज्य नैवेद्यकाले
मूलकसहितदधिभक्तनैवेद्यं समर्प्य पूजां समाप्य यः
करिष्यति मेधावी मिलित्वा युवयोर्व्रतम्। तस्य स्यात्सकला
सिद्धिः सत्यं सत्यं न संशयः॥ इति सम्प्रार्थयेत्। ततः
स्वस्रीयमातुलौ सम्भोजयेत्। अनेन पूजनेन श्रीबुधगुरू
प्रीयेताम्॥

॥ प्रतिशुक्रवासरे जीवन्तिकापूजाविधिः ॥

कुड्ये हरिद्राचन्दनादिना बालान्दोलनयुतां बहु-
बालसमन्वितां जीवन्तिकां विलिखेत्। ततो देशकालौ०
मम पुत्राणां दीर्घायुष्याभिवृद्धिपूर्वकसकलैश्वर्याद्यभि-
वृद्ध्यर्थं जीवन्तिकापूजनं करिष्ये। श्रीजीवन्तिकायै नम
इति नाममन्त्रेण षोडशोपचारैः सम्पूज्य गोधूमपिष्टस-
८ म्भूतैर्गुडसम्भूतैर्वा पञ्चदीपैः नीराज्य, अक्षतान् क्षिपेत्।
अक्षतांश्चैव चिक्षेप यत्र मे बालको भवेत्। तत्र त्वया

रक्षणीयां जीवन्ति करुणार्णवे ॥ इति अनेन पू० श्रीजीवन्तिका प्रीयताम्। ततः सुवासिनीं भोजयेत् ॥

॥ श्रावणशुक्लभृगुवासरे वरलक्ष्मीपूजाविधिः ॥

भूमिं गोमयेनोपलिप्य तत्र चतुर्द्वारोपशोभिते मण्डपे पञ्चरङ्गभूषितवेदिकायां प्रस्थमिततण्डुलोपरि महीद्यौरित्यादिना पूर्णपात्रनिधानान्तं कृत्वा तदुपरि वस्त्राष्टदलनिर्मिते हैमीं लक्ष्मीप्रतिमामग्न्युत्तारणप्राणप्रतिष्ठापूर्वकं संस्थाप्य, तत्पुरतः एकविंशतितन्तुमयं तावतैव ग्रन्थियुतं हरिद्रारञ्जितं दोरकं स्थापयेत्। अथ पूजाप्रयोगः। आचम्य देशकालौ स्मृत्वा, ममेह जन्मनि जन्मान्तरे च अखण्डितसौभाग्यपुत्रपौत्राद्यभिवृद्ध्यर्थम् अलक्ष्मीनाशनपूर्वकस्थिरलक्ष्मीप्राप्त्यर्थं वरलक्ष्मीव्रताङ्गभूतं यथामिलितषोडशोपचारद्रव्यैः पुराणोक्तमन्त्रैः (श्रीसूक्तेन वा) वरलक्ष्मीपूजनमहं करिष्ये। गणपतिपूजनादिसम्भारप्रोक्षणान्तं कृत्वा, ध्यायेत्। क्षीरसागरसम्भूतां क्षीरवर्णसमप्रभाम्। क्षीरवर्णसमं वस्त्रं दधानां हरिवल्लभाम्॥ श्रीवरलक्ष्म्यै० वरलक्ष्मीं ध्यायामि। ब्राह्मी हंससमारूढा धारिण्यक्षकमण्डलू। विष्णुतेजोधिका देवी सा मां पातु वरप्रदा॥ आवाहनं०। महेश्वरि महादेवि आसनं ते ददाम्यहम्। महैश्वर्यसमायुक्तं ब्रह्माणि ब्रह्मणः प्रिये॥ आसनं०। कुमारशक्तिसम्पन्ने कौमारि शिखिवाहने। पाद्यं ददाम्यहं देवि वरदे वरलक्षणे ॥ पाद्यं० ॥ तीर्थोदकैर्महादिव्यैः पापसंहारकारकैः। अर्घ्यं गृहाण भो लक्ष्मि देवानामुपकारिणि ॥ अर्घ्यं० ॥ वैष्णवी विष्णुसंयुक्ता ह्यसङ्ख्यायुधधारिणि। आचम्यतां देवपूज्ये वरदेऽसुर-

मर्दिनि ॥ आचम० । पद्मे पञ्चामृतैः शुद्धैः स्नपयिष्ये हरि-प्रिये । वरदे शक्तिसम्भूते वरदेवि वरप्रिये ॥ पयो दधि घृतं चैव मधु शर्करया तथा । पञ्चामृतेन स्नपनं क्रियतां परमेश्वरि ॥ पञ्चामृत० । गङ्गाजलं समानीतं सुगन्धि-द्रव्यसंयुतम् । स्नानार्थं ते मया दत्तं गृहा० ॥ स्नानं० । पञ्चोपचारपूजां कृत्वा, सुरास्त्वेत्यनेन श्रीसूक्तेन वाऽभि-षेकः । रजताद्रिसमं दिव्यं क्षीरसागरसन्निभम् । चन्द्र-प्रभासमं देवि वस्त्रं ते प्रददाम्यहम् ॥ वस्त्रं० । माङ्गल्य-मणिसंयुक्तं मुक्ताफलसमन्वितम् । दत्तं मङ्गलसूत्रं ते गृहाण सुरवल्लभे ॥ कण्ठसूत्रं० । सुवर्णभूषितं दिव्यं नानारत्नसुशोभितम् । त्रैलोक्यभूषिते देवि गृहाणाभरणं शुभम् ॥ भूषणा० । रक्तगन्धं सुगन्धाढ्यमष्टगन्धसमन्वि-तम् । दास्यामि देवि वरदे लक्ष्मि देवि प्रसीद मे ॥ चन्दनं० । हरिद्रां कुङ्कुमं चैव सिन्दूरं कज्जलं तथा । सौभाग्यद्रव्यसंयुक्तं गृहा० ॥ सौभा० । नानाविधानि पुष्पाणि नानावर्णयुतानि च । आहृतानि प्रयच्छामि भक्त्या देवि वरप्रदे ॥ पुष्पाणि० ॥

॥ अथाङ्गपूजा ॥

१ वरलक्ष्म्यै० पादौ पू० ।
२ कमलवासिन्यै० गुल्फौ पू० ।
३ पद्मालयायै० जङ्घे पू० ।
४ श्रियै नमः० जानुनी पू० ।
५ इन्दिरायै० ऊरू पूज० ।
६ हरिप्रियायै० कटी पू० ।
७ लोकमात्रे० नाभिं पू० ।
८ लोकधात्र्यै० स्तनौ पू० ।
९ शङ्खनिधये० हस्तौ पू० ।
१० त्रैलोक्यपालिन्यै० कण्ठं पू० ।
११ धात्र्यै नमः नासां पू० ।
१२ पद्मनिधये० नेत्रे पू० ।
१३ भार्गव्यै० कर्णौ पू० ।
१४ क्षीरसागरजायै० ललाटं० ।
१५ श्रीवरलक्ष्म्यै० शिरः पू० ।
१६ श्रीमहालक्ष्म्यै० सर्वाङ्गं पू० ।

॥ एकविंशतिपत्रपूजा ॥

१ श्रीवरलक्ष्म्यै० २१ अश्वत्थपत्राणि० ।
२ श्रीवरल० २१ वटपत्रा० ।
३ श्रीवरल० २१ बिल्वप० ।
४ श्रीवरल० २१ आम्रप० ।
५ श्रीवरल० २१ मालतीप० ।
६ श्रीवर० २१ दाडिमीप० ।

धूपं दास्यामि ते देवि गोघृतेन समन्वितम् । प्रतिगृह्य महादेवि भक्तानां वरदप्रिये ॥ धूपं० ॥ साज्यं च वर्ति० दीपं ॥ नैवेद्यं परमं दिव्यं दृष्टिप्रीतिकरं शुभम् । भक्ष्यभोज्यादिसंयुक्तं परमान्नादिसंयुतम् ॥ एकविंशति अपूपपायसपक्वान्ननैवेद्यं० ॥ आचमनं० । करोद्वर्तनं स० ॥ इदं फ० फलं० ॥ नागवल्लीदलैर्युक्तं चूर्णक्रमुकसंयुतम् । ताम्बूलं गृह्यतां देवि वरलक्ष्मि नमोऽस्तु ते ॥ ताम्बूलं० । सुवर्णं सर्वधातूनां श्रेष्ठं देवि च तत्सदा । भक्त्या ददामि वरदे स्वर्णवृष्टिं च देहि मे ॥ दक्षिणां स० ॥ नीराजनं सुमङ्गल्यं कर्पूरेण समन्वितम् ॥ चन्द्रार्कवन्हिसदृशं गृह्ण देवि नमोऽस्तु ते ॥ नीराजनं० । सर्वमङ्गलमाङ्गल्ये सर्वपापप्रणाशिनि । दोरकं प्रतिगृह्णामि सुप्रीता हरिवल्लभे ॥ इति दोरकं गृहीत्वा, करिष्यामि व्रतं देवि त्वद्भक्तस्त्वत्परायणः । श्रियं देहि यशो देहि सौभाग्यं देहि मे शुभे ॥ इति दोरकं वामकरे बध्वा विशेषार्घ्यं दद्यात् । क्षीरार्णवसुते लक्ष्मि चन्द्रस्य च सहोदरि । गृहाणार्घ्यं महालक्ष्मि देवि तुभ्यं नमोऽस्तु ते ॥ श्रीवरलक्ष्म्यै० इदं विशेषार्घ्यं स० ॥ श्रीवृक्षस्य दलं देवि महादेवि प्रियं सदा । बिल्वपत्रं प्रयच्छामि पवित्रं ते सुनिर्मलम् ॥ बिल्वपत्रं स० ॥ इह जन्मनि यत्पापं मम जन्मान्तरेषु च । निवारय महा-

देवि लक्ष्मि नारायणप्रिये ॥ प्रदक्षिणां स० ॥ दामोदरि नमस्तेऽस्तु नमस्त्रैलोक्यनायके। हरिकान्ते नमस्तेऽस्तु त्राहि मां दुःखसागरात् ॥ नमस्कारान्० ॥ क्षीरार्णवसमुद्भूते कमले कमलालये। प्रयच्छ सर्वकामांश्च विष्णुवक्षस्थलालये ॥ व्रतसमर्पणं स०। छत्रं चामरमान्दोलं दत्वा व्यजनदर्पणे। गीतवादित्रनृत्यैश्च राजसन्माननैस्तथा ॥ सूपचारैः समभ्यर्च्य क्षमाप्य च महेश्वरीम्। वरलक्ष्मि महादेवि सर्वकामप्रदायिनि ॥ यन्मया च कृतं देवि परिपूर्णं कुरुष्व तत् ॥ इति क्षमापयेत्। प्रयच्छ पुत्रपौत्रांश्च विष्णुवक्षस्थलेऽनघे। श्रियं देहि यशो देहि सर्वान्कामान्प्रयच्छ मे ॥ इति प्रार्थयेत्। यस्य स्मृत्या० अनेन वरलक्ष्मीपूजनाख्येन वरलक्ष्मीः प्रीयताम्।

ततः पञ्चसु वंशपात्रेषु एकविंशति पक्वान्नानि निधाय वायनपञ्चकं विप्राय, यतये, देव्यै, ब्रह्मचारिणे, सुवासिन्यै च क्रमेण दद्यात्। अद्य०पूजासाङ्गतासिध्यर्थं (अमुक) पूजनं (अमुकाय) वायनप्रदानं च करिष्ये। गन्धादिपूजां कृत्वा, स्वस्त्यस्तु दीर्घ०। एकविंशतिपक्वान्नशर्कराघृतसंयुतम्। वायनं ते प्रयच्छामि इन्दिरा प्रीयतां मम् ॥ इदं एकविंशति पक्वान्नवायनं फलताम्बूलसहितं (अमुकाय) तुभ्यम०। प्र० प्र०। दान सां० इमां द०। इति प्रत्येकं दद्यात्। अनेन वायनदानाख्येन क० तेन श्रीवरलक्ष्मीः प्रीयताम् ॥ ततः यान्तु देवेति देवतां विसृज्य, पीठसहितां प्रतिमां ब्राह्मणाय दद्यात्। अद्य० वरलक्ष्मीपीठदानं ब्राह्मणपूजनं च क०। गन्धाः पां० स्वस्त्यस्तु दीर्घ०। इन्दिरा प्रतिगृह्णाति इन्दिरा वै ददाति च। इन्दिरा तारकोभाभ्यामिन्दिरायै नमो नमः ॥ इदं पीठं प्रतिमासहितं

ब्राह्मणाय तुभ्य० । पीठदानसां० इमां द० । तेन श्रीवर-लक्ष्मीःप्रीयताम् ॥ कृतस्य क० सुवासिनीः ब्राह्मणांश्च भोजयिष्ये । ततः शक्तौ सत्यां गां च दद्यात्, ततः स्वयं मौनेन भुञ्जीत ॥

अत्र व्रते देवी सन्तुष्टा वा नेति परीक्षाप्रकारः । नागवल्लीदलं चैकं क्रमुकं चूर्णवर्जितम् । भक्षयित्वा तु चैलान्ते बध्वा प्रातर्निरीक्षयेत् ॥ आरक्ते सति सुप्रीता देवी ज्ञेया विचक्षणैः । अन्यथा न व्रतं कुर्यात्सर्वदा भूतिमिच्छता ॥ इति वरलक्ष्मीपूजाविधिः ॥

॥ अथ वरलक्ष्मीकथाप्रारम्भः ॥

सूत उवाच । कैलासशिखरे रम्ये सर्वदेवनिषेविते । गौर्या सह महादेवो दिव्याक्षैश्च विनोदितः ॥ जितोऽसि त्वं जितेत्याह पार्वतीपरमेश्वरौ । सोऽपि त्वं च जितेत्याह सुविवादस्तयोरभूत् ॥ चित्रनेमिस्तदा पृष्टो मृषा वादमभाषत । गौरी कोपसमाविष्टा तदा शापं ददौ तु तम् ॥ कुष्ठी भव मृषा वादिन् चित्रनेमे हतक्रिय । नानृतेन समं पापं क्वापि दृष्टं श्रुतं न हि ॥ चित्रनेमिर्महाप्राज्ञः सत्यं वदति नो मृषा । प्रसादः क्रियतां देवि देवीमाह वृषध्वजः ॥ प्रसादसुमुखी तस्मै विशापं च जगाद सा । यदा सरोवरे रम्ये करिष्यसि तपः शुचिः ॥ ततः स्वर्गणिकाः सर्वाः वक्ष्यन्ति त्वां समागताः । तदा भवान् विशापः स्यादित्युक्तः स पपात ह ॥ ततो दिनैश्च कतिभिश्चित्रनेमिः सरोवरे । कुष्ठी भूत्वा वसंस्तत्र ददर्श स्वर्विलासिनीः ॥ देवतापूजनोद्युक्ताः पप्रच्छ प्रणिपत्य ताः । किमेतद्भो महाभागाः किं पूजायां तु वाञ्छितम् ॥

किं चास्माभिरनुष्ठेयमिहामुत्र सुखाय च। इति प्रश्नं
॥ ६३ ॥ चित्रनेमिश्चक्रेऽथ च सुलोचनः॥ येनास्माद् गिरिजाशापा-
न्मोक्ष्यामि चिरदुःखितात्। ता ऊचुः क्रियतेऽस्माभिर्व्रतमे
तदनुत्तमम्॥ वरलक्ष्मीव्रतं दिव्यं सर्वकामसमृद्धिदम्।
यदा रवौ कुलीरस्थे मासे च श्रावणे तथा॥ गङ्गायमुन-
योर्योगं तुङ्गभद्रासमं तदा। तस्मिन् वै श्रावणे मासि
शुक्लान्ते तु भृगोर्दिने॥ प्रारब्धव्यं व्रतं तत्र महालक्ष्म्या
यतात्मभिः। सुवर्णप्रतिमां कुर्याच्चतुर्भुजसमन्विताम्॥
पूर्वं गृहमलङ्कृत्य तोरणै रङ्गवल्लिभिः। गृहस्य पूर्वदि
ग्भागे ईशान्यां च विशेषतः॥ तण्डुलान्प्रस्थसङ्ख्याकान्
भूमौ निक्षिप्य पूजयेत्। फलानि च विनिक्षिप्य सुवर्णं
प्रक्षिपेत्ततः॥ पल्लवांश्च विनिक्षिप्य वस्त्रेणाच्छाद्य
यत्नतः। प्रतिमां स्थापयेत्तत्र पूजयेच्च यथाविधि॥
अग्न्युत्तारणपूर्वं तु शुद्धस्नानं यथाक्रमम्। पञ्चामृतेन
स्नपनं कारयेन्मन्त्रतः सुधीः॥ शुद्धस्नानं ततः कृत्वा
देवीसूक्तेन वै ततः। अष्टगन्धैः समभ्यर्च्य पल्लवैश्च
समर्पयेत्॥ अश्वत्थवटबिल्वादिचूतदाडिममालतीः।
एतेषां पत्रमादाय एकविंशतिसङ्ख्यया॥ नानाविधानि
पुष्पाणि मालत्यादीनि वै ततः। धूपदीपैर्महालक्ष्मीं पूजये-
त्सर्वकामदाम्॥ पायसं सर्वमन्नं च सर्वभक्ष्यैश्च संयुतम्।
एकविंशतिसङ्ख्याकैरपूपैः पूजयेच्छिवाम्॥ देव्यै सर्वं
समर्प्याथ वरं च वृणुयात्ततः। एवं सम्पूजयित्वा तां
ताम्बूलाद्यैश्च षोडश॥ उपचारैः षोडशभिर्बहुभिर्विवि-
धैस्तथा। नृत्यगीतादिसहितां देवीं सम्प्रार्थयेच्छ्रियम्॥
उमा सरस्वती धात्री शची च प्रियवादिनी। एताभिश्च
कृतं सम्यग्व्रतं सर्वसमृद्धिदम्॥ पूजावसानपर्यन्तं चित्र-

तत्समाहृतम् । आचम्यतां महादेव्यः पुत्रपौत्रप्रवर्धिकाः॥ आचमनीयं० । पयो दधि घृतं चैव शर्करा मधुसंयुतम् । पञ्चामृतं मया दत्तं स्नानार्थं प्रति० ॥ पञ्चामृतस्नानं० । गङ्गा च यमुना चैव नर्मदा च सरस्वती । तोयमेतत्सुखस्पर्शं स्नानार्थं प्रति० ॥ मलापकर्षस्नानं० । ततः पञ्चोपचारपूजां कृत्वा अभिषेकः कार्यः । सूक्ष्मतन्तुमयानीह निर्मलानि शुभानि च । वासांसि प्रतिगृह्णीत दिव्ययोगिपुरःसराः ॥ वस्त्राणि स० । भास्करोदयवर्णाभाः कञ्चुकीश्च मनोहराः । दास्यामि प्रीतये देव्यः स्वीकुरुध्वं मयार्पिताः ॥ कञ्चुकीः० । हरिद्रां कुङ्कुमं चैव कण्ठसूत्रं च ताडकम् । सिन्दूरं कज्जलं चारु षट् सौभाग्यं प्रगृह्यताम् ॥ सौभाग्यद्रव्यं० ॥ अम्भोजमालतीजातीकुरण्टमुनिचम्पकान् । माल्यार्थं प्रतिगृह्णीत दिव्ययोगिपुरःसराः ॥ पुष्पाणि० । भूतप्रेतपिशाचादिभवभीतिविनाशिकाः । नानापरिमलो धूपो ग्राह्यस्त्रैलोक्यमातरः ॥ धूपं० । मार्तण्डमण्डलाखण्डचन्द्रबिम्बाग्नितेजसाम् । निधानं दिव्यदीपोऽयं ग्राह्य० ॥ दीपं० । नैवेद्यं गृह्यतां देव्यो भक्तिं कुरुत चाचलाम् । कुरुध्वमीप्सितं कामं परत्र च परां गतिम् ॥ नैवेद्यं० ॥ उत्तरापो० । करोद्वर्तनं० । इदं फलं० फलं० । पूगीफलं मह० ताम्बूलं० । हिरण्यगर्भ० दक्षिणां० । चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च । त्वमेव सर्वज्योतींषि आर्तिक्यं प्रति० ॥ आर्तिक्यदीपं स० । आयुषा च मुदा युक्ताः कुरुतानन्यकाम्यया । पूजिताः पूजयन्त्यो मां कृपायुक्ता भविष्यथ ॥ पुष्पाञ्जलिं० ॥ यानि कानि० प्रदक्षिणां० । नमोऽस्तु चतुःषष्टिदेवीभ्यः शरणं व्रजे । पुत्रश्रीवृद्धिकामाहं भक्त्या सम्पूजिताः

दत: ॥ महादेवस्ततः प्राह चित्रनेमे शुचिव्रत । अद्य-
प्रभृति कैलासे भुङ्क्ष्व भोगान् यथेप्सितान् ॥ पश्चाद् ग-
न्तासि वैकुण्ठं व्रतस्यास्य प्रभावतः । पार्वत्यापि कृतं पूर्वं
पुत्रलाभार्थया तथा ॥ दृष्टश्च षण्मुखस्तेन ततश्च सुम-
हाव्रतः । नलराज्ञा विक्रमेण राज्यं प्राप्तं तदाज्ञया ॥
नन्दी च कान्तया हीनो कान्ता लब्धा प्रसादतः । तया च
तद् व्रतं कृत्स्नं कृतं वै पुत्रहेतुतः ॥ पुत्रं प्रसुषुवे साऽत्र
त्रिलोकभरणक्षमम् । इदं मानुष्यलोके हि व्रतं चीर्णं
सुविस्तरम् ॥ तदाप्रभृति येनैवं वरलक्ष्मीव्रतं श्रुतम् ।
व्रतं पुण्यं नरो वापि कुर्याच्चैतत्तथाङ्गना ॥ भक्त्या करोति
विपुलान् भोगान् प्राप्य श्रियं व्रजेत् । व्रतानामुत्तमं पुण्यं
वरलक्ष्मीव्रतं शुभम् ॥ तद्व्रती च नरो नारी फलमाप्नोत्य-
संशयम् । य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ॥ धन-
धान्यमवाप्नोति वरलक्ष्मीप्रसादतः ॥

॥ इति श्रीभविष्योत्तरपुराणे वरलक्ष्मीकथा समाप्ता ॥

{ श्रावणे प्रतिशनिवासरे नृसिं-
हशनिहनुमतां पूजनप्रकारः ॥ }

कुड्ये हरिद्रायुक्चन्दनेन लक्ष्मीसहितं नृसिंहं
विलिख्य, सुवासिनीब्राह्मणांश्च तैलेनाभ्यज्य स्वयमपि
कुटुम्बसहितोऽभ्यज्य स्नायात् । ततः देशकालौ० मम
सर्वापच्छान्तिपूर्वकपुत्रपौत्राद्यभिवृध्यर्थं श्रीलक्ष्मीनृसिंह-
पूजनं करिष्ये । श्रीलक्ष्मीनृसिंहाभ्यां नम इति नाममन्त्रेण
ध्यानादिषोडशोपचारैर्नीलपीतपुष्पैः कुसरसंज्ञकशाक-
सहितकृसरान्नस्य नैवेद्येन च सम्पूज्य, श्रीनृसिंह रमाका-
न्त भक्तानां भयनाशन । क्षीराम्बुधिनिवास त्वं चक्रपाणे

जनार्दन ॥ इति सम्प्रार्थयेत् । यस्य० अनेन लक्ष्मीनृसिंहपूजनेन लक्ष्मीनृसिंहौ प्रीयेताम् ॥ साङ्गता० सुवासिनीब्राह्मणांश्च कृसरान्नेन माषान्नेन च सम्भोज्य स्वयमपि भुञ्जीत ॥

अथ शनिपूजाविधिः । लोहमय्यां शनिप्रतिमायां, अश्वत्थवृक्षे वा पूजयेत् । प्रातः खञ्जं ब्राह्मणं तिलतैलेनाभ्यज्य स्नापयित्वा स्वयमपि तथैव स्नात्वा, आचम्य देश० मम समस्तरोगपरिहारार्थं दृष्टयुदरलक्षागतशनिकृतपीडानिरासार्थं श्रावणशनिवासरे शनैश्चरपूजनमहं करिष्ये । नीलाञ्जनसमाभासं रविपुत्रं यमाग्रजम् । छायामार्तण्डसम्भूतं तं नमामि शनैश्चरम् ॥ इति ध्यात्वा श्रीशनैश्चराय नम इति षोडशोपचारैस्तिलमाषाक्षतैः कृसरान्ननैवेद्येन च सम्पूजयेत् । तिलतैलेनाभिषेकं कुर्यात् । यः पुनर्नष्टराज्याय नीलाय परितोषितः । ददौ निजं महाराज्यं स मे सौरिःप्रसीदतु ॥ कोणस्थः पिङ्गलो बभ्रुः कृष्णो रौद्रोऽन्तको यमः । सौरिःशनैश्चरो मन्दः पिप्पलादनसंस्तुतः ॥ एतानि शनिनामानि जपेदश्वत्थसन्निधौ । शनैश्चरकृतापीडा न कदाचिद् भविष्यति ॥ इति प्रार्थयित्वा, सप्त नमस्कारान् सप्त प्रदक्षिणांश्च कुर्यात् । अनेन पूजनेन शनैश्चरः प्रीयताम् । साङ्गता० खञ्जं ब्राह्मणं भोजयेत् ॥

अथ हनुमत्पूजनविधिः । तैलमिश्रितसिन्दूरेण हनुमन्तं लेपयित्वा, देशकालौ० मम सर्वसम्पत्प्राप्तिपूर्वकश्रीहनुमत्प्रीत्यर्थं हनुमत्पूजनमहं करिष्ये । श्रीहनुमते नम इति षोडशोपचारैर्जपापुष्पमालाभिरर्कमालाभिर्वटकानां मालाभिर्मन्दारमालाभिश्च सम्पूज्य द्वादशनामानि जपेत् । हनुमानञ्जनीसूनुर्वायुपुत्रो महाबलः । रामेष्टः फाल्गुनसखः

पिङ्गाक्षोऽमितविक्रमः ॥ उदधिक्रमणश्चैव सीताशोकनिवारणः । लक्ष्मणप्राणदाता च दशग्रीवस्य दर्पहा ॥ एवं द्वादशनामानि प्रातरुत्थाय यः पठेत् । नाशुभं जायते तस्य सर्वसम्पत्प्रजायते ॥ अनेन हनुमत्पूजनेन श्रीहनुमान् प्रीयताम् ॥

॥ श्रावणशुक्लपञ्चम्यां नागपूजाविधिः ॥

पञ्चमी षण्मुहूर्ता परा ग्राह्येति सकलसिद्धान्तः । तत्र यथाकुलाचारं पीठे भित्तौ वा चन्दनेन हरिद्रया वा नव नागान् नागपत्नींश्च विलिख्य, मृन्मयान् पिष्टमयान् वा कृत्वा पूजामारभेत् । तत्र दाक्षिणात्याचारानुसारेण प्रयोगः । पञ्चम्यां प्रातः कृतनित्यक्रियो देशकालौ स्मृत्वा, मम सकुटुम्बस्य सपरिवारस्य सर्वदा सर्वतः सर्पभयनिवृत्तिपूर्वकसर्पप्रसादसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं श्रावणशुक्लपञ्चम्यां नागपूजनं करिष्ये । कलशपूजनादिसम्भारप्रोक्षणान्तं कृत्वा, आवाहयेत् ।

१ अनन्ताय० अनन्तं आवा० ।	६ शङ्खपालाय० शङ्खपालं० ।
२ वासुकये० वासुकिं आ० ।	७ धृतराष्ट्राय० धृतराष्ट्रं० ।
३ शेषाय न० शेषं आवा० ।	८ तक्षकाय० तक्षकं आ० ।
४ पद्मनाभाय० पद्मनाभं० ।	९ कालियाय० कालियं आ० ।
५ कम्बलाय० कम्बलं आ० ।	१० नागपत्नीभ्यो० नागपत्नीः० ।

अनन्तादिनागेभ्यो० अनन्तादिनागान् ध्यायामि । नवनाग शताधीश शब्दोद्धारक काश्यप । नानारत्नसमायुक्तमासनं प्र० ॥ आसनं० । अनन्तप्रीतये शेष जगदाधार विग्रह । पाद्यं गृहाण भक्त्या त्वं काद्रवेय नमोऽस्तु ते ॥

पाद्यं० । कश्यपानन्दजनक मुनिवन्द्य महाप्रभो । अर्घ्यं गृहाण सर्वज्ञ गन्धपुष्पाक्षतैर्युतम् ॥ अर्घ्यं० । सहस्रफणरूपेण वसुधाधारक प्रभो । गृहाणाचमनं देव पावनं च सुशीतलम् ॥ आचमनीयं० । सर्पराज नमस्तुभ्यं दधिमध्वाज्यसंयुतम् ॥ मधुपर्कं प्रदास्यामि स्वीकुरुष्व जगत्प्रभो ॥ मधुपर्कं० ॥ क्षीरं दधि घृतं चैव मधु शर्करया युतम् । पञ्चामृतस्नानमिदं स्वीकुरुष्व दयानिधे ॥ पञ्चामृतस्ना० ॥ गङ्गादिसर्वतीर्थेभ्यो जलमाहृत्य शीतलम् । स्नानार्थं च प्रयच्छामि गृ० ॥ स्नानं० । पञ्चोपचारपूजां कृत्वा, अभिषेकः । कौशेययुग्मं देवेश प्रीत्या तव मयार्पितम् । पन्नगाधीश नागेन्द्र तार्क्ष्यशत्रो नमोऽस्तु ते ॥ वस्त्रं० । सर्पराज नमस्तेऽस्तु त्राहि मां भवसागरात् । ब्रह्मसूत्रं सोत्तरीयं गृ० ॥ यज्ञोपवीतं० ॥ कर्पूरकस्तूरिककेसराढ्यं गोरोचनं चागरुरक्तचन्दनम् । श्रीचन्दनाक्तं शुभदिव्यगन्धं गृहाण विष्णुप्रिय ते मयार्पितम् ॥ चन्दनं० । काश्मीरपङ्कलिप्तांश्च शालितण्डुलनिर्मितान् । पातालाधिपते तुभ्यमर्पये त्वं गृहाण भोः ॥ अक्षतान्० । हरिद्रा कुङ्कमं चैव कण्ठसूत्रं च ताडकम् । सिन्दूरं कज्जलं चारु पट् सौभाग्यं गृहाण भोः ॥ सौभाग्यद्रव्यं० ॥ करवीरैर्जातिकुसुमैश्चम्पकैर्बकुलैः शुभैः । शतपत्रैश्च कल्हारैरर्चयेत्पन्नगोत्तमम् ॥ पुष्पाणि स० ॥ दध्यक्षतदूर्वाङ्कुरान् कुशाङ्कुरांश्च समर्पयामि ॥

॥ नामपूजा ॥

१ अनन्ताय नमः ।	४ पद्मनाभाय० ।	७ धृतराष्ट्राय न० ।
२ वासुकये नमः ।	५ कम्बलाय न० ।	८ तक्षकाय नमः ।
३ शेषाय नमः ।	६ शङ्खपालाय० ।	९ कालियाय न० ।
		१० नागपत्नीभ्यो० ।

वनस्पतिर० धूपं० ॥ आज्यं च व० दीपं द० ॥ नैवेद्यं गृ० नैवेद्यं० ॥ लाजान्, चणकान्, पयश्च स० । आचमनीयं स० ॥ करोद्वर्तनं० ॥ इदं फलं म० फलं स० ॥ पूगीफलं० ताम्बूलं० ॥ हिरण्यगर्भ० दक्षिणां० ॥ नीराजयामि त्वां देव पन्नगाधिपते प्रभो । कश्यपानन्दजनक कर्पूरेण सुखप्रद ॥ कर्पूरदीपं० । नानाफलसमायुक्तं पुष्पाञ्जलिमिमं प्रभो । समर्पयामि नागेन्द्र दीनं मां रक्ष सागरात् ॥ पुष्पाञ्जलिं० । नमामि वासुकिं नागं नैमित्तं तक्षकं विभुम् । नमामि शङ्खं नागेन्द्रं कुमुदं प्रणमाम्यहम् ॥ अनन्तं भुजगं श्रेष्ठं नौमि कर्कोटकं विभुम् । नमामि पुलिकं नाम नागलोक-निवासिनम् ॥ नमस्कारान् स० ॥ श्रावणे शुक्लपञ्चम्यां यत्कृतं नागपूजनम् । तेन तृप्यन्तु मे नागा भवन्तु सुख-दा सदा ॥ अज्ञानाद् ज्ञानतो वापि यन्मया पूजनं कृतम् । न्यूनातिरिक्तं तत्सर्वं भो नागाः क्षन्तुमर्हथ ॥ युष्मत्प्रसा-दात्सकला मम सन्तु मनोरथाः । सर्वदा मत्कुले मास्तु भयं सर्पविषोद्भवम् ॥ इति सम्प्रार्थ्य, कृतस्य पूजासा-ङ्गतासिध्यर्थं अनन्तादिनागप्री० यथाशक्ति पायसाद्य-न्नेन सुवासिनीर्ब्राह्मणांश्च भोजयिष्ये ॥ यस्य स्मृ० अनेन मया कृतेन पूज० अनन्तादिनागाः प्रीयन्ताम् ॥ अथवा आयंगौरित्यादि वैदिकमन्त्रेण षोडशोपचारैः सम्पूज्य, नमो अस्तु सर्पेभ्य इति नमस्कारान्कृत्वा प्रार्थनादि समापयेत् ॥ तद्दिने भूमेः खननकर्षणाद्युपघातं लोहपात्रे पोलिकादिकरणं च न कुर्यादिति ॥ इति नागपूजा समाप्ता ॥

॥ श्रावणशुक्लषष्ठ्यां सूपौदनवायनदानविधिः ॥

षष्ठी च सायाह्नव्यापिनी सप्तमीयुता ग्राह्या । देश-

कालौ स्मृत्वा, मम इह जन्मनि जन्मान्तरे च भर्त्रा सह अखण्डितसुखसौभाग्याभिवृद्धिपुत्रपौत्राणां दीर्घायुष्याद्यभीष्टसिद्ध्यर्थं श्रावणशुक्लषष्ठ्यां विहितं (श्रीउमामहेश्वरपूजनपूर्वकं) ब्राह्मणाय सूपौदनवायनदानं करिष्ये ॥ (सोमवारोक्तपूजाप्रकारेण उमामहेश्वरौ सम्पूज्य, सूपौदननैवेद्यं समर्प्य पूजां समापयेत्) ततो वायनं विप्राग्रे निधाय आसनादिना विप्रं सम्पूजयेत् ॥ स्वस्त्यस्तु दी०। दानमन्त्रः—आम्रलवणशाकेन नैवेद्यस्य पदार्थकैः। सूपौदनं सताम्बूलं ब्राह्मणाय ददाम्यहम् ॥ इदं सूपौदनम् आम्रलवणशाकनैवेद्यपदार्थसहितं सदक्षिणाकं सताम्बूलम् अमुकश० प्र०। अनेन (उमामहेश्वरपूजनेन) सूपौदनवायनदानाख्येन च कर्मणा तेन श्रीउमामहेश्वरौ प्रीयेताम् ॥

॥ श्रावणशुक्लसप्तम्यां दध्योदनदानविधिः ॥

सप्तमी मध्याह्नव्यापिनी ग्राह्या। कुड्ये चन्दनादिना चतुरस्रां वर्तुलां वा वापीं सप्त जलदेवताश्च बालद्वयपुरुषत्रययुतां नारीं च अश्वं वृषभं नरवाहनयुतां शिबिकां च विलिख्य पूजां समारभेत्। आचम्य देशकालौ स्मृत्वा, मम इह जन्मनि जन्मान्तरे च अवैधव्यप्राप्तये अखण्डितभर्तृसंयोगपुत्रपौत्रादि धनधान्यप्राप्तये च शीतलासप्तम्यां विहितं (जलदेवतापूजनपूर्वकं) दध्योदनवायनदानं करिष्ये। (कलशपूजनादि विधाय, लिखितदेवता आवाह्य, श्रीजलदेवताद्यावाहितदेवताभ्यो नम इति नाममन्त्रेण षोडशोपचारैः कर्कटीफलयुतदध्योदननैवेद्यसमर्पणेन च पूजां समापयेत्) ॥ ततः ब्राह्मणं सम्पूज्य वायनं दद्यात्। दानमन्त्रः—ताम्बूलदक्षिणायुक्तं दध्यन्नं कर्कटीफलम्।

व्रतसम्पूर्णसिद्ध्यर्थं वायनं प्रददाम्यहम् ॥ इदं कर्कटीफलयुतं दध्योदनवायनं सताम्बूलं सदक्षिणाकं श्रीजलदेवताप्रीत्यर्थम् अमुकश० ब्राह्मणाय तुभ्य० प्र० । अनेन (जलदेवतापूजनेन) दध्योदनवायनदानाख्येन च कर्मणा तेन श्रीजलदेवताः प्रीयन्ताम् ।

॥ अथ पवित्रारोपणविधिः ॥

तत्र विष्णोः पवित्रारोपणं श्रावणशुक्लद्वादश्यां, श्रवणनक्षत्रे, शुक्लपञ्चम्यां, पौर्णमास्यां वा, कार्यम् । शिवस्य तु आषाढचतुर्दश्यां, श्रावणचतुर्दश्यां, भाद्रपदचतुर्दश्यामष्टम्यां वा शुक्ले कृष्णे वा कार्यम् । मुख्यकालातिक्रमे कार्तिकपौर्णमासीपर्यन्तं गौणकालः । प्रतिपदादितिथिषु देवतान्तरपवित्रारोपणादि विस्तृतः प्रयोगः कौस्तुभादौ ज्ञेयः । अत्र तु सङ्क्षिप्तः प्रयोग उच्यते । तत्रादौ विष्णोः पवित्रारोपणम् । ब्राह्मण्या कर्तितानि सप्तविंशतिसङ्ख्याककार्पाससूत्राणि एकीकृत्य दोरकं कृत्वा समान्तरालान् द्वादशग्रन्थीन् दत्वा प्रतिमानाभिपर्यन्तं प्रलम्बितं कुर्यात्, शालिग्रामादौ चतुरङ्गुलमात्रं क्षेत्रविस्तारमात्रं वा कुर्यात् । परिवारदेवतानां गुरुब्राह्मणानां च तत्तन्नाभिमात्रप्रलम्बितानि त्रिभिः सूत्रैर्ग्रन्थित्रययुतानि एकग्रन्थियुतानि वा सम्पादयेत् । अथ प्रयोगः । द्वादश्यां प्रातः कृतनित्यक्रियो देशकालौ० मया कृतायाः संवत्सरावधि (अमुकदेवता) पूजायाः सम्पूर्णफलप्राप्तिद्वारा श्रीपर० (अमुकदेवतायाः) पवित्रारोपणं तदङ्गत्वेन पूजनं च करिष्ये । यथासम्भवं पूजां कृत्वा पवित्राणि प्रक्षाल्य वैणवपटलादौ संस्थाप्य गन्धाद्युपचारैः सम्पूज्य देवसमीपे

गोदोहनमात्रमधिवास्य गन्धदूर्वाक्षतयुक्तं कृत्वा देवकण्ठे समर्पयेत् । तत्र मन्त्रः, अतोदेवा० इति वैदिकः । देवदेव नमस्तुभ्यं गृहाणेदं पवित्रकम् । पवित्रीकरणार्थाय वर्ष-पूजाफलप्रदम् ॥ पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतम् । शुद्धो भवाम्यहं देव त्वत्प्रसादात्सुरेश्वर ॥ इति मन्त्रेण मूलमन्त्रसम्पुटितेन समर्प्य, अङ्गदेवताभ्यस्तत्तन्नाममन्त्रेण समर्प्य उत्तरपूजां कृत्वा महानैवेद्यं समर्प्य नीराज्य, प्रार्थयेत् । मणिविद्रुममालाभिर्मन्दारकुसुमादिभिः । इयं सांवत्सरी पूजा तवास्तु गरुडध्वज ॥ १ ॥ वनमालां यथा देव कौस्तुभं सततं हृदि । पवित्रमस्तु ते तद्वत्पूजां च हृदये वह ॥ २ ॥ जानताऽजानतावापि न कृतं यत्त-वार्चनम् । केनचिद्विघ्नदोषेण परिपूर्णं तदस्तु मे ॥ ३ ॥ अपराधसहस्राणि क्रियन्तेऽहर्निशं मया । दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर ॥ ४ ॥ भूमौ स्खलितपादानां भूमिरेवावलम्बनम् । त्वयि जातापराधानां त्वमेव शरणं मम ॥५॥ इति सम्प्रार्थ्य, अनेन पवित्रारोपणेन (अमुक) देवता प्रीयताम् ॥ ततः गुरवे ब्राह्मणेभ्यश्च दत्वा स्वयं च धारयित्वा ब्राह्मणैः सह पारणं कुर्यात् । पवित्राणि त्रिरात्रमहोरात्रं वा धारयित्वा तदन्ते देवं सम्पूज्य जले विसृजेत् । इति पवित्रारोपणोत्सवः ॥

॥ श्रावणशुक्लपूर्णिमायां सभादीपदानविधिः ॥

तण्डुलपिष्टनिर्मितं घृतवर्त्तियुक्तं तण्डुलप्रस्थश्रीफलादि पञ्चफलपूगीफलसंयुतं दीपं कांस्यपात्रे निधाय, सपत्नीक उपविश्य, आचम्य देशकालौ स्मृत्वा, मम (सपत्नीकस्य) इह जन्मनि जन्मान्तरे च अखण्डितसौ-

भाग्यदीर्घायुष्मत्सुपुत्रलक्ष्मीविविधसुखाद्यभीष्टकामना-
॥ ७२ ॥ सिद्धिद्वारा श्रीब्रह्मविष्णुमहेश्वरप्रीत्यर्थं ब्राह्मणाय सभा-
दीपदानं करिष्ये। तदङ्गत्वेन दीपपूजनं ब्राह्मणपूजनं
च करिष्ये। पञ्चोपचारैः दीपं ब्राह्मणं च सम्पूज्य, स्वस्त्यस्तु,
दीर्घं०। भो दीप ब्रह्मरूपस्त्वं ज्योतिषां प्रभुरव्ययः।
सौभाग्यं देहि मे पुत्रानवैधव्यं च देहि मे॥ अभीष्टस्यास्तु
मे प्राप्तिर्भवेस्मिंश्च भवान्तरे। तव प्रदानात्सकला मम
सन्तु मनोरथाः॥ श्रावण्यां श्रवणे ऋक्षे सभायामग्नि-
सन्निधौ। सभादीपं प्रदास्यामि तुभ्यं विप्र सदक्षिणम्॥
इदं सभादीपदानं दक्षिणाताम्बूलसहितं अमुकश० तुभ्य-
महं सम्प्रददे। प्रति गृ० प्र०। अनेन सभादीपदानाख्येन
कर्मणा तेन श्रीब्रह्मविष्णुमहेश्वराः प्रीयन्ताम्।

अथोद्यापनविधिः। तद्यथा, पञ्चप्रस्थसम्मितानि पञ्च-
धान्यानि पञ्चसु पात्रेषु भूमौ वा चतुर्दिक्षुमध्ये च निधाय
मध्यस्थधान्यराशौ प्रस्थतण्डुलपूरितं कांस्यपात्रं निधाय
तत्र पिष्टमयं दीपं संस्थाप्य, तत्समीपे यथासम्भव-
सुवर्णादिनिर्मितां दीपिकां यथासम्भवसुवर्णवर्तिसहि-
तघृताक्तकार्पासवर्तियुतां निधाय, प्रज्वाल्य दीपद्वयं
यज्ञोपवीतवस्त्रद्वयवेष्टितं कृत्वा, आचम्य देशका० मया
कृतस्य पञ्चवर्षपर्यन्तस्य सभादीपदानकर्मणः सम्पूर्ण-
तासिद्ध्यर्थं उद्यापनं करिष्ये। तदङ्गं गणपतिपूजनं
दीपपूजनं ब्राह्मणपूजनं च करिष्ये। गणपतिं दीपं ब्राह्मणं
च सम्पूज्य, भोदीप इत्यादिमन्त्रान् पठित्वा, सभादीप-
दानसम्पूर्णतायै इमं सोपस्करं सदक्षिणं सभादीपम् अमु-
१० कश० सम्प्रददे। प्रतिगृ० प्र०। अनेन सभादीपदानोद्याप-
नाख्येन कर्मणा तेन श्रीब्रह्मविष्णुमहेश्वराः प्रीयन्ताम्॥

॥ अस्यामेव पूर्णिमायां रक्षाबन्धनविधिः ॥

पूर्णिमा तु चतुर्दशीयुताऽपराह्णव्यापिनी ग्राह्येति कमलाकरप्रभृतयः । अत्रायं विधिः । सिद्धार्थैः * रक्षतैर्हेमसंयुतैश्चित्रवाससा । सुबद्धां तन्तुभिश्चित्रैर्ग्रथितां पोटलीं शुभाम् ॥ एतादृशीं पोटलीं विधायापराह्णे विप्रान्सम्पूज्य शुभासने न्वपविश्य स्वरक्षार्थं दक्षिणे करे बध्नीयात् । तत्र मन्त्रः—येन बद्धो बली राजा दानवेन्द्रो महाबलः । तेन त्वामपि बध्नामि रक्षे मा चल मा चल ॥ इति रक्षाबन्धनविधिः ॥

॥ अथ हलषष्ठीपूजाविधिः ॥

भाद्रपदकृष्णषष्ठी हलषष्ठी । सा वन्ध्याकाकवन्ध्यामृतवन्ध्यादिभिर्वा सुवासिनीभिर्दीर्घायुःपुत्रपौत्रादिसन्तानप्राप्त्यर्थं कार्या । स्नात्वा मध्याह्नसमये इत्युक्तत्वात्सा मध्याह्नव्यापिनी ग्राह्या । प्रातः सुवासिनीपञ्चकमामन्त्र्य पूजास्थानं रङ्गवल्यादिभिः कदलीस्तम्भैश्च मण्डितं कुर्यात् । पञ्चपक्वान्नसहितसौभाग्यद्रव्ययुक्तपञ्चवायनानि सम्पाद्य तथा बदरीशाखां पलाशशाखां कुशस्तम्बं काशस्तम्बं भवानीशङ्करप्रतिमां पूजासामग्रीं च सम्पाद्य मध्याह्ने स्नात्वा धौतवस्त्रावृता शृङ्गाराभरणानि च धृत्वा सगीतवादित्रनिर्घोषैः सुवासिनीभिः सह पूजास्थानं प्रविश्य पूजां समारभेत् । तत्र बदरीशाखादीनां रोपणं कृत्वा समन्ततो नूतनवस्त्रेणावेष्ट्य तदग्रे भवानीशङ्करप्रतिमां स्थापयेत् । ब्राह्मणैः स्थापनं कुर्यादियुक्तत्वात्तदभावे स्त्रिया तत्कर्तुमशक्यत्वात्पतिना सह पूजा कार्येतियुक्तमि-

* भाषया शिरस इति प्रसिद्धः ।

ति प्रतिभाति। देशकालौ० ममेह जन्मनि जन्मान्तरे च वन्ध्याकाकवन्ध्यामृतवन्ध्यादिदोषपरिहारद्वारा दीर्घायुःश्रीर्विपुलकीर्तियुतपुत्रपौत्राद्यनवच्छिन्नसन्ततिप्राप्त्यर्थं अस्यां हलषष्ठ्यां भवानीशङ्करदेवताप्रीत्यर्थं षोडशोपचारैः भवानीशङ्करपूजनमहं करिष्ये। तदङ्गत्वेन गणपतिपूजनं आसनविधिं (प्रजनने ब्रह्मा तिष्ठत्विति पुरुषसूक्तेन वा) न्यासान् कलशपूजनं शङ्खघण्टापूजनं च करिष्ये। गणपतिपूजनादिपूजासम्भारप्रोक्षणान्तं कृत्वा (प्रतिमाया अग्न्युत्तारणं) प्राणप्रतिष्ठां च कुर्यात्। प्राणप्रतिष्ठाविधिश्च सिद्धिविनायकपूजायां द्रष्टव्यः। अथ ध्यानम्। कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम्। सदावसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥ भवानीशङ्कराभ्यां नम इत्यनेन पुरुषसूक्तेन वा षोडशोपचारपूजां कुर्यात्। आवाहनं न जानामीत्यादीना क्षमाप्य यस्य स्मृत्येत्यादिना सम्प्रार्थ्य ततो सखीभिस्सह कथां शृणुयात्। ततो ब्राह्मणपूजनं, सुवासिनीपूजनं, वायनं दत्वा, सम्भोज्य, तद्दिने हलकृष्टान्नगोपयोदध्यादिवर्जं भुञ्जीयात्। श्वःप्रातः विसर्जनं कृत्वा पूजापीठं ब्राह्मणाय दत्वा समापयेत्।

॥ इति हलषष्ठीपूजाविधिः ॥

॥ अथ हलषष्ठीकथाप्रारम्भः ॥

सूत उवाच। लसत्प्रसन्नवदनां नीलोत्पलदलेक्षणाम्। स्वर्णसिंहासनगतां दिव्यवस्त्रोपशोभिताम् ॥ माणिक्यमणिरत्नौघैः कृताभरणभूषिताम्। वृद्धां देवीं प्रणम्याथ पप्रच्छुः किन्नरस्त्रियः ॥ स्त्रिय ऊचुः। कृतानि बहुशो देवि त्वत्प्रसादाद्व्रतानि वै। हलषष्ठीव्रतं सम्यगस्मभ्यं वक्तुमर्हसि ॥

वृद्धोवाच । समाप्ते श्रावणे मासि कृष्णे भाद्रपदस्य च ।
।७६॥ हलषष्ठी विधातव्या स्त्रीभिः स्वात्महितेच्छया ॥ पुत्रपौत्रप्रदा सा च सुखसौभाग्यवर्धिनी । तद्दिने हलकृष्टान्नं वर्जयेद् गोपयो दधि ॥ सुवासिनीः सुप्रभाते समागम्य व्रतार्थिनी । स्नात्वा मध्याह्नसमये धौतवस्त्रावृता तथा ॥ सखीभिः संप्रहृष्टात्मा शृङ्गारतिलकादिभिः । गीतवादित्रनिर्घोषैः समाच्छादितदिङ्मुखा ॥ पूजोपचारमाहृत्य पूजास्थानं प्रविश्य च । रोपयेद् बदरीदर्भकाशपालाशपल्लवान् ॥ एकीकृत्य सुवस्त्रेण वेष्टयेन्नूतनेन च । तस्याग्रे तु विधानेन कृत्वा गौरीं शिवं तथा ॥ प्रतिष्ठाप्य प्रतिष्ठाभिर्ब्राह्मणैर्वेदपारगैः । कुर्यात्प्रयत्नतः पूजां गन्धपुष्पाक्षतादिभिः ॥ धूपैर्दीपैः सनैवेद्यैरुपचारैरनेकधा । एवं पूजां समाप्याथ कथां च शृणुयात्ततः ॥ हलषष्ठीव्रतस्यास्य माहात्म्यं सखिभिः सह । आसीच्चन्द्रपुरे रम्ये चन्द्रभट्टः सुशोभनः ॥ तस्य पत्नी विशालाक्षी साध्वी पतिपरायणा । द्वे तस्याश्चेटके आस्तां मानाधानेति विश्रुते ॥ वन्ध्याभिस्तिसृभिर्भट्टो राजानं सेवतेऽन्वहम् । तस्मात्प्रसादमासाद्य सम्मानेन समर्चितः ॥ समाप्य सेवां भूपस्य स्वगृहं गन्तुमुद्यतः । स्वगृहं गच्छता तेन दृष्टं स्वस्थानसेचनम् ॥ न ब्रह्महा न गोघ्नोऽहं न कुष्ठो न च दुर्गतिः । न चौरो न च पापिष्ठः कस्मान्मे स्थानसेचनम् ॥ इति चिन्तानतमुखः स संपप्रच्छ वारिदम् ॥ चन्द्रभट्ट उवाच । त्वं मा कथय भोमित्र कुतो मे स्थानसेचनम् । वारिद उवाच । पृष्टश्चैवं त्वया भट्ट सत्यं सत्यं वदाम्यहम् । भोभट्ट त्वमपुत्रोऽसि तस्मात्ते स्थानसेचनम् ॥ श्रुत्वा वचस्तस्य भट्टो दुःखेन परितापितः । गत्वा गेहे न्यपतत स्वाङ्गान्याच्छाद्य वाससा ॥

चिन्तया किं करोमीति पुत्रोत्पत्तिः कथं भवेत् । ततः सुलो-
॥ ७७ ॥ चना भार्या तत्सकाशमुपागता ॥ दृष्ट्वा सा दुःखितं नाथं
प्रोवाच मधुरस्वना ॥ सुलोचनोवाच । भो भो नाथ स्वदुः-
खस्य कारणं कथय प्रभो । हृदयं मेऽन्यथा तूर्णं विदीर्य-
त्येव निश्चितम् ॥ चन्द्रभट्ट उवाच । शृणु प्रिये सभामध्ये
प्रोत्थितस्य ममासनम् । अपुत्रकत्वात्संसिक्तं वारिदेनेति
दुःखितः ॥ किं करोमि क्व गच्छामि कथं पुत्रस्तु लभ्यते ।
इति भर्तुर्वचः श्रुत्वा सापि चिन्तापराऽभवत् ॥ ततः स
चन्द्रभट्टोऽपि गतो ऽसौ वनगह्वरम् । व्रतं निरशनं कृत्वा
जपन् दुर्गां हृदि स्थिताम् ॥ वनं विवेश स व्याघ्रसिंह-
शार्दूलसेवितम् । वनाद्वनान्तरं गत्वा सोऽपश्यद्देवता-
लयम् ॥ अधिष्ठितं महादेव्याश्चतुर्द्वारैश्च शोभितम् । स तत्र
स्तवनं चक्रे महादेव्या दृढासनः ॥ निराहारस्य जपतः
सिद्धो मन्त्रः प्रयत्नतः । गतान्यहानि बहुशः चन्द्रभट्टस्य
धीमतः ॥ अथ रात्रौ कृपायुक्ता महादेवी समागता । वरं
ब्रूहि वरं ब्रूहि प्रजल्पन् सस्मितानना ॥ देव्युवाच । किं
प्रार्थ्यते त्वया वत्स सन्तुष्टा संस्तवेन च । अहमेव वरं
दिव्यं दास्यामि तव वाञ्छितम् ॥ इत्युक्तश्चन्द्रभट्टोऽसौ
हृष्टस्तां समभाषत ॥ चन्द्रभट्ट उवाच । मह्यं पुत्रं वरं देहि
यदि तुष्टासि चण्डिके । देव्युवाच । नैव पुत्रस्त्वदर्थेऽस्ति
कुत्रत्यो दीयते मया । पुत्रं विना वरं ब्रूहि यन्मया दीयते
द्विज ॥ चन्द्रभट्ट उवाच । प्राणत्यागो विधातव्यो यदि
नास्ति सुतोद्भवः । किमन्येन वरेणात्र महादेवीश्वरेश्वरी ॥
इत्याकर्ण्य महादेवी चिन्तयाकुलिताब्रवीत् ॥ देव्युवाच ।
भो भट्ट पुत्रो दत्तस्ते यद्वरं मनसेप्सितम् । तस्येप्सितं
न पूर्येत तदैव स मरिष्यति ॥ गृहाणाम्रफलं गच्छ भो भट्ट

स्वगृहं प्रति । एतदाम्रफलं विप्र पत्न्यै स्वस्यै प्रदापय ॥
॥ ७८ ॥ एवं संचिन्तितं तेन धनान्धीभूतचेतसा । लब्ध्वा चित्ते-
प्सितं पुत्रं भट्टस्तु गृहमागतः ॥ सुलोचनायै तद्दत्तं
भक्षणायाग्रजं फलम् । वल्कलाक्षी च दासीभ्यां दत्वा
पुत्रानजीजनत् ॥ दिने दिने ते ववृधुः परामापुर्मुदं गृहे ।
कदाचिद्दैवसंयोगाच्चन्द्रभट्टसुतोऽभवत् ॥ अप्राप्य चेप्सितं
भूमौ स पुत्रो मृत एव सः । एवं हि चेटिकापुत्रौ मृतौ
भट्टस्य पश्यतः ॥ ततो बहुविधं शोकं दुःखं कृत्वा मुहु-
र्मुहुः । पुनर्जगाम तां दुर्गां संस्मरन् वरदाम्बिकाम् ॥
तुतोष च ततस्तस्मै फलमेकं पुनर्ददौ । आम्रमानीय यत्नेन
भार्यायै तत्प्रदत्तवान् ॥ तत्फलप्राशनाद् गर्भं पुनर्लेभे कुटु-
म्बिनी । तस्यां सुतः समुत्पन्नस्तत्फलस्यैव भक्षणात् ॥
अप्राप्य स्वेप्सितं मातुः पुनरेव ममार सः । देव्याः शरण-
मापन्नः पुनर्लेभे सुतत्रयम् ॥ याचयित्वेप्सितं किञ्चिदल-
भन्मृत एव सः । एवं चैव सुतास्तेन लब्ध्वा लब्ध्वाति-
दुःखितः ॥ देवालयं पुनः प्राप्तौ दम्पती तौ सुतार्थिनौ ।
सुलोचना च सा गुप्ता तत्रैव च समाविशत् ॥ भट्टस्तु
दूरतो देव्या जपं कुर्वन्समाविशत् । दिनानि तत्र पञ्चा-
शद् गतानि स्थितयोस्तयोः ॥ अथ रात्रौ महादेवी सुगुप्तं
पुत्रमब्रवीत् ॥ देव्युवाच । दास्याम्यस्मै तथैव त्वां गच्छ
गच्छ यथा पुनः । पुत्र उवाच । मया दत्तं महद् दुःखं देवि
मातुः पितुस्तयोः । नाहं पुनर्गमिष्यामि दुःखदो नैव शर्म-
कृत् ॥ देव्युवाच । एकवारं पुनर्गच्छ पुनरागच्छ पुत्रक ।
तत्रेप्सितस्य सम्पूर्तिं पितरौ चेत्करिष्यतः ॥ तदा स्थेयं
त्वया पुत्र समागन्तव्यमन्यथा ॥ पुत्र उवाच । तानीप्सि-
तानि कथय महामाये शृणोम्यहम् । देव्युवाच । जातक-

र्मादिकं सर्वं प्रहृष्टः क्रियते यदि । स्वलङ्कृतापि ते माता
॥ ७९ ॥ प्रगृह्णाति रजोवृतम् ॥ मलमूत्रसमालिप्तं यदि चैवं च
संस्पृशेत् । तदा स्थेयं त्वया पुत्र समागन्तव्यमन्यथा ॥
रुदन्तं वा हसन्तं वा प्रीत्या चुम्बति ते मुखम् । रजोऽवगु-
ण्ठितं स्वाङ्के पुत्र गृह्णाति ते पिता ॥ तदा स्थेयं० ॥
शय्यास्थितं स्वपन्तं वा पृष्ठं कृत्वा तु न स्वपेत् । तदा स्थेयं० ॥
भ्राष्ट्रे चणकगोधूमहोलकं यदि लभ्यते । तदा स्थेयं० ॥
चतुष्के वाङ्कशय्यायां लुण्ठनं यदि लभ्यते । तदा स्थेयं० ॥
नौकायां गोपयो दुग्ध्वा मातुलो भार्यया सह । तदा स्थेयं० ॥
घृताक्तमण्डकांस्तुभ्यं यदि दास्यति भोजने । तदा स्थेयं० ॥
विवाहो राजपुत्र्या च करोमीति च लालयेत् । वर्षे वर्षे च
ते जन्म दिवसे चोत्सवं चरेत् ॥ तदा स्थेयं० ॥ स्वसा यम-
द्वितीयायां भोजयेत्परया मुदा । तदा स्थेयं० ॥ किमीप्सि-
तैस्तैर्बहुभिर्हलषष्ठीव्रतं चरेत् । तदा स्थेयं० ॥ त्वदर्थे जननी
वत्स सर्वमेतत्करोति चेत् । तदा स्थातव्यमेवेति तद्गृहे
पुत्र सर्वदा ॥ इति सर्वं श्रुतं तत्र गुप्तया भट्टभार्यया ।
ततः प्रभाते सा देवी भट्टाय च वरं ददौ ॥ वरं प्रगृह्य
भट्टोऽपि तुष्टः स्वगृहमागतः । सुलोचनापि तदनु समा-
याता स्वमालयम् ॥ ततः पुत्रः समभवद्दशमे मासि
शोभने । ईप्सितं सर्वमप्यस्य सुतस्यापूरितं तया ॥ यद्यच्च
भाषितं देव्या तथा तत्तच्चकार सा । वशीभूय स्थितः
पुत्रश्चिरं भट्टस्य सद्मनि ॥ उवाच भट्टभार्या सा नमस्कृत्य
सुलोचना । पुत्र सर्वं च यद्देव्या त्वदग्रे कथितं पुरा ॥ श्रुतं
तच्च मया सम्यग्गुप्तया तत्र सद्मनि । तत्तदेव समानीय
स्थापितं हि त्वदीप्सितम् ॥ पुत्र उवाच । अहं मातस्त्वया
क्रीत ईप्सितैस्तैः प्रपूरितैः । हलषष्ठीव्रतस्यास्य प्रभावाद-

परोऽस्म्यहम् ॥ वृद्धोवाच । इत्थं याश्च प्रकुर्वन्ति हलषष्ठीव्रतं शुभम् । न तासां पुत्रविरहः कदाचिन्नैव जायते ॥ हलषष्ठीकथा दिव्या श्रोतव्या परया मुदा । सौभाग्यधनधान्यादि सुखानि च समश्नुते ॥ ब्राह्मणेभ्यस्ततो दानं सधवाभ्यस्तु वायनम् । पात्रे पात्रे ददन्नार्यो लभ्यन्ते पुत्रपौत्रकान् ॥ इत्थं व्रतं याः प्रमदाः प्रकुर्युर्वृद्धाख्यदेव्योक्तकथां निशम्य । ताः पुत्रपौत्रादिसमृद्धियुक्ताः सुधान्यसम्पूर्णगृहा भवन्ति ॥

॥ इति श्रीब्रह्माण्डपुराणे वृद्धाकिन्नरीसंवादे हलषष्ठीव्रतकथा समाप्ता ॥

॥ अथ गोकुलाष्टम्यां श्रीकृष्णपूजाविधिः ॥

तत्र निशीथव्यापिन्यामष्टम्यां निशीथे रोहिणीयुतायां जन्माष्टमीव्रतं जयन्तीव्रतं च सहैवेति सकलसिद्धान्तः। सर्वथा निशीथे अष्टमीयोगाभावे उभयेद्यू रोहिणीयोगाभावे सकलनिशीथव्याप्तौ अंशतः समव्याप्तौ वा परेद्युरेव जन्माष्टमीव्रतम् । विषमव्याप्तौ त्वधिकव्यापिन्याम् । अथ पूजाविधिः । आचम्य प्राणानायम्य देशकालौ स्मृत्वा, मम सकुटुम्बस्य क्षेमस्थैर्यविजयाभयायुरारोग्यैश्वर्याभिवृध्यर्थं धर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिध्यर्थं नन्दयशोदाबलदेवादिश्रीकृष्णप्रीत्यर्थं च पुरुषसूक्तेन पुराणोक्तमन्त्रैश्च यथामिलितोपचारद्रव्यैः जन्माष्टमीव्रताङ्गत्वेन विहितं परिवारसहितश्रीकृष्णपूजनमहं करिष्ये। तदङ्गत्वेन गणपतिपूजनं आसनविधिं पुरुषसूक्तन्यासान् कलशपूजनं शङ्खघण्टापूजनं च करिष्ये । गणपतिपूजनादिपूजासम्भारप्रोक्षणान्तं कृत्वा प्राणप्रतिष्ठां कुर्यात् । तद्विधिश्च सिद्धिविनायकपूजायां

|| ८१ || द्रष्टव्यः । अथ ध्यानम् । गायद्भिः किन्नराद्यैः सततपरिवृता वेणुवीणानिनादैः श्रृङ्गारादर्शकुम्भप्रवरकृतकरैः किन्नरैः सेव्यमाना । पर्यङ्के स्वास्तृतायामुदिततरमुखी पुत्रिणी सम्यगास्ते सा देवी देवमाता जयति सुवदना देवकी दिव्यरूपा ॥ देवक्यै० देवकीं ध्यायामि । मञ्चके बालकं सुप्तं पर्यङ्के स्तनपायिनम् । श्रीवत्सवक्षसं शान्तं नीलोत्पलदलच्छविम् ॥ श्रीकृष्णाय नमः श्रीकृष्णं परिवारदेवताश्च ध्यायामि ।

१ श्रीकृष्णा० श्रीकृष्णं आ० ।	१३ नाग्नजित्यै० नाग्नजितीं० ।
२ देवक्यै० देवकीं आ० ।	१४ कालिन्द्यै० कालिन्दीं आ० ।
३ रोहिण्यै० रोहिणीं० ।	१५ मित्रविन्दा० मित्रविन्दां० ।
४ वसुदेवा० वसुदेवं० ।	१६ लक्ष्मणा० लक्ष्मणां आ० ।
५ बलदेवा० बलदेवं० ।	१७ जाम्बवत्यै० जाम्बवतीं० ।
६ यशोदायै० यशोदां आ० ।	१८ सुशीला० सुशीलां आ० ।
७ नन्दाय० नन्दं आ० ।	१९ कंसाय० कंसं आ० ।
८ गर्गाय० गर्गं आ० ।	२० गवे० गां आ० ।
९ चतुर्मुखा० चतुर्मुखं० ।	२१ कुञ्जरा० कुञ्जरं आ० ।
१० गोकुला० गोकुलं आ० ।	२२ यमुना० यमुनां आ० ।
११ रुक्मिण्यै० रुक्मिणीं० ।	२३ कालिया० कालियं० ।
१२ सत्यभामायै० सत्यभामां आ० ।	

सहस्रशीर्षा० आगच्छ देवदेवेश जगद्योने रमापते । पूजयिष्याम्यहं देव प्रसादात्सुमुखो भव ॥ श्रीकृष्णाद्यावाहितदेवताभ्यो नमः । आवाहनं० ॥ पुरुषए० देवदेव
११ जगन्नाथ गरुडासनसंस्थित । आसनं कल्पितं दिव्यं जगद्धाम नमोऽस्तु ते ॥ आसनं० ॥ एतावा० नानातीर्थाहृतं

शुद्धं निर्मलं पुष्पवासितम् । पाद्यं गृहाण दैत्यारे विश्वरूप नमोऽस्तु ते ॥ पाद्यं० ॥ त्रिपाद्० गङ्गादिसर्वतीर्थेभ्यो मयाऽऽनीतं सुशीतलम् । गोपीपते गृहाणार्घ्यं गन्धपुष्पफलैर्युतम् ॥ अर्घ्यं० ॥ तस्माद्वि० कृष्णावेणीसमुद्भूतं कालिन्दीजलसंयुतम् । गृहाणाचमनं कृष्ण विश्वकाय नमोऽस्तु ते ॥ आचमनीयं० ॥ दधि क्षौद्रं घृतं शुद्धं कपिलायाः सुगन्धि यत् । सुस्वादु मधुरं शौरे मधुपर्कं गृहाण मे ॥ मधुपर्कं० ॥ पयो दधि घृतं क्षौद्रं शर्करासहितं प्रभो । स्नानार्थं देवदेवेश गृह्यतां देवकीसुत ॥ आप्यायस्वेत्यादिवैदिकमन्त्रैश्च पञ्चामृतस्नानं० ॥ यत्पुरुषेण० मन्दाकिनी गौतमी च यमुना च सरस्वती । ताभ्यः स्नानार्थमानीतं गृहाण शिशिरं जलम् ॥ स्नानं० ॥ तैलं सुगन्धसंयुक्तं नानापुष्पैः सुवासितम् । मङ्गलार्थं मया दत्तमभ्यङ्गं प्र० ॥ कनिक्र० तैलाभ्यङ्गस्नानं० । हरिद्रायाः कृतं चूर्णं सतैलं ससुगन्धिकम् । मया निवेदितं साम्बूद्वर्तनं प्र० ॥ हरिद्राचूर्णलेपनं० ॥ नानातीर्थादाहृतं च सुगन्धं जलमुत्तमम् । उष्णं कृतं मया देव स्नानार्थं प्र० ॥ उष्णोदकस्नानं० ॥ आचमनीयं० । स्नानसमये नीराज्य, पञ्चोपचारपूजां कृत्वा पुरुषसूक्तेन, श्रीसूक्तेन, सुरास्त्वेत्यादिभिश्चाभिषेकः । तंयज्ञं० क्षौमं च पट्टसूत्राढ्यं मयाऽऽनीतं शुभांशुकम् । गृह्यतां देवदेवेश रमाधीश सुरोत्तम ॥ वस्त्रं० ॥ तस्माद्यज्ञात्सर्वहुतः सं० दामोदर नमस्तेऽस्तु त्राहि मां भवसागरात् । ब्रह्मसूत्रं सोत्तरीयं गृ० ॥ यज्ञोपवी० ॥ किरीटकुण्डलादीनि काञ्चीवलययुग्मकम् । कौस्तुभं वनमाला च भूषणानि जगत्प्रभो ॥ आभूषणं० ॥ तस्मा० ऋ० कुङ्कुमेन समायुक्तं कर्पूरादिसमन्वितम् । मया निवेदितं भक्त्या चन्दनं प्रति० ॥

चन्दनं० ॥ अक्षताश्च सुरश्रेष्ठाः कुङ्कुमाक्ताः सुशोभिताः। पूजासंरक्षणार्थाय अक्षताः प्रति० ॥ अक्षतान्० ॥ तस्माद्० पुष्पाणि यानि दिव्यानि पारिजातोद्भवानि च। मालती-केशरादीनि पूजार्थं प्रति० ॥ पुष्पाणि० ॥

॥ अथाङ्गपूजा ॥

१ श्रीकृष्णाय० पादौ पू०।	२ सङ्कर्षणाय० गुल्फौ पू०।
३ कालात्मने० जानुनी पू०।	४ विश्वकर्मणे० जङ्घे पू०।
५ विश्वनेत्रा० कटी पू०।	६ विश्वकर्त्रे० मेढ्रं पू०।
७ पद्मनाभाय० नाभिं पू०।	८ परमात्मने० हृदयं पू०।
९ श्रीकण्ठाय० कण्ठं पू०।	१० सर्वास्त्रधारिणे० बाहू पू०।
११ वाचस्पतये० मुखं पू०।	१२ केशवाय० ललाटं पू०।
१३ सर्वात्मने० शिरः पू०।	१४ विश्वरूपिणे० सर्वाङ्गं पू०।

॥ अथाष्टोत्तरशतविष्णुनामावलिप्रारम्भः ॥

अद्य०र्थं मम समस्तपापक्षयार्थं श्रीमहाविष्णुप्रीत्यर्थं अष्टोत्तरशतनामभिः तुलसीदलसमर्पणं करिष्ये। इति सङ्कल्प्य, देवैस्त्वं निर्मिता पूर्वमर्चितासि मुनीश्वरैः। नमो नमस्ते तुलसि पापं हर हरिप्रिये ॥ इति तुलसीं सम्प्रार्थ्य तुलसीदलानि प्रक्षाल्य समर्पयेत्।

१ श्रीकृष्णाय नमः।	७ लीलामानुषविग्रहाय०।
२ कमलानाथाय नमः।	८ श्रीवत्सकौस्तुभधराय०।
३ वासुदेवाय नमः।	९ यशोदावत्सलाय नमः।
४ सनातनाय नमः।	१० हरये नमः।
५ वसुदेवात्मजाय नमः।	११ चतुर्भुजात्तचक्रासिगदाशङ्खाद्युतायुधाय नमः।
६ पुण्याय नमः।	

१२ देवकीनन्दनाय नमः ।
१३ श्रीशाय नमः ।
१४ नन्दगोपप्रियात्मजाय० ।
१५ यमुनावेगसंहारिणे न० ।
१६ बलभद्रप्रियानुजाय न० ।
१७ पूतनाजीवितहराय न० ।
१८ शकटासुरभञ्जनाय न० ।
१९ नन्दव्रजजनानन्दाय न० ।
२० सच्चिदानन्दविग्रहाय० ।
२१ नवनीतविलिप्ताङ्गाय० ।
२२ नवनीतनटाय नमः ।
२३ अनघाय नमः ।
२४ नवनीतनवाहाराय न० ।
२५ मुचुकुन्दप्रसादकाय न० ।
२६ षोडशस्त्रीसहस्रेशाय० ।
२७ त्रिभङ्गीललिताकृतये० ।
२८ शुकवागमृताब्धिन्दवे न० ।
२९ गोविन्दाय नमः ।
३० योगिनां पतये नमः ।
३१ वत्सपालनसञ्चारिणे न० ।
३२ धेनुकासुरभञ्जनाय न० ।
३३ तृणीकृततृणावर्ताय न० ।
३४ यमलार्जुनभञ्जनाय न० ।
३५ उत्तालोत्तालभर्त्रे नमः ।
३६ तमालश्यामलाकृतये न० ।
३७ गोपगोपीश्वराय नमः ।
३८ योगिने नमः ।
३९ कोटिसूर्यसमप्रभाय न० ।
४० इडापतये नमः ।
४१ परंज्योतिषे नमः ।
४२ यादवेन्द्राय नमः ।
४३ यदूद्वहाय नमः ।
४४ वनमालिने नमः ।
४५ पीतवाससे नमः ।
४६ पारिजातापहारकाय० ।
४७ गोवर्धनचलोद्धर्त्रे न० ।
४८ गोपालाय नमः ।
४९ सर्वपालकाय नमः ।
५० अजाय नमः ।
५१ निरञ्जनाय नमः ।
५२ कामजनकाय नमः ।
५३ कञ्जलोचनाय नमः ।
५४ मधुघ्ने नमः ।
५५ मथुरानाथाय नमः ।
५६ द्वारकानायकाय नमः ।
५७ बलिने नमः ।
५८ वृन्दावनान्तसञ्चारिणे० ।
५९ तुलसीदामभूषणाय० ।
६० स्यमन्तकमणेर्हर्त्रे न० ।
६१ नरनारायणात्मकाय० ।
६२ कुब्जाकृष्णाम्बरधरा० ।
६३ मायिने नमः ।

६४ परमपूरुषाय नमः ।
६५ मुष्टिकासुरचाणूरमल्लयुद्धविशारदाय० ।
६६ संसारवैरिणे नमः ।
६७ कंसारये नमः ।
६८ मुरारये नमः ।
६९ नरकान्तकाय नमः ।
७० अनादये नमः ।
७१ ब्रह्मसब्चारिणे नमः ।
७२ कृष्णाव्यसनकर्षकाय० ।
७३ शिशुपालशिरच्छेत्रे० ।
७४ दुर्योधनकुलान्तकाय० ।
७५ विदुराक्रूरवरदाय० ।
७६ विश्वरूपप्रदर्शकाय० ।
७७ सत्यवाचे नमः ।
७८ सत्यसङ्कल्पाय नमः ।
७९ सत्यभामारताय नमः ।
८० जयिने नमः ।
८१ सुभद्रापूर्वजाय नमः ।
८२ जिष्णवे नमः ।
८३ भीष्ममुक्तिप्रदायका० ।
८४ जगद्गुरवे नमः ।
८५ जगन्नाथाय नमः ।
८६ वेणुनादविशारदाय० ।
८७ वृषभासुरविध्वंसिने० ।
८८ बाणासुरकरान्तकाय० ।
८९ युधिष्ठिरप्रतिष्ठात्रे० ।
९० बर्हिबर्हावतंसकाय० ।
९१ पार्थसारथये नमः ।
९२ अव्यक्ताय नमः ।
९३ गीतामृतमहोदधये० ।
९४ कालीयफणिमाणिक्यरञ्जितश्रीपदाम्बुजाय० ।
९५ दामोदराय नमः ।
९६ यज्ञभोक्त्रे नमः ।
९७ दानवेन्द्रविनाशकाय० ।
९८ नारायणाय नमः ।
९९ परब्रह्मणे नमः ।
१०० पन्नगाशनवाहनाय० ।
१०१ जलक्रीडासमासक्तगोपीवस्त्रापहारकाय० ।
१०२ पुण्यश्लोकाय नमः ।
१०३ पुण्यतीर्थाय नमः ।
१०४ वेदवेद्याय नमः ।
१०५ दयानिधये नमः ।
१०६ सर्वतीर्थात्मकाय नमः ।
१०७ सर्वग्रहरूपिणे नमः ।
१०८ परात्पराय नमः ।

अनेन अष्टोत्तरशततुलसीदलसमर्पणाख्येन कर्मणा श्रीमहाविष्णुः प्रीयताम् ।

यत्पुरुषं० वनस्पतिरसोद्भूतं कालागरुसमन्वितम् । गृहाण देवदेवेश गुणसागर गोपते ॥ धूपं ॥ ब्राह्मणो० त्वं ज्योतिः सर्वदेवानां तेजस्त्वं तेजसां परम् । आत्मज्योतिर्नमस्तुभ्यं दीपोऽयं प्रति० ॥ दीपं ॥ चन्द्रमाम० नानागन्धसमायुक्तं भक्ष्यभोज्यं चतुर्विधम् । नैवेद्यार्थं मया दत्तं गृ० ॥ नैवेद्यं० ॥ आचमनं० । करोद्वर्तनं० । ताम्बूलं च सकर्पूरं पूगीफलसमन्वितम् । मुखवासकरं रम्यं प्रीतिदं प्रति० ॥ ताम्बूलं० । सौवर्णं राजतं ताम्रं नानारत्नसमन्वितम् । कर्मसाद्गुण्यसिध्यर्थं दक्षिणा प्रतिगृह्यताम् ॥ दक्षिणां० ॥ रम्भाफलं नारिकेलं तथैवाम्रफलानि च । पूजितोऽसि सुरश्रेष्ठ गृह्यतां कंससूदन ॥ फलं० ॥ श्रियेजा० कर्पूरनिर्मितं दीपं स्वर्णपात्रे निवेशितम् । नीराजनं मया दत्तं वरद प्रति० ॥ कर्पूरदीपं० । नाभ्याआ० । यानि कानि० प्रदक्षिणां० । सप्तास्यास० नमस्ते देवदेवेश नमस्ते करुणालय । नमस्ते सर्वभूतेश नमस्ते लोकसाक्षिणे ॥ नमस्कारान्० ॥ यज्ञेन यज्ञ० अञ्जलिस्थानि पुष्पाणि अर्पयामि जगत्पते । गृहाण सुमुखो भूत्वा जगदानन्ददायक ॥ पुष्पाञ्जलिं० ॥ सर्वोपचारपूजनसमाप्तौ द्वादशाङ्गुलविस्तारं रौप्यमयं स्थण्डिलादिलिखितं प्रत्यक्षं वा रोहिणीयुतं चन्द्रम्—सोमेश्वराय सोमाय तथा सोमोद्भवाय च । सोमस्य पतये नित्यं तुभ्यं सोमाय वै नमः ॥ इति गन्धादिभिः सम्पूज्य शङ्खेन पुष्पचन्दनकुशसहितं जलमादायार्घ्यं दद्यात् । क्षीरोदार्णवसम्भूत अत्रिगोत्रसमुद्भव । गृहाणार्घ्यं शशाङ्केदं रोहिण्या सहितो मम ॥ चन्द्रमसे नम इदमर्घ्यं० ॥ ज्योत्स्नापते नमस्तुभ्यं ज्योतिषां पतये नमः । नमस्ते रोहिणीकान्त अर्घ्यं नः प्रति० ॥ चन्द्रमसे नमः इदमर्घ्यं० । ततः श्रीकृष्णायार्घ्यं दद्यात् ।

जातः कंसवधार्थाय भूभारोत्तारणाय च । पाण्डवानां हितार्थाय धर्मसंस्थापनाय च ॥ कौरवाणां विनाशाय दैत्यानां निधनाय च । गृहाणार्घ्यं मया दत्तं देवक्या सहितो हरे ॥ देवकीसहितश्रीकृष्णाय० इदमर्घ्यं० । ततः प्रार्थयेत् । त्राहि मां सर्वलोकेश हरे संसारसागरात् । त्राहि मां सर्वपापघ्न दुःखशोकार्णवात्प्रभो ॥ सर्वलोकेश्वर त्राहि पतितं मां भवार्णवे । त्राहि मां सर्वदुःखघ्न रोगशोकार्णवाद्धरे ॥ यस्य स्मृत्या० । अनेन मया कृतेन पूजनेन श्रीकृष्णाद्यावाहितदेवताः प्रीयन्ताम् ॥ ततस्तां रात्रिं पुराणश्रवणादिना नयेत् । प्रातःकाले उत्तरपूजां विधाय उक्तपारणानिर्णीते काले ब्राह्मणान् सम्भोज्य, ओंनमो वासुदेवाय गोब्राह्मणहिताय च । शान्तिरस्तु शिवं चास्तु इत्युक्त्वा मां विसर्जयेत् ॥ इत्यनेन देवता विसृज्य स्वयं भुञ्जीत ॥ इति जन्माष्टमीपूजाविधिः ॥

॥ अथ जन्माष्टमीकथाप्रारम्भः ॥

इन्द्र उवाच ॥ कथयस्व रहस्यं मे व्रतानामुत्तमं व्रतम् । यन्न कस्यचिदाख्यातं तन्मे ब्रूहि तपोधन ॥ नारद उवाच ॥ शृणु देवेन्द्र वक्ष्यामि व्रतानामुत्तमं महत् । कृष्णजन्माष्टमी नाम तिथिः पूर्वाघनाशिनी ॥ तस्यां कृष्णं समभ्यर्च्य सर्वपापक्षयो भवेत् । आयुरारोग्यमैश्वर्यं चतुर्वर्गश्च जायते ॥ इन्द्र उवाच ॥ का सा जन्माष्टमी ब्रह्मन् कथं देवं समर्चयेत् । कृष्णः कोऽसौ यदर्चातो भुक्तिर्मुक्तिश्च जायते ॥ नारद उवाच ॥ पुरा यदुकुले राजा कंसो नामासुरोऽभवत् । विष्णुना निहतो दैत्यः कालनेमिरितिश्रुतः ॥ स एव जातः कंसाख्य उग्रसेनसुतो बली । तस्यानुजा रूप-

सती देवकीत्येव विश्रुता ॥ पिता तां वसुदेवाय ददौ
शूरात्मजाय तु । गते बहुतिथे काले कंसो दैवज्ञमब्रवीत् ॥
वद दैवज्ञ मे मृत्युर्भविता कीदृशः कुतः । यदि जानामि
मे मृत्युं करिष्ये तत्प्रतिक्रियाम् ॥ दैवज्ञ उवाच ॥ तवानु-
जा तु या बाला देवकी नाम विश्रुता । तस्यास्त्वामष्टमो
गर्भो हनिष्यति न संशयः ॥ माघासितचतुर्दश्यां तव
मृत्युर्भविष्यति । नारद उवाच ॥ एवमुक्तस्तदा कंसश्चि-
न्ताशोकपरायणः ॥ १० ॥ भगिनीं हन्तुमारब्धो भावि-
त्वान्न जघान ताम् । किन्तु कारागृहे क्षिप्त्वा जातं जात-
महन् शिशुम् ॥ हतेषु षट्सु बालेषु देवक्या औग्रसेनिना ।
विस्रस्ते सप्तमे गर्भे भगवानष्टमो भवत् ॥ ततः कारागृह-
द्वारि सन्नद्धानसुरान्बहून् । शृङ्खलार्गलकीलादियत्नं बहु
चकार सः ॥ कदाचिद्देवकी देवी जलाहरणकैतवात् । आगता
यमुनातीरमश्वत्थस्य तले स्थिता ॥ भ्रातुर्दौरात्म्यमालोक्य
रुदन्ती शोककर्षिता । नन्दपत्नीं यशोदाख्यां गुर्विणीं
ददर्शान्तिके ॥ तामाहूय सखीं तत्र निजं दुःखं न्यवेदयत् ।
ततो नन्दवधू प्राह यदि मे कन्यका भवेत् ॥ त्वत्पुत्रसम-
कालं तु तदा विनिमयोऽस्तु नौ । कन्यायां त्वयि नीतायां
कंसो नैनां हनिष्यति ॥ श्रुत्वा तु देवकीवाक्यं यशोदा
प्रीतमानसा । विसर्जयित्वा शिबिरं पुनः प्रायात् त्वरा-
न्विता ॥ ततो भाद्रासिताष्टम्यां निशीथे सुषुवे सुतम् ।
यशोदापि तदा कन्यां नन्दपत्नी व्यजीजनत् ॥ देवक्या
नोदितस्तत्र वसुदेवः सुतं निजम् । विनिमातुं समादाय
प्रययौ नन्दगोकुलम् ॥ २० ॥ यशोदाशयने स्थाप्य बाल-
मादाय कन्यकाम् । पुनरागान्निजं वेश्म द्वारपालैर्न वीक्षितः ॥
ततो बालध्वनिं श्रुत्वा द्वारपालैर्निवेदितम् । निशम्य कंसः

कुपितः प्रययौ देवकीगृहम् ॥ बलादाकृष्य तां कन्यां
॥ ८९ ॥ भ्रामयित्वा शिलातले। चिक्षेप सा गताऽऽकाशं सायुधाष्ट-
भुजान्विता ॥ अब्रवीत्किं मया मन्द हतया ते भविष्यति ।
तव प्राणहरो जातो नन्दगोपकुलेऽर्भकः ॥ तया कथित-
माकर्ण्य कंसश्चिन्तापरायणः। पूतनां प्रेषयामास राक्षसीं
बालघातिनीम् ॥ योषित्त्वान्माययात्मानं नन्दगोकुलमा-
गता । सूतीशयनतो बालमादाय प्रददौ स्तनम् ॥ बालः
स्तन्यं समप्राणैराचकर्ष निमीलयन्। तेनातिविह्वला भीता
त्यक्त्वा तं प्राद्रवद्भयात् ॥ ततः कंसोऽसुरं भीमं द्विजरूपम-
नोदयत् । सोऽपि भिक्षाटनच्छद्मा यशोदामन्दिरं ययौ ॥
यशोदास्नापितं बालं सुप्तं वीक्ष्य द्विजं च तम् । स्नातुं
गन्तुमनाः सुभ्रूर्द्विजं स्थाप्य विनिर्गता ॥ ततो द्विजः
समुत्थाय बालं हन्तुसमुद्यतः ॥ ३० ॥ बालोऽप्येनं जिघृ-
क्षन्तं भृशमाहत्य मुष्टिभिः । धृत्वा करे शिरस्तस्य दधि-
भाण्डे न्यवेशयत् ॥ पुनर्बालवपुर्भूत्वा सुष्वापैव स पूर्ववत्।
स्नात्वाऽऽगता यशोदा तु द्विजं दृष्ट्वैव तादृशम् ॥ दधि-
भाण्डगतग्रीवं निर्भर्त्स्यैनं न्यवासयत्। श्रुत्वा चिन्तापरः
कंसो नन्दमाहूय चाब्रवीत् ॥ पारिजातप्रसूनानि श्वः प्रभाते
समानय । नोचेत्त्वां निहनिष्यामि सदारपशुबान्धवम् ॥
गृहमागत्य नन्दोऽपि चिन्ताशोकपरायणः । रुरोद भृश-
सन्तप्तो यशोदाऽनुशुशोच तम् ॥ रुदन्तौ पितरौ वीक्ष्य
श्रुत्वोदन्तं च तन्मुखात् । ययौ कन्दुकमादाय शिशुभि-
र्यमुनातटम् ॥ ततो निजेच्छया तोये कृष्णश्चिक्षेप कन्दु-
कम् । ततः कदम्बमारुह्य कन्दुकादानकौतुकी ॥ पपात
१२ यमुनातोये गतः कालियसद्मनि । नागभार्या समालोक्य
बालं कोमलमब्रवीत् ॥ मनोज्ञ कोऽसि कस्यासि कथमाग-

मनं तव। भीतोऽस्मि किं कुतो द्यूते पराजित्यागतोऽसि
॥६०॥ वा ॥ अपेत्तसेऽत्र किं ब्रूहि कालियोऽतीव निर्दयः। यदि
जागर्त्ति भस्म त्वां करिष्यति न संशयः ॥ ४० ॥ नाग-
भार्यावचः श्रुत्वा ततः कृष्णो जगाद ताम्। सम्यक् ज्ञातं
त्वया भीरु मया द्यूते पराजितम्॥ कंसेनासं मम द्यूतं
कालियस्य शिरो ग्लहः। समायातस्तदा दातुं प्रतिबोधय
कालियम्॥ तच्छ्रुत्वा त्वरिता भीता कालियं वाक्यम-
ब्रवीत्। किं सुप्तोऽसि चिरं मूढ द्वारे शत्रुः समागतः॥
कालियोऽपि ततः कोपात्फूत्कारानी रयन्मुहुः। आजगाम
त्वरा कृष्णं गरुडस्थं ददर्श तम्॥ अथ भीतो हरिं ज्ञात्वा
प्रणम्यानर्च भक्तितः। पारिजातोद्भवैर्माल्यैर्दिव्यै रत्नाम्बरा-
दिभिः॥ ततः प्रसन्नो भगवानब्रवीत्प्रणतं प्रति। अभयं
तेऽस्तु मां कंसे प्रापयस्वाविचारतः॥ ततो रुदन्तीं तत्पत्नी-
माश्वास्य प्रययौ हरिः। दत्वा कंसाय माल्यानि पित्रोस्त-
त्संन्यवेदयत्॥ दृष्ट्वा कंसोऽपि बालस्य महिमानमलौकि-
कम्। भीतस्तस्य वधार्थाय दानवान् समचोदयत्॥ अरि-
ष्टं धेनुकं वत्सं बकं केशिनमेव च। गतास्ते विलयं सर्वे
कृष्णबाहुबलार्दिताः॥ धनुर्मखमहच्छद्म कृत्वा गोपान्स-
माह्वयत्। अथ नन्दादयो गोपा गृहीत्वोपायनं बहु ॥५०॥
सबालवृद्धमहिला मथुरां गन्तुमुद्यताः। कृष्णोप्यागत्य
मथुरां बलदेवादिभिर्वृतः॥ अतिवाह्य निशामेकां प्रभाते
गन्तुमुद्यतः। रङ्गद्वारि समासीनं महामात्रेण नोदितम्॥
द्वीपं कुवलयापीडं हत्वा रङ्गे समागतः। तत्र दृष्ट्वा
तु तौ मल्लौ घोरौ चाणूरमुष्टिकौ॥ शलं तोशलकं चैव
निजघान सलीलया। तत उत्प्लुत्य तरसा राजमञ्चं समा-
रुहत्॥ अपहृत्यास्य मुकुटं मञ्चाद्द भूमावचिक्षिपत्। ततः

पपातास्य हृदि सोऽपि प्राणानवासृजत् ॥ ततो गृहीत्वा केशेषु विचकर्ष सभातले । सोऽयं कंसवधार्थाय भगवान्कृष्णरूपधृक् ॥ जातो यदुकुले तस्य व्रतं पापप्रणाशनम् । भाद्रे मास्यसिताष्टम्यामस्य व्रतमुदीरितम् ॥ मण्डपं कारयेत्तत्र तोरणाद्यैरलङ्कृतम् । तत्र संस्थाप्य देवेशं सौवर्णं शक्तितः कृतम् ॥ देवकीं वसुदेवं च यशोदां नन्दमेव च । यमुनां कालियमपि कुर्याच्छक्ति विनिर्मितान् ॥ हैमान्वा राजतांस्ताम्रान्मृन्मयान्वापि कारयेत् । शक्त्या सम्पूज्य देवेशं दत्त्वा दानान्यनेकशः ॥ ६ ॥ उत्सवं कारयेत्तत्र गीतवाद्यादिमङ्गलैः । मरिचं पिप्पलीं शुण्ठिं जातीफललवङ्गकम् ॥ स्थापयेत्सूतिकागेहे ताम्बूलाद्यं निवेदयेत् । एवं सम्पूज्य यत्नेन रात्रौ जागरणं चरेत् ॥ प्रातः सम्पूज्य देवेशं ब्राह्मणान् भोज्य शक्तितः । व्रतं सम्पूर्णतामेति भुक्तिमुक्तिफलप्रदम् ॥ सर्वपापक्षयकरं कथाश्रवणमात्रतः । नारद उवाच ॥ ईदृग्विधं ते कथितं व्रतं पापप्रणाशनम् ॥ यस्यानुष्ठानमात्रेण सर्वपापैः प्रमुच्यते ॥ इति श्रीभविष्योत्तरपुराणे जन्माष्टमीव्रतकथा समाप्ता ॥

॥ अमावास्यायां पिठोराव्रतम् ॥

तत्त्रिविधम्, चतुःषष्टियोगिनीपूजनात्मकम्, गोवृषपूजनात्मकम्, सर्वसांसारिकोपकरणसहितउमामहेश्वरपूजनात्मकं चेति। अमावास्यात्वत्र प्रदोषव्यापिनी ग्राह्या, तदभावे परैव ॥

॥ तत्रादौ चतुःषष्टियोगिनीपूजनप्रयोगः ॥

विस्तीर्णे कुड्ये पीठादौ वा हरिद्रादिना चतुःषष्टियोगिनीर्विलिख्य पूजयेत् ॥ अथ पूजाविधिः ॥ आचम्य

देशकालौ सङ्कीर्त्य, मम इह जन्मनि जन्मान्तरे च उत्पन्नदुरितशमनपूर्वकसकलसौभाग्यपुत्रपौत्राद्यनवच्छिन्नसन्ततिप्राप्तिमृतवन्ध्यात्वदोषशमनार्थं दिव्ययोगिन्यादिचतुःषष्टियोगिनीप्रीत्यर्थं पिठोराव्रताङ्गत्वेन विहितं पुराणोक्तमन्त्रैः यथामिलितोपचारैः पूजनमहं करिष्ये। गणपतिपूजनादिपूजासम्भारप्रोक्षणान्तं कुर्यात् । अथ ध्यानम् । धारिणीःसर्वशस्त्राणां सुरासुरसमर्चिताः । ध्यायामि सततं देवीर्दिव्ययोगिपुरःसराः ॥ दिव्ययोगिन्यादिचतुःषष्टिदेवताभ्यो नमः ध्यायामि । ततः देवता आवाहयेत् । आयान्तु सकला देव्यः सर्वाभरणभूषिताः । यावत्पूजां करिष्यामि तावत्तिष्ठन्तु सुस्थिराः ॥

१ दिव्ययोगिन्यै नमः ।
(दिव्ययोगिनीं आवाहयामि । एवं सर्वत्र ।)
२ महायोगिन्यै० नीं आ० ।
३ सिद्धयोगिन्यै० नीं आ० ।
४ गणेश्वर्यै नमः रीं आ० ।
५ प्रेताक्ष्यै नमः क्षीं आ० ।
६ डाकिन्यै० नीं आ० ।
७ काल्यै नमः लीं आ० ।
८ कालरात्र्यै नमः त्रीं आ० ।
९ निशाचर्यै नमः रीं आ० ।
१० झङ्कार्यै नमः रीं आ० ।
११ रौद्रवेताल्यै० लीं आ० ।
१२ हिङ्कर्यै नमः रीं आ० ।
१३ भूतडाम्बर्यै० रीं आ० ।
१४ ऊर्ध्वकेशिन्यै० नीं आ० ।
१५ विरूपाक्ष्यै० क्षीं आ० ।
१६ शुष्काङ्ग्यै न० गीं आ० ।
१७ नरभोजन्यै० नीं आ० ।
१८ ईश्वर्यै नमः रीं आ० ।
१९ वीरभद्रायै० द्रां आ० ।
२० धूम्राक्ष्यै नमः क्षीं आ० ।
२१ कलहप्रियायै० यां आ० ।
२२ राक्षस्यै न० सीं आ० ।
२३ घोररक्ताक्ष्यै न० क्षीं आ० ।
२४ विश्वरूपायै० पां आ० ।
२५ भयङ्कर्यै न० रीं आ० ।
२६ चण्डिकायै० कां आ० ।

२७ वीरकौमार्यै न॰रीं आ॰।
२८ वाराह्यै न॰ ह्रीं आ॰।
२९ मुण्डधारिण्यै॰णां आ॰।
३० भास्युर्यै नमः रीं आ॰।
३१ रौद्रझङ्कार्यै॰ रीं आ॰।
३२ भीषणायै॰ णां आ॰।
३३ त्रिपुरान्तकायै॰कां आ॰।
३४ भैरव्यै नमः वीं आ॰।
३५ ध्वंसिन्यै न॰ नीं आ॰।
३६ क्रोधिन्यै न॰ नीं आ॰।
३७ दुर्मुख्यै नमः खीं आ॰।
३८ प्रेतवाहिन्यै॰ नीं आ॰।
३९ खट्वाङ्ग्यैनमः गीं आ॰।
४० दीर्घलम्बोष्ठ्यै॰ष्ठीं आ॰।
४१ मालिन्यै नमः नीं आ॰।
४२ मन्त्रयोगिन्यै॰ नीं आ॰।
४३ कालाग्निग्रहण्यै॰णीं॰।
४४ दुर्गायै नमः गीं आ॰।
४५ कङ्काल्यै नमः लीं आ॰।
४६ भुवनेश्वर्यै नमः रीं आ॰।
४७ कण्टकीत्रोटिन्यै॰ नीं॰।
४८ रौद्र्यै नमः द्रीं आ॰।
४९ यमदूत्यै नमः तीं आ॰।
५० करालिन्यै नमः नीं आ॰।
५१ घोराद्यै नमः द्यीं आ॰।
५२ कार्मुक्यै नमः कीं आ॰।
५३ काकदृष्ट्यै नमः ष्टिं आ॰।
५४ अधोमुख्यैनमः खीं आ।
५५ मुण्डोग्रधारिण्यै॰ णीं॰।
५६ व्याघ्र्यै नमः घ्रीं आ॰।
५७ किङ्किणीप्रेतभक्षिण्यै॰णीं॰
५८ कालरूपायै न॰पां आ॰।
५९ कामाख्यायै न॰ ख्यां आ॰।
६० चोड्डाण्यै न॰ णीं आ॰।
६१ योगपीठिकायै न॰ कां॰।
६२ महालक्ष्म्यै न॰क्ष्मीं आ॰।
६३ एकवीरायै॰ रां आ॰।
६४ कालरात्रिपीठिकायै नमः।
कालरात्रिपीठिकां आ॰।

चन्द्रसूर्यसमाभासे पीठे मणिमये शुभे। अत्रास्यतां हि भो देव्यो दिव्ययोगिपुरःसराः ॥ आसनं॰। पाद्यं गृह्णन्तु भो देव्यो गन्धाक्षतसमन्वितम्। रक्तपुष्पादिसंमिश्रं भक्त्या सम्पत्तिहेतवे ॥ पाद्यं॰। स्वर्णपीठनिवासिन्यो दिव्यालङ्कारभूषिताः। प्रतिगृह्णन्तु मे ह्यर्घ्यं पूर्णयन्तु मदीप्सितम् ॥ अर्घ्यं॰। गङ्गादिसर्वतीर्थेभ्यो जलमे-

तत्समाहृतम् । आचम्यतां महादेव्यः पुत्रपौत्रप्रवर्धिकाः॥ आचमनीयं० । पयो दधि घृतं चैव शर्करा मधुसंयुतम् । पञ्चामृतं मया दत्तं स्नानार्थं प्रति० ॥ पञ्चामृतस्नानं० । गङ्गा च यमुना चैव नर्मदा च सरस्वती । तोयमेतत्सुखस्पर्शं स्नानार्थं प्रति० ॥ मलापकर्षस्नानं० । ततः पञ्चोपचारपूजां कृत्वा अभिषेकः कार्यः । सूक्ष्मतन्तुमयानीह निर्मलानि शुभानि च । वासांसि प्रतिगृह्णीत दिव्ययोगिपुरःसराः ॥ वस्त्राणि स० । भास्करोदयवर्णाभाः कञ्चुकीश्च मनोहराः । दास्यामि प्रीतये देव्यः स्वीकुरुध्वं मयार्पिताः ॥ कञ्चुकीः० । हरिद्रां कुङ्कुमं चैव कण्ठसूत्रं च ताडकम् । सिन्दूरं कज्जलं चारु षट् सौभाग्यं प्रगृह्यताम् ॥ सौभाग्यद्रव्यं० ॥ अम्भोजमालतीजातीकुरण्टमुनिचम्पकान् । माल्यार्थे प्रतिगृह्णीत दिव्ययोगिपुरःसराः ॥ पुष्पाणि० । भूतप्रेतपिशाचादिभवभीतिविनाशिकाः । नानापरिमलो धूपो ग्राह्यस्त्रैलोक्यमातरः ॥ धूपं० । मार्तण्डमण्डलाखण्डचन्द्रबिम्बाग्नितेजसाम् । निधानं दिव्यदीपोऽयं ग्राह्य० ॥ दीपं० । नैवेद्यं गृह्यतां देव्यो भक्तिं कुरुत चाचलाम् । कुरुध्वमीप्सितं कामं परत्र च परां गतिम् ॥ नैवेद्यं० ॥ उत्तरापो० । करोद्वर्तनं० । इदं फलं० फलं० । पूगीफलं मह० ताम्बूलं० । हिरण्यगर्भ० दक्षिणां० । चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च । त्वमेव सर्वज्योतींषि आर्तिक्यं प्रति० ॥ आर्तिक्यदीपं स० । आयुषा च मुदा युक्ताः कुरुतानन्यकाम्यया । पूजिताः पूजयन्त्यो मां कृपायुक्ता भविष्यथ ॥ पुष्पाञ्जलिं० ॥ यानि कानि० प्रदक्षिणां० । नमोऽस्तु चश्चतुःषष्टिदेवीभ्यः शरणं व्रजे । पुत्रश्रीवृद्धिकामाहं भक्त्या सम्पूजिताः

शुभाः ॥ नमस्कारान्० । धनसन्तानसौभाग्यदायिन्यः सन्तु मे सदा । भवन्त्यो वो नमश्चास्तु दिव्ययोगिपुरस्सराः ॥ प्रार्थना० ॥

ततो रजतादिपात्रे सपायसं पूर्णपोलिकावायनं निधाय अत्रातिथिः कोस्तीति पृष्टे पृष्ठतो भूत्वा अमुकशर्माहमतिथिरस्मीति वदद्भ्यः स्वबालकेभ्यो ज्येष्ठादिक्रमेण तद्वायनं दद्यात् । अन्यच्च यथाकुलाचारमाचरेत् । यस्य स्मृत्या० । अनेन मया कृतेन पूजनेन श्रीदिव्ययोगिन्यादिचतुःषष्टिदेवताः प्रीयन्ताम् । ततः साङ्गतासिध्यर्थं सुवासिनीः ब्राह्मणांश्च भोजयित्वा स्वयं सुहृद्युतो भुञ्जीत ॥

॥ अथ पिठोराव्रतकथाप्रारम्भः ॥

इन्द्राण्युवा० । अपुत्रा लभते पुत्रं परत्र च महत्फलम् । व्रतानां परमं श्रेष्ठं कथय त्वं हि पार्वति ॥ पार्वत्युवा० ॥ प्राचीनः श्रीधरो विप्रो ह्यष्टपुत्रो धनेश्वरः । तस्य भार्या सुमित्रा च गृहधर्मण्यवर्तत ॥ श्रीधरस्य सुतो ज्येष्ठः शङ्करो नाम नामतः । तस्य भार्या विदेहा च मृतापत्याभवत्तदा ॥ श्रीधरस्य पितुः श्राद्धे विदेहा चाप्रसूयत । दुःखयुक्ता सुमित्रा च विदेहां पर्यवर्जयत् ॥ दुःखयुक्ता वनं प्राप्ता मठमेकं ददर्श सा । सरिच्च प्रबला यत्र विदेहा तत्र सा गता ॥ मठमध्ये स्थितां नारीं पश्यन्ती च पुनः पुनः । कुत्रेयमधुना प्राप्ता लक्षणान्वितसुन्दरी ॥ मठाधिपाविचार्यैवं विदेहां प्राह सत्वरम् । झोटिङ्गैर्यक्षवेतालैरनेकैः स्थीयते शुभे ॥ त्वां ग्रसिष्यन्ति सकला गच्छ शीघ्रं यथागतम् ॥ विदेहोवाच । दुःखयुक्ता ह्यहं देवि प्रयामि च वनान्तरम् । मां चेद्ग्रसन्ति झोटिङ्गाः क्षेमं मम भवे-

स्तदा ॥ मठनार्युवाच । अत्र देव्यश्चतुःषष्टिर्दिव्ययोग्या-
दयःशुभाः । पूजनार्थं समायान्ति निशामध्ये शुभाःस्थिताः ॥
बिल्वपत्रेषु गुप्ता त्वमधुना भव भामिनि । अतिथिप्राप्त-
काले च ब्रूहि त्वमिह संस्थिता ॥ तव कामं प्रकुर्वन्ति
जीविष्यन्ति च बालकाः । लुप्ता तत्र विदेहा च बिल्वपत्रेषु
संस्थिता ॥ क्षणेनैकेन ज्योटिङ्गा मठमध्ये समागताः ।
ज्ञात्वा मनुष्यगन्धं च मठनारीमपृच्छत ॥ कुतो मनुष्य-
गन्धश्च समायाति वदस्व तम् ॥ मठनार्यु० । भवतामेव
भ्रान्तिश्च जातेत्येवं तु वञ्चिताः । निशामध्ये चतुःषष्टि-
देव्यस्तत्र समागताः ॥ अनेकैश्च महारत्नैः फलैर्नानाविधै-
रपि । निविष्टाःपीठदेवीनामाह्वानं कुर्वतेस्म हि ॥ श्राव-
णस्य तु मासस्य कृष्णपक्षे कुहूतिथौ । पूजां कृत्वा चतुः-
षष्टिरतिथीन्ब्रुवतेस्म हि ॥ वदतेस्म मनुष्या सा लुप्ताथ
प्रकटाभवत् । ममाशुचित्वमापन्नं मातर्मे बालकं मृतम् ॥
तवाग्रे मृतमादाय स्थितास्मीति च बालकम् । सप्तग-
र्भाश्चतुःषष्टि सजीवाश्च भवन्त्वितः ॥ तत्र स्थितं च नैवेद्यं
सा नारी प्रतिगृह्य च । चतुःषष्टिस्ततस्तुष्टा ददौ तस्यै
शुभं वरम् ॥ श्रीधरस्य स्नुषा त्वं हि शङ्करस्य च वल्लभा ।
पुत्रपौत्रयुता राज्यं भुक्त्वा पूज्या सुरालये ॥ अष्टपुत्रा
भवन्त्वाशु विदेहे गम्यतां पुरम् । आगता येन मार्गेण
तेनैव पुनरेव हि ॥ पुरान्तरं स्थिता गत्वा प्रविवेशस्व
मन्दिरम् । श्रीधरश्च सुमित्रा च शङ्करो बान्धवैःसह ॥
विदेहा चाष्टपुत्रैश्च युक्ता सा मङ्गलोत्सवैः । प्रापुर्मुदं
महाभागा देवीनां च प्रसादतः ॥ द्विजमन्त्रादिनिर्घोषै-
र्दुन्दुभीनां च निःस्वनैः । मृगाक्षी मङ्गलाचारैर्मृदङ्गैर्नृत्य-
घोषकैः ॥ तथा सम्पूजिता देव्यश्चतुःषष्ट्यः प्रकीर्तिताः ।

तद् व्रतं शृणु चेन्द्राणि पिठोराख्यं कुहूतिथौ । तासां स्म-
॥ ९७ ॥ रणमात्रेण पुत्रपौत्रधनान्विता ॥ नारी भवति चेन्द्राणि
शृणु त्वं नामपूजनम् । दिव्ययोगी महायोगी सिद्धयोगी
गणेश्वरी ॥ प्रेताक्षी डाकिनी काली कालरात्रिर्निशाचरी ।
झङ्कारी रौद्रवेताली हिङ्कारी भूतडाम्बरी ॥ ऊर्ध्वकेशी
विरूपाक्षी शुष्काङ्गी नरभोजनी । ईश्वरी वीरभद्रा च
धूम्राक्षी कलहप्रिया ॥ राक्षसी घोररक्ताक्षी विश्वरूपा
भयङ्करी । चण्डिका वीरकौमारी वाराही मुण्डधारिणी ॥
भासुरी रौद्रझङ्कारी भीषणा त्रिपुरान्तका । भैरवी ध्वं-
सिनी क्रोधी दुर्मुखी प्रेतवाहिनी ॥ खट्वाङ्गी दीर्घल-
म्बोष्ठी मालिनी मन्त्रयोगिनी । कालाग्निग्रहणी दुर्गा
कङ्काली भुवनेश्वरी ॥ कण्टकी त्रोटिनी रौद्री यमदूती
करालिनी । घोराक्षी कार्मुकी चैव काकदृष्टिरधोमुखी ॥
मुण्डोग्रधारिणी व्याघ्री किङ्किणी प्रेतभक्षिणी । काल-
रूपा च कामाख्या चोड्डाणी योगपीठिका ॥ महालक्ष्मी-
श्चैकवीरा कालरात्री च पीठिका । नमोऽस्तु वश्चतुःषष्टि-
देवीभ्यः शरणं व्रजे ॥ पुत्रश्रीवृद्धिकामाहं भक्त्या सम्पू-
जिताः शुभाः ॥ एवमिन्द्राणि कथितं पिठोराख्यं महद् व्रतम् ॥
भक्त्या कुर्वन्ति या नार्यः कृतकृत्या भवन्ति ताः । सुख-
सौभाग्यसंयुक्ताश्चतुःषष्ट्याः प्रसादतः ॥ इति श्रीभवि-
ष्योत्तरपुराणे पिठोराव्रतकथा समाप्ता ॥

॥ अथ पिठोराव्रताङ्गगोवृषपूजाविधिः ॥

आचम्य देशकालौ स्मृत्वा मम गोधनवृद्धिद्वारा
१३ सकलैश्वर्याद्यभिवृद्ध्यर्थं पिठोराव्रताङ्गभूतं मृन्मयगोवृष-
पूजनमहं करिष्ये । गणपतिपूजनादिप्रोक्षणान्तं विधाय,

ऋषभंमासंमानानामिति वैदिकमन्त्रेण गोसहितवृषभेभ्यो नम इति नाममन्त्रेण वा षोडशोपचारैः सम्पूजयेत्। अनेन पूजनेन गोसहितवृषभाः प्रीयन्ताम्। प्रत्यक्षगोवृषपूजनमपि कुर्यात्। तेषां शृङ्गेषु स्वर्णरौप्यपट्टिकाबन्धनं कौशेयगुच्छबन्धनं च कुर्यात्। विचित्रवर्णैर्वस्त्रैस्तेषां पृष्ठमाच्छादयेत्। गलेषु रम्यशब्दितां घण्टां बध्वा दिनाष्टमभागे बहिर्नीत्वा सायं ग्रामं प्रवेशयेत्। ततः पिण्याकं नानाविधं चान्नं नैवेद्यं दद्यात्। एतत्करणेन गोधनवृद्धिर्भवति ॥

॥ अथ पिठोराव्रताङ्गउमामहेश्वरपूजनविधिः ॥

विस्तीर्णे कुड्ये ताम्रेण कृष्णेन सितेन वा विलिप्य, तदुपरि पोतेन विभिन्नवर्णेन वा मध्ये शिवासहितं शिवलिङ्गं मूर्तिं वा विलिख्य, सर्वं संसारोपकरणं चतुःशालापाकागारदेवागारादि यावच्छक्यं विलिखेत्। देशकालौ० मम सर्वमनोरथपरिपूर्त्यर्थं उमामहेश्वरादिसर्वलिखितसांसारिकोपकरणवस्तुमात्रपूजनं करिष्ये। ततः उमामहेश्वरादिसर्वदेवताभ्यो नम इति षोडशोपचारैःसम्पूज्य, शिव साम्ब दयासिन्धो गिरीश शशिशेखर। व्रतेनानेन सन्तुष्टः प्रयच्छास्मन्मनोरथान् ॥ इति सम्प्रार्थ्य, यस्य स्मृत्या०। अनेन पूजनेन श्रीउमामहेश्वरादयः प्रीयन्ताम् ॥

॥ अथ भाद्रपदमासः ॥

॥ शुक्लतृतीयायां हरितालिकापूजाविधिः ॥

तृतीया च परयुता ग्राह्या, यदा परदिने विधिवशान्नास्ति तदा पूर्वयुतापि ग्राह्या। तत्र प्रातस्तिलामलक-

कलकेन केशान् संशोध्य स्नात्वा पट्टवस्त्रं परिधाय वालु-
कामयीं उमामहेश्वरमूर्तिं विधाय, कदलीस्तम्भमण्डिते
पीठे संस्थाप्य पूजयेत् । अथ पूजाप्रयोगः । आचम्य मास-
पक्षाद्युल्लिख्य, ममेह जन्मनि सप्तजन्माखण्डितराज्यसुख-
सौभाग्यपुत्रपौत्राद्यभिवृद्ध्यर्थं श्रीउमामहेश्वरप्रीत्यर्थं ह-
रितालिकाव्रताङ्गभूतं यथामिलितोपचारद्रव्यैः श्रीउमाम-
हेश्वरपूजनमहं करिष्ये । तदङ्गं गणपतिपूजनं कलशघण्टा-
पू० । महागण० । वक्रतुण्ड० । कलशस्य० । वरुणाय० ।
अपवित्रः० पूजासम्भारान् प्रोक्ष्य, ब्राह्मणद्वारा प्राणप्रतिष्ठां
कृत्वा ध्यायेत् । पीतकौशेयवसनां हेमाभां कमलासनाम् ।
भक्तानां वरदां नित्यं पार्वतीं चिन्तयाम्यहम् ॥ १ ॥
मन्दारमालाकुलितालकायै कपालमालाङ्कितशेखराय ।
दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः
शिवाय ॥ २ ॥ श्रीउमामहेश्वराभ्यां नमः उमामहे-
श्वरौ ध्यायामि ॥ देवि देव समागच्छ प्रार्थयेऽहंजगन्मये ।
इमां मया कृतां पूजां गृहाण सुरसत्तमे ॥ श्री०आवाहनं० ॥
भवानि त्वं महादेवि सर्वसौभाग्यदायिके । अनेकरत्न-
संयुक्तमासनं प्रति० ॥ आसनं० ॥ सुचारु शीतलं दिव्यं
नानागन्धसमन्वितम् । पाद्यं गृहाण देवेशि महादेवि
नमोऽस्तु ते ॥ पाद्यं० ॥ श्रीपार्वति महाभागे शङ्करप्रिय-
वादिनि । अर्घ्यं गृहाण कल्याणि भर्त्रा सह पतिव्रते ॥
अर्घ्यं० ॥ गङ्गाजलं समानीतं सुवर्णकलशे स्थितम् ।
आचम्यतां महाभागे रुद्रेण सहितेऽनघे ॥ आचमनीयं० ॥
गङ्गासरस्वतीरेवापयोष्णीनर्मदाजलैः । स्नापितासि मया
देवि तथा शान्तिं कुरुष्व मे ॥ स्नानं० ॥ कामधेनुसमुद्भूतं
दुग्धं चामृतमुत्तमम् ।स्नानार्थं च मयाऽऽनीतं गृहा० ॥ पय-

स्नानं० ॥ शुद्धोदकस्नानं० एवं सर्वत्र ॥ गोदुग्धं विकृतं देवि दधिरूपं गुणान्वितम् । स्नानार्थं च मया दत्तं स्वीकुरु त्वं जगत्प्रिये ॥ दधिस्नानं० ॥ गोघृतं च मयाऽऽनीतं देवानां हविरुत्तमम् । पावनं सर्वलोकानां गृहाण सुरसुन्दरि ॥ घृतस्नानं० ॥ पुष्पेभ्यः सारमादाय मक्षिकाभिः कृतं मधु । स्नानार्थं च मया दत्तं गृहाण सुरपूजिते ॥ मधुस्नानं० । शर्करा च सिता श्रेष्ठा इक्षुसारसमुद्भवा । स्नानार्थं च मया दत्ता गृहाण० ॥ शर्करास्नानं० ॥ गन्धोदकस्नानं० ॥ अभ्यङ्गार्थं मयाऽऽनीतं तैलं पुष्पादिवासितम् । प्रयत्नेनार्जितं शुद्धं गृहा० ॥ सुगन्धतैलस्नानं० ॥ अङ्गोद्वर्तनकं देवि कस्तूर्या कुङ्कुमेन च । अन्यैः सुगन्धद्रव्यैश्च निर्मितं प्रति० ॥ अङ्गोद्वर्तनकं स० ॥ नानातीर्थादाहृतं च तोयमुष्णं मया कृतम् । स्नानार्थं च मया दत्तं गृह्यतां० ॥ उष्णोदकस्नानं० ॥ पञ्चोपचारपूजां कृत्वा, अभिषेकः । महिम्नः पारन्ते० सुरास्त्वा० इत्यादिभिः । स्नानानन्तरेण आचमनीयं० । पार्वति प्रतिगृह्ण त्वमम्बिके शिववल्लभे । सुवेषकारकं वासो लज्जाया वारणं परम् ॥ वस्त्रं० ॥ पीततन्तुयुतां दिव्यां रक्तकौशेयसम्भवाम् । मुञ्चन्मुक्तावलीयुक्तां कञ्चुकीं प्रति० ॥ कञ्चुकीं सम० ॥ उमाकान्त नमस्तुभ्यं रक्ष मां भवसागरात् । उपवीतं सोत्तरीयं गृहाण जगदीश्वर ॥ यज्ञोपवीतं० ॥ कण्ठसूत्रं ताडपत्रं हरिद्रां कुङ्कुमाञ्जनम् । सिन्दूरादि प्रदास्यामि सौभाग्यं देहि मेऽव्ययम् । सौभाग्यद्रव्यं० ॥ कुङ्कुमागरुकर्पूरकस्तुरीरोचनायुतम् । विलेपनं महादेवि गन्धं दास्यामि भक्तितः ॥ चन्दनं० ॥ रञ्जिताः कुङ्कुमाद्येन अक्षताश्चातिशोभनाः । भक्त्या समर्पितास्तुभ्यं प्रसन्ना भव पार्वति ॥ अक्षतान्० ॥ सेव-

न्तिकाबकुलचम्पकपाटलाब्जैः पुन्नागजातिकरवीररसाल-
॥१०१॥ पुष्पैः । बिल्वप्रवालतुलसीदलमालतीभिस्त्वां पूजयामि जगदीश्वरि मे प्रसीद ॥ पुष्पाणि० ॥

॥ अथाङ्गपूजा ॥

१ उमायै नमः पादौ पूजयामि ।	९ कल्याण्यै० हस्तौ पू० ।
२ गौर्यै नमः जङ्घे पूजयामि ।	१० काल्यै न० कण्ठं पू० ।
३ पार्वत्यै० जानुनी पू० ।	११ शिवायै० मुखं पू० ।
४ जगद्धात्र्यै० ऊरू पूज० ।	१२ भवान्यै न० नेत्रे पू० ।
५ जगत्प्रतिष्ठायै० कटी पू० ।	१३ रुद्राण्यै० कर्णौ पू० ।
६ शान्तिरूपिण्यै० नाभिं० ।	१४ शर्वाण्यै० ललाटं० ।
७ देव्यै नमः उदरं पू० ।	१५ मङ्गलदात्र्यै० शिरः० ।
८ लोकवन्दितायै० स्तनौ० ।	१६ पार्वत्यै न० सर्वाङ्गं० ।

॥ अथ पत्रपूजा ॥

१ दुर्गायै न० अपामार्गप० ।	१२ दक्षयज्ञविध्वंसि-
२ कात्यायन्यै० दाडिमप० ।	न्यै० करवीरपत्रं ।
३ मङ्गलायै० अर्कपत्रं० ।	१३ विन्ध्यवासिन्यै० चम्पक०
४ सुभद्रायै० जातीपत्रं० ।	१४ महिषासुरमर्दि-
५ भवान्यै न० बदरीपत्रं० ।	न्यै० दूर्वापत्रं० ।
६ शिववल्लभा० देवदारु० ।	१५ परमेश्वर्यै० शमीप० ।
७ अम्बिकायै० धत्तूरपत्रं० ।	१६ वाराह्यै० तुलसीप० ।
८ पार्वत्यै न० भृङ्गिराजप० ।	१७ वृषभवाहिन्यै०
९ कल्याण्यै० अगस्तिप० ।	अर्जुनपत्रं० ।
१० रुद्राण्यै० बिल्वपत्रं० ।	१८ भक्तवत्सलायै०
११ शिवायै न० शतपत्रं० ।	विष्णुकान्तपत्रं० ।

देवद्रुमरसोद्भूतः कृष्णागरुसमन्वितः । आनीतोऽयं मया धूपो भवानि प्रति० ॥ धूपं० ॥ त्वं ज्योतिः सर्वदेवानां तेजसां तेज उत्तमम् । आत्मज्योतिः परं धाम दीपोऽयं प्रति० ॥ दीपं द० । अन्नं चतुर्वि० नैवेद्यं० ॥ आचमनीयं० ॥ मलयाचलसम्भूतं कर्पूरेण समन्वितम् । करोद्वर्तनकं चारु गृ० ॥ करोद्वर्तनं० ॥ नारिकेलं सनारिङ्गं कदली पनसं तथा । जम्बीरं श्रीफलं पूगं मातस्त्वं प्रति० ॥ फलं स० ॥ कर्पूरैलालवङ्गादिनागवल्लीदलैर्युतम् । खदिरक्रमुकैर्युक्तं ताम्बूलं प्रति० ॥ ताम्बूलं० ॥ प्रजाफलप्रसिध्यर्थं तवाग्रे स्वर्णमीश्वरि । दक्षिणार्थं मया भक्त्या कल्पितं प्रति० ॥ दक्षिणां० ॥ आर्तिक्यं गिरिजे तुभ्यं मया दत्तं शिवप्रिये । तेन सन्तानवृद्धिं मे कुरु कल्याणकारके ॥ कर्पूरदीपं० आर्तिक्यदीपं स० ॥ भवानि कमले देवि शङ्करप्राणवल्लभे । त्वमेव सर्वदेवानां पूजनीया सदाशिवा ॥ पुष्पाञ्जलिं० ॥ यानि कानि च० प्रदक्षिणां० ॥ नमः सर्वहितार्थायै जगतः सर्वहेतवे ॥ साष्टाङ्गोऽयं प्रणामोऽस्ति प्रणयेन मया कृतः ॥ नमस्कारान्० । पुत्रान्देहि धनं देहि सौभाग्यं देहि सुव्रते । अन्यांश्च सर्वकामांश्च देहि देवि नमोऽस्तु ते ॥ प्रार्थनां० ॥ यस्य स्मृ० । अनेन मया कृतेन पूजनेन श्रीउमामहेश्वरौ प्रीयेताम् । ततःवायनं दद्यात् ॥ अद्य०र्थं पूजासाङ्गतासिध्यर्थं ब्राह्मणाय सौभाग्यद्रव्यसहितवायनप्रदानं तदङ्गं ब्राह्मणपूजनं च करिष्ये । गन्धाः पान्तु स्वस्त्यस्तु दी० । अन्नं सवंशपात्रस्थं सवस्त्रफलदक्षिणम् । वायनं गौरि विप्राय ददामि प्रीतये तव ॥ सौभाग्यारोग्यकामानां सर्वसम्पत्समृद्धये । गौरीगिरीशतुष्ट्यर्थं वायनं ते ददाम्यहम् ॥ इदं सौभाग्यवायनं अमुकश० ददे । प्रति० प्र० । दान-

साङ्गतासिध्यर्थं इमां दक्षि० । अनेन वायनदानेन श्रीउमा-
महेश्वरौ प्रीयेताम् । रात्रौ पञ्चोपचारपूजां कृत्वा नृत्यगी-
तपुरःसरं जागरणं कुर्यात् । कथां शृणुयात् । तत्र प्रभाते
पञ्चोपचारपूजां कृत्वा दधिभक्तनैवेद्यं समर्प्य यान्तुदेवेति
विसृज्य, नद्यां प्रक्षिपेत् । स्वयं पारणां कुर्यात् ।

॥ अथ हरितालिकाकथाप्रारम्भः ॥

सूत उवाच । मन्दारमालाकुलितालकायै कपालमा-
लाङ्कितशेखराय । दिव्याम्बरायै च दिगम्बराय नमः
शिवायै च नमः शिवाय ॥ कैलासशिखरे रम्ये गौरी
पृच्छति शङ्करम् । गुह्याद् गुह्यतरं गुह्यं कथयस्व महेश्वर ॥
सर्वेषां सर्वधर्मस्वमल्पायासेन यत्फलम् । प्रसन्नोऽसि जग-
न्नाथ तथ्यं ब्रूहि जगत्प्रभो ॥ केन व्रतप्रभावेण तपोदानेन
शङ्कर । अनादिमध्यनिधनो भर्त्ता त्वं च जगत्प्रभुः ॥
मया प्राप्तोऽसि देवेश न जाने तत्सदाशिव । कथयस्व महा-
देव यदहं तव वल्लभा ॥ ईश्वर उवाच ॥ शृणु देवि प्रव-
क्ष्यामि तवाग्रे व्रतमुत्तमम । येन व्रतप्रभावेण प्राप्तमर्धासनं
प्रिये ॥ यद् गुह्यं मम सर्वस्य कथयामि तव प्रिये । यथा
ह्युडुगणे चन्द्रो ग्रहाणां भानुरेव च ॥ वर्णानां तु यथा
विप्रो देवानां विष्णुरुत्तमः । नदीनां तु यथा गङ्गा पुरा-
णानां तु भारतम् ॥ वेदानां तु यथा साम इन्द्रियाणां
मनो यथा । पुराणवेदसर्वस्वमागमेषु यथोदितम् ॥ तदे-
काग्रेण मनसा शृणुष्वेदं सनातनम् । भाद्रे मासि सिते
पक्षे तृतीया हस्तसोमयुक् ॥ १० ॥ तस्यानुष्ठानमात्रेण
सर्वान् कामानवाप्नुयात् । शृणु पूर्वं तु यद्देवि त्वया तस्या-
मनुष्ठितम् ॥ तत्सर्वं कथयिष्यामि यथा वृत्तं हिमाचले ।

पार्वत्युवाच ॥ कथं पूर्वं मया चीर्णं व्रतानामुत्तमं व्रतम् ॥
तत्सर्वं श्रोतुमिच्छामि त्वत्सकाशाद् वृषध्वज । ईश्वर
उवाच ॥ अस्ति तत्र महान् दिव्यो हिमवान् पर्वतेश्वरः ॥
नानासिंहसमायुक्तो नानाद्रुमसमाकुलः । नानापक्षिग-
णैर्युक्तो नानामृगनिषेवितः ॥ यत्र देवाः सगन्धर्वाः सिद्ध-
चारणगुह्यकाः । विचरन्ति सदा हृष्टा गन्धर्वा गीतत-
त्पराः ॥ स्फाटिकैः काञ्चनैः शृङ्गैर्मणिवैडूर्यमण्डितैः । भुजै-
र्लिखति चाकाशं चित्रको मन्दिरं यथा ॥ हिमेनापूरितः
सर्वो गङ्गाध्वनिविराजितः । नृत्यन्त्यप्सरसो यत्र शोभमानो
नगेश्वरः ॥ तत्र त्वं पार्वती बाल्ये आचरन्ती महत्तपः ।
द्वादशाब्दानि देवेशि धूम्रपानमधोमुखी ॥ भूत्वा त्वं सन्नि-
मित्तेन मदाराधनतत्परा । संवत्सरचतुःषष्टि पक्वपर्णा-
शनं त्वया ॥ दृष्ट्वा तातेन ते कष्टं दुःखितश्चिन्तया भृशम् ।
इत्येवं चिन्तयाविष्टो देवर्षिर्नारदोऽभ्यगात् ॥ २० ॥
पाद्यार्घ्याचमनं स्थानं नारदाय ददौ गिरिः । हिमवानुवाच ॥
अद्य मे सफलं जन्म अद्य मे सफलाः क्रियाः ॥ गतं चाद्य
जडत्वं मे यज्जातं तव दर्शनम् । गताद्य मानसी चिन्ता ययाहं
दुःखितो भृशम् ॥ कन्यारत्नमिदं कस्मै देयं तद् ब्रूहि मे मुने ।
नारद उवाच ॥ शृणु शैलेन्द्र मद्वाक्यं विष्णुना प्रेषितोऽस्म्य-
हम् ॥ योग्यं योग्याय दातव्यं कन्यारत्नमिदं त्वया । वासु-
देवसमो नास्ति ब्रह्माद्या ये सुरेश्वराः ॥ चतुर्वर्गस्य दात्रे वै
दीयतां मम संमतम् । गिरिरुवाच ॥ वासुदेवसमो देवः
कन्यां प्रार्थयते यदि ॥ तस्मै देया मया कन्या त्वदागमनगौ-
रवात् । इत्येवं गदितं श्रुत्वा वैकुण्ठं नारदो ययौ ॥ प्रीतः
पीताम्बरधरं शङ्खचक्रगदाधरम् । चतुर्भुजं वासुदेवं नम-
स्कृत्वाभ्यभाषत ॥ शृणु देव विवाहार्थं गन्तव्यं

शैलजां प्रति । तेन दत्तं प्रतिग्राह्यं कन्यारत्नं सुशो-
॥१०५॥ भनम् ॥ हिमवांस्तु तदा गौरीमुवाचातीव हर्षितः । दत्ता-
सि त्वं मया देवि देवराट् गरुडध्वजे ॥ श्रुत्वा वाक्यं
पितुर्देवी सख्या सार्धं वनान्तरम् । गता ह्यनशनं ग्राह्यं
तपस्तप्तुं सुदुःखिता ॥ ३० ॥ सख्युवाच ॥ किमर्थं नग-
पुत्रि त्वं दुःखिता तप्यसे पुनः । को वा कामोऽभिलषितः
सखि ज्ञातो न वै शुभे ॥ पार्वत्युवाच ॥ सखि शृणु महान्
कामो मनसा चिन्तितो मया । अल्पेन तपसा किं स प्रा-
प्यते मादृशैःखलु ॥ अतस्त्वया सह पुनःप्राप्ता तप्तुं वना-
न्तरम् । सख्युवाच ॥ को वा कामोऽभिलषितो योऽल्पेन
तपसा नरैः ॥ न प्राप्यते स मे ब्रूहि उपायश्चिन्तयामि वै ।
पार्वत्युवाच ॥ कैलासशिखरासीनं देवदेवं वृषध्वजम् ॥
भर्तृत्वेनैव मनसा कामेनाहं न संशयः । सोऽयं कामो महा-
नद्य तातेन कृतमन्यथा ॥ तस्माद् देहपरित्यागं करिष्ये
तन्मनस्कका । पार्वत्या वचनं श्रुत्वा सखीवचनमब्रवीत् ॥
नगपुत्रि महद्भाग्यं प्रार्थिता विष्णुना यतः । स सेव्यो
दैवतैः सर्वैर्महेन्द्रादिपुरोगमैः ॥ यस्यैकगुणलेशेन गुणवन्तो
भवन्ति हि । सगुणानामनन्तत्वादनन्त इति विश्रुतः ॥
देवानां कन्यका भद्रे स्वकीयां चेष्टदेवताम् । सम्पूज्य
यस्य दास्यन्ताः प्रार्थयन्ति दिवानिशम् ॥ अतिभाग्य-
वशाद् देवि माहिष्यं प्राप्यते त्वया । किञ्च या पायसं
१४. त्यक्त्वा भिक्षार्थं गम्यतेऽन्यतः ॥ ४० ॥ प्राप्यापि कामदं
देवं प्रार्थ्यते कामदाहकः । अस्ति काचित् क्वचिद् देवि
त्रिलोक्यां त्वद्विना प्रिये ॥ नरोत्तमाय दत्तासि तथ
पित्रा शुभं कृतम् । मा शोचस्व निवर्त्तस्व न जानासि गुणां-
स्तयोः ॥ भ्रामितास्यथवा केन शृणुष्वेकमनानघे । किरीटी

केशवो देवो जटी मृत्युञ्जयोऽनघे॥ केशवः सुमुखो भद्रे स च भीममुखः सदा। सुपङ्क्ती रक्तदन्तश्च विपङ्क्ती दीर्घदंष्ट्रकः॥ रत्नकुण्डलवान् विष्णुर्नागकुण्डलवान् शिवः। विष्णुः कमलनेत्रश्च ज्वलन्नेत्रः सदाशिवः॥ चतुर्भुजधरो विष्णुः स वै दशभुजो महान्। श्रीवत्सं लांछनं विष्णोः शिवस्य ब्रह्मणः शिरः॥ पीताम्बरधरो विष्णुः स च चर्माम्बरः सदा। पद्मपाणिर्युवा विष्णुः स वृद्धः शूलपाणिधृक्॥ अम्लानपद्ममालास्यो मुण्डमालाप्रियः स च। कण्ठेऽस्य कौस्तुभं रत्नं तस्य कण्ठे विषं सदा॥ वाहनं गरुडो देवि जरठोक्षा शिवस्य च। शेषपर्यङ्कशायी स्याचिताभस्मशयः स च॥ गन्धर्वध्वनिना हृष्टो भूतानां रोदनेन सः। विष्णुर्भोगी स योगी च कथं चकमसे शिवम्॥ ५०॥ पार्वत्युवाच॥ न जानासि विमूढा त्वं योगिनं शूलपाणिनम्। यस्याज्ञा सात्त्विको विष्णुस्त्रिलोकीं पाति नान्यथा॥ राजसेन स्वरूपेण ब्रह्मा सृष्टिं विधास्यति। तामसेन स्वरूपेण रुद्रोऽत्ति सकलं रुषा॥ गुणातीतस्य वै शम्भोः को वेत्ति महिमां शुभाम्। यस्याज्ञा कमठो भूत्वा विष्णुः पृथ्वीं दधार वै॥ पुनः स शूकरो भूत्वा तां च दन्ते दधार वै। यद्दत्तान् भुञ्जते भोगान् विष्णुर्भोगीति वद्यते॥ सहस्रकमलैः पूर्वं विष्णुनाऽऽराधितः शिवः। वैकुण्ठं स श्रियं तेजस्तेन दत्तं निजं क्षणात्॥ इन्द्रादीनां तु यो दाता स देवो न श्रुतस्त्वया। यद्दत्तं देवराज्यं तु इन्द्रो वै भुञ्जते सुखम्॥ कुबेरेणापि महती श्रीरवाप्ता वरानने। वरुणेन जलेशत्वं शेषःपातालसंस्थितिम्॥ सूर्यस्तपति यद्भीत्या वायुर्वाति दिवानिशम्। यमः संयमनीशत्वं स देवः किं न वेत्स्यसि॥ यस्याज्ञया

स्वकालेऽपि मेघा वर्षन्ति सर्वतः। पावकः सर्वदेवानां वदनं
भविताऽनघे॥ पितरः पितृलोकत्वं सत्पिता पर्वतेशताम्।
चन्द्रो ह्युडुगणेशत्वं समुद्रो वै गभीरताम्॥ ६०॥
सोमः प्राप्यौषधीशत्वं चन्दनेन सुगन्धताम्। यस्याज्ञया
स्वकाले वै वर्त्तन्त्यादेशवर्तिनः॥ वृष्टिः शीतं च घर्मश्च
स्वकाले च गमागमः। शक्राद्या अपि दिक्पालाः स्वदिशं
पालयन्ति ते॥ येषु कृत्येषु ये देवा योजितास्ते तु तत्पराः।
अन्यथा करणे तेषां स च दण्डं विधास्यति॥ परात्परः
स वै देवो निर्गुणः सगुणोऽपि सः। निराकारश्च साकारो
योगी भोगी स एव हि॥ केवलो निर्गुणः साक्षी क्षरश्चा-
क्षर एव सः। को वेद तस्य तद्रूपं यद् ब्रह्मेति प्रचक्षते॥
ब्रह्माद्या देवताः सर्वा ऋषयश्च तपोधनाः। योगिनो ज्ञान-
निष्ठा ये यदर्थे त्यक्तबन्धनाः॥ तेऽपि तस्य न जानन्ति
स्वरूपं सखि शूलिनः। अतस्तं चकमेऽहं वै शूलिनं तं पतिं
शुभे॥ सख्युवाच॥ सम्यक्कामोऽभिलषितस्तदर्थे
त्यक्तजीविता। यत्र वै निश्चिता बुद्धिः स कामो भवति
ध्रुवम्॥ ममापि च महद्भाग्यं यतस्त्वत्कर्मकारिका।
किञ्चिद्विज्ञप्तुमिच्छामि यदि त्वं शृणुषे वचः॥ अम्बिका-
पूजनं कार्यं तन्मया कामदं श्रुतम्। तवेष्टकर्त्री या देवी
सापि पूज्या प्रयत्नतः॥ ७०॥ मयि चानुग्रहो देवि मयि
प्रीतिरनुत्तमा। अनुज्ञादानमात्रेण निजं सफलतां नय॥
करिष्याम्यहमप्येतद् गौर्याः पूजनमुत्तमम्। तथेति संमतं
कृत्वा नीतासि त्वं महद्वनम्॥ पिता निरीक्षयामास हिम-
वांस्तु गृहे गृहे। केन नीता त्वसौ पुत्री देवदानवकिन्नरैः॥
सत्यं कृतं च ऋषिणा किं दास्ये गरुडध्वजे। इत्येवं
चिन्तयाविष्टो मूर्छितो निपपात ह॥ हाहा कृत्वा ततो

लोकाः प्रधावन्ति गिरिं प्रति। आगत्य मुनयः सर्वे प-
॥१०८॥ प्रच्छुस्तं हिमाचलम् ॥ किमर्थं मूर्छतां प्राप्तः कथयस्व
हृदि स्थितम्। गिरिरुवाच ॥ यदर्थं दुःखसम्भ्रान्तः कन्या-
रत्नं हृतं मम ॥ दष्टा वा कालसर्पेण सिंहव्याघ्रेण वा हता।
न जाने क्व गता पुत्री केन दुष्टेन वा हृता ॥ पतितः
शोकसन्तप्तो वातेनेव तरुर्यथा। निर्गतो गिरिराजस्तु
दुहितायां गवेषणे ॥ महादेव उवाच ॥ गत्वाऽथ विपिनं
घोरं सिंहशार्दूलसङ्कुलम्। व्याघ्रसिंहैश्च भल्लूकैर्युध्य-
मानैर्महागजैः ॥ तस्मिन्वने महाघोरे व्रजन्ती सखिभिर्युता।
दृष्ट्वा तत्र नदीं रम्यां वनमध्ये गुहान्तरे ॥८०॥ उपविष्टा-
ऽऽलिभिःसाकमन्नाहारविवर्जिता। संस्थाप्य वालुकापिण्डं
पार्वत्या सहितं मम ॥ हस्तनक्षत्रसंयुक्ता मासि भाद्रे
सिता जया। तत्र वाद्येन गीतेन रात्रौ जागरणं कृतम् ॥
तेन व्रतप्रभावेण त्वासनं चलितं मम। प्राप्तोऽहं देवि
तत्रैव यत्र त्वं सखिभिःसह ॥ प्रकरोषि मम प्रीत्या मदा-
राधनमुत्तमम्। गुरूपदिष्टविधिना तेन तुष्टो भृशं मुदा ॥
प्रसन्नोऽस्मि वरं ब्रूहि मया प्रोक्तं वरानने। प्रसन्नोऽसि
यदा देव ददस्व मनसेप्सितम् ॥ सर्वज्ञस्य न चाज्ञातं
किञ्चिदस्ति महीतले। महादेव उवाच ॥ व्रतमेतद्धि कुरु-
ते या नारी दृढमानसा ॥ प्राप्यापि सकलान् कामानन्ते
ब्रह्मणि लीयते। इत्युक्त्वा च ततो देवि कैलासमहमा-
गतः ॥ ततः प्रभातसमये नद्यामेव विसर्जनम्। पारणं
तु ततः कृत्वा यत्प्राप्तं वनमध्यगम् ॥ पुनस्तत्रैव सुप्तासि
सख्या सार्द्धं सरित्तटे। हिमवानपि तत्रैव सम्प्राप्तस्त्व-
द्गवेषणे ॥ अन्विष्यंस्त्वां चतुर्दिक्षु ह्यन्नपानविवर्जितः।
सुप्तं दृष्टं नदीतीरे दूरतः कन्यकाद्वयम् ॥ ९० ॥ उत्था-

योत्सङ्गमानीय रुदन्तीं त्वामुवाच ह । सिंहव्याघ्रादि-
॥१०६॥ भिर्दुष्टैः सेवितं हि महावनम् ॥ पुत्रि प्राप्ता किमर्थं त्वं
प्रियं किं करवाणि ते । पार्वत्युवाच । शृणु तात मया
ज्ञातं मां दास्यसि च शूलिने ॥ तदन्यथा कृतं तात तेनाहं
वनमागता । तथेत्युक्तं हिमवता नीतासि त्वं गृहं प्रति ॥
तेन प्रोक्तोऽस्म्यहं देवि विवाहार्थं त्वया सह । पार्वत्यु-
वाच ॥ किं कृतं गिरिणा तत्र विवाहोऽभूत्कथं मम ॥
त्वयाऽत्र किं कृतं नाथ श्रोतुमिच्छामि विस्तरात् ॥ ऋष-
यः सप्त भोर्देवि त्वदर्थे प्रेषिता मया ॥ दृष्टास्ते नगराजेन
पप्रच्छ मुदिताननः । कुत आगमनं जातं यूयं देवेन प्रेषि-
ताः ॥ अन्यथा महतां प्राप्तिर्जडानां वै कथं भवेत् । ऋष-
य ऊचुः ॥ नगराज वयं तावच्छङ्कराज्ञाविधायिनः ॥
त्वत्समीपे तु कन्यार्थं दीयतां यदि रोचते । महादेवो
यदा मत्तः कन्यां प्रार्थयते तदा ॥ कन्यया च कृतं सम्यक्
यदर्थं दुष्करं तपः । अतस्तेन प्रसादोऽस्याः कर्त्तव्यः शूल-
पाणिना ॥ ऋषिभिर्बहुभिर्गीतं स देवो भक्तवत्सलः ।
इति श्रुत्वा गता विप्रा महादेवस्य सन्निधौ ॥ १०० त-
द्वृत्तान्तं समाकर्ण्य आजगाम महेश्वरः । आजग्मुस्तत्र
वै सर्वे देवा इन्द्रपुरोगमाः ॥ पातालादागतः शेषः क्षीरा-
ब्धिशयनाद्विभुः । यत्र यत्र स्थिता देवा गन्धर्वाः सिद्ध-
चारणाः ॥ ते तत्स्थानात्समाजग्मुस्तन्महोत्सवसम्भ्रमाः ।
विष्णुनाऽथ धृतं छत्रं श्वेतं चार्कशतप्रभम् ॥ इन्द्रो वै
चामरे दिव्ये कुबेरः कोशधारकः । स्वफणामणिभिः शेषो
दीपमालां बिभर्त्ति सः ॥ सहस्रयोजनायामं तेनाकारि सुम-
ण्डपम् । एकस्तम्भमयं प्रोच्चं योजनानां शतादहो ॥ ब्रह्म-
बृहस्पती देवौ मन्त्राशीर्भिः समूचतुः । जयशब्दैस्तथा देवा

ऋषयश्च तपोधनाः ॥ नृत्यन्त्यप्सरसस्तत्र गन्धर्वा ललितं जगुः । वाद्यानां ध्वनिवन्मेघो मन्दं मन्दं च गर्जति ॥ अवाकिरच्चतुर्दिक्षु तुषारकुसुमानि सः । देवकन्या नागकन्या लाजाभिः कृतमङ्गलाः ॥ सरस्वती रमादेवी शच्याद्या दैवतस्त्रियः । स्वर्णपात्रे निधायाशु पुष्पचन्दनमक्षतान् ॥ दधिदूर्वांश्च सिद्धार्थान् हरिद्रारत्नदीपकान् । नीराजनं प्रकुर्वन्ति गिरिजायाः शिवस्य च ॥ ११० ॥ पुष्पवृष्टिं प्रकुर्वन्ति देवाः सव्यापसव्यतः । महोत्सवः सम्प्रवृत्तो हिमालयगिरौ तदा ॥ गिरिणा च तदा तस्मै दत्तं जामातृतोषकम् । गजानां दशसाहस्रमश्वानां नियुतं तथा ॥ अनर्घ्याणि च रत्नानि ददौ तस्मै गिरिः स्वयम् । मुक्तानां दशकोट्यश्च शतकोट्यश्च विद्रुमाः ॥ हाटकं कोटिकोट्यस्तु पारिबर्हं ददौ गिरिः । असङ्ख्यातास्तु वै दास्यो मनःसन्तुष्टिकारकाः ॥ मैनाकस्त्वतिप्रियार्थं वै गिरिणा प्रेषितः स्वयम् । एवं गिरिजया सार्द्धं कैलासमहमागतः ॥ आगत्य देवताः सर्वाः स्वे स्वे स्थाने समादिशम् । महादेव उवाच । तेन व्रतप्रभावेण सौभाग्यमतुलं त्वया ॥ प्राप्तमर्द्धासनं देवि सा सखी विजयाऽभवत् । अद्यारभ्य व्रतं देवि कस्याग्रे न निवेदितम् ॥ यद्गोप्यं हृद्गतं देवि यन्नोक्तं नन्दिने मया । तदुक्तं त्वत्समीपे तु त्वत्सौभाग्यविमोहितः ॥ तदारभ्य व्रतस्यास्य शृणु देवि यथाऽभवत् । आलिभिर्हरिता यस्मात्तस्मात्सा हरितालिका ॥ पार्वत्युवाच ॥ श्रुतं पूर्वं कृतं नाथ विधिं चास्य वद प्रभो । किं पुण्यं किं फलं चास्य कैश्च वा क्रियते नरैः ॥ १२० ॥ महादेव उ० । शृणु देवि विधिं वक्ष्ये नारीणां व्रतमुत्तमम् । कर्तव्यं तु प्रयत्नेन यदि सौभाग्यमिच्छति ॥ तोर-

णादि प्रकर्तव्यं कदलीस्तम्भमण्डितम्। आच्छाद्य पट्टवस्त्रैश्च नानावर्णविचित्रकैः॥ चन्दनादिसुगन्धेन लेपयेत्तं च मण्डपम्। शङ्खभेरीमृदङ्गैश्च वादयेद् बहु वाद्यकान्॥ नानामङ्गलसंरम्भः कर्तव्यो मम सद्मनि। स्थापयेत्प्रतिमां तत्र पार्वत्या सहितस्य मे॥ नानाकारैश्च नैवेद्यैर्नानाभक्ष्योपहारकैः। नानोपचारताम्बूलैरुपवाससजागरैः॥ नारिकेलैः पूगफलैर्दाडिमैः पनसादिभिः। बीजपूरैः सनारिङ्गैः फलैरन्यैरुपासयेत्॥ ऋतुदेशोद्भवैः सर्वैः फलैश्च विविधैः शुभैः। गन्धाक्षतैस्तथा पुष्पैर्धूपैर्दीपैर्मनोरमैः॥ पूर्वोक्तेन विधानेन पूजयेदुमया सह। कथां श्रुत्वैकचित्तेन दद्याद्दानानि भूरिशः॥ आचार्याय प्रदातव्यं वस्त्रं धेनुर्हिरण्यकम्। अन्येभ्यो भूयसीं दद्यात्स्त्रीभ्यो वा भूषणादिकम्॥ ततो वाद्येन गीतेन सा निशा कौतुकादिना। नयेदतन्द्रिता देवि यदि सौभाग्यमिच्छति॥ १३०॥ तस्मिन्नहनि या नारी भोजनं कुरुते यदि। सप्त जन्म भवेद्वन्ध्या वैधव्यं च पुनः पुनः॥ दारिद्र्यं पुत्रशोकं च कर्कशा दुःखभागिनी। पतेत्सा नरके घोरे नोपवासं करोति या॥ पयः पानादहिर्मत्सी फलाहारे च मण्डुकिः। शर्करागुडखाद्यादिभक्षणात्तु पिपीलिका॥ शृङ्गिपिष्टं तथान्यं वै पञ्चखाद्यादिकं तथा। क्षुधार्ता याश्च भक्षन्ति मूषक्यस्ता भवन्ति हि॥ दधि भक्षति मार्जारी या स्त्री विज्ञानसंयुता। फलं भक्षति या नारी सा भवेद्वानरी ध्रुवम्॥ राजतं काञ्चनं ताम्रं वेणुजं वापि मृन्मयम्। सम्पुटीकृत्य तन्मध्ये फलानि विविधानि च॥ हरिद्रां कुङ्कुमं चैव अञ्जनादि प्रकल्पयेत्। वस्त्राण्याभरणादीनि ताम्बूलं सहिरण्यकम्॥ दानं च द्विजवर्याय दद्यादन्ते च पारणा॥ एवं विधिं या

कुरुते च नारी भर्त्रा समं सा रमते सुखेन। भोगाननेकान् भुवि भुञ्जमाना सायुज्यमन्ते लभते हरेण॥
॥११२॥ अश्वमेधसहस्राणि वाजपेयशतानि च। कथाश्रवणमात्रेण तत्पुण्यं लभते नरः॥ एतत्ते कथितं देवि तवाग्रे व्रतमुत्तमम्। कोटियज्ञकृतं पुण्यमस्यानुष्ठानमात्रतः॥ इति श्रीस्कन्दपुराणे उमामहेश्वरसंवादे हरितालिकाकथा समाप्ता॥

॥ भाद्रपदशुक्लचतुर्थ्यां सिद्धिविनायकपूजाविधिः॥

चतुर्थी च मध्याह्नव्यापिनी ग्राह्या। यदा तु परदिने मध्याह्नव्यापिनी, न पूर्वदिने तदा परा। दिनद्वये मध्याह्नव्याप्तौ तदभावे वा अंशतः समव्याप्तौ विषमव्याप्तौ वा पूर्वा, तृतीयाविद्धायाः प्राशस्त्यात्। इयं रविभौमयोरतिप्रशस्ता। अत्र मध्याह्नः पञ्चधा विभक्तस्य दिनस्य तृतीयो भागः। तस्यां प्रातः शुक्लतिलकल्कोद्वर्तनपूर्वकं स्नानं विधाय, कृतनित्यक्रियो गणेशपूजार्थं कदलीस्तम्भशोभितं आम्रपल्लवतोरणविविधफलनानाविचित्ररङ्गवल्ल्याद्यलङ्कृतं पीठं परिकल्प्य तदुपरि तण्डुलपुञ्जं निधाय स्वस्तिकं विरचयेत्॥ अथ पूजाप्रयोगः॥ मध्याह्ने आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य, मम सकुटुम्बस्य सपरिवारस्य सिद्धिविनायकप्रीतिद्वारा शत्रुनिरसनपूर्वकजयप्राप्तिक्षेमस्थित्यायुरारोग्यैश्वर्याभिवृद्धिसर्वकर्मनिर्विघ्नसिद्धिपुत्रपौत्रादिधनधान्यादिसमृद्ध्यर्थं भाद्रपदशुक्लचतुर्थ्यां विहितं मृन्मय्यां मूर्तौ पुरुषसूक्तमन्त्रैः पुराणोक्तमन्त्रैश्च यथामिलितषोडशोपचारद्रव्यैः श्रीसिद्धिविनायकपूजनमहं करिष्ये॥ तदङ्गं आसनविधिं पुरुषसूक्तन्यासान् कलश-

पूजनं शङ्खघण्टापूजनं च करिष्ये । पृथिव त्वया० । अपस० ।
॥११३॥ तीक्ष्णदंष्ट्र० । वामपादेन भूमिं त्रिस्ताडयेत् । सहस्रशीर्षेति षोडशर्चस्य सूक्तस्य नारायणः पुरुषोऽनुष्टुप् अन्त्यात्रिष्टुप् न्यासे विनियोगः ।

१ सहस्र० वामकराय० ।	९ तस्मा० ऋ० नाभ्यै न० ।
२ पुरुषए० दक्षिणकरा० ।	१० तस्माद० हृदयाय० ।
३ एतावा० वामपादा० ।	११ यत्पुरुषं० कण्ठाय न० ।
४ त्रिपादूर्ध्व० दक्षिण० ।	१२ ब्राह्मणो० वामबाहु० ।
५ तस्माद्वि० वामजानु० ।	१३ चन्द्रमाम० दक्षिणबा० ।
६ यत्पुरुषेण० दक्षिण० ।	१४ नाभ्याआ० मुखाय० ।
७ तंयज्ञंब० वामकट्यै० ।	१५ सप्तास्या० अक्षिभ्यां० ।
८ तस्मा० सं० दक्षिणक० ।	१६ यज्ञेनय० शिरसे नमः ।

कलशस्य मु० । शङ्खादौ० । आगमा० । सर्वोपचारार्थे गन्धाक्षतपुष्पं० । अपवित्रः प० । पूजाद्रव्याणि प्रोक्ष्य, ततः हेरम्बाय नमः मृदाहरणम् । गणनायकाय० उदकसेचनम् । सुमुखाय० सङ्घट्टनम् । गौरीसुताय० इति मूर्तिं पीठे संस्थाप्य प्राणप्रतिष्ठां कुर्यात् । अस्यां सिद्धिविनायकमूर्तौ देवताधिष्ठानयोग्यतासिद्ध्यर्थं प्राणप्रतिष्ठां करिष्ये । दक्षिणेन पाणिना प्रतिमायाः कपोलौ स्पृष्ट्वा, अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुःसामाथर्वाणि छन्दांसि । पराप्राणशक्तिर्देवता । आं बीजम् ।
१५ ह्रीं शक्तिः । क्रों कीलकम् । सिद्धिविनायकमूर्तौ प्राणप्रतिष्ठापने वि० । ॐ आंह्रींक्रों अंयंरंलंवंशंषंसंहंळंक्षंअः क्रोंह्रींआं सिद्धिविनायकमूर्तेः प्राणा इह प्राणाः । ॐ आंह्रींक्रों० सिद्धि० जीव इह स्थितः । ॐ आंह्रींक्रों० सिद्धि० सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपा-

दपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा।
॥११४॥ असुनी०। गर्भाधानादिपञ्चदशसंस्कारसिध्यर्थं पञ्चदशप्रणवावृत्तीः करिष्ये, ॐ १५। रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः, पाशं कोदण्डमिक्षूद्भवमथ गुणमप्यङ्कुशं पञ्चबाणान्। बिभ्राणासृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या, देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥ देवाग्रे नैवेद्यं निधाय पार्श्वभागे तिष्ठन् आज्येन नेत्रोन्मीलनं कुर्यात्, तच्चक्षुर्दे० इत्यनेन। इति प्राणप्रतिष्ठाविधिः। अथ ध्यानम्। एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भुजम्। पाशाङ्कुशधरं देवं ध्यायेत्सिद्धिविनायकम् ॥ ध्यायेद्देवं महाकायं तप्तकाञ्चनसन्निभम्। दन्ताक्षमालापरशुपूर्णमोदकहस्तकम् ॥ मोदकासक्तशुण्डाग्रमेकदन्तं विनायकम् ॥ श्रीसिद्धिविनायकं साङ्गं सपरिवारं ध्यायामि। सहस्र० गणानां त्वा० एवं सर्वत्र। आवाहयामि विघ्नेशं सुरराजार्चितेश्वरम्। अनाथनाथं सर्वज्ञं पूजार्थं गणनायकम् ॥ श्रीसि० ऋद्धिबुद्धिसहितं साङ्गं सपरिवारं सायुधं सशक्तिकं आवाहयामि। पुरुषए०। विचित्ररत्नरचितं दिव्यास्तरणसंयुतम्। स्वर्णसिंहासनं चारु गृहाण सुरपूजित ॥ श्रीसि० आसनं० ॥ एतावा०। सर्वतीर्थसमुद्भूतं पाद्यं गन्धादिसंयुतम्। विघ्नराज गृहाणेदं भगवन् भक्तवत्सल ॥ श्रीसि० पाद्यं० ॥ त्रिपादू०। अर्घ्यं च फलसंयुक्तं गन्धपुष्पाक्षतैर्युतम्। गणाध्यक्ष नमस्तेऽस्तु गृहाण करुणानिधे ॥ श्रीसि० अर्घ्यं० ॥ तस्माद्वि०। विनायक नमस्तुभ्यं त्रिदशैरभिवन्दित। गङ्गोदकेन तोयेन शीघ्रमाचमनं कुरु ॥ श्रीसि० आचमनीयं० ॥ दध्याज्यमधुसंयुक्तं मधुपर्कं मयाऽऽहृतम्। गृहाण सर्वलोकेश गणनाथ

नमोऽस्तु ते ॥ श्रीसि० मधुपर्कं० ॥ मधुपर्कानन्तरेण आचमनीयं० । आप्याय० । क्षीरोदतनयानन्त क्षीरोदतनयप्रिय । क्षीरोदागारहृदय क्षीरं स्नानाय गृह्यताम् ॥ पयस्नानं० । शुद्धोदकस्नानं० । सकलपू० ॥ दधिक्राव्णो० । दध्ना चैव महादेव स्नपनं क्रियते मया । गृहाण त्वं सुराधीश सुप्रसन्नो भवाव्यय ॥ दधिस्नानं० । शु० स० ॥ घृतंमि० । घृतकुम्भसमायुक्तं घृतयोने घृतप्रिय । घृतभुक् घृतधामासि घृतं स्नानाय कल्पताम् ॥ घृतस्नानं० । शु० स० ॥ मधुवा० । मधुरूपो वसन्तस्त्वं त्वमेव जगतां मधु । मधुसूदनसम्प्रीत्या मधु स्नानाय गृह्यताम् ॥ मधुस्नानं० । शु० स० ॥ स्वादुः प० । इक्षुसारसमुद्भूतां शर्करां सुमनोहराम् । मलापहारिणीं स्नातुं गृहाण त्वं मयार्पिताम् ॥ शर्करास्नानं० । शु० स० ॥ यत्पुरुषे० । गङ्गादिसर्वतीर्थेभ्य आनीतं तोयमुत्तमम् । भक्त्या समर्पितं तुभ्यं गृह्णीष्वाभीष्टदायक ॥ मलापकर्षस्नानं० ॥ तैलं सुगन्धसंयुक्तं नानापुष्पैः सुवासितम् । मङ्गलार्थं मया दत्तमभ्यङ्गं प्रतिगृ० ॥ कनिक्रदज्ज० । श्रीसि० तैलाभ्यङ्गस्नानं० ॥ हरिद्रायाः कृतं चूर्णं सतैलं ससुगन्धिकम् । मया निवेदितं साम्बूद्वर्तनं प्रतिगृ० ॥ श्रीसि० हरिद्राचूर्णलेपनं स० ॥ नानातीर्थादाहृतं च सुगन्धजलमुत्तमम् । उष्णं कृतं मया देव स्नानार्थं प्रति० ॥ उष्णोदकस्नानं० आचमनीयं० ॥ मूलमन्त्रेण पञ्चोपचारपूजां कृत्वा, गणपतिअथर्वशीर्षेण पुरुषसूक्तेन च अभिषेकः । स्नानानन्तरेण आचमनीयं स० । तंयज्ञं० । रक्तवस्त्रद्वयं देव दिव्यं काञ्चनसम्भवम् । सर्वप्रद गृहाणेदं लम्बोदर हरात्मज ॥ श्रीसर्वप्रदाय० आरक्तवस्त्रद्वयं स० ॥ तस्माद्यज्ञात्सर्वहुतः सं० । राजतं

ब्रह्मसूत्रं च काञ्चनं चोत्तरीयकम् । गृहाण चारु सर्वज्ञ भक्तानां वरदो भव ॥ श्रीसि० यज्ञोपवीतं स० ॥ तस्माद्य० ऋ० । कस्तूरोचन्दनं चैव कुङ्कुमेन समन्वितम् । विलेपनं सुरश्रेष्ठ चन्दनं प्र० ॥ श्रीगणाध्यक्षाय० चन्दनं० ॥ अहिरिव० सौभाग्यद्रव्यं० । नानापरिमलद्रव्याणि स० । उद्यद्भास्करसङ्काशं सन्ध्यावदरुणं प्रभो । वीरालङ्करणं दिव्यं सिन्दूरं प्र० ॥ श्रीसि० सिन्दूरं० ॥ रक्ताक्षतांश्च देवेश गृहाण द्विरदानन । ललाटपटले चन्द्रस्तस्योपर्यत्र-धार्यताम् ॥ श्रीसि० रक्ताक्षतान् स० ॥ तस्माद्० । माल्या० । करवीरैर्जातिकुसुमैश्चम्पकैर्बकुलैः शुभैः । शतपत्रैश्च कल्हारैरर्चयेद् गणनायकम् । श्रीविनायकाय० पुष्पाणि स० ॥

॥ अथाङ्गपूजा ॥

१ गणेशाय नमः पादौ पू० ।
२ विघ्नराजाय ० जानुनी पू० ।
३ आखुवाहना० ऊरू पू० ।
४ हेरम्बाय न० कटी पू० ।
५ कामारिसूनवे० नाभिं पू० ।
६ लम्बोदराय० उदरं पू० ।
७ गौरीसुताय० स्तनौ पू० ।
८ गणनायका ० हृदयं पू० ।
९ स्थूलकण्ठाय० कण्ठं पू० ।
१० स्कन्दाग्रजा० स्कन्धौ पू ० ।
११ पाशहस्ताय० हस्तान् पू० ।
१२ गजवक्त्राय० वक्त्रं पू० ।
१३ विघ्नहर्त्रे नमः ललाटं पू० ।
१४ सर्वेश्वराय० शिरः पू० ।
१५ गणाधिपाय० सर्वाङ्गं पू० ।

॥ अथ पत्रपूजा ॥

१ सुमुखाय० मालतीपत्रं० ।
२ गणाधिपाय० भृङ्गराजपत्रं० ।
३ उमापुत्राय० बिल्वपत्रं० ।
४ गजाननाय० श्वेतदूर्वापत्रं० ।
५ लम्बोदराय० बदरीपत्रं० ।
६ हरसूनवे न० धत्तूरपत्रं० ।
७ गजकर्णका० तुलसीपत्रं० ।
८ वक्रतुण्डाय० शमीपत्रं० ।

९ गुहाग्रजाय० अपामार्गपत्रं० ।	१६ सुराग्रजा० देवदारुपत्रं० ।
१० एकदन्ताय० बृहतीपत्रं० ।	१७ भालचन्द्रा० मरुपत्रं० ।
११ विकटाय० करवीरपत्रं० ।	१८ हेरम्बाय० अश्वत्थपत्रं० ।
१२ कपिलाय० अर्कपत्रं० ।	१९ चतुर्भुजाय० जातीपत्रं ।
१३ गजदन्ताय० अर्जुनपत्रं० ।	२० विनायका० केतकीपत्रं० ।
१४ विघ्नराजा० विष्णुक्रान्तपत्रं० ।	२१ सर्वेश्वरा० अगस्तिपत्रं० ।
१५ बटवे न० दाडिमपत्रं० ।	

यत्पुरुषं० । दशाङ्गं गुग्गुलं धूपं सुगन्धं च मनोहरम् । गृहाण सर्वदेवेश उमापुत्र नमोऽस्तु ते ॥ श्रीउमासुताय० धूपमा० ॥ ब्राह्मणो० । सर्वज्ञ सर्वलोकेश त्रैलोक्यतिमिरापहम् । गृहाण मङ्गलं दीपं रुद्रप्रिय नमोऽस्तुते ॥ श्री रुद्रप्रियाय० दीपं द० ॥ चन्द्रमाम० । नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु । ईप्सितं मे वरं देहि विघ्ननाशिन्नमोऽस्तु ते ॥ नानाखाद्यमयं दिव्यं तुष्ट्यर्थं ते निवेदितम् । मया भक्त्या शिवापुत्र गृहाण गणनायक ॥ श्री विघ्ननाशिने० एकमोदकसहितनैवेद्यं० ॥ एलोशीरलवङ्गादिकर्पूरपरिवासितम् । प्राशनार्थं कृतं तोयं गृहाण गणनायक ॥ श्रीसि० मध्येपानीयं० ॥ उत्तरापोशनं० ॥ मुखप्रक्षालनं० ॥ मलयाचलसम्भूतं कर्पूरेण समन्वितम् । करोद्वर्तनकं चारु गृह्यतां जगतःपते ॥ श्रीसि०करोद्वर्तनं० ॥ नारिकेलं च नारिङ्गं कदम्बं मातुलिङ्गकम् । द्राक्षाखर्जूरदाडिम्बं गृहाण गणनायक ॥ श्रीसि० फलं० ॥ नागवल्लीदलैर्युक्तमेकविंशतिसङ्ख्यया । क्रमुकं चूर्णसंयुक्तं ताम्बूलं प्रति० ॥ श्रीसि० ताम्बूलं० ॥ हिरण्यगर्भ० । श्रीसि० दक्षिणां० ॥ श्रियेजातःश्रि० । नीराजनं गृहाणेश शोभनं भक्तिसंयुतम् । अनाथनाथ सर्वज्ञ नमस्ते भक्तवत्सल ॥ श्रीगणाध्यक्षाय० नीराजनं द० ॥

॥ आरती ॥

सुखकरतादु:खहरतावार्ताविघ्नाची । नुरवीपुरवीप्रेम कृपाजयाची । सर्वांगीसुंदरउटिशेंदुराची । कंठीझळके माळमुक्ताफळांची । जयदेवजयदेवजयमङ्गलमूर्ती दर्शनमात्रेमानस्मरणेमात्रेमानकामनापुरती । जयदेव० ॥ १ ॥ रत्नखचितफरातुजगौरीकुमरा । चंदनाचीउटीकुंकुमकेशरा । हीरेजडितमुकुटशोभतोवरा । रुणझुणतीनूपुरेचरणींघागरिया । जयदेव० ॥ २ ॥ लंबोदरपीतांबरफणिवरबंधना । सरळसोंडवक्रतुंडत्रिनयना । दासरामाचावाटपाहेसदना । संकष्टीपावावेंनिर्वाणींरक्षावेसुरवरवंदना । जयदेव० ॥ ३ ॥

नाभ्याञ्रा० । विघ्नेश्वर विशालाक्ष सर्वाभीष्टफलप्रद । प्रदक्षिणं करोमि त्वां सर्वान्कामान्प्रयच्छ मे ॥ श्रीसिद्धिवि० प्रदक्षिणां स० । समास्या० । नमस्ते विघ्नसंहर्त्रे नमस्ते ईप्सितप्रद । नमस्ते देवदेवेश नमस्ते गणनायक ॥ श्रीसि० नमस्कारान्० । तत एकविंशतिदूर्वा आदाय एकैकेन नाम्ना गन्धाक्षतयुक्तं दूर्वायुग्मं समर्पयेत् ।

॥ दूर्वायुग्मपूजा ॥

१ गणाधिपाय०	दूर्वायुग्मं० ।	६ सर्वसिद्धिप्रदा०	दूर्वायु० ।
२ उमापुत्राय०	दूर्वायु० ।	७ एकदन्ताय०	दूर्वायु० ।
३ अघनाशना०	दूर्वायु० ।	८ इभवक्त्राय०	दूर्वायु० ।
४ विनायका०	दूर्वायु० ।	९ मूषकवाहना०	दूर्वायु० ।
५ ईशपुत्राय०	दूर्वायु० ।	१० कुमारगुरवे०	दूर्वायु० ।

ततोऽवशिष्टामेकां दूर्वां गणाधिपाय नम इत्यादिदशभिर्नामभि: समर्पयेत् ।

यज्ञेनयज्ञ० गणानांत्वा० निषुसीदेत्यादिवैदिकमन्त्रै: पुष्पाञ्जलिं० । विनायक गणेशान सर्वदेवनमस्कृत । पार्व-

तीप्रिय विघ्नेश मम विघ्नं विनाशय ॥ सर्वत्र सर्वदा देव निर्विघ्नं कुरु सर्वदा । मानोन्नतिं च राज्यं च पुत्रपौत्रान् प्रदेहि मे ॥ वक्रतुण्ड० सर्वदा ॥ विघ्नान्नाशय मे सर्वा-न्नाशायोपस्थितान् प्रभो । त्वत्प्रसादेन कार्याणि सर्वाणीह करोम्यहम् ॥ शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयं कुरु । इति विज्ञाप्य देवेशं प्रणिपत्य पुनः पुनः ॥ इति सम्प्रार्थ्य, यस्य स्मृत्या० । अनेन मया कृतेन पूजनेन श्रीसिद्धिवि-नायकः प्रीयताम् ॥

ततो दशमोदकान् विप्राग्रे निधाय वायनं दद्यात् । अद्य पू० पूजासाङ्गतासिद्ध्यर्थं ब्राह्मणाय वायनप्रदानं तद-ङ्गत्वेन ब्राह्मणपूजनं च करिष्ये । सिद्धिविनायकस्वरू-पिणे ब्राह्मणाय इदमासनम्, गन्धाः० स्वस्त्यस्तु० । मोद-कान् दशसङ्ख्याकान् सगुडान् घृतपाचितान् । विप्रवर्याय दास्यामि गणनाथ प्रतुष्टये ॥ इदं दशमोदकसङ्ख्याक-वायनं सधान्यं सफलं अमुकशर्मणे० सम्प्रददे । दान-साङ्गता० दक्षिणां० सम्प्रददे । प्रति० प्रतिगृ० । अनेन वायनदानेन सिद्धिविनायकः प्रीयताम् । ततो मोदकस-हितेनान्नेन ब्राह्मणान् भोजयित्वा स्वयं सुहृद्युतो दशमो-दकसहितमतैलपक्वमन्नं भुञ्जीत ॥

अत्रायमाचारः—तां प्रतिमां विसर्जनमकृत्वैव कति-पयदिनान्युत्सवार्थं स्थापयित्वा प्रतिदिनं पूजनगीतनृत्य-वाद्यकथापुराणश्रवणादिभिर्ब्राह्मणभोजनेन चोत्सवं कृत्वा भाद्रपदशुक्लपक्षे शुभेऽह्नि विसर्जनाङ्गत्वेन मध्याह्ने देवं सम्पूज्य महानैवेद्यं समर्प्य, यान्तु देवगणा इति आवाहितं सिद्धिविनायकं विसर्जयामीति विसृज्य, उत्तिष्ठ ब्रह्मण० इत्युत्थाप्य नरयानादावारोप्य, मङ्गलवाद्यघोषपुरःसर

नीत्वा नद्यादौ महति जले प्रतिमां विसृजेदिति । अस्यां चतुर्थ्यां चन्द्रदर्शनं निषिद्धम् । दर्शने मिथ्याभिदूषणं दोषस्तत्परिहाराय पुराणोक्तं श्लोकं पठेत् । सिंहः प्रसेनमवधीत्सिंहो जाम्बवता हतः । सुकुमारक मारोदीस्तव ह्येष स्यमन्तकः ॥ इति सिद्धिविनायकपूजाविधिः ॥

॥ अथ स्यमन्तकोपाख्यानप्रारम्भः ॥

नन्दिकेश्वर उवाच । शृणुष्वैकाग्रचित्तःसन् व्रतं गाणेश्वरं महत् । चतुर्थ्यां शुक्लपक्षे तु सदा कार्यं प्रयत्नतः ॥ सनत्कुमार योगीन्द्र यदीच्छेच्छुभमात्मनः । नारी वा पुरुषो वापि यः कुर्याद्विधिवद् व्रतम् ॥ मोचयत्याशु विप्रेन्द्र सङ्कष्टाद् व्रतिनं हि तत् । अपवादहरं चैव सर्वविघ्नप्रणाशनम् ॥ कान्तारे विषमे वापि रणे राजकुलेऽथवा । सर्वसिद्धिकरं विद्धि व्रतानामुत्तमं व्रतम् ॥ गजाननप्रियं चाथ त्रिषु लोकेषु विश्रुतम् । अतो न विद्यते ब्रह्मन् सर्वसङ्कष्टनाशनम् ॥ सनत्कुमार उवाच । केन चादौ पुरा चीर्णं मर्त्यलोके कथं गतम् । एतत्समस्तं विस्तार्य ब्रूहि गाणेश्वरं महत् ॥ नन्दिकेश्वर उवाच । चक्रे व्रतं जगन्नाथो वासुदेवः प्रतापवान् । आदिष्टो नारदेनैव वृथा लाञ्छनमुक्तये ॥ सनत्कुमार उवा० । षड्गुणैश्वर्यसम्पन्नः सृष्टिसंहारकारकः । वासुदेवो जगद्व्यापी प्राप्तवान् लाञ्छनं कथम् ॥ एतदाश्चर्यमाख्यानं ब्रूहि त्वं नन्दिकेश्वर । नन्दिकेश्वर उवाच । भूमिभारनिवृत्त्यर्थं वसुदेवसुतावुभौ ॥ रामकृष्णौ समुत्पन्नौ पद्मनाभफणीश्वरौ । जरासन्धभयात्कृष्णो द्वारकां समकल्पयत् ॥१०॥ विश्वकर्माणमाहूय पुरीं हाटकनिर्मिताम् । तत्र षोडश साहस्रं स्त्रीणां चैव शताधिकम् ॥

॥१२१॥

भवनानि मनोज्ञानि तेषां मध्ये ऽयकल्पयत्। पारिजा-
ततरुं मध्ये तासां भोगाय कल्पयत्॥ यादवानां गृहा-
स्तत्र षट् पञ्चाशतकोटयः। अन्येऽपि बहवो लोका वसन्ति
विगतज्वराः॥ यत् किञ्चित् त्रिषु लोकेषु सुन्दरं तत्र दृश्यते।
सत्राजितप्रसेनाख्यौ पुत्रावुग्रस्य विश्रुतौ॥ अम्भोधि-
तीरमासाद्य तत्र तप्तुं मनोदधे। सत्राजितस्तपस्तेपे
सूर्यमुद्दिश्य बुद्धिमान्॥ व्रतं निरशनं गृह्य सूर्यसम्बद्धलो-
चनः। ततः प्रसन्नो भगवान् सत्राजितपुरस्थितः॥ सत्रा-
जितोऽपि तुष्टाव दृष्ट्वा देवं दिवाकरम्। तेजोराशे नम-
स्तेऽस्तु नमस्ते सर्वतोमुख॥ विश्वव्यापिन्नमस्तेऽस्तु हरि-
दश्व नमोऽस्तु ते। ग्रहराज नमस्तेऽस्तु नमस्ते चण्डरो-
चिषे॥ वेदत्रय नमस्तेऽस्तु सर्वदेव नमोऽस्तु ते। प्रसीद
पाहि देवेश सुदृष्ट्या मां दिवाकर॥ इत्थं संस्तूयमानोऽसौ
देवदेवो दिवाकरः। स्निग्धगम्भीरमधुरं सत्राजितमुवाच
ह॥ सूर्य उवाच। वरं ब्रूहि प्रदास्यामि यत्ते मनसि
वर्तते। सत्राजित महाभाग तुष्टोऽहं तव निश्चयात्॥ सत्रा-
जित उवा०। स्यमन्तकमणिं देहि यदि तुष्टोऽसि भास्कर।
ददौ तस्य च तद्रत्नं स्वकण्ठादवतार्य सः॥भास्कर उवाच।
भाराष्टकं शातकुम्भं स्रवतेऽसौ महामणिः। शुचिष्मता सदा
धार्यं रत्नमेतन्महोत्तमम्॥ सत्राजित त्वणैनतद्धन्ति ह्यशु-
भमानसम्। इत्युक्त्वान्तर्दधे देवस्तेजोराशिर्दिवाकरः॥
१६ तत्कण्ठरत्नज्वलमानरूपी पुरीं स कृष्णस्य विवेश सत्व-
रम्। दृष्ट्वा तु लोका मनसा दिवाकरं संचिन्तयन्तो
ह्यविनष्टदृष्टयः॥ समागतोऽयं हरिदश्वदीधितिर्जनार्दनं
द्रष्टुमसंशयेन। नायं सहस्रांशुरितीह लोकाः सत्राजितो-
ऽयं मणिकण्ठभास्वान्॥ स्यमन्तकं महारत्नं दृष्ट्वा तत्क-

ष्ठमण्डले । स्पृहां चक्रे जगन्नाथो न जहार मणिं ततः ॥
॥१२२॥ सत्राजितो जातभयो याचयिष्यति मां हरिः । प्रसेनाय
ददौ भ्रात्रे धार्योऽयं शुचिना त्वया ॥ एकदा कण्ठदेशेऽसौ
क्षिप्त्वा तं मणिमुत्तमम् । मृगयाक्रीडनार्थाय ययौ
कृष्णेन संयुतः ॥ अश्वारूढोऽशुचिश्चासौ हतः सिंहेन
तत्क्षणात् । रत्नमादाय सिंहोऽपि गच्छन् जाम्बवता
हतः ॥ नीत्वा स विवरे रत्नं ददौ पुत्राय जाम्बवान् ॥
पुरीं विवेश कृष्णोऽपि स्वकैः सर्वैः समावृतः । प्रसे-
नोऽद्यापि नायाति हतः कृष्णेन निश्चितम् । मणिलो-
भेन हा कष्टं बान्धवः पापिना हतः । द्वारकावासिनः
सर्वे जना ऊचुः परस्परम् । वृथापवादसन्तप्तः कृष्णोऽपि
निरगाच्छनैः । सहैव तैर्यथारण्ये दृष्ट्वा सिंहेन पातितम् ॥
प्रसेनं वाहनयुतं तत्पदानुचराः शनैः । प्रसेन निहतं दृष्ट्वा
कृष्णश्चर्क्षबिलं गतः ॥ विवेश योजनशतमन्धकारं स्वते-
जसा ॥ निवारयन्ददर्शाग्रे प्रासादं षड्भूमिकम् ॥
कुमारीं जाम्बवन्तस्य दोलायाममितद्युतिम् । माणिक्यं
लम्बमानं च ददर्श भगवान् हरिः ॥ रूपयौवनसम्पन्नां
कन्यां जाम्बवतीं पुनः ॥ दोलां दोलयमानां च ददर्श
कमलेक्षणः ॥ महान्तं विस्मयं चक्रे दृष्ट्वा तां चारुहा-
सिनीम् । दोलां दोलयमानां च जगौ गीतमिदं मुहुः ॥
सिंहः प्रसेनमवधीत्सिंहो जाम्बवता हतः । सुकुमारक
मारोदीस्तव ह्येष स्यमन्तकः ॥ मदनज्वरदाहार्ता दृष्ट्वा
तं कमलेक्षणम् । उवाच ललितं बाला गम्यतां गम्यता-
मिति ॥ रत्नं गृहीत्वा वेगेन यावद्गच्छेते तु जाम्ब-
वान् । इत्याकर्ण्य वचः शौरिःशङ्खं दध्मौ प्रतापवान् ॥
आकर्ण्य सहसोत्थाय युयुधे यक्षराट् ततः । तयोर्युद्धम-

भूद् घोरं हरिजाम्बवतोस्तदा ॥ द्वारकावासिनः सर्वे गतास्ते सप्तमे दिने । पुनः कृष्णो निरीक्षन्तो निःसंदिग्धं विचार्य च ॥ परलोकक्रियां चक्रुः परेतस्य तु ते तदा । एकविंश-दिनं यावद् बाहुप्रहरणो विभुः ॥ युयुधे तेन ऋक्षेण युद्ध-कर्मणि तोषितः । जाम्बवान् प्राक्तनं स्मृत्वा दृष्ट्वा देव-बलं महत् ॥ जाम्बवानुवाच । अजेयोऽहं सुरैः सर्वैर्यक्ष-राक्षसदानवैः । त्वया जितोऽहं देवेश देवस्त्वमसि नि-श्चितम् ॥ जाने त्वां वैष्णवं तेजो नान्यथा बलमीदृशम् । इति प्रसाद्य देवेशं ददौ माणिक्यमुत्तमम् ॥ सुतां जाम्ब-वतीं नाम भार्यार्थं वरवर्णिनीम् । पाणिं वै ग्राहयामास देवदेवं च जाम्बवान् ॥ मणिमादाय देवोऽपि जाम्बव-त्यापि संयुतः । तद् वृत्तान्तं समाचष्टे द्वारकावासिनां स्वयम् ॥ सत्राजितस्य माणिक्यं दत्तवान् संसदि स्थितः । मिथ्यापवादसंशुद्धिं प्राप्तवान्मधुसूदनः ॥ स त्राजितोऽपि संत्रस्तः कृष्णाय प्रददौ सुताम् । सत्यभामां महाबुद्धिर्ददौ सर्वगुणान्विताम् ॥ शतधन्वाक्रूरमुख्या यादवा दुष्टमानसाः । सत्राजितेन ते वैरं चक्रू रत्नाभिला-षिणः ॥ दुरात्मा शतधन्वापि गते कृष्णे च पाण्डवान् । सत्राजितं निहत्याशु मणिं जग्राह पापधीः ॥ कृष्णस्य पुरतः सत्या समाचष्टे विचेष्टितम् । अन्तर्हृष्टो बहिः कोपी कृष्णः कपटिनायकः ॥ बलदेवपुरो वाक्यमुवाच धर-णीधरः । हत्वा सत्राजितं दुष्टो मणिमादाय गच्छति ॥ निहत्य शतधन्वानं गृहीत्वा रत्नमावयोः । मम भोग्यं च तद्रत्नं भविष्यति सुनिश्चितम् ॥ एतच्छ्रुत्वा भया-त्त्रस्तः शतधन्वापि यादवः । आहूयाक्रूरनामानं माणिक्यं प्रददौ च सः ॥ आरुह्य वडवां वेगान्निर्गतो दक्षिणां दिशम् ।

रथस्थावनुगच्छेतां तदा रामजनार्दनौ ॥ शतयोजनमात्रेण ममार वडवा तदा । पलायमानो निहतः कृष्णेन च पदातिना ॥ रथस्थे बलदेवे तु हते रत्नस्य लोभतः । न दृष्टं तत्र तद्रत्नं बलदेवपुरोऽवदत् ॥ तदाकर्ण्य महारोषादुवाच वचनं बली । कपटी त्वं सदा कृष्ण लोभी पापी सुनिश्चितम् ॥ अर्थाय स्वजनं हंसि कस्त्वं बन्धुं समाश्रयेत् । अनेकशपथैः कृष्णो बलदेवं प्रसादयन् । सोऽपि धिक्कष्टमित्युक्त्वा ययौ वैदर्भमण्डलम् । कृष्णोऽपि रथमारुह्य द्वारकां प्रययौ पुनः ॥ तथैवोचुर्जनाः सर्वे न साधोयानयं हरिः । निष्काशितो रत्नलोभाज्ज्येष्ठो भ्राता बलो बली ॥ तच्छ्रुत्वा दीनवदनः पापीयानिव संस्थितः । वृथाभिशापात्सन्तप्तो बभूव स जगत्पतिः ॥ अक्रूरोऽपि विनिष्क्रम्य तीर्थयात्रानिमित्ततः । काशीं गत्वा सुखेनासौ यजन्यज्ञपतिं प्रभुम् ॥ तोषमुत्पादयामास तेन द्रव्येण बुद्धिमान् । सुरालयगृहैश्चित्रैर्नगरं समकल्पयत् ॥ न दुर्भिक्षं न वै रोगा ईतयो न च विड्वरम् । शुचिना धार्यते तत्र मणिः सूर्यस्य निश्चितम् ॥ जानन्नपि हि तत्सर्वं मानुषं भावमाश्रितः । लोकाचारं तथा मायामज्ञानं च समाश्रितः ॥ बन्धुवैरं समुत्पन्नं लाञ्छनं समुपस्थितम् । वृथापवादबहुलं जायमानं कथं हरेः ॥ इति चिन्तातुरं कृष्णं नारदः समुपस्थितः । गृहीत्वा तत्कृतां पूजां सुखासनगतोऽब्रवीत् ॥ नारद उवाच । किमर्थं खिद्यसे देव किं वा ते शोककारणम् । यथावृत्तं समाचष्टे नारदाय च केशवः ॥ जानामि कारणं देव यदर्थं लाञ्छनं तव । त्वया भाद्रपदे शुक्ले चतुर्थ्यां चन्द्रदर्शनम् ॥ कृतं तेन समुत्पन्नं लाञ्छनं तु वृथैव हि । श्रीकृष्ण उवाच । वद नारद मे शीघ्रं को दोषश्चन्द्रदर्शने ॥

किमर्थं तु द्वितीयायां तस्य कुर्वन्ति दर्शनम् । नारद उवाच । गणनाथेन संशप्तश्चन्द्रमा रूपगर्वतः ॥ तद्दर्शने नराणां हि वृथा निन्दा भविष्यति । श्रीकृष्ण उवाच ॥ किमर्थं गणनाथेन शप्तश्चन्द्रः सुधामयः ॥ इदमाख्यानकं श्रेष्ठं यथावद्वक्तुमर्हसि । नारद उवाच । गणानामाधिपत्ये च रुद्रेण विहितः पुरा ॥ अणिमा महिमा चैव लघिमा गरिमा तथा । प्राप्तिः प्राकाम्यमीशत्वं वशित्वं चाष्टसिद्धयः ॥ भार्यार्थं प्रददौ देवो गणेशस्य प्रजापतिः । पूजयित्वा गणाध्यक्षं स्तुतिं कर्तुं प्रचक्रमे ॥ ब्रह्मोवाच । गजवक्त्र गणाध्यक्ष लम्बोदर वरप्रद । विघ्नराजाधिदेवेश सृष्टिसंहारकारक ॥ सम्पूजयेद् गणाध्यक्षं मोदकाद्यैः प्रयत्नतः । तेषां प्रजायते सिद्धिर्निर्विघ्नेन न संशयः ॥ असम्पूज्य गणाध्यक्षं ये वाञ्छन्ति सुरासुराः । न तेषां जायते सिद्धिः कल्पकोटिशतैरपि ॥ त्वद्भक्त्या तु गणाध्यक्ष विष्णुःपालयते सदा । रुद्रोऽपि संहरत्याशु त्वद्भक्त्यैव करोम्यहम् ॥ इत्थं संस्तूयमानोऽसौ देवदेवो गजाननः । उवाच परमप्रीतो ब्रह्माणं जगतां पतिम् ॥ श्रीगणेश उवाच । वरं ब्रूहि प्रदास्यामि यत्ते मनसि वर्तते । ब्रह्मोवाच । क्रियमाणस्य मे सृष्टिर्निर्विघ्नं जायतां प्रभो ॥ एवमस्त्विति देवोऽसौ गृहीत्वा मोदकान्करे । सत्यलोकात्समागत्य स्वेच्छया गगने शनैः ॥ चन्द्रलोकं समासाद्य चलितो गणनायकः । उपहासं तदा चक्रे सोमो रूपमुक्षान्वितः ॥ तं दृष्ट्वा कोपताम्राक्षो गणनाथः शशाप ह । दर्शनीयः सुरूपोऽहं सुन्दरश्चाह मित्यथ ॥ गर्वितोऽसि शशाङ्क त्वं फलं प्राप्स्यसि सत्वरम् । अद्यप्रभृति लोकास्त्वां न हि पश्यन्ति पापिनम् ॥ ये पश्यन्ति प्रमादेन

॥१२६॥

त्वां नरा मृगलाञ्छनम् ॥ मिथ्याभिशापसंयुक्ता भवि-ष्यन्तोह ते ध्रुवम् ॥ हाहाकारो महान् जातः श्रुत्वा शापं च भीषणम् । अत्यन्तं म्लानवदनश्चन्द्रो जलमथाविशत् ॥ कुमुदं कौमुदीनाथः स्थितस्तत्र कृतालयः । ततो देव-र्षिगन्धर्वा निराशोद्विग्नमानसाः ॥ तुराषाहं पुरोधाय जग्मुस्ते तं पितामहम् । देवं शशंसुश्चन्द्रस्य गणेशस्य च चेष्टितम् ॥ दत्तः शापो गणेशेन कथयामासुरादरात् । विचार्य भगवान्ब्रह्मा तान्सुरानिदमब्रवीत् ॥ गणेशशापो देवेन्द्रौ शक्यते केन वाऽन्यथा । कर्तुं रुद्रेण न मया वि-ष्णुना चापि निश्चितम् । तमेव देवदेवेशं व्रजध्वं शरणं सुराः । स एव शापमोक्षं च करिष्यति न संशयः ॥ देवा ऊ० ॥ केनोपायेन वरदो गजवक्त्रो गणेश्वरः । पितामह महाप्राज्ञ तदस्माकं वद प्रभो । पितामह उवा० । चतुर्थ्यां देवदेवोऽसौ पूजनीयः सदैव हि ॥ कृष्णपक्षे विशेषेण नक्तं कुर्याच्च तद् व्रतम् । अपूपैर्घृतसंयुक्तैर्मोदकैः परितोष-येत् ॥ मधुरान्नं हविष्यं च स्वयं भुञ्जीत वाग्यतः । स्वर्ण-रूपं गणेशस्य दातव्यं द्विजसत्तमे ॥ शक्त्या च दक्षिणां दद्याद्वित्तशाठ्यं न कारयेत् । एवं समेतैस्तैः सर्वैर्गीष्पतिः प्रेषितस्तदा ॥ स गत्वा कथयामास चन्द्राय ब्रह्मणोदि-तम् ॥ व्रतं चक्रे ततश्चन्द्रो यथोक्तं ब्रह्मणा पुरा । आवि-र्बभूव भगवान् गणेशो व्रततोषितः ॥ तं क्रीडमानं गणनायकं च तुष्टाव दृष्ट्वा तु कलानिधानः ॥ त्वं कारणं कारणकारणानां वेत्तासि वेद्यं च विभो प्रसीद । प्रसीद देवेश जगन्निवास गणेश लम्बोदर वक्रतुण्ड ॥ विरिञ्चि-नारायणपूज्यमान क्षमस्व मे गर्वकृतं च हास्यम् । ये त्वामसम्पूज्य गणेश नूनं वाञ्छन्ति मूढाः सुकृतार्थसिद्धिम् ।

ते दैवनष्टा विश्रुतं च लोके ज्ञातो मया ते सकलः प्रभा-
॥१२७॥ वः ॥ ये चाप्युदासीनतरास्तु पापास्ते यान्ति वासं नरके
सदैव। हेरम्ब लम्बोदर मे क्षमस्व दुश्चेष्टितं तत्करुणासमु-
द्र ॥ एवं संस्तूयमानोऽसौ चन्द्रेणाथ गजाननः। तुष्टोऽहं
तव दास्यामि वरं ब्रूहि निशाकर ॥ चन्द्र उवाच। लोकानां
दर्शनीयोऽहं भवामि पुनरेव हि। विपापोहं विशापोऽहं
त्वत्प्रसादाद् गणेश्वर ॥ गणेश उवाच। वरमन्यं प्रदास्यामि
नैतद्देयं मया तव ॥ ततो ब्रह्मादयः सर्वे समाजग्मुर्भया-
र्दिताः। विशापं कुरु देवेश प्रार्थयामो वयं तव। विशापम-
करोच्चन्द्रं कमलासनगौरवात् ॥ शुक्लपक्षे चतुर्थ्यां तु ये
पश्यन्ति सदैव हि। मिथ्यापवादमाब्दं प्राप्स्यन्तीह न
संशयः ॥ मासादौ पूर्वमेव त्वां ये पश्यन्ति सदा जनाः।
चतुर्थ्यां शुक्लपक्षस्य तेषां दोषो न जायते ॥ तदाप्रभृति
लोकोऽयं द्वितीयायां कृतादरः ॥ पुनरेव तु पप्रच्छ
कलावान् गणनायकम् ॥ केनोपायेन देवेश तुष्टो भवसि
मद्वद। गणेश उवा०। सदा कृष्णचतुर्थ्यां तु मोदकाद्यैः
प्रपूज्य माम्। रोहिण्या सहितं त्वां च समभ्यर्च्य विधा-
नतः ॥ यथाशक्त्या च मद्रूपं स्वर्णेन परिकल्पितम्।
दत्वा द्विजाय भुक्त्वाऽथ कथां श्रुत्वा विधानतः ॥ सदा
तस्य करिष्यामि सङ्कष्टस्य निवारणम्। भाद्रशुक्लचतुर्थ्यां
तु मृन्मयी प्रतिमा शुभा ॥ हेमाभावे तु कर्तव्या
नानापुष्पैः प्रपूज्य माम् ॥ ब्राह्मणान् भोजयेत्पश्चाज्जागरं
च विशेषतः। स्थापयेदव्रणं कुम्भं धान्यस्योपरि शोभि-
तम्। यथाशक्त्या च मद्रूपं शातकुम्भेन निर्मितम्।
वस्त्रद्वयसमाच्छन्नं मोदकाद्यैः प्रपूज्य माम् ॥ रक्ताम्बर-
धरो मर्त्यो ब्रह्मचर्यव्रतः शुचिः। राजतस्य तु रूपं मे

यथाशक्त्या विनिर्मितम् ॥ वस्त्रं शिवप्रियायेति उपवस्त्रं गणाधिपे । गन्धं लम्बोदरायेति पुष्पं सिद्धिप्रदायके ॥ धूपं गजमुखायेति दीपं मूषकवाहने । विघ्ननाथाय नैवेद्यं फलं सर्वार्थसिद्धिदे ॥ ताम्बूलं कामरूपाय दक्षिणां धनदाय च ॥ इक्षुदण्डैर्मोदकैश्च होमं कुर्याच्च नामभिः । विसर्जनं ततः कुर्यात्सर्वसिद्धिप्रदायकम् ॥ एवं सम्पूज्य विघ्नेशं कथां श्रुत्वा विधानतः । मन्त्रेणानेन तत्सर्वं ब्राह्मणाय निवेदयेत् ॥ दानेनानेन देवेश प्रीतो भव गणेश्वर । सर्वत्र सर्वदा देव निर्विघ्नं कुरु सर्वदा ॥ मानोन्नतिं च राज्यं च पुत्रपौत्रान्प्रदेहि मे ॥ गाश्च धान्यं च वासांसि दद्यात्सर्वं स्वशक्तितः । दत्वा तु ब्राह्मणैः सर्वैः स्वयं भुञ्जीत वाग्यतः ॥ मोदकापूपमधुरं लवणक्षारवर्जितम् । एवं करोति यश्चन्द्र तस्याहं सर्वदा जयम् ॥ सिद्धिं च धनधान्ये च ददामि विपुलां प्रजाम् । इत्युक्त्वान्तर्दधे देवो विघ्नराजो विनायकः । तद् व्रतं कुरु कृष्ण त्वं ततः सिद्धिमवाप्स्यसि ॥ नारदेनैवमुक्तश्च व्रतं चक्रे हरिः स्वयम् । मिथ्यापवादं निर्मृज्य ततः कृष्णोऽभवच्छुचिः । ये शृण्वन्ति तदाख्यानं स्यमन्तकमणीयकम् । चन्द्रस्य चरितं सर्वं तेषां दोषो न जायते । भाद्रशुक्लचतुर्थ्यां तु क्वचिच्चन्द्रस्य दर्शनम् । जातं तत्परिहारार्थं श्रोतव्यं सर्वमेव हि ॥ यदा यदा मनःकष्टं सन्देह उपजायते । तदा तदा च श्रोतव्यमाख्यानं कष्टनाशनम् ॥ एवमुक्त्वा गतो देवो गणेशः कृष्णतोषितः । श्रावणस्य सिते पक्षे चतुर्थ्यामेकभुग्व्रती ॥ व्रतं कुर्याद् गणेशस्य यावद् वर्षसपञ्चमम् । सर्वसिद्धिकरं नृणां स्त्रीणां चैव ऋषीश्वराः ॥ एवं चक्रे व्रतं कृष्णः नारदस्योपदेशतः । व्रतं कुर्याद् गणेशस्य सर्वसिद्धि-

प्रदायकम् ॥ यदा यदा चर्यसि कार्य उत्थिते नारी नरश्चाथ करोति तद् व्रतम्। सिद्ध्यन्ति कार्याणि मनेप्सितानि किं दुर्लभं विघ्नहरे प्रसन्ने ॥ इति श्रीस्कन्दपुराणे नन्दिकेश्वर-सनत्कुमारसंवादे स्यमन्तकोपाख्यानं सम्पूर्णम् ॥

॥ ऋषिपञ्चमीव्रताङ्गपूजाविधिः ॥

पञ्चमी मध्याह्नव्यापिनी ग्राह्या, दिनद्वये तद्व्याप्ताव-व्याप्तौ वा पूर्वैव । तस्यां मध्याह्नसमये नद्यादौ गत्वा, आचम्य देशकालौ स्मृत्वा, ऋषिपञ्चमीव्रताङ्गभूतं दन्तधा-वनपूर्वकं स्नानविधिं करिष्ये। अष्टोत्तरशतं सप्त वा अपा-मार्गसमिधो गृहीत्वा, आयुर्बलं यशो वर्चः प्रजाःपशुवसूनि च । ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥ इति सम्प्रार्थ्य, मुखदुर्गन्धिनाशाय दन्तानां च विशुद्धये। ष्ठीवनाय च गात्राणां कुर्वेऽहं दन्तधावनम् ॥ इति मन्त्रेण दन्तान् संशोध्य, केशवाय नम इत्यादिपञ्चभिर्नाममन्त्रैः पञ्चगव्यं सम्पाद्य तैरेव मन्त्रैः मृत्स्नानपूर्वकं स्नायात् । सुवासिनीभिस्तु दन्तान् संशोध्य, तिलामलककल्केन केशान् संशोध्य स्नातव्यमिति विशेषः । आचम्य, ततः शुक्लवाससी परिधाय मौनेन गृहमागत्य शुद्धदेशे भूमिं गोमयेनोपलिप्य रङ्गवल्ल्यादिभिरलङ्कृते पीठे प्रादेश-मात्रैः साग्रैः सप्तभिः कुशैः प्रदक्षिणग्रन्थि विधाय सप्त ऋषीन् सम्पाद्य, तेषु अथवा अक्षतपुञ्जेषु उदक्संस्थमा-वाह्य पूजां कुर्यात् । आचम्य देशकालौ स्मृत्वा, मया ज्ञानतः अज्ञानतो वा प्रथमऋतुदर्शनादारभ्य रजस्वला-वस्थायां कृतभाण्डादिसम्पर्कजनितदोषेण दुर्योनित्वादि-समस्तदोषपरिहारार्थं अरुन्धतीसहितकश्यपादिसप्त-

ऋषिप्रीत्यर्थं ऋषिपञ्चमीव्रताङ्गत्वेन विहितं यथामिलितषोडशोपचारद्रव्यैः पूजनमहं करिष्ये। आदौ निर्विघ्नतासिध्यर्थं महागणपतिपूजनं कलशघण्टापूजनं च करिष्ये। महागणपतिं सम्पूज्य वक्रतुण्डेति प्रार्थयेत्। कलशपूजनादिसम्भारप्रोक्षणान्तं कृत्वा, उदक्संस्थं आवाहयेत्।

१ कश्यपाय नमः कश्यपं आ०।	५ गौतमाय नमः गौतमं आ०।
२ अत्रये नमः अत्रिं आवा०।	६ जमदग्नये० जमदग्निं०।
३ भरद्वाजाय० भरद्वाजं आ०।	७ वसिष्ठाय० वसिष्ठं आ०।
४ विश्वामित्रा० विश्वामित्रं०।	८ अरुन्धत्यै नमः अरुन्धतीं०।

ध्यायेत्। मूर्तिं ब्रह्मण्यदेवस्य ब्रह्मणस्तेज उत्तमम्॥ सूर्यकोटिप्रतीकाशं ब्रह्मवृन्दं विचिन्तये॥ ब्रह्मसूत्रं सोत्तरीयं बिभ्रतोऽजिनदण्डकम्। कमण्डलुधरान् सप्त चिन्तयामि मुनीश्वरान्॥ अरुन्धतीसहितकश्यपादिसप्तऋषीन् ध्यायामि। कुशासने पवित्रेऽस्मिंस्तिष्ठन्तु मुनिसत्तमाः। अरुन्धत्या समेताश्च जटामुकुटधारिणः॥ अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः। आसनं०। गन्धपुष्पाक्षतैर्युक्तं पाद्यं गृह्णन्तु भो द्विजाः। प्रसादं कुरुत प्रीतास्तुष्टाः सन्तु सदा मम॥ पाद्यं०॥ नभस्ये शुक्लपञ्चम्यामर्चिता ऋषिसत्तमाः। दहन्तु पापं मे सर्वं गृह्णन्त्वर्घ्यं नमो नमः॥ अर्घ्यं०॥ लोकानां तुष्टिकर्तारो यूयं सर्वे तपोधनाः। नमो वो धर्मविज्ञेभ्यो महर्षिभ्यो नमो नमः॥ आचमनं०॥ इदं क्षीरं समानीतं सर्वेषां पुष्टिकारकम्। ऋषयो दीयते भक्त्या स्नानार्थं प्र.ति०॥ पयस्नानं०॥ गोदुग्धं विकृतं देवा दधिरूपं गुणालयम्। स्नानार्थं च प्रयच्छामि गृ०॥ दधिस्नानं०॥ इदं मयार्पितं सर्पिः प्रियं सर्वदिवौकसाम्। सर्वेषां हविषां श्रेष्ठं

घृतं स्नानाय गृ०॥ घृतस्नानं० ॥ पुष्पेभ्यः सारमादाय मक्षि-
॥१३१॥ काभिः कृतं मधु । एतद्ददामि वो देवा मधु स्नानाय गृ० ॥
मधुस्नानं० ॥ अथेक्षुरससम्भूता शर्करा जगतां प्रिया ।
मया दत्ता गृहाणेमां स्नानार्थं ऋषिसत्तमाः ॥ शर्करा-
स्नानं० ॥ मन्दाकिन्याः समानीतं हेमाम्भोरुहवासि-
तम् । तोयमेतद् गन्धयुक्तं स्नानार्थं प्रति० ॥ स्नानं० ॥
नाममन्त्रेण गन्धादिपञ्चोपचारपूजां कृत्वा अभिषेकः ।
सर्वे नित्यं तपोनिष्ठा ब्रह्मज्ञाः सत्यवादिनः । वस्त्राणि
प्रतिगृह्णन्तु मुक्तिदाः सन्तु मे सदा ॥ वस्त्राणि० ॥ ना-
नामन्त्रैः समुद्भूतं त्रिवृतं ब्रह्मसूत्रकम् । प्रत्येकं च प्रय-
च्छामि ऋषयः प्रति० ॥ यज्ञोपवीतानि० ॥ कुङ्कुमागरु-
कर्पूरसुगन्धैर्मिश्रितं शुभम् । गन्धाढ्यं चन्दनं दिव्यं
गृह्णन्तु ऋषिसत्तमाः ॥ चन्दनं० ॥ शुभ्राक्षताश्च सम्पूर्णाः
प्रक्षाल्य च नियोजिताः । शोभायै वो मया दत्ता गृह्य-
न्तां मुनिसत्तमाः ॥ अक्षतान्० ॥ कण्ठसूत्रं ताडपत्रं हरि-
द्रां कुङ्कुमाञ्जनम् । सिन्दूरादि प्रदास्यामि सौभाग्यं देहि
मेऽव्ययम् ॥ अरुन्धत्यै नमः सौभाग्यद्रव्यं स० ॥ मालती-
चम्पकादीनि तुलस्यादीनि वै द्विजाः । मयाऽऽहृतानि
पुष्पाणि पूजार्थं प्रति० ॥ पुष्पाणि० ॥ वनस्पति० धूपोऽयं
प्रति० ॥ धूपं० ॥ सुवर्तिघृतसंयुक्तमन्धकारविनाशनम् ।
दीपोऽयं गृह्यतां विप्रा भक्त्या चैव मयार्पितम् ॥ दीपं० ॥
नानापक्वान्नसंयुक्तं रसैः षड्भिः समन्वितम् । गृह्णन्तु
ऋषयः सर्वं नैवेद्यं वसुदायकाः ॥ नैवेद्यं० ॥ मध्येपानी-
यं० । हस्तप्रक्षालनं० । मुखप्र० । मृगनाभिसमायुक्तं कद-
लीसम्भवान्वितम् । गृह्यन्तां मुनयः सर्वे हस्तोद्वर्तनकं
तथा ॥ करोद्वर्तनं० ॥ नारिकेलं च क्रमुकं पक्वं च कदली-

फलम् । उर्वारुकं च खर्जूरीफलानि प्रति० ॥ फलानि
॥१३२॥ स० । पूगीफलं म० । ताम्बूलं० । हिरण्यगर्भग० दक्षि-
णां० ॥ अग्निर्ज्योती रविर्ज्योतिरात्मज्योतिस्तथैव च ।
त्वमेव सर्वज्योतींषि आर्तिक्यं प्रति० ॥ आर्तिक्यदीपं
द० ॥ ऋषयः सर्वलोकेशाः प्रजासर्जनकारिणः । नराणा-
मृषिरूपेण सर्वपापप्रणाशनाः ॥ यानि कानि च० प्रदक्षि-
णां० ॥ नमोऽस्तु ऋषिवृन्देभ्यो देवर्षिभ्यो नमो नमः ॥ सर्व-
पापहरेभ्यो हि वेदविद्भ्यो नमो नमः ॥ नमस्कारान्० ॥
कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः । जमदग्नि-
र्वसिष्ठश्च साध्वी चैवाप्यरुन्धती ॥ पुष्पाञ्जलिं स० ॥
एते सप्तर्षयः सर्वे भक्त्या सम्पूजिता मया । सर्वं पापं
व्यपोहन्तु ज्ञानतोऽज्ञानतः कृतम् ॥ प्रार्थनां० ॥ अथार्घ्य-
विधिः ॥ अर्घ्यपात्रे गन्धाक्षतफलहिरण्योदकं प्रक्षिप्य अ-
ष्टावर्घ्यान्दद्यात् । तत्र मन्त्राः—कश्यपाय नमस्तुभ्यं
सर्वभूतहिताय च । नारीणां पापनाशाय ऋषिरूपधराय
च ॥ कश्यपाय नमः इदमर्घ्यं० स० ॥ १ ॥ अत्रये च
नमस्तुभ्यं सर्वभूतहितैषिणे । तपोरूपाय सत्याय ब्रह्मणे-
ऽनन्तशक्तये ॥ अत्रये० इदमर्घ्यं स० ॥ २ ॥ भरद्वाज
नमस्तुभ्यं सदाध्यानपरायण । महाजटिल धर्मात्मन् पा-
तकं हर मे सदा ॥ भरद्वाजाय० इदम० ॥ ३ ॥ विश्वा-
मित्र नमस्तुभ्यं ज्वलन्मुख महाव्रत । अध्यक्षीकृतगायत्री
तपोरूप नमोऽस्तु ते ॥ विश्वामित्राय० इदम० ॥ ४ ॥
गौतमः सर्वभूतानामृषीणां च महाप्रिय । कृतानां कर्मणां
चैव सम्प्रदायप्रवर्तक ॥ गौतमाय० इदमर्घ्यं स० ॥ ५ ॥
जमदग्निर्महातेजास्तपसा ज्वलनप्रभ । लोकेषु धर्मसि-
द्ध्यर्थं निवर्तयतु मे ह्यघम् ॥ जमदग्नये० इदमर्घ्यं० ॥६॥

नमस्तुभ्यं वसिष्ठाय जटिलाय महात्मने। धर्मरूपाय सत्याय लोकानां हितकारिणे॥ वसिष्ठाय० इदमर्घ्यं० ॥७॥ अरुन्धति नमस्तुभ्यं महापातकनाशिनि। पतिव्रतानां सर्वासां धर्मशीलप्रवर्तिके॥ अरुन्धत्यै० इदमर्घ्यं० ॥ ८॥ यस्य स्मृ०। अनेन पूजनेन अरुन्धतीसहितकश्यपादिसप्तऋषयः प्रीयन्ताम्। अद्य० थं कृतायाः पूजायाः साङ्गतासिध्यर्थं अरुन्धतीसहितकश्यपादिसप्तऋषिप्रीत्यर्थं ब्राह्मणाय सप्तशाकदानं सौभाग्यवायनदानं च क०। तदङ्गं ब्राह्मणपूजनं करिष्ये। आसनादिपूजां कृत्वा स्वस्त्यस्तु। दीर्घ०। विप्राय वे० इदं सप्तशाकदानं ब्राह्मणाय तुभ्यमहं सम्प्रददे। प्र०प्र०। सौभाग्यवायनदानमन्त्रः-भवन्तः प्रतिगृह्णन्तु ज्योतीरूपास्तपोधनाः। उभयोस्तारकाः सन्तु वायनस्य प्रदानतः॥ इदं सौभाग्यवायनदानं सदक्षिणाकं सताम्बूलं सधान्यं अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। प्र० प्र०। अनेन वायनदानाख्येन कर्मणा अरुन्धतीसहितकश्यपादिसप्तऋषयः प्रीयन्ताम्। न्यूनातिरिक्तानि परिस्फुटानि यानीह कर्माणि मया कृतानि। क्षम्याणि चैतानि मम क्षमध्वं प्रयात तुष्टाः पुनरागमाय॥ यान्तु देव०इति विसर्जयेत्। कृतस्य० दम्पतीब्राह्मणान् भोजयिष्ये॥

॥ अथ ऋषिपञ्चमीव्रतकथाप्रारम्भः॥

युधिष्ठिर उवाच॥ श्रुतानि देवदेवेश व्रतानि सुबहूनि च। साम्प्रतं मेऽन्यदाचक्ष्व व्रतं पापप्रणाशनम्॥ श्रीकृष्ण उ०॥ अथान्यदपि राजेन्द्र पञ्चमीमृषिसंज्ञिताम्। कथयिष्यामि यत्कृत्वा नारी पापात्प्रमुच्यते॥ युधिष्ठिर उ०॥ कीदृशी पञ्चमी कृष्ण कथं च ऋषिसंज्ञिता।

पातकान्मुच्यते कस्मान्नारी यदुकुलोद्भव ॥ पापानि च
॥१३४॥ बहून्यत्र विद्यन्ते किल केशव । कथं वा ऋषिपञ्चम्यां
नारी कस्मात् प्रमुच्यते ॥ कृष्ण उवाच ॥ अज्ञानाज्ज्ञा-
नतो वापि या स्त्री जाता रजस्वला । दुष्टा स्पृशति भा-
ण्डानि गृहकर्मणि संस्थिता ॥ प्राप्नोति सा महापापं
सत्यं सा नरकं व्रजेत् । शृणु तत्कारणं यस्माद्वर्जनीया
रजस्वला ॥ प्रोत्सार्य गृहतो दूरं चातुर्वर्ण्येन भारत । ब्रह्म-
हत्यां पुरा शक्रो वृत्रं हत्वा ह्यवाप च ॥ तया वै राजशा-
र्दूल व्रीडितो वृत्रसूदनः । ब्रह्माणं समुपागच्छदात्मनः
शुद्धिकारणात् ॥ शुद्धिं शक्रस्य राजेन्द्र प्रहृष्टेनान्तरात्म-
ना । विभज्य ब्रह्महत्यां तु चतुर्धा च चतुर्मुखः ॥ प्राक्षि-
पद्राजशार्दूल चतुःस्थानेषु वै तदा । वह्नौ प्रथमज्वालासु
नदीषु प्रथमोदके ॥ १० ॥ पर्वताग्रे वृक्षजातौ नारीरजसि
पार्थिव । ततो रजस्वला नारी प्रोत्सार्य च प्रयत्नतः ॥
ब्रह्मणः शासनात्पार्थ चातुर्वर्ण्येन सर्वदा । प्रथमेऽहनि
चाण्डाली द्वितीये ब्रह्मघातकी ॥ तृतीये रजकी प्रोक्ता
चतुर्थेऽहनि शुध्यति । भर्तुः शुद्धा चतुर्थेऽह्नि दैवे पित्र्ये च
पञ्चमे ॥ अज्ञानाज्ज्ञानतो वापि जातं सम्पर्कपातकम् ।
तत्पापसंक्षयार्थं वै कार्येयमृषिपञ्चमी ॥ सर्वपापप्रशमनी
सर्वोपद्रवनाशिनी । ब्रह्मक्षत्रियविट्शूद्रस्त्रीभिः कार्या
विशेषतः ॥ कृष्ण उवा० ॥ अत्रार्थे यत्पुरावृत्तं
प्रवक्ष्यामि कथानकम् । पुरा कृतयुगे राजा विदर्भायां
बभूव ह ॥ श्येनजिन्नामराजर्षिश्चातुर्वर्ण्यानुपालकः । तस्य
देशे वसन्विप्रो वेदवेदाङ्गपारगः ॥ सुमित्रो नाम राजेन्द्र
सर्वभूतहिते रतः । कृषिवृत्त्यां सदा युक्तः कुटुम्बपरिपा-
लकः ॥ तस्य भार्या सुसाध्वी च पतिशुश्रूषणे रता । जय-

श्रीर्नाम विख्याता बहुभृत्यसुहृज्जना ॥ अतिचिन्तान्विता सा च प्रावृट्काले सुमध्यमा । क्षेत्रादिषु रता साध्वी व्याकुलीकृतमानसा ॥ २० ॥ एकदा सात्मनः प्राप्तमृतुकालं व्यलोकयत् । रजस्वलापि सा राजन् गृहकर्म चकार ह ॥ भाण्डादीन्यस्पृशद्राजन्नृतौ प्राप्तेऽपि भामिनी । कालेन बहुना साध्वी पञ्चत्वमगमत्तदा ॥ तस्या भर्तापि विप्रोऽसौ कालधर्ममुपेयिवान् । एवं तौ दम्पती राजन्स्वकर्मवशगौ तदा ॥ भार्या तस्य जयश्रीः सा ऋतुसम्पर्कदोषतः । शुनियोनिसमुत्पन्ना सुमित्रोऽपि नरेश्वर ॥ तस्याः सम्पर्कदोषेण बलीवर्दो बभूव ह । एवं तौ दम्पती राजन्स्वकर्मवशगौ सदा ॥ ऋतुसम्पर्कदोषेण तिर्यग्योनिमुपागतौ । स्वधर्माचरणाज्जातावुभौ जातिस्मरौ तथा ॥ सुतस्यैव गृहे राजन्स्मरन्तौ पूर्वपातकम् । सुमित्रस्य च पुत्रोऽभूद् गुरुशुश्रूषणे रतः ॥ सुमतिर्नाम धर्मज्ञो देवतातिथिपूजकः । अथ क्षयाहे सम्प्राप्ते पितुस्तु सुमतिस्तदा ॥ भार्यां चन्द्रवतीं प्राह सुमतिः श्रद्धयान्वितः । अद्य सांवत्सरदिनं पितुर्मे चारुहासिनि ॥ भोजनीया द्विजा भीरु पाकशुद्धिर्विधीयताम् । तया कृता पाकशुद्धिः सुमतेर्भर्तुराज्ञया ॥ ३० ॥ मुक्तं पायसभाण्डे वै सर्पेण गरलं ततः । दृष्ट्वा ब्रह्मवधाद्भीता शुनी भाण्डानि साऽस्पृशत् ॥ द्विजभार्या च तां दृष्ट्वा उल्मुकेन जघान ह । भाण्डादीनि च प्रक्षाल्य त्यक्त्वा पाकं सुमध्यमा ॥ पुनः पाकं च कृत्वा तु श्राद्धं कृत्वा विधानतः । ततो भुक्तेषु विप्रेषु नोच्छिष्टं च ददौ बहिः ॥ भूमौ किंसं तदा शुन्या उपवासस्ततोऽभवत् । ततो रात्र्यां प्रवृत्तायां सा शुनी क्षुधिता भृशम् ॥ बलीवर्दमुपागत्य भर्तारमिदमब्रवीत् । बुभुक्षिताद्य

॥१२५॥

हे भर्तर्न दत्तं भोजनादिकम् ॥ ग्रासादिकं च न प्राप्तं
 क्षुधा मां बाधते भृशम् । अन्यस्मिन्दिवसे पुत्रो मम लेह्यं
ददात्यसौ ॥ अद्य मह्यं किमप्येष उच्छिष्टमपि नो ददौ ।
पायसान्ने पपाताद्य गरलं सर्पसम्भवम् ॥ मया विचिन्त्य
मनसा मरिष्यन्ति द्विजोत्तमाः । संस्पृष्टं पायसं गत्वा
वध्वाऽहं ताडिता भृशम् ॥ दुःखितं तेन मे गात्रं कटि-
भंगना करोमि किम् । ततः प्राह स चानड्वान् भद्रे ते
पापसङ्ग्रहात् ॥ किं करोमि ह्यशक्तोऽहं भारवाहोऽद्य
संस्थितः । अद्याहमात्मजत्तेत्रे वाहितः सकलं दिनम् ॥
॥ ४० ॥ मारितश्चात्मजेनाहं मुखं बध्वा बुभुक्षितः ।
वृथा श्राद्धं कृतं तेन जाताद्य मम कष्टता ॥ कृष्ण उवा० ॥
तयोः संवदतोरेवं मातापित्रोश्च भारत । श्रुत्वा पुत्रस्तदा
वाक्यं यदुक्तं च तदोभयोः ॥ ततो रजन्यां तत्काल-
मुभयोर्भोजनं ददौ । पितरौ तौ विदित्वा तु दत्तवान्सु-
मतिस्तदा ॥ तदाऽसौ दुःखितः पुत्रो ज्ञात्वाऽवस्थां तदा
तयोः । मातापित्रोस्तु राजेन्द्र तदाऽसौ प्रस्थितो वनम् ॥
ज्ञातुमिच्छामि कष्टं वै मातापित्रोश्च भारत । तत्र गत्वा
ज्ञानवृद्धान् ऋषीन् परमधार्मिकान् ॥ प्रणिपत्याब्रवीद्वाक्यं
हितं चैव तदा तयोः । सुमतिरुवाच । कथयध्वं विप्रवर्याः
प्रश्नमेकं समाहिताः ॥ केन कर्मविपाकेन पितरौ मे तपो-
धनाः । इमामवस्थां सम्प्राप्तौ मुच्येते पातकात्कथम् ॥
ऋषय ऊचुः । तव माता पुरा विप्र स्वगृहे बालभावतः ॥
प्राप्तं ऋतुं विदित्वा तु सम्पर्कमकरोद् द्विज । तेन कर्म-
विपाकेन शुनियोनिमुपागता ॥ पितापि स्पर्शदोषेण बली-
वर्दो बभूव ह । एतयोर्मुक्तिकामार्थं कुरु त्वमृषिपञ्च-
मीम् ॥५०॥ भार्यया सह विप्रेन्द्र ऋषीन्सम्पूज्य यत्नतः ।

आचरस्व व्रतं तत्र सप्तवर्षं द्विजोत्तम ॥ अन्ते चोद्यापनं कुर्याद्वित्तशाठ्यविवर्जितः। शाकाहारस्तु कर्तव्यो नीवारैः श्यामकैस्तथा ॥ कन्दं वाथ फलं मूलं हलकृष्टं न भक्षयेत् । प्राप्य भाद्रपदे मासि शुक्लपक्षस्य पञ्चमी ॥ तस्यां मध्याह्नसमये नद्यादौ विमले जले। कृत्वापामार्गसमिधा दन्तधावनमादितः ॥ आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च। ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥ सम्प्रार्थ्यानेन मन्त्रेण कुर्याद्वै दन्तधावनम् । मुखदुर्गन्धिनाशाय दन्तानां च विशुद्धये ॥ ष्ठीवनाय च गात्राणां कुर्वेऽहं दन्तधावनम् । अनेन दन्तान्संशोध्य स्नायान्मृत्स्नानपूर्वकम् ॥ तिलामलककल्केन केशान्संशोध्य यत्नतः। परिधाय नवे शुद्धे वाससी च समाहितः ॥ विधाय नित्यकर्माणि दत्वा द्वारवती * मृषीन् । स्नापयेद्विधिवद्भक्त्या पञ्चामृतरसैः शुभैः ॥ चन्दनागरुकर्पूरैर्विलिप्य च सुगन्धिभिः । पूजयेद्विविधैः पुष्पैर्गन्धधूपादिदीपकैः ॥ ६० ॥ समाच्छाद्य शुभैर्वस्त्रैः सोपवीतैर्यथाविधि । ततो नैवेद्यसम्पन्नैरर्घ्यं दद्याच्छुभैः फलैः ॥ पूजयस्व ऋषीन् दिव्यानरुन्धत्या समन्वितान् । कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः ॥ जमदग्निर्वसिष्ठश्च साध्वी चैवाप्यरुन्धती । मन्त्रेणानेन सप्तर्षीन्पूजयेत्सुसमाहितः ॥ व्रतेन ऋषिपञ्चम्याः कृतेनैव द्विजोत्तम। ऋतुसम्पर्कजो दोषः क्षयं याति न संशयः ॥ श्रीकृष्ण उवा० ॥ तच्छ्रुत्वा सुमतिर्वाक्यं परमं ऋषिभाषितम् । गृहमेत्य व्रतं चक्रे सभार्यः श्रद्धयान्वितः ॥ व्रतं तु ऋषिपञ्चम्याः सर्वपापप्रणाशनम् । कृत्वा सर्वं यथोक्तं च मातापित्रोः फलं ददौ ॥ व्रतपुण्य-

* अग्निहोत्रशालाम् ।

प्रभावेण माता तस्य श्वयोनितः । मुक्ता नृपतिशार्दूल विमानवरसंस्थिता ॥ दिव्याम्बरधरा भूत्वा गता स्वर्गं च भारत । पितापि स मृतो ऽगच्छत्सुमतेः पशुयोनितः ॥ स्वर्गं प्राप्तो महाराज व्रतस्यास्य प्रभावतः । कायिकं वाचिकं वापि मानसं यच्च दुष्कृतम् ॥ तत्सर्वं विलयं याति व्रतस्यास्य प्रभावतः । अस्य यज्जायते पुण्यं तच्छृणुष्व नृपोत्तम ॥ ७० ॥ सर्वव्रतेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् । सर्वदानेषु दत्तेषु तदेतद्व्रतचारणात् ॥ कुरुते या व्रतं नारी सा भवेत्सुखभोगिनी । रूपलावण्ययुक्ता च पुत्रपौत्रादिसंयुता ॥ इह लोके सुखं भूयात्परत्र च परां गतिम् । एतत्ते कथितं राजन्व्रतानामुत्तमं व्रतम् ॥ सर्वसम्पत्प्रदं चैव नारीणां पापनाशनम् । धनं यशश्च स्वर्गं च पुत्रानपि युधिष्ठिर ॥ पठतां शृण्वतां चापि सर्वपापप्रणाशनम् ॥ ७४ ॥ इति श्रीभविष्योत्तरपुराणे ऋषिपञ्चमीव्रतकथा सम्पूर्णा ॥

॥ भाद्रपदशुक्लषष्ठी सूर्यषष्ठी ॥

सा च सप्तमीयुता ग्राह्या । अस्यां स्नानं सूर्यपूजनं पञ्चगव्यप्राशनं च कार्यम्, तेन अश्वमेधफलप्राप्तिः । अस्यां कार्तिकेयदर्शनेन च ब्रह्महत्यादिपापनाशः । इयमेव लोलार्कषष्ठी प्रसिद्धा ॥

॥ भाद्रपदशुक्लसप्तम्यां मुक्ताभरणपूजाविधिः ॥

सप्तमी च मध्याह्नव्यापिनी ग्राह्या । दिनद्वये तद्व्याप्तौ अव्याप्तौ वा परा । नद्यादौ स्नात्वा गृहमागत्य गोमयादिलिप्ते शुद्धदेशे रङ्गवल्ल्यादिभिरलङ्कृते मण्डलं विधाय तदुपरि चन्दनादिना उमासहितं शिवं विलिख्य पूजयेत् ॥ अथ पूजाविधिः ॥ आचम्य देशकालौ सङ्की-

र्त्यं, मम इह जन्मनि अखिलपापक्षयपूर्वकअखण्डित-सन्ततिपुत्रपौत्रधनधान्यसौख्यातिशयद्वारा श्रीउमामहेश्वरप्रीत्यर्थं मुक्ताभरणव्रताङ्गभूतं यथामिलितोपचारद्रव्यैः षोडशोपचारपूजनमहं करिष्ये। तदङ्गं गणपतिपूजनादि करिष्ये। गणपतिपूजनादिकलशाराधनान्तं कृत्वा, अपवि० पूजासम्भारान् प्रोक्ष्य, ततः ध्यानादिपुष्पाञ्जलिपर्यन्तं श्रावणसोमवारोक्तशिवपूजावत् * पूजां कुर्यात्। ततः प्रार्थना—महादेव महाराज प्रीत्या पापप्रणाशन। अस्माकं कुर्वतां पूजा भवता साधु योजिता॥ ज्ञानतोऽज्ञानतो वापि भवतो विहिता च या। सम्पूर्णा सा तु विश्वेश विमला त्वत्प्रसादतः॥ इति सम्प्रार्थ्य, ततो देवस्य पुरतः सौवर्णं राजतं सौत्रं वा दोरकं निधाय, सम्पूज्य, देवदेव जगन्नाथ सर्वसौभाग्यदायक। गृह्णीयां दोरकं रूपं पुत्रपौत्रप्रवर्धनम्॥ इति मन्त्रेण गृहीत्वा, सप्त सामोपवीतं त्वां धारयामि जगद्गुरो। सूत्रग्रन्थिस्थितं नित्यं धारयामि स्थिरो भव॥ इति मन्त्रेण वामहस्ते बध्नीयात्॥ ततः—दह सर्वाणि पापानि तुष्टिं कुरु दयानिधे। प्रसन्नः सन्नुमाकान्त दीर्घायुष्पुत्रदो भव॥ इति मन्त्रेण जीर्णदोरकं उत्तारयेत्। यस्य स्मृ०। अनेन पूजनेन श्रीउमामहेश्वरौ प्रीयेताम्। अद्य० र्थं, पूजासाङ्गतासिध्यर्थं ब्राह्मणाय एकादशसङ्ख्याकमण्डकवायनदानं करिष्ये। तदङ्गं ब्राह्मणपू०। आसनादिना पूजां कृत्वा, स्वस्त्यस्तु, दी०। शङ्करः प्रतिगृह्णाति शङ्करो वै ददाति च। शङ्करस्तारकोभाभ्यां शङ्कराय नमो नमः॥ इमान् एकादशस-

---

* पूजा तु २७ पृष्ठे उक्ता।

ङ्ख्याकान् मण्डकान् सघृतान् सफलान् दक्षिणायुतान् वेदशास्त्रप्रवीणाय कुटुम्बिने ब्राह्मणाय तुभ्यमहं सम्प्रददे।
॥१४०॥ प्र०, प्र०। अनेन वायनदानेन श्रीउमामहेश्वरौ प्रीयेताम् ॥

॥ अथ मुक्ताभरणव्रतकथाप्रारम्भः ॥

श्रीकृष्ण उवाच ॥ मुनीन्द्रो लोमशो नाम मथुरायां गतः पुरा। सोऽर्चितो वसुदेवेन देवक्या च युधिष्ठिर ॥ उपविष्टः कथाः पुण्याः कथयित्वा मनोरमाः। ततः कथयितुं भूयः कथामेनां प्रचक्रमे ॥ कंसेन ते हताः पुत्रा जाता जाताः पुनः पुनः। मृतवत्सा देवकि त्वं पुत्रदुःखेन दुःखिता ॥ यथा च. द्रमुखी दीना बभूव नहुषप्रिया। पश्चाच्चीर्णव्रता चैव बभूवात्तवत्सका ॥ त्वमपि देवकि तथा भविष्यसि न संशयः। देवक्युवाच। कासीच्चन्द्रमुखी ब्रह्मन् बभूव नहुषप्रिया ॥ किं चीर्णं हि व्रतं दिव्यं तथा सन्ततिवर्धनम्। संपत्नदर्पदमनं सौभाग्यारोग्यदं विभो ॥ लोमश उवाच ॥ अयोध्यायां पुरा राजा नहुषो नाम विश्रुतः। तस्य स्त्री रूपसम्पन्ना देवी चन्द्रमुखी प्रिया ॥ तथा तस्यैव नगरे विष्णुगुप्तोऽभवद् द्विजः। आसीद् गुणवती तस्य पत्नी भद्रमुखी तथा ॥ तयोरासीदतिप्रीतिः स्पृहणीया परस्परम्। अथ ते द्वे अपि सख्यौ स्नानार्थं शरयूजले। प्राप्ते प्राप्ताश्च तत्रैव बह्व्यो वै नगराङ्गनाः ॥ ताः स्नात्वा मण्डलं चक्रुस्तन्मध्येऽव्यक्तरूपिणम्। लेपयित्वा शिवं शान्तमुमया सह शङ्करम् ॥ गन्धपुष्पाक्षतैर्भक्त्या पूजयित्वा यथाविधि। प्रणम्य गन्तुकामास्ताः पप्रच्छतुरुभे स्त्रियौ ॥ १० ॥ ता ऊचुः ॥ अस्माभिः शङ्करो देवःपार्वत्या सह पूजितः। बध्वा सूत्र-

मयं तन्तुं शिवस्यात्मा निवेदितः ॥ धारणीयमिदं ताव-
द्यावत्प्राणविधारणम् । तासां तद्वचनं श्रुत्वा सख्यौ ते
चापि देवकि ॥ कृत्वा च उभयं तत्र बध्वा दोर्भ्यां सुदो-
रकम् । ततस्ताश्च गृहं जग्मुः स्वसखीभिः समावृताः ॥
कालेन महता तस्यास्तद् व्रतं विस्मृतं शुभम् । चन्द्रमुख्याः
प्रमत्ताया विस्मृतः स तु दोरकः ॥ भद्रमुख्यास्तथा भद्रे
विस्मृतं सर्वमेव तत् । मृता कैश्चिदहोरात्रैः सा बभूव
प्लवङ्गमी ॥ भद्राख्या कुक्कुटी जाता व्रतभङ्गाच्छुभानने ।
सम्भूय भूयः समयं प्राक् वृतं चक्रतुः सदा ॥ कालेन
पञ्चतां प्राप्ते सखीभावात्सहैव ते । अदैवमातृके देशे जाता
गोकुलसंज्ञके ॥ भद्राख्या ब्राह्मणी जाता यासीचन्द्रमुखी
परा । नाम्ना भद्रमुखी या सा भूषणा नाम साऽभवत् ॥
अग्निमीळाय सा दत्ता पित्रा तस्य पुरोधसे । अतीव
वल्लभा चासीद् भूषणाऽऽभूषणप्रिया ॥ भूषिता भूषणवरै
रूपेणालङ्कृता स्वयम् । तस्यां बभूवुरष्टौ च पुत्राः सर्व-
गुणान्विताः ॥२०॥ मातृवद्रूपसम्पन्नाः पितृवद्धर्मशालिनः ।
सख्यौ ते तेन तद्वच्च जाते जातिस्मरे किल ॥ पुनर्निरन्त-
राप्रीतिस्तयोरासीद्यथा पुरा । काले बहुतिथे जाते जाता
सन्त्यक्तयौवना ॥ मध्ये वयसि राज्ञी सा पुत्रमेकमजीज-
नत् । ईश्वरी रोगिणं मूकं प्रज्ञाहीनं च विस्वरम् ॥
तादृशोऽपि महाभागे मृतोऽसौ नववार्षिकः । ततस्तां
भूषणा द्रष्टुमीश्वरीं पुत्रदुःखिताम् ॥ सखीभावादतिस्नेहा-
त्पुत्रैः स्वैः परिवारिता । अमुक्ताभरणा भद्रा स्वरूपेणैव
भूषिता ॥ सा हि भद्रा द्विजस्याभूद्भार्या भूषणनामिका ।
पुरा हि तस्याः कालेन कुक्कुटी बहु पुत्रिणी ॥ तां दृष्ट्वा
तादृशीं भव्यां प्रजज्वालेश्वरी रुषा । ततो गृहं प्रेषयित्वा

॥१४२॥

ब्राह्मणीं तामामत्सराम् ॥ चिन्तयामास सा शीघ्रं तस्याः पुत्रवधं प्रति । निश्चित्य चेतसा क्रूरा घातयामास तत्सुतान् ॥ हता हताश्च ते पुत्राः पुनर्जीवन्त्यनामयाः । तदद्भुततरं दृष्ट्वा सखीमाहूय भूषणाम् ॥ उपविश्यासने श्रेष्ठे बहुमानपुरःसरम् । अपृच्छद्विस्मयाविष्टा राज्ञी तां नृपवल्लभा ॥ ३० ॥ ब्रूहि तथ्यं महाभागे किं त्वया सुकृतं कृतम् । दानं व्रतं तपो वापि शुश्रूषणमुपोषणम् ॥ येन ते निहताः पुत्राः पुनर्जीवन्त्यनामयाः । तथा हि बहुपुत्रा च जीवद्वत्सा शुभानना ॥ अमुक्ताभरणा नित्यं भर्तुश्चेतस्यवस्थिता । अतीव शोभसे भद्रे विद्युदेव यथाम्बरे ॥ भूषणोवाच ॥ शृणु देवि प्रवक्ष्यामि जन्मान्तरविचेष्टितम् । किं तद्धि विस्मृतं सर्वमयोध्यायां कृतं हि यत् ॥ आवाभ्यां व्रतवैकल्यं प्रमत्ताभ्यां वरानने । येन त्वं प्लवगी जाता जाताहं कुक्कुटी तथा ॥ तथापि व्रतवैकल्यं त्वया चापल्यतः कृतम् । मया तु सर्वभावेन चेतसाध्याय शङ्करम् ॥ तिर्यग्योन्यनुसारेण मनोवृत्त्या ह्यनुष्ठितम् । एतद्धि कारणं भद्रे नान्यत्किञ्चित्करोम्यहम् ॥ लोमश उवा० ॥ इत्याकर्ण्य वचः स्मृत्वा पूर्वजन्मविचेष्टितम् । ईश्वरी च तया सार्द्धं पुनः सम्यक् चकार ह ॥ व्रतस्यास्य प्रभावेण पुत्रपौत्रादिसम्भवम् । भुक्त्वा तु सौख्यमतुलं मृता शिवपुरं गता ॥ तस्मात्त्वमपि कल्याणि व्रतमेतत्समाचर । आरब्धेऽस्मिन्व्रते दिव्ये जीवत्पुत्रा भविष्यसि ॥ ४० ॥ देवक्युवाच ॥ ब्रह्मन्नाख्याहि मे सम्यक् व्रतमेतत्सुखप्रदम् । सन्तानवृद्धिकरणं शिवलोकस्थितिप्रदम् ॥ लोमश उ० ॥ भद्रे भाद्रपदे मासि सप्तम्यां सलिलाशये । स्नात्वा शिवं मण्डलके लेखयित्वा

सहाम्बिकम् ॥ तत्र सम्पूज्य समयं कुर्याद् बध्वा करे गुणम् । यावज्जीवं मयात्मा तु शिवस्य विनिवेदितः ॥ इत्येवं समयं कृत्वा ततःप्रभृति दोरकम् । सौवर्णं राजतं वापि सूत्रं वा धारयेत्करे ॥ मण्डकान्वेष्टितान्दद्यान्मासे पक्षेऽथ वाब्दके । स्वयं तांश्चैव भुञ्जीत व्रतभङ्गभयाच्छुभे ॥ प्रतिमासं तु सप्तम्यां शुक्लपक्षे विशेषतः । कुर्यादेवं व्रतं भद्रे वर्षान्तेऽपि तु देवकि ॥ कारिता मुद्रिका शैवी हैमी रूप्या स्वशक्तितः । ताम्रपात्रोपरि स्थाप्य ब्राह्मणाय निवेदयेत् ॥ आचार्याय विशेषेण सुवर्णस्याङ्गुलीयकम् । पुष्पं कुसुमसंयुक्तं ताम्बूलाञ्जनसूत्रकैः * ॥ एवं तत्कारयित्वा तु व्रतं सन्ततिवर्धनम् । सर्वपापविनिर्मुक्तं भुक्त्वा सौख्यमनामयम् ॥ सन्तानं वर्धयित्वा च शिवलोके महीयते । एतत्ते सर्वमाख्यानमाख्यातं व्रतमुत्तमम् ॥ ५० ॥ कुरु देवकि यत्नेन जीवत्पुत्रा भविष्यसि । कृष्ण उवा० । इत्युक्त्वा तु मुनिश्रेष्ठस्तत्रैवान्तरधीयत ॥ चकार सर्वं यत्नेन यदुक्तं तत्र धीमता । व्रतस्यास्य प्रभावेण देवकी मामजीजनत् ॥ तस्मात्पार्थ नरैः कार्यं स्त्रीभिः कार्यं विशेषतः । व्रतं पापप्रशमनं सुखसन्ततिवर्धनम् ॥ एवं यः शृणुयाद्भक्त्या यश्चैतत्प्रतिपादयेत् । व्रतमाख्यानसहितं सोऽपि पापैः प्रमुच्यते ॥ आख्यानकं व्रतमिदं सुखसौख्यकामा या स्त्री करिष्यति शिवं हृदये निधाय । दुःखं विहाय बहुशो गतकल्मषौघा सा स्त्री व्रताद्भवति शोभनजीववत्सा ॥ ५५ ॥ इति हेमाद्रौ भविष्ये मुक्ताभरणसप्तमीव्रतकथा सम्पूर्णा ।

॥ भाद्रपदशुक्लाष्टम्यां ज्येष्ठापूजनविधिः ॥

तत्र यस्मिन्दिने मध्याह्नादूर्ध्वं किञ्चिदपि ज्येष्ठानक्षत्रं

---

* सहार्थे तृतीया ।

भवेत् तद्दिने ज्येष्ठापूजनम् । तत्पूर्वदिवसेऽनुराधानक्षत्रे आवाहनम् । पूजनात् परदिने मूलनक्षत्रे विसर्जनम् । इदं त्रिदिनात्मकं व्रतम् । तत्पूजनं स्वस्वकुलाचारानुसारेण । केचित् प्रतिमादौ, चित्रादौ, मृन्मय्यां मूर्तौ कुर्वन्ति । चित्तपावनास्तु जलाशयसमीपस्थाः क्षुद्राः शिलाः पञ्च सप्त वा आनीय, तासु आवाहनं पूजनं च कृत्वा, विसर्जनान्ते ताः शिलाः पूर्वस्थाने स्थापयन्ति । प्रथमदिने आचम्य देशकालौ सङ्कीर्त्य, अद्य पू० प्राप्त्यर्थं अनुराधानक्षत्रे ज्येष्ठादेव्या आवाहनं पञ्चोपचारपूजनं च करिष्ये । एह्येहि त्वं महाभागे सुरासुरनमस्कृते । ज्येष्ठा त्वं सर्वदेवानां मत्समीपगता भव ॥ इति मन्त्रेणावाह्य पूजयेत् । तस्यां रात्रौ जागरणाद्युत्सवं यथाकुलाचारं कुर्यात् ॥ अथ पूजाविधिः ॥ द्वितीयदिने मध्याह्ने आचम्य देशकालौ सङ्कीर्त्य, मम सकुटुम्बस्य सपरिवारस्य अलक्ष्मीनिरसनपूर्वकधनधान्यपुत्रपौत्रसौभाग्याद्यभिवृद्धिद्वारा श्रीज्येष्ठादेवीप्रीत्यर्थं भाद्रपदशुक्लपक्षे ज्येष्ठानक्षत्रे यथामिलितषोडशोपचारद्रव्यैः ज्येष्ठादेवीपूजनं करिष्ये । तदङ्गं गणपतिपूजनं आसनविधिं कलशघण्टापूजनं च करिष्ये । श्रीमहागणपतये नमः । इति मन्त्रेण पूजां कृत्वा, वक्रतुण्ड० इति प्रार्थयेत् । पृथिव त्व० । कलश० । आगमा० । कलशं घण्टां च सम्पूज्य, अपवि० पूजासम्भारान् प्रोक्षेत् । अथ ध्यानम् । त्रिलोचनां शुक्लदन्तीं बिभ्रतीं काञ्चनीं तनुम् । विरक्तां रक्तनयनां ज्येष्ठां ध्यायामि सुन्दरीम् ॥ श्रीज्येष्ठादेव्यै नमः ज्येष्ठादेवीं ध्यायामि ॥ श्वेतसिंहासनस्था त्वं श्वेतवस्त्रैरलङ्कृता । वरदं पुस्तकं पात्रं बिभ्रती वै नमो नमः ॥ आसनं० ॥ ज्येष्ठे श्रेष्ठे तपोनिष्ठे धर्मिष्ठे सत्यवादिनि ।

समुद्रमथनोत्पन्ने पाद्यं गृह्ण नमोऽस्तु ते ॥पाद्यं० ॥ श्रीख-
॥१४५॥ ण्डकर्पूरयुतं तोयं पुष्पेण संयुतम् । गृहाणार्घ्यं मया दत्तं
ज्येष्ठादेवि नमोऽस्तु ते ॥ अर्घ्यं० ॥ ज्येष्ठायै ते नमस्तुभ्यं
श्रेष्ठायै ते नमो नमः । शर्वायै ते नमस्तुभ्यं शाङ्कर्यै ते नमो
नमः ॥ आचमनीयं० ॥ पयो दधि घृतं चैव क्षौद्रशर्कर-
यान्वितम् । पञ्चामृतं मयाऽऽनीतं स्नानं गृह्ण सुरेश्वरि ॥
पञ्चामृतस्नानं० ॥ मन्दाकिन्याः समानीतं हेमाम्भोरुह-
वासितम् । स्नानार्थं ते मया दत्तं स्नानं कुरु जगन्मये ॥
स्नानं० ॥ पञ्चोपचारपूजां कृत्वा अभिषेकः । सूक्ष्मतन्तु-
भवे श्वेते धौते निर्मलवारिणा । वारणे लोकलज्जाया वाससी
प्रति०॥ वस्त्रयुग्मं स० ॥ आचमनीयं० ॥ हरिद्रां कुङ्कुमं
चैव कण्ठसूत्रं च ताडकम् । सिन्दूरं कज्जलं चारु षट्
सौभाग्यं गृहाण भोः॥ सौभाग्यद्रव्यं०॥ श्रीखण्डं चन्द०
चन्दनं०॥ अक्षताश्च सु० अक्षतान्०॥ नूपुरौ मेखला काञ्ची
कङ्कणानि सुशोभने । नासिकायां मया दत्ता मुक्ताकाञ्च-
नसंयुता ॥ भूषणानि० ॥ चम्पकादिसुगन्धीनि मालत्या०
पुष्पाणि स० ॥ वनस्पतिर० धूपमा० ॥ आज्यं च वर्ति०
दीपं द० ॥ गोधूमपिष्टशाल्यादितण्डुलानां च कारयेत् ।
कृत्वा प्रसृतिमात्रास्तु पूरिका घृतपाचिताः ॥ शाल्योदनं
सूपयुक्तं दधि दुग्धं घृतं तथा । नानाव्यञ्जनसंयुक्तं नैवेद्यं
प्र० ॥ नैवेद्यं० ॥ उत्तरापोशनं०॥ करोद्वर्तनं०॥ इदं फलं म०
फलं० ॥ पूगीफलं० ताम्बूलं० ॥ हिरण्यगर्भ० दक्षिणां० ॥
यानि कानि० प्रदक्षिणां० ॥ अन्यथा शर० नमस्कारान्० ॥
शार्ङ्गबाणाब्जखड्गादिप्रासतोमरमुद्गरैः । अन्यैरप्यायुधै-
१६ र्युक्तां ज्येष्ठे त्वामर्चयाम्यहम् ॥ पुष्पाञ्जलिं० ॥ त्वं लक्ष्मी-
स्त्वं महादेवी त्वं ज्येष्ठे सर्वदामरैः । पूजितासि मया

देवि वरदा भव मे सदा ॥ प्रार्थनां० ॥ ततो विशेषार्घ्यं दद्यात्। अर्घ्यपात्रे गन्धाक्षतोदकफलहिरण्यं निधाय, ज्येष्ठे श्रेष्ठे तपोनिष्ठे ब्रह्मिष्ठे सत्यवादिनि। एह्ये हि त्वं महाभागे अर्घ्यं गृह्ण सरस्वति ॥ श्रीज्येष्ठादेव्यै नमः इदं विशेषार्घ्यं स०। पूजासाङ्गतासिद्ध्यर्थं ब्राह्मणपूजनं करिष्ये। ज्येष्ठादेवीप्रीतये सुवासिनीब्राह्मणांश्च भोजयिष्ये। यस्य स्मृ०। अनेन पूजनेन श्रीज्येष्ठादेवी प्रीयताम्। तद्दिने स्वयं हविष्यमश्नीयात्।

ततस्तृतीयदिने मूलनक्षत्रे ज्येष्ठादेव्या विसर्जनाङ्गत्वेन पूजनं करिष्ये। पञ्चोपचारपूजां कृत्वा, दधिभक्तनैवेद्यं समर्प्य, प्रार्थयेत्—इदं व्रतं मया देवि कृतं त्वत्प्रीतयेऽम्बिके। त्वत्प्रसादान्महालक्ष्मीः स्थिराऽस्तु मम सद्मनि ॥ १ ॥ धनधान्यादिसम्पत्तिः सन्ततिः पुत्रपौत्रिकी। अखण्डास्तु ममाजस्रमलक्ष्मीर्मास्तु मद्गृहे ॥ २ ॥ इति सम्प्रार्थ्य विसर्जयेत्। गच्छ गच्छ सुरश्रेष्ठे स्वस्थाने परमेश्वरि। विसर्जयामि मातस्त्वां पुनरागमनाय च ॥ इति पूर्वस्थाने स्थापयेत् ॥ इति ज्येष्ठापूजनविधिः ॥

॥ षोडशदिनात्मकव्रताङ्गमहालक्ष्मीपूजाविधिः ॥

भाद्रपदशुक्लाष्टमीमारभ्य कृष्णाष्टमीपर्यन्तं पूजा कार्या। अष्टमी च अर्धरात्रोत्तरव्यापिनी ग्राह्या। तस्यां प्रातः षोडशवारं हस्तौ पादौ प्रक्षाल्य षोडशगण्डूषांश्च कृत्वा स्नानादि नित्यकर्म कुर्यात्। आचम्य देशकालौ स्मृत्वा, मम सकुटुम्बस्य सपरिवारस्य अविच्छिन्नस्थिरलक्ष्मीप्राप्त्यर्थं पुत्रपौत्रादिसकलैश्वर्याद्यभिवृद्धिसौभाग्यादिप्राप्त्यर्थं श्रीमहालक्ष्मीप्रीत्यर्थं भाद्रपदशुक्लाष्टमीमारभ्य कृष्णाष्टमीपर्यन्तं षोडशदिनात्मकं महालक्ष्मी-

व्रतं करिष्ये । तत्रादौ महालक्ष्मीव्रताङ्गभूतं अद्यारभ्य कृष्णाष्टमीपर्यन्तं प्रत्यहं दोरकपूजनं कथाश्रवणं च करिष्ये। आदौ निर्विघ्नतासिध्यर्थं महागणपतिपूजनं कलशपूजनं च करिष्ये । गणानां० गणपतिं सम्पूज्य । कलशे वरुणं सम्पूज्य, अपवित्रः० । षोडशतन्तुमयं षोडशग्रन्थि-युतं दोरकं निर्माय, पुरतः संस्थाप्य, मालतीपुष्पचन्दना-गरुणा तं धूपयित्वा दोरकमभिमन्त्रयेत् । श्रीमहालक्ष्म्यै नमः महालक्ष्मीं प्रथमग्रन्थौ न्यसामि । एवं षोडशग्रन्थी-नभिमन्त्र्य धारयेत् । तत्र मन्त्रः–धनं धान्यं धरां धर्मं कीर्तिमायुर्यशः श्रियम् । तुरगान् दन्तिनः पुत्रान्महालक्ष्मी प्रयच्छ मे ॥ अनेन मन्त्रेण दक्षिणकरे, स्त्री तु वामकरे कण्ठे वा बध्वा, षोडश साग्रान् समूलान् दूर्वाङ्कुरान् षोडश तण्डुलांश्च हस्ते गृहीत्वा, एकचित्तः कथां श्रुत्वा गृहीतषोडशदूर्वाङ्कुरतण्डुलैश्च करस्थं दोरकं पूजयेत् । एवमेव कृष्णाष्टमीपर्यन्तं प्रत्यहं पादहस्तगण्डूषस्नानक-रणादिदोरकपूजनान्तं कुर्यात् ॥

ततः कृष्णाष्टम्यां नक्तकाले स्नात्वा धौतवाससी परिधाय, पूजागृहं प्रविश्य, आसने स्थित्वा, श्वेतवस्त्रे श्वेतपात्रे वा कर्पूरागरुचन्दनैः अष्टकेशरसहितं पङ्कजं विलिख्य, पूर्वदलादिक्रमेण अष्टदलेषु ऐन्द्र्यादिअष्टदेवताः, मध्ये ध्यानोक्तेन प्रकारेण महालक्ष्मीं च विलिख्य पूजयेत्। आचम्य देशकालौ स्मृत्वा, मम सकुटुम्बस्य अविच्छिन्न-स्थिरलक्ष्मीप्राप्त्यर्थं पुत्रपौत्रादिसकलैश्वर्याद्यभिवृद्ध्यर्थं सौभाग्यप्राप्त्यर्थं श्रीमहालक्ष्मीप्रीत्यर्थं श्रीमहालक्ष्मी-व्रताङ्गभूतं यथामिलिताष्टत्रिंशदुपचारद्रव्यैः श्रीसूक्तेन पुराणोक्तमन्त्रैश्च महालक्ष्मीपूजनमहं करिष्ये । आदौ

निर्विघ्नतासिध्यर्थं महागणपतिपूजनं आसनविधिं श्रीसू-
॥१४८॥ क्तन्यासान् कलशशङ्खघण्टापूजनं च करिष्ये। इति सङ्कल्प्य, गणपतिं सम्पूज्य, आसनविधिं विधाय, श्रीसूक्तन्यासान् कुर्यात्। हिरण्यवर्णामिति पञ्चदशर्चस्य सूक्तस्य। आनन्दकर्दमश्रीदचिक्लीतेन्दिरासुता ऋषयः। श्रीर्देवता। आद्याऽनुष्टुप्। द्वितीया भुरिगनुष्टुप्। तृतीया निचृदनुष्टुप्। चतुर्थी भुरिक्पुरस्ताद्बृहती। पञ्चमीषष्ठयौ त्रिष्टुभौ। ततः पञ्चानुष्टुभः। द्वादशी निचृदनुष्टुप्। त्रयोदशीचतुर्दश्यावनुष्टुभौ। अन्त्या आस्तारपङ्क्तिः। न्यासे विनियोगः।

१ हिरण्यव० शिरसि।
२ तांमआव० नेत्रे।
३ अश्वपूर्वां० कर्णयोः।
४ कांसोस्मि० नासिका०।
५ चन्द्रांप्रभा० मुखे।
६ आदित्य० ग्रीवायाम्।
७ उपैतुमां० बाह्वोः।
८ क्षुत्पिपासा० हृदये।
९ गन्धद्वा० नाभौ।
१० मनसः० गुह्ये।
११ कर्दमेन० गुदे।
१२ आपः सृ० ऊर्वोः।
१३ आर्द्रांपु० जान्वोः।
१४ आर्द्रांयष्क० जङ्घयोः।
१५ तांमआ० पादयोः।
इति विन्यस्य।

कलशशङ्खघण्टापूजनादिसम्भारप्रोक्षणान्तं कृत्वाऽष्टदलेषु पूर्वादिक्रमेण देवता आवाहयेत्।

१ पूर्वदले	ऐन्द्र्यै नमः	ऐन्द्रीं आवाहयामि।
२ आग्नेयदले	कौमार्यै नमः	कौमारीं आवा०।
३ दक्षिणदले	ब्राह्म्यै नमः	ब्राह्मीं आवा०।
४ नैर्ऋतिदले	वाराह्यै नमः	वाराहीं आवा०।
५ पश्चिमदले	चामुण्डायै नमः	चामुण्डां आवा०।
६ वायव्यदले	वैष्णव्यै नमः	वैष्णवीं आवा०।

७ उत्तरदले	माहेश्वर्यै नमः	माहेश्वरीं आवा०।
८ ईशानदले	वैनायक्यै नमः	वैनायकीं आवा०।

इति देवता आवाह्य, मध्ये महालक्ष्मीं आवाहयेत्। महालक्ष्मि समागच्छ पद्मनाभपदादिह। पञ्चोपचारपूजेयं त्वदर्थं देवि सम्भृता॥ श्रीमहालक्ष्म्यैनमः महालक्ष्मीं साङ्गां सपरिवारां सायुधां सशक्तिकां आवाहयामि। अथ ध्यायेत्। हिरण्यवर्णां०। शुभ्रवस्त्रपरीधानां मुक्तामणिविभूषिताम्। पङ्कजासनसंस्थानां स्मेराननसरोरुहाम्॥१॥ शारदेन्दुकलाकान्तिस्निग्धनेत्रां चतुर्भुजाम्। पद्मयुग्मभयदां वरव्यग्रकराम्बुजाम्। अभितो गजयुग्मेन सिच्यमानां घटाम्बुभिः॥ श्रीमहालक्ष्म्यै नमः महालक्ष्मीं ध्यायामि॥ तांमआवह०। आलयस्ते हि कथितः कमलं कमलालये॥ विमले कमले ह्यस्मिन् स्थितिं त्वं कृपया कुरु॥ श्रीमहा० आसनं०। अश्वपूर्वां०। गङ्गादिसलिलाधारं तीर्थमन्त्राभिमन्त्रितम्। दूरयात्राश्रमहरं पाद्यं मे प्रति०॥ श्री० पाद्यं०॥ कांसोस्मितां०। निधीनां सर्वरत्नानां त्वमनर्घ्यगुणा ह्यसि। तथापि भक्तिसंयुक्तं गृहाणार्घ्यं नमोऽस्तु ते। श्री० अर्घ्यं०॥ चन्द्रांप्रभासां०। आचम्य जगदाधारे सिद्धि लक्ष्मि जगत्प्रिये। चपले देवि ते दत्तं तोयं गृह्ण नमोऽस्तु ते। श्रीम० आचमनीयं०॥ आदित्यवर्णे०। इदं तव महालक्ष्म्याः कर्पूरागरुवासितम्। तीर्थेभ्यः सुसमानीतं स्नानार्थं प्रति०॥ श्रीम० स्नानं०॥ पयो दधि घृतं क्षौद्रं सितया च समर्पितम्। स्नानं पञ्चामृतेनाद्य कुरु देवि दयानिधे॥ आप्यायस्व०, दधिक्रा०, घृतंमि०, मधुवा०, स्वादुःप०, इत्यादिमन्त्रैः पञ्चामृतस्नानं स०॥ स्नानान्तरेण आचमनीयं स०॥ अभ्यङ्गार्थं मयाऽऽनीतं तैलं पु-

रूपादिवासितम् । प्रयत्नेनार्जितं शुद्धं महालक्ष्मी गृहाण
॥१५०॥ भोः ॥ सुगन्धतैलस्नानं० ॥ अङ्गोद्वर्तनकं देवि कस्तूर्या
कुङ्कुमेन च । अन्यैःसुगन्धद्रव्यैश्च निर्मितं प्रति० ॥
अङ्गोद्वर्तनं० ॥ नानातीर्थादाहृतं च तोयमुष्णं मया कृतम् ।
स्नानार्थं च मया दत्तं गृह्य० ॥ उष्णोदकस्नानं० ॥ नाम-
मन्त्रेण पञ्चोपचारपूजां कृत्वा श्रीसूक्तादिनाभिषेकः ।
उपैतुमां० । तन्तुसन्तानसंसिद्धं कलाकौशलकल्पितम् ।
सर्वाङ्गाभरणं श्रेष्ठं वसनं परिधीयताम् ॥ वस्त्रं० ॥ क्षु-
त्पिपासा० । मुक्तामणिगणोपेतामनर्घ्यां च सुखप्रदाम् ।
कञ्चुकीं ते सुखस्पर्शां ददामि हरिवल्लभे ॥ कञ्चुकीं०॥
वस्त्रानन्तरेण आचमनीयं० ॥ कण्ठसूत्रं ताडपत्रं हरिद्रां
कुङ्कुमाञ्जनम् । सिन्दूरादि प्रदास्यामि सौभाग्यं देहि
मेऽव्ययम् ॥ अहिरिवभो० सौभाग्यद्रव्याणि स० ॥
हारकङ्कणकेयूरमेखलाकुण्डलानि च । रत्नाढ्यं मुकुटोपेतं
भूषणानि प्रगृह्यताम् ॥ आभूषणानि स० ॥ गंधद्वारांदु० ।
मलयाचलसम्भूतं नानापन्नगसेवितम् । शीतलं बहुला-
मोदं चन्दनं प्रति० ॥ चन्दनं० ॥ अक्षतानरविन्दाक्षि
नक्षत्रेण सहोदरि । माणिक्यप्रतिमान् पद्मे गृहाण त्वं
मयार्पितान् ॥ अक्षतान् स० ॥ मनसःका० । मिलत्परि-
मलामोदमत्तालिकुलसङ्कुलम् । आनन्दिनन्दनोद्यानं
पद्मायै कुसुमं नमः ॥ पुष्पाणि स० ॥ मधुकैःशङ्खपुष्पैश्च
शतपत्रैर्विचित्रिताम् । पुष्पमालां प्रयच्छामि गृहाण परमे-
श्वरि ॥ पुष्पमालां स० ॥ विष्ण्वादिसर्वदेवानां प्रियपत्रां
सुशोभनीम् । क्षीरसागरसम्भूतां दूर्वां स्वीकुरु सर्वदा ॥
दूर्वाङ्कुरान् स० ॥ अमृतोद्भव श्रीवृक्ष महादेव प्रियं सदा ।
बिल्वपत्रं प्रयच्छामि दुर्गे दुर्गार्तिनाशिनि ॥ बिल्वपत्रं० ॥

॥ अथाङ्गपूजा ॥

१ लक्ष्म्यै नमः पादौ पूज० ।	७ मन्मथवासिन्यै० स्तनौ० ।
२ पद्मायै० गुल्फौ पूज० ।	८ क्षमायै नमः हृदयं पू० ।
३ कमलायै० जानुनी पू० ।	९ क्षीराब्धितनयायै० कं० ।
४ हरिप्रियायै० ऊरू पू० ।	१० उमायै नमः नेत्रे पू० ।
५ इन्दिरायै न० कटी पूज० ।	११ रमायै नमः शिरः पू० ।
६ मङ्गलायै० नाभिं पूज० ।	१२ श्रीमहालक्ष्म्यै० सर्वां० ।

॥ अथ नामपूजा ॥

१ श्रियै नमः ।	९ मुक्ताहारसमप्रभायै नमः।
२ लक्ष्म्यै नमः ।	१० सूर्यायै नमः ।
३ वनमालिकायै नमः ।	११ पुष्करिण्यै नमः ।
४ विभीषणायै नमः ।	१२ पिङ्गलायै नमः ।
५ मालिकायै नमः ।	१३ हेममालिन्यै नमः ।
६ शाङ्कर्यै नमः ।	१४ इन्दिरायै नमः ।
७ वसुमालिकायै नमः ।	१५ जमदग्निप्रियायै० ।
८ पङ्कजद्वयधारिण्यै नमः ।	१६ जगन्नाथायै नमः ।

॥ षोडशदूर्वापत्रपूजा ॥

१ श्रियै नमः ।	९ राममात्रे नमः ।
२ लक्ष्म्यै नमः ।	१० शिवायै नमः ।
३ कालिकायै नमः ।	११ भूतनाथायै नमः ।
४ महाकाल्यै नमः ।	१२ भक्तवत्सलायै नमः ।
५ विकराल्यै नमः ।	१३ भवान्यै नमः ।
६ त्रैलोक्यजनन्यै नमः ।	१४ सिद्धेश्वर्यै नमः ।
७ एकनाथायै नमः ।	१५ विश्वरूपिण्यै नमः ।
८ रेणुकायै नमः ।	१६ शर्वाण्यै नमः ।

कर्दमेन० । गन्धसम्भारसन्नद्धं कस्तूरीमोदसम्भवम् । सुरासुरनरानन्दि धूपं देवि गृहाण मे ॥ धूपमा० ॥ आपः स्र० । मार्तण्डमण्डलाखण्डचन्द्रबिम्बाग्नितेजसाम् । निधानं देवि दीपोऽयं निर्मितस्तव भक्तितः ॥ दीपं द० ॥ आर्द्रां पु० । देवतालयपातालभूतलाधारधान्यजम् । षोडशाकाकारसम्भारनैवेद्यं ते नमः श्रिये ॥ अन्नं च० नानाविधपक्वान्ननैवेद्यं स० ॥ एलोशीरलवङ्गादिकर्पूरपरिवासितम् । प्राशनार्थं हृतं तोयं गृहाण कमले शुभे ॥ मध्येपानीयं० ॥ उत्तरापोशनं कर्तुं तोयमुद्धृतमुज्वलम् । मया निवेदितं भक्त्या गृहाण कमले शुभे ॥ उत्तरापोशनं स० ॥ हस्तप्रक्षालनं स० ॥ मुखप्रक्षालनं स० ॥ सुगन्धद्रव्यसंयुक्तं सुवासितजगत्त्रयम् । करोद्वर्तनकं मातर्गृहाण परमेश्वरि ॥ करोद्वर्तनार्थे चन्दनं स० ॥ बीजपूराम्रपनसखर्जूरीदलसंयुतम् । नारिकेलफलं दिव्यं गृहाण कमलालये ॥ फलानि स० ॥ पातालतलसम्भूतं वदनाम्भोजभूषणम् । नानागुणसमाकीर्णं ताम्बूलं देवि ते नमः ॥ ताम्बूलं स० ॥ सुवर्णं सर्वधातूनां श्रेष्ठं देवि प्रियं सदा । भक्त्या ददामि वरदे स्वर्णवृष्टिं प्रदेहि मे ॥ दक्षिणां० ॥ सुरासुरशिरोरत्नप्रभानीराजितक्रमे । रूपसाम्राज्यसंसिध्यै कुर्वे नीराजनं विधिम् । श्रियेजात० ।

॥ आरतीलक्ष्मीची ॥

करविरपुरवासिनिसुरवरमुनिमाता । पुरहरवरदायिनीमुरहरप्रियकांता । कुमराकारजठरीजनलज्जादाता । सहस्त्रवदनीधरणीनपुरेगुणगाता ॥ जयदेवीजयदेवीजयजयमहालक्ष्मी वसतोव्यापकरूपेतुलानिसुक्ष्मि । जयदे० ॥ १ ॥ तारामुक्तागमाशोभेगजगौरी । सांखीह्मणतीनेती-

॥१५३॥

प्रकृतिगुणधारी । गायत्रीनिजविजनिगमाश्रुतसारी । प्रगटपद्मावतीजयधर्माचारी ॥ जयदे० ॥२॥ अमृतभरिते-चरितेअगदुरितेवारी । वारीअसुरभयदुस्तरनेवारी । हेरूप-चिद्रूपदाखविनिर्धारी । हारीपडलोआतांभयदुस्तरनेवारी ॥ जयदेवी० ॥ ३ ॥ मातुलिंगगदाखेटकररविकरणी । छाल-कहाटकवाटकपीयूषशरपाणी । माणिकदशिकनाशिकमो-तीमृगनयनी । निशकरवदनाराजसमदनाचीजननी ॥ जय दे० ॥ ४ ॥ चतुराननकुत्सितकर्माचीहोळी । लिहिलेह-स्तेमातेनिजभाळी । पुसूनिचरणातळींसाजेवत्ताळी । मुक्ती-श्वरनागरक्षीरसागरभाळी ॥ जयदे० ॥ घालिन्लोटांग० ॥

आर्त्तिक्यदीपं० ॥ कर्पूरनिर्मितं दीपं स्वर्णपात्रे नि-वेशितम् । नीराजनं मया दत्तं गृहाण परमेश्वरि ॥ कर्पूर-दीपं० ॥ आर्द्रायष्क० । कायवाङ्मानसं पापं यत्कृतं ज-न्मजन्मनि । तन्मे नाशय देवि त्वं प्रदक्षिणविधानतः ॥ प्रदक्षिणां० ॥ तांमआ० । या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता । नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ नमस्कारान्० ॥ यःशुचिः प्र० । पारिजातादिजातोयं नाना-कुसुमसञ्चयम् । अर्पयेऽनल्पसंसिध्यै पूजा सम्पूर्णताकृते ॥ पुष्पाञ्जलिं स० ॥ विष्णोर्वक्षसि पद्मे च शङ्खे चक्रे तथा-म्बरे । लक्ष्मीर्नित्या यथाऽसि त्वं मयि नित्या तथा भव ॥ प्रार्थनां० ॥ स्तुतिभिःसह दिव्याभिःसहितं नर्तितं मया । नृत्यं तत् कल्पितं भक्त्या गृहाण परमेश्वरि ॥ नृत्यं प्र-दर्शयामि ॥ सवितृकिरणस्पर्धिस्फुरत्किरणमण्डलम् । द-र्पणं मुनिभिः क्लृप्तं गृहाण सुरपूजिते ॥ दर्पणं दर्शयामि ॥

२०

हरिन्मणिगणाबद्धदण्डशक्तिवरप्रदम् । सुवर्णकलशं छत्रं गृहाण परमेश्वरि ॥ छत्रं स० ॥ वियन्नदीप्रभे हैमे चामरे

विशदप्रभे । स्वर्णदण्डोपशोभाढ्ये गृहाण प० ॥ चामरे स० ॥ प्रवालनालसद्गात्रं मुक्तामञ्चकमण्डितम् । पट्टसूत्रमयं दत्तं गृहाण सरसीरुहे ॥ मञ्चकं स० ॥ उष्णगङ्गोदकं दिव्यं नानागन्धसुवासितम् । चरणक्षालनं कर्तुं गृहाण प० ॥ चरणक्षालनार्थं उष्णोदकं स० ॥ उशीरनिर्मितं दिव्यं हेमदण्डपरिष्कृतम् । व्यजनं कल्पितं भक्त्या गृहाण प० ॥ व्यजनं० ॥ सुगन्धनिर्मितं तैलं पुष्पसारैरनेकधा । घ्राणाय ते महादेवि वरदा भव मङ्गले ॥ सुगन्धतैलं स० ॥ अथ दोरकोत्तारणम् ॥ लक्ष्मि देवि गृहाण त्वं दोरकं यन्मया धृतम् । व्रतं सम्पूर्णतां यातु कृपा कार्या मयि त्वया ॥ इति दोरकं बाहोः उत्तार्य लक्ष्मीपार्श्वे निवेदयेत् । कथां शृणुयात् ॥ अथ वायनदानविधिः ॥ द्वात्रिंशत्सङ्ख्याकान् गोधूमपिष्टनिर्मितान् दीपान् पिण्डीश्च कृत्वा तन्मध्ये षोडश दीपान् षोडश पिण्डीश्च वंशपात्रे निधाय ब्राह्मणाय दद्यात् । अद्य० पूजासाङ्गतासिध्यर्थं ब्राह्मणाय षोडशसङ्ख्याकदीपपिण्डीवायनदानं करिष्ये । तदङ्गं ब्राह्मणपूजनं करिष्ये । आसनादिना विप्रं सम्पूज्य, स्वस्त्यस्तु, दीर्घ० । दानमन्त्रः—इन्दिरा प्रतिगृह्णाति इन्दिरा वै ददाति च । इन्दिरा तारकोभाभ्यामिन्दिरायै नमो नमः ॥ इदं षोडशसङ्ख्याकदीपपिण्डीवायनदानं सदक्षिणाकं सघृतं सधान्यं अमुकश० । प्रति०, प्र० । अनेन वायनदानाख्येन कर्मणा तेन श्री महालक्ष्मीः प्रीयताम् । कृतस्य कर्मणः साङ्गतासिध्यर्थं त० सुवासिनीं ब्राह्मणांश्च भोजयिष्ये । तेभ्यश्च भूयसीं दक्षिणां दातुमहमुत्सृजे । ततः षोडशदीपान् षोडशपिण्डीश्च स्वयं भक्षयित्वा जागरणं कार्यम् ।

चन्द्रोदये जाते चन्द्रं सम्पूज्य, शङ्खपुष्पचन्दनफलसहितं जलमादाय अर्घ्यं दद्यात्। तत्र मन्त्रः--नमोऽस्तु ते निशानाथ लक्ष्मीभ्रातर्नमोऽस्तु ते। व्रतं सम्पूर्णतां यातु गृहाणार्घ्यं विधो मम॥ रोहिणीसहितचन्द्रमसे नमः इदमर्घ्यं स०। अनेन अर्घ्यप्रदानाख्येन कर्मणा तेन श्रीचन्द्रः प्रीयताम्॥

ततः प्रातःकाले नित्यविधिं कृत्वा, अद्य० र्थं आवाहितमहालक्ष्म्याः उत्तरपूजनं क०। नाममन्त्रेण पञ्चोपचारैः सम्पूज्य विसर्जयेत्। पङ्कजं देवि सन्त्यज्य मम वेश्मनि संविश। यथा सपुत्रभृत्योऽहं सुखी स्यां त्वत्प्रसादतः॥ इति मन्त्रेण पुष्पं समर्प्य तत्सूत्रं नद्यां प्रवाहयेत्। यस्य स्मृ०। अनेन षोडशदिनात्मकमहालक्ष्मीव्रताख्येन कर्मणा तेन श्रीमहालक्ष्मीः प्रीयताम्॥

॥ अथ महालक्ष्मीव्रतकथाप्रारम्भः॥

युधिष्ठिर उवाच॥ स्वस्थानलाभपुत्रायुः सर्वैश्वर्यसुखप्रदम्। व्रतमेकं समाचक्ष्व विचार्य पुरुषोत्तम॥ श्रीकृष्ण उवाच॥ दुर्वारवृत्तदैतेयपरिव्यासे त्रिविष्टपे। एतदेव कृतस्यादौ देवेन्द्रः प्राह नारदम्॥ इन्द्र उवाच॥ गता स्वराज्यलक्ष्मीर्मे कथमायाति सत्वरम्। दानं व्रतं पुण्यकर्म तदर्थं वद साम्प्रतम्॥ तस्य श्रुत्वा ततो वाक्यं स मुनिः प्रत्यभाषत। नारद उवाच॥ पुरन्दर पुरा पूर्वं पुरमासीच्छुभान्वितम्॥ रत्नागर्भोऽभवद् भूमिर्यत्र रत्नाढ्यभूधरैः। यत्राङ्गनाजनापाङ्गभङ्ग्या लोचनसायकैः॥ त्रैलोक्यं च वशं चक्रे देवः कुसुमसायकः। चतुर्वर्गजनिर्यत्र यच्च विश्वविभूषणम्॥ विश्वकर्माऽपि यद्वीक्ष्य कम्पयत्यनिशं

शिरः। तत्राभवन्महीपालो मङ्गलो मङ्गलालयः॥ चिल्लदेवी प्रिया तस्य दुर्भगैका बभूव ह। अन्या तु चोलदेवी या महिषी सा तपस्विनी॥ कदाचिन्मङ्गलो राजा चोलदेवी-सहायवान्। प्रासादशिखरारूढः स्थलीमेकामपश्यत॥ तामालोक्य महीपालः स्मरस्मेरमुखाम्बुजः। चोलदेवीं प्रति प्राह दन्तद्योतितदिङ्मुखः॥१०॥ चञ्चलाक्षि तवोद्यानं कान्तिनिन्दितनन्दनम्। कारयामि तवोदिष्टमत्रोद्यानमकारयत्॥ सम्पन्नं च तदुद्यानं नानाद्रुमलतान्वितम्। नानारत्नकसंयुक्तं नानापक्षिसमावृतम्॥ तत्रागत्य महाकोलस्तनुन्यस्तनभस्थलः। प्रावृट्कालघनश्यामश्चतुराक्षिसचञ्चलः॥ दंष्ट्रावकृष्टचन्द्रार्कः प्रलयाम्भोधरध्वनिः। उद्यानं भञ्जयामास नानाद्रुमलतान्वितम्॥ कांश्चिदुत्पाटयामास पादपान् पाण्डुनन्दन। कांश्चिद्दन्तप्रहारेण कांश्चिद्दन्तप्रघर्षणैः॥ जघान कांश्चित्पुरुषान् रत्नकानन्तकोपमान्। तद् भुनक्तीति विज्ञाय समेत्योद्यानपालकाः॥ सभयास्तस्य वृत्तान्तमूचुस्ते नृपतेः पुरः। तदाकर्ण्य ततो राजा क्रोधारुणितलोचनः॥ वधाय दंष्ट्रिनस्तस्य सन्दिदेशाखिलं बलम्। ततश्चचाल भूपालस्त्रिगण्डगलितैर्गजैः॥ आप्लावयन्महीं सर्वां वाजिवृन्दवृताम्बराम्। चालयन्नखिलान्सैन्यान् स्यन्दनौघमरुद्भवैः॥ पत्तिव्रातमहाध्वानैः पूरयन्नखिला दिशः। ततो गाढं समावृत्य तदुद्यानं नरेश्वरः॥२०॥ उवाचोच्चैः प्रतिध्वानैर्दिशो मुखरयन्दश। पथि यस्य वराहोऽयं प्रयात्युपवनान्तिकम्॥ तस्यावश्यं शिरश्छेदं विदधामि रिपोरिव। तस्य भूपस्य तद्वाक्यं समाकर्ण्य स शूकरः॥ जगामास्यैव मार्गेण प्राणिनां चेष्टितं यथा। ततः क्रुद्धो धराशक्रः कशयाऽश्वं प्रताड्य च॥ क्रीडाकल्-

ङ्कितास्येन्दुर्मार्गं तस्यैव सोऽगमत्। गत्वाऽथ विपिनं
॥१५७॥ घोरं सिंहशार्दूलसङ्कुलम् ॥ तमालतालहिन्तालशाला-
र्जुनसमावृतम् । झिल्लीझङ्कारसम्भारवाचालितदिग-
न्तरम् ॥ तत्रैकचेतास्तं पश्यन् बहु बभ्राम भूपतिः।
कोलो वेलामवाप्यैव सोऽभवद्राजसम्मुखः॥ भल्लेन सो-
ऽवधीत्कोलं वज्रेणाद्रिं यथा हरिः। अथ व्योम्नि विमान-
स्थः स्मरसुन्दरविग्रहः। कोलरूपं परित्यज्य सोऽब्रवीन्
मङ्गलं नृपम्। गन्धर्व उवाच ॥ स्वस्त्यस्तु ते महीपाल
त्वया मुक्तिः कृता मम ॥ तदाकर्णय वृत्तान्तं येनाहं जात
ईदृशः। एकदा देवतावृन्दैः संवृतः कमलासनः॥ चञ्च-
त्पुटादिभिस्तालैः षड्जाद्यैः सप्तभिः स्वरैः। मन्द्रादिभि-
स्त्रिभिर्ग्रामैर्गीयमानं मया नृप ॥ ३० ॥ नानास्थानगुणो-
पेतमश्रौषीद् गीतमुत्तमम्॥ गीयमाने च्युतस्तालस्ततोऽहं
कर्मपाकतः॥ शप्तश्चित्ररथस्तेन सृष्टिकर्त्रा हि वेधसा।
ब्रह्मोवाच ॥ कोलो भव त्वं मेदिन्यां मुक्तिस्ते तु यदा
तदा ॥ निर्जिताखिलभूपालो मङ्गलस्त्वां हनिष्यति।
तदद्य घटितं सर्वं त्वत्प्रसादान्महीपते॥ त्वं गृहाण वरं भूप
यद्देवस्यापि दुर्लभम्। महालक्ष्मीव्रतं दिव्यं चतुर्वर्गफलप्र-
दम्॥ लभस्व सार्वभौमत्वं गच्छ राज्यं निजं द्रुतम्।ना-
रद उवाच॥ चित्ररथोऽथ गन्धर्व उक्त्वेत्थं भूपतिं प्रति॥
अन्तर्धानं गतस्तुष्टः शरत्काल इवाम्बुदः। अथ मङ्गल-
भूपालः पार्श्वस्थं द्विजमागतम्॥ विलोक्य बटुकं कञ्चि-
त्कक्षानिक्षिप्तशम्बलम्। उवाच मधुरां वाचं स्मितपूर्वं
शुचिस्मिताम् ॥ देवस्त्वं दानवस्त्वं वा गन्धर्वो वाथ
राक्षसः। तथ्यं वद बटो कस्मात्किमर्थं त्वमिहागतः॥
श्रुत्वेत्याशिष्य तं विप्रः प्राह स्वदेशसम्भवः। बटुरुवाच॥

॥१५८॥

अहं सार्धं त्वया यातस्तदादिश यथोचितम् ॥ राजाऽथ तमुवाचेदं त्वं बटो नूतनाख्यकः । अफल्याणं विधाया-श्वं तूर्णं तोयं च पायय ॥ ४० ॥ अथ विश्रम्य भूपालं बटुको वटपादपे । तथा कृतं तुरङ्गं च समारुह्य महामतिः ॥ जगाम पक्षिघोषेण यत्रास्ते सुन्दरं सरः । कमलैकविला-सेन रथाङ्गाभरणेन च ॥ वनमालालयत्वेन दधन्नारा-यणीं तनुम् । भयवायुसुतोयोगमत्तारं विषवर्जितम् ॥ नाशितागस्त्यतृष्णार्तिप्रसन्नं सागराधिपम् । पङ्के मग्नोऽथ तत्राश्वः पृष्ठादुत्तीर्य तस्य सः ॥ चतुर्दिक्षु निरीक्ष्याथ तस्यैव सरसस्तटे । दिव्यवस्त्रपरीधानं दिव्याभरणभूषितम् ॥ कथयन्तं कथां दिव्यां स्त्रीणां सार्थमपश्यत । उपसृत्याथ तं सार्थं सवृत्तान्तं निवेद्य च ॥ कृताञ्जलिरिति प्राह बटुर्मधुरया गिरा । बटुरुवाच । किं क्रियते तडागे हि भवतीभिर्विशेषतः ॥ व्रतं वा पूजनं वापि वदध्वं देवताऽत्र का । सार्थ उवाच । शृणु विप्रैकचित्तस्त्वं श्रद्धा-भक्तिसमन्वितः ॥ या माया प्रकृतिः शक्तिस्त्रैलोक्ये स-चराचरे । व्रतमेतन्महालक्ष्म्यास्तस्याः सर्वफलप्रदम् ॥ आकर्णय विधिं चास्य कथ्यमानं मया बटो । भाद्रे मासि सिताष्टम्यां प्रारम्भोऽस्य विधीयते ॥ ५० ॥ प्रातः षोड-शकृत्वस्तु प्रक्षाल्याङ्घ्रीकरौ मुखम् । तन्तुषोडशसंयुक्तं ग्रन्थिषोडशसंयुतम् ॥ मालतीपुष्पकर्पूरचन्दनागरुधूपि-तम् । लक्ष्म्यै नमोऽथ मन्त्रेण प्रतिग्रन्थ्यभिमन्त्रितम् ॥ धनं धान्यं धरां हर्म्यं कीर्तिमायुर्यशः श्रियम् । तुरगान्दन्तिनः पुत्रान्महालक्ष्मि प्रयच्छ मे ॥ मन्त्रेणानेन बध्वाऽथ दोरकं दक्षिणे करे । काण्डानि षोडशादाय दूर्वायाः साक्षतानि च ॥ एकचित्तः कथां श्रुत्वा पूजयेत्तैश्च दोरकम् । ततस्तु

प्रातरारभ्य यावत्स्यादसिताष्टमी ॥ तावत्प्रत्नाल्य तद्धत्तु
॥१५६॥ घादादीनि कथां तथा। शृणुयात्प्रत्यहं विप्र तत्सङ्ख्यैरक्त-
तादिभिः॥ अथ कृष्णाष्टमीं प्राप्य नक्तकाले जितेन्द्रियः।
स्नातः शुक्लाम्बरधरो व्रती पूजागृहं विशेत्॥ तत्रोप-
विश्य पूर्वास्यश्चारुधौतासनोपरि। श्वेतवस्त्रे लिखेदष्ट-
दलं कमलमुत्तमम्।. ऐन्द्री माहेश्वरी ब्राह्मी कौमारी
वैष्णवी तथा। वाराही नारसिंही च भैरवीत्यष्टशक्तयः॥
ऐन्द्र्यादिशक्तिसंयुक्तं पार्श्वपत्रं सकेसरम्। कर्णिकायां
ततो लक्ष्मीं कर्पूरक्षोदपाण्डुराम् ॥६०॥ शुभ्रवस्त्रपरीधानां
मुक्तामणिविभूषिताम्। पङ्कजासनसंस्थानां स्मेराननस-
रोरुहाम्। शारदेन्दुकलाकान्तिस्निग्धनेत्रां चतुर्भुजाम्।
पद्मयुग्माभयदां वरव्यग्रकराम्बुजाम्॥ अभितो गज-
युग्मेन सिच्यमानां घटाम्बुभिः। सञ्चिन्त्यैवं लिखेद्देवीं
कर्पूरागरुचन्दनैः॥ ततस्त्वावाहनं कुर्यान्मन्त्रेणानेन सुव्रती।
महालक्ष्मि समागच्छ पद्मनाभपदादिह। पञ्चोपचारपूजेयं
त्वदर्थं देवि सम्भृता॥ आवाहनमन्त्रः। आलयस्ते हि
कथितः कमलं कमलालये। विमले कमले ह्यस्मिन् स्थितिं
मे कृपया कुरु॥ स्थापनमन्त्रः। गङ्गादिसलिलाधारं तीर्थ-
मन्त्राभिमन्त्रितम्। दूरयात्राश्रमहरं पाद्यं मे प्रतिगृह्य-
ताम्। पाद्यमन्त्रः। महालक्ष्मि महामाये मलयाचलवा-
सिनि। मया निवेदितं भक्त्या गृहाणार्घ्यं सुरेश्वरि॥
अर्घ्यमन्त्रः। स्नानं तव महालक्ष्म्याः कर्पूरागरुवासितम्।
सुतीर्थेभ्यः समानीतं तोयं मे प्रतिगृह्यताम्॥ स्नानीयमन्त्रः॥
स्नानादिकं विधायाथ यतः शुद्धिरवाप्यते। एतदाचमनीयं
मे महालक्ष्मि विधीयताम्॥ आचमनमन्त्रः॥ तन्तुसन्तान-
संसिद्धं कलाकौशलकल्पितम्। सर्वाङ्गाभरणं श्रेष्ठं वसनं

॥१६०॥

परिधीयताम् ॥ ७० ॥ वस्त्रमन्त्रः । मलयाचलसम्भूतं नानापन्नगसेवितम् । शीतलं बहुलामोदं चन्दनं प्रतिगृह्यताम् ॥ चन्दनमन्त्रः । मिलत्परिमलामोदमत्तालिकुलसङ्कुलम् । आनन्दनन्दनोद्यानं पद्मायै कुसुमं नमः ॥ पुष्पमन्त्रः । गन्धसम्भारसन्नद्धं पृथग्वस्तुसमुद्भवम् ॥ सुरासुरनरानन्दि धूपं देवि गृहाण मे ॥ धूपमन्त्रः । मार्त्तण्डमण्डलाखण्डचन्द्रबिम्बाग्नितेजसाम् ॥ निधानं देवि दीपोऽयं निर्मितस्तव भक्तितः ॥ दीपमन्त्रः । देवतालयपातालभूतलाधारधान्यजम् । षोडशाकारसम्भारनैवेद्यं ते नमः श्रियै ॥ नैवेद्यमन्त्रः । पातालतलसम्भूतं वदनाम्भोजभूषणम् । नानागुणसमाकीर्णं ताम्बूलं देवि ते नमः । ताम्बूलमन्त्रः । विष्णोर्वक्षसि पद्मे च शङ्खे चक्रे तथाम्बरे । लक्ष्मीर्नित्या यथाऽसि त्वं मयि नित्या तथा भव ॥ प्रार्थनामन्त्रः । उतार्य दोरकं बाह्वोर्लक्ष्मीपार्श्वे निवेदयेत् ॥ लक्ष्मि देवि गृहाण त्वं यन्मया दोरकं धृतम् । व्रतं सम्पूर्णतां यातु कृपा कार्या मयि त्वया ॥ दोरकोत्तारणमन्त्रः । नानाप्रकारपूजा च कार्यं तौर्यत्रिकादिकम् ॥ कथां श्रुत्वा सुवर्णं च आचार्याय च दक्षिणाम् ॥ एवं निर्वर्त्य विधिवत्पूजनं बहुकश्रियः । चातुर्वर्ण्याय देया च दत्वाऽऽचार्याय दक्षिणाम् ॥ ८० ॥ दीपान्षोडशपिण्डीश्च गोधूमस्य द्विजाय ते । दत्वा तत्सङ्ख्यकान्भुक्त्वा रात्रौ जागरणं चरेत् ॥ चन्द्रोदयेऽथ सञ्जाते दद्यादर्घ्यं ततो व्रती । मन्त्रेणानेन राजेन्द्र शङ्खेनाम्बुफलादिना ॥ नमोऽस्तु ते निशानाथ लक्ष्मीभ्रातर्नमोऽस्तु ते । व्रतं सम्पूर्णतां यातु गृहाणार्घ्यं विधो मम ॥ चन्द्रार्घ्यमन्त्रः । प्रातर्विसर्जयेद्देवीं मन्त्रेणानेन सुव्रती । पङ्कजं देवि सन्त्यज्य मम वेश्मनि संविश ॥

यथा सपुत्रभृत्योऽहं सुखी स्यां त्वत्प्रसादतः ॥ देवविस-
॥१६१॥ र्जनमन्त्रः । षोडशाब्दे तु सम्पूर्णे कुर्यादुद्यापनं व्रती ।
अनेन विधिना विप्र कुरु श्रद्धासमन्वितम् ॥ दातव्या
धेनुरेका वै स्वर्णशृङ्गादिसंयुता । आचार्याय सुवर्णं च
दद्याद् गोवसनानि च ॥ यथाशक्त्या सुवर्णं च दत्त्वा
पूर्णं भवेद् व्रतम् । एतत्ते कथितं विप्र व्रतानामुत्तमं व्रतम् ॥
यद्विधानादनायासाल्लभते वाञ्छितं फलम् । कृत्वा त्वं
सत्वरं विप्र राजानं तं च कारय ॥ व्रतमेतत्त्वया विप्र
देयं श्रद्धावते परम् । नास्तिकानां पुरस्तात्तु न प्रकाश्यं
कथञ्चन ॥ तद्व्रतं च नैवेद्यं बटो गृह्णीष्व सत्वरम् ।
नमस्कृत्य तु तं सार्धं पङ्कादुत्थाप्य वाजिनम् ॥ ६० ॥
प्रपीयाम्भः समादाय पद्मिनीपत्रयन्त्रितम् । आरुह्य
तुरगं विप्रो राजान्तिकमुपागमत् ॥ स घोटकं बटुं तत्र
राजाऽपश्यन्मुदान्वितम् । उपनीतं जलं तेन तृषार्त्ताय
महीभुजे ॥ पीत्वा तदुदकं राजा पृच्छतिस्म बटुं तदा ।
किन्तु जातो विलम्बस्ते कस्मात्ते हर्षसम्भवः ॥ इति पृष्टो
यथावृत्तं सर्वं राज्ञेन्यवेदयत् । निवेद्य तद्व्रतं विप्रो
राजानं तमकारयत् ॥ नानाप्रकारसम्भारं शम्बलं बटुक-
स्य च । व्रतप्रभावादभवद् बुभुजे भूभुजां पतिः ॥ आरुह्य
च महीपालो बटुपल्याणि तं हयम् । तद्व्रतस्य प्रभावेण
तूर्णं स्वपुरमागतः ॥ तमायान्तं समालोक्य मङ्गलं भूपुरन्द-
रम् । उत्सवं चक्रिरे पौरास्तौर्यत्रिकपुरःसरम् ॥ चलत्प-
ताकदोर्मालं राजत्कलशमौक्तिकम् । पुरं नृत्यदिवा भाति
क्षुद्रघण्टौघघर्घरैः ॥ अथोत्कलिकया काचिद्धावतिस्म
२१ पुराङ्गना । स्वर्णमुक्तालताजालैश्चतुष्कमिव कुर्वती ॥
काचिद्विमुक्तकेशी च परैकनयनाञ्जना । काचिन्नितम्ब-

भारार्त्ता काचित्पीनपयोधरा ॥ १०० ॥ अथाविशन्महीपालः सहितो बहुनालयम् । पौरनारीजनाक्षिप्तलाजैः पूरितविग्रहः ॥ अथोत्तीर्य हयात्तस्माद् बहुबाहुविलम्बितः । जगाम मङ्गलो राजा चोलदेवी तु यत्र वै ॥ दृष्ट्वाऽथ चोलदेवी सा दोरकं राजबाहुके । विमृश्य मनसा क्रुद्धा शङ्कां चक्रे ततस्त्विमाम् । आखेटकस्य व्याजेन गतोऽन्यां वल्लभां प्रति ॥ सौभाग्याय तया बद्धो दोरको दक्षिणे करे । तयैव बहुकश्चायं द्रष्टुं मां प्रेषितो ध्रुवम् ॥ ततो दुर्दैवदुष्टा सा कोपादाच्छिद्य दोरकम् । निचिक्षेप महीपृष्ठे स्वसौभाग्यसुखैः सह ॥ न बुबोध च तां राजा त्रोटयन्तीं तु दोरकम् । सामन्तमन्त्रिभृत्याद्यैः कुर्वन् वार्तां वनोद्भवाम् ॥ चिल्लदेव्यास्तदा काचिद्दासी द्रष्टुं समागता । तया दोरकमादाय बहुमापृच्छय तद्धृतम् ॥ तद्वृतस्य विधानं च स्वस्वामिन्यै न्यवेदयत् । ततो नूतनमाहूय चिल्लदेव्यकरोद् व्रतम् ॥ अथ संवत्सरेऽतीते लक्ष्मीपूजादिने नृपः । तौर्यत्रिकस्य निस्वानं चिल्लदेवीगृहेऽशृणोत् ॥ तमाकर्ण्य महीपालो नूतनं बहुमब्रवीत् । अहहाद्य दिनं लक्ष्म्याः क्व गतो मम दोरकः ॥ ११० ॥ इति श्रुत्वा नृपं प्राह दोरकत्रोटनक्रमम् । तच्छ्रुत्वा मङ्गलो राजा चोलदेव्यै प्रकुप्य च ॥ मयापि पूजनं कार्यं चिल्लदेवीगृहं प्रति । अथ मङ्गलभूपालो बहुबाहुविलम्बितः ॥ जगाम कमलार्चायै चिल्लदेवीगृहं प्रति । अत्रान्तरे महालक्ष्मीर्वृद्धारूपं विधाय च ॥ जिज्ञासार्थं गृहे तस्याश्चोलदेव्या जगाम सा । गच्छ गच्छाथ दुष्टे किमिहागत्य करोषि मे ॥ तया दुराशयात्यर्थं लक्ष्मीः साप्यपमानिता । शशापाथ महालक्ष्मीश्चोलदेवीमिति क्रुधा ॥ कोलास्या भव दुष्टे त्वं त्वयाहमपमा-

॥१६२॥

निला । चोलदेवी श्रियः शापात्कोलास्या तत्क्षणादभूत् ॥
॥१६३॥ कोलापुरमिति ख्यातं क्षितौ तन्मङ्गलं पुरम् । अथागता
महालक्ष्मीश्चिल्लदेवीनिकेतनम् ॥ बहुधा चिल्लदेव्या
सा लक्ष्मीः सम्मानितार्चिता । वृद्धारूपं परित्यज्य प्रत्य-
क्षा साऽभवत्तदा ॥ पञ्चोपचारपूजाभिः श्रियं राज्ञी ततो-
ऽर्चयत् । परितुष्टा ततो लक्ष्मीश्चिल्लदेवीमुवाच ह ॥ श्री-
रुवाच ॥ प्रसन्नास्म्यर्चनैरेभिश्चिल्लदेवि वरं वृणु । वरं
वव्रे ततो राज्ञी चिल्लदेवी शुभाशया ॥ १२० ॥ चिल्ल-
देव्युवाच । ये करिष्यन्ति ते देवि व्रतमेतत्सुरेश्वरि । न
तद्वेश्म त्वया त्याज्यं यावच्चन्द्रदिवाकरौ ॥ अद्यारभ्य
कथा ह्येषा भूपसम्बन्धिनी मम । ख्यातिं यातु क्षितौ
देवि भक्तिर्भवतु मे त्वयि ॥ सद्भावेन कथामेतां ये
शृण्वन्ति पठन्ति च । तेषां च वाञ्छितं सर्वं त्वया कार्यं
सदैव हि ॥ तथेत्युक्त्वा महालक्ष्मीस्तत्रैवान्तरधीयत ।
अथ मङ्गलभूपालस्तत्रागत्य श्रियोऽर्चनम् ॥ चक्रे परमया
भक्त्या चिल्लदेवीसमन्वितः । अथेर्ष्यया दुराचारा चि-
ल्लदेवीगृहं प्रति ॥ चोलदेवी समायाता द्वारस्थैर्वारिता
जनैः । जगाम विपिनं घोरं यत्रासीदङ्गिरा मुनिः ॥
अथालोक्याद्भुताकारां ज्ञानदृष्ट्या व्यचिन्त्य च । स मुनिः
श्रीव्रतं दिव्यं चोलदेवीमकारयत् ॥ व्रते कृतेऽथ सञ्जाता
चोलदेवी शुभानना । दाक्षिण्यकेलिलीलाभिर्लावण्यैक-
निकेतना ॥ ततः कदाचिदागत्य वनमाखेटकं नृपः । मुने-
र्वेश्मनि तां राजा ददर्शोत्पललोचनाम् ॥ अथ राजा
मुनिं प्राह केयं धन्येति कथ्यताम् । तद्वृत्तान्तं समाख्याय
राज्ञे तामददान्मुनिः ॥ १३० ॥ अथागत्य नृपो राज्यं
चोलदेवीसमन्वितः । चोलदेव्या च सहितो बुभुजे मङ्गलो

नृपः ॥ चिल्लदेवी वरं वव्रे चोलदेवीसमागमम् । चिल्लदेवी सुखापन्ना चोलदेवीसमागमे ॥ समुद्रस्य यथा गङ्गायमुने वल्लभे सदा । परस्पराधिके प्रीते तस्य राज्ञो बभूवतुः ॥ चिल्लदेव्या समं राज्यं चोलदेव्या समन्वितम् । सप्तद्वीपवतीं पृथ्वीं बुभुजे मङ्गलो नृपः ॥ व्रतस्यास्य प्रभावेण वटुकः सोऽपि नूतनः । अभून्मङ्गलभूपस्य मन्त्री तव यथा गुरुः ॥ भुक्त्वाऽथ विपुलान्भोगान् मङ्गलो भूभृतां वरः । स पुनः स्वर्गमागत्य नक्षत्रं विष्णुदैवतम् ॥ नारद उवाच । एतत्ते कथितं शक्र व्रतानामुत्तमं व्रतम् । यत्कथाश्रवणेनापि लभते वाञ्छितं फलम् ॥ प्रयाग इव तीर्थेषु देवेषु मघवानिव । नदीषु च यथा गङ्गा व्रतेष्वेतत्तथा व्रतम् ॥ धर्मं चार्थं च कामं च मोक्षं च यदि वाञ्छसि । तर्हीदं च व्रतं शक्र कुरु श्रद्धासमन्वितः ॥ श्रीकृष्ण उवाच । व्रतमिदमथ चक्रे नारदेनोपदिष्टं सुरपतिरपि यस्माद्वाञ्छितार्थं स लेभे । त्वमपि कुरु तदेतद्धर्मसूनो यथा स्यादभिमतफलसिद्धिः पुत्रपौत्रादिवृद्धिः ॥१४०॥ इति श्रीभविष्योत्तरपुराणे नारदसंवादान्तर्गतकृष्णयुधिष्ठिरसंवादे महालक्ष्मीव्रतकथा समाप्ता ॥

॥ भाद्रपदशुक्लाष्टम्यां दूर्वाष्टमीव्रतम् ॥

एतद् व्रतं स्त्रीणां नित्यम् । अष्टमी च पूर्वविद्धा ग्राह्येति सकलसिद्धान्तः । ज्येष्ठामूलयुतायामष्टम्यां अगस्त्योदये कन्यार्के च न कार्यम् । भाविन्यगस्त्योदये पूर्वायां कृष्णाष्टम्यामेव कार्यम् । यदा ज्येष्ठादिकं विनाऽष्टमी न लभ्यते तदा ब्राह्मणद्वारा पूजनं कारयित्वा स्वयमेकभक्तं कुर्यात् । वन्ध्यं दिवसं न नयेत् ॥ अथायं विधिः ॥

शुचौ देशे जातदूर्वायां अथवा वितस्तिमितां दूर्वां गृहे आनीय पीठे संस्थाप्य तन्मूले शिवं संस्थाप्य पूजामारभेत। आचम्य देशकालौ स्मृत्वा, ममेह जन्मनि जन्मान्तरे च अखण्डितसौभाग्याविच्छिन्नसन्ततिधनधान्यैश्वर्याद्यभिवृद्ध्यर्थं नित्यविधिरूपं दूर्वाष्टमीव्रताङ्गभूतं यथामिलितोपचारद्रव्यैः दूर्वामूले शिवपूजनपूर्वकं दूर्वापूजनं करिष्ये। कलशपूजनादिप्रोक्षणान्तं कृत्वा, श्रीशिवाय नम इति नाममन्त्रेण शिवम्, आगच्छ देवि दूर्वे त्वं सर्वसम्पत्प्रदायिनि। यावद्व्रतं समाप्येत तावत्त्वं सन्निधा भव॥ श्रीदूर्वायै नमः दूर्वां आवाहयामि इत्यादिषोडशोपचारैर्गन्धदध्यक्षतशमीपत्रैः पुष्पैर्धूपदीपैः खर्जूरनारिकेलमातुलिङ्गद्राक्षाजम्बीरबीजपूरदाडिमफलैर्नैवेद्येन च पूजां समाप्य, गन्धदध्यक्षतदूर्वाशमीमिश्रितजलेन विशेषार्घ्यं दत्वा प्रार्थयेत्। त्वं दूर्वेऽमृतजन्मासि वन्दितासि मुनीश्वरैः। सौभाग्यं सन्ततिं देहि सर्वकार्यकरी भव॥ यथा शाखाप्रशाखाभिर्विस्तृतासि महीतले। तथा ममापि सन्तानं देहि त्वमजरामरम्॥ ततो ब्राह्मणाय खर्जूरनारिकेलादिफलवायनं दत्वा दूर्वां विसर्जयेत्। विष्णुदेहसमुद्भूते दूर्वे त्वं हि प्रसीद मे। वन्दिता सर्वदेवैस्तु गम्यतां निजमन्दिरम्॥ यस्य स्मृत्या०। अनेन मया कृतेन पूजनेन श्रीशिवः प्रीयताम्। ततः ब्राह्मणान् सम्भोज्य, स्वयमनग्निपक्वमन्नं दधि फलं च अक्षारलवणं भुञ्जीत॥ इति दूर्वाष्टमीपूजाविधिः॥

॥ अदुःखनवमीव्रताङ्गपूजाविधिः॥

नवमी मुहूर्तमात्रापि दशमीयुता ग्राह्या। तत्र गोमयेनोपलिप्तभूमौ गुडलिप्तां वेदिकां विधाय तदुपरि इक्षु-

च्छादितां अदूपासादितां उपरि मण्डपिकायुतां कृत्वा, तत्र पीठे ब्राह्मणद्वारा महीद्यौरित्यादिना कलशस्थापनादिपूर्णपात्रनिधानान्तं कृत्वा, अग्न्युत्तारणपूर्वकं गौरीप्रतिमां स्थापयेत् ॥ अथ पूजाविधिः ॥ आचम्य देशकालौ स्मृत्वा, मम इह जन्मनि जन्मान्तरे च भर्त्रा सह सकलपातकादिदुःखनाशनपूर्वकअभीष्टकामनासिद्धिद्वारा व्रतखण्डकल्पोक्तफलावाप्त्यर्थं श्रीगौरीदेवताप्रीत्यर्थं अदुःखनवमीव्रताङ्गभूतं यथामिलितोपचारैः पुराणोक्तमन्त्रैः षोडशोपचारैः गौरीपूजनं करिष्ये । गणपतिपूजनादिसम्भारप्रोक्षणान्तं कृत्वा आवाहयेत् । गौरीं दुःखहरां देवीं शिवस्यार्धाङ्गधारिणीम् । सुनीलवस्त्रसंयुक्तामुमामावाहयाम्यहम् ॥ श्रीगौर्यै नमः गौरीं साङ्गां सपरिवारां सायुधां सशक्तिकां आवाहयामि । देवपात्रधरां देवीं विभूतिं च त्रिलोचनीम् । दुग्धान्नदाननिरतां गौरीं त्वां चिन्तयाम्यहम् ॥ ध्यायामि ॥ प्रसन्नवदने मातर्नित्यं देवर्षिसंस्तुते । मया भावेन यद्दत्तं पीठं तत्प्रतिगृ० ॥ आसनं० ॥ सर्वतीर्थमयं दिव्यं सर्वभूतस्य जीवनम् । मया दत्तं च पानीयं पाद्यार्थं प्रतिगृ० ॥ पाद्यं० ॥ गङ्गादिसर्वतीर्थेभ्यो भक्त्याऽऽनीतं सुशीतलम् ॥ गन्धपुष्पाक्षतोपेतं गृहाणार्घ्यं नमोऽस्तुते ॥ अर्घ्यं० ॥ गङ्गादिसर्वतीर्थेभ्य आनीतं विपुलं च यत् । तोयमाचमनीयार्थं निर्मलं प्रतिगृ० ॥ आचमनीयं० ॥ मातः सर्वाणि तीर्थानि गङ्गाद्याश्च तथा नदाः । स्नानार्थं तव देवेशि मयाऽऽनीताः सुशोभनाः ॥ स्नानं० ॥ दध्याज्यमधुसंयुक्तं मधुपर्कं मयाऽऽहृतम् । गृहाण देवदेवेशि मया सम्प्रार्थितेऽनघे ॥ मधुपर्कं० ॥ पञ्चामृतं मयाऽऽनीतं पयो दधि घृतं मधु । शर्करादिसमायुक्तं स्नानार्थं प्रतिगृ० ॥

पञ्चामृतस्नानं० ॥ अभ्यङ्गार्थं मयाऽऽनीतं तैलं पुष्पादिवा-
१६७॥ सितम् । प्रयत्नेनार्जितं शुद्धं गृहाण परमेश्वरि ॥ अभ्यङ्ग-
स्नानं० ॥ अङ्गोद्वर्तनकं देवि कस्तूर्या कुङ्कुमेन च । अन्यैः
सुगन्धिद्रव्यैश्च निर्मितं प्रतिगृह्यताम् । अङ्गोद्वर्तनं स० ॥
नानातीर्थादाहृतं च तोयमुष्णं मया कृतम् । स्नानार्थं च
प्रयच्छामि गृहाण परमेश्वरि ॥ उष्णोदकस्नानं० ॥ पञ्चो-
पचारपूजां कृत्वा, अभिषेकः । सर्वभूषाधिके सौम्ये
लोकलज्जानिवारणे । मयोपपादिते तुभ्यं वाससी प्रतिगृ० ॥
वस्त्रं० ॥ मुक्तामणिगुणोपेता ह्यनर्घ्या च सुखप्रदा । कञ्चु-
की च मया दत्ता पार्वति प्रतिगृ० ॥ कञ्चुकीं स० ॥ अनेक-
रत्नखचितं सर्वाभरणभूषितम् । गृहाण भूषणं देवि इष्ट-
सिद्धिं च देहि मे ॥ अलङ्कारान् स० ॥ कण्ठसूत्रं ताडपत्रं
हरिद्रां कुङ्कुमाञ्जनम् । सिन्दूरादि प्रदास्यामि सौभाग्यं
देहि मेऽव्ययम् ॥ सौभाग्यद्रव्यं० ॥ श्रीखण्डं चन्दनं०
चन्दनं० ॥ अक्षताश्च सु० अक्षतान् स० ॥ माल्यादीनि
सु० पुष्पाणि० ॥

॥ अथाङ्गपूजा ॥

१ उमायै० पादौ पू० ।
२ गौर्यै न० जङ्घे पू० ।
३ पार्वत्यै० जानुनी पू० ।
४ जगद्धात्र्यै० ऊरू पू० ।
५ जगत्प्रतिष्ठायै० कटिं पू० ।
६ शान्तिरूपिण्यै० नाभिं० ।
७ देव्यै न० उदरं पू० ।
८ लोकवन्द्यायै० स्तनौ० ।
९ काल्यै न० कण्ठं पू० ।
१० शिवायै० मुखं० ।
११ भवान्यै० नेत्रे पू० ।
१२ रुद्राण्यै० कर्णौ पू० ।
१३ शर्वाण्यै० ललाटं० ।
१४ मङ्गलदात्र्यै० शिरः पू० ।
१५ पुत्रदायिन्यै० सर्वाङ्गं पू० ।

वनस्पतिर० धूपमा० ॥ आज्यं च व० दीपं द० ॥ नैवेद्यं गृह्य० नैवेद्यं० ॥ करोद्वर्तनं स० ॥ इदं फलं म० फलं० ॥ पूगीफलं म० ताम्बूलं० ॥ हिरण्यगर्भ० दक्षिणां० । चक्षुर्दं सर्व० नीरा० ॥ यानि कानि च० प्रदक्षिणां० ॥ नमो देव्यै महा० नमस्कारान्० ॥ भवानि कमले देवि शङ्करप्राणवल्लभे । पुष्पाञ्जलिमिमं देवि गृहाण परमेश्वरि ॥ पुष्पाञ्जलिं० ॥ आवाहनं न० प्रार्थनां० ॥ विशेषार्घः–नमस्तुभ्यं जगद्धात्रि भक्तानां हितकारिणि ॥ जगद्भीतिविनाशिन्यै गृहाणार्घ्यं नमोऽस्तु ते ॥ श्रीगौर्यै० विशेषार्घ्यं स० । यस्य स्मृ० । अनेन पूजनेन श्रीगौरी प्रीयताम् । अद्य० पूजासाङ्गतासिद्ध्यर्थं ब्राह्मणपूजनं अपूपवायनदानं च करिष्ये । ब्राह्मणं सम्पूज्य, दानमन्त्रः–गौर्या दुःखविनाशिन्या व्रतसम्पूर्णहेतवे । वायनकं द्विजवर्याय सहिरण्यं ददाम्यहम् । इदं नवसङ्ख्याकअपूपवायनदानं नारिकेलफलसहितं सदक्षिणाकं सताम्बूलं अमुकश० । प्र०प्र० । स्वस्त्यस्तु दी० । अनेन वायनदानाख्येन क० तेन श्रीगौरी प्रीयताम् । तद्दिने सशक्तेनोपोषणं अशक्तेन हविष्यं दुग्धफलभक्षणं वा कृत्वा, रात्रौ नृत्यगीतादिना जागरणं कृत्वा, प्रातः पञ्चोपचारैर्देवीं सम्पूज्य, स्कन्दमातर्नमस्तुभ्यं दुःखव्याधिविनाशिनि । उत्तिष्ठ गच्छ भवनं वरदा भव पार्वति ॥ इति विसर्जयेत् । अद्यपू० ब्राह्मणपूजनं पीठदानं च करिष्ये । ब्राह्मणं सम्पूज्य, इदं गौरीपीठं सोपस्करं प्रतिमासहितं अमु० । प्रतिगृ० प्र० । कृतस्य० सपत्नीकान् ब्राह्मणान् भोजयिष्ये । ततः स्वयं भुञ्जीत ॥

॥ अदुःखनवमीव्रतकथाप्रारम्भः ॥

ऋषय ऊचुः । कदाचिन्नैमिषारण्ये व्यासं धर्मविदां

वरम् ॥ कथयन्तं कथां दिव्यामिदमूचुर्महर्षयः ॥ जय धर्म-
॥१६६॥ विदां श्रेष्ठ व्रतानि विविधानि च । विपाकात्कर्मणां चैव
प्राणिनां विविधां गतिम् ॥ आकर्ण्य विस्मिताः सर्वे कौतू-
हलसमन्विताः । न तृप्तिमधिगच्छामो पीत्वा चैतत्कथा-
मृतम् ॥ संशृणुमो वयं सद्यो व्रतं दुःखहरं त्विदम् । येन
चीर्णेन धर्मज्ञ तात दुःखं न जायते ॥ कृपां कुरु महाबुद्धे
ब्रूहि दुःखहरं व्रतम् । व्यास उवाच ॥ शृण्वन्तु पुरुषाः
सर्वे शौनकाद्या महर्षयः ॥ ये नराः पुण्यकर्माणो दम्भाह-
ङ्कारवर्जिताः ॥ श्रद्धया निश्चिता नित्यमहिंसानिरताश्च
ये ॥ यथा मिलितभोक्तारः सुखिनस्तेन तेन हि । गुह्यं
चान्यच्च वक्ष्यामि दुःखनाशनसूचकम् ॥ येऽदुःखनवमीं
प्राप्य नराश्चैनां च पण्डिताः । शिवां गच्छन्तु शरणमु-
त्पत्तिस्थितिकारिणीम् ॥ जन्मान्तरशतैर्वापि येन दुःखस्य
भागिनः । ऋषय ऊचुः ॥ अदुःखनवमी नाम त्वया केयं
निरूपिता ॥ पूजनीय. कदा गौरी विधानं कीदृशं तथा ।
भविष्यति कदा चेयं यदा कार्यं भविष्यति ॥१०॥ एवं सर्वं
विधानेन वक्तुमर्हस्यशेषतः । व्यास उवाच ॥ एतद् गुह्यतमं
पुण्यं शृणुध्वं गदतो मम ॥ न देयं नास्तिकायैतदभक्ताय
शठाय च । वदेश्च श्रद्दधानेभ्यो विधिं सर्वं विशेषतः ॥
समाहितमनाः सर्वे भवन्तः पुण्यदायकाः । सर्वस्याद्या महा-
देवि त्रिगुणा परमेश्वरी ॥ नित्यानन्दमयी देवी तमःपारे
प्रतिष्ठिता । ब्रह्माण्डजननी या च योत्पत्तिस्थितिकारिणी ।
पुरुषप्रकृतिश्चेयमात्मानं बिभिदे द्विधा । यथा शिवस्तथा
गौरी यथा गौरी तथा शिवः ॥ यथा हरिस्तथा लक्ष्मीर्दुःखपा-
२२ पापहारिणी । तस्याः पूजनमात्रेण न कश्चिद्दुःखभाग् भवेत् ॥
नभस्यशुक्लनवमी या वा पूर्णातिथिर्भवेत् । अस्तदोषादि-

रहिता सर्वदुःखहरा परा ॥ प्रशस्तायां जले स्नात्वा नित्यं
।१७०।। च विधिवद् द्विजः। मौनेन गृहमागत्य संयतस्तत्परायणः ॥
अदुःखदायी भूत्वा च शुचिस्थानगतस्तथा। गोमयेन विलि-
प्तायां शुचौ मण्डपिकां शुभाम् ॥ सत्कुम्भं स्थापयेत्तत्र
गुडेनालिप्य वेदिकाम्। आच्छादितामपूपैश्च विलिप्यानन्द-
दायिनीम् ॥२०॥ आचार्यानुज्ञया तत्र जगद्धात्रीं प्रपूजयेत्।
पूजयित्वोपचारैस्तां नत्वा नत्वा पुनः पुनः ॥ वाणकं च
ददेत्तस्यां सपक्वान्नफलान्वितम्। शक्तश्चेदुपवासेन निशि
जागरणं चरेत् ॥ अशक्तेन च भोक्तव्यं पयः प्राश्य अथा-
पि वा। फलं वापि प्रयत्नेन न हिंसारतचेतसा ॥ रात्रौ
जागरणं कार्यं नृत्यगीतादिभिस्तथा। प्रभाते विमले जाते
कृत्वा नित्यविधिं पुनः ॥ ब्राह्मणान्भोजयेत्पश्चात्सपत्नी-
कान् शुचींस्तथा। देवीं विसर्जयेत्पश्चात्साचार्यं पूजयेत्त-
तः ॥ आचार्यस्तु स्वशाखोक्तशतमष्टोतरं हुनेत्। देवी-
मन्त्रेण गव्याज्यं पायसञ्चापि यत्नतः ॥ आचरेन्नववर्षाणि
पञ्चवर्षाणि वा तथा। सौवर्णभूषणैर्वस्त्रैर्युतां तां च स-
मर्पयेत् ॥ पञ्च वा अथवा चैकं नारिकेलैश्च वायनम्। पक्वा-
न्नं नवसङ्ख्याकं ब्राह्मणाय निवेदयेत् ॥ पश्चाद् बन्धुजनैः
सार्द्धं भुञ्जीयान्नियतःशुचिः। श्रुत्वा कथां पुण्यतमां वाग्य-
तस्तत्परो यतः ॥ स कदाचिन्न दुःखेन युज्यते नात्र संश-
यः। भुक्त्वा भोगांस्तथा कामं स याति परमं पदम् ॥३०॥
अत्रैवोदाहरन्तीममितिहासं पुरातनम्। अरण्ये विष-
मे प्राप्य शापदग्धाप्सराः किल ॥ आसीज्जातिस्मरा का-
चित्तिर्यग्योनिसमागता ॥ कुक्कुटीनामतो ह्यासीत्सदा
दुःखेन पीडिता ॥ तत्सखी मर्कटी नाम ते चोभे शोकक-
र्षिते। अथ तस्मिन्वनोद्देशे परस्परहिते रते ॥ उभे अ-

भूतां सहिते विचरन्त्यौ दिशो दश । अथ कालेन सहिता वर्षान्ते चागता तिथिः ॥ अदुःखनवमी नाम दुःखव्याधिविनाशिनी । गत्वा तां कुक्कुटी प्राह मर्कटीं दैवयोगतः ॥ अद्य कश्चिन्न भोक्तव्यमावाभ्यां शृणु कारणम् । तिर्यग्योनिगते चादौ पूर्वकर्मविपाकतः ॥ दुःखापनुत्तये चाद्य न भोद्‌येऽहं त्वया सह । तस्यै हि कारणं चोक्त्वा नवमीति वने स्थिता ॥ कृत्वा च त्वमशक्ता चेद्भक्ष शीर्णफलानि च । महामायाप्रसादेन याहि भद्रमहिंसया ॥ इत्युक्त्वा मर्कटीं तूष्णीं बभूवानश्नती तदा । मर्कटी च तदाकर्ण्य व्रतस्थेयं बभूव च ॥ अथ सा मर्कटी नाम गत्वा पूर्ववनं प्रति । स्थित्वा तद्दिनशेषं तु क्षुधिता पीडिता भृशम् ॥ ४० ॥ अजानती तमेवार्थं पूर्वकर्मविपाकतः । निशान्तरे च सा गत्वा वनोद्देशे विचिन्वती ॥ ददर्श बर्हिणाण्डानि ह्यतीव क्षुधिता तदा ॥ भक्षयित्वा स्थितां वाक्यमुवाच मर्कटीं प्रति ॥ कुक्कुट्युवाच । किंचिद् भुक्तं त्वया दुष्टे वृजन्त्या हरिसंयुते । व्रतं भ्रष्टं त्वया दुष्टे वारितासि मयाऽनघे ॥ नाकर्णितं मम वचः प्रायः किं निर्गतं तव । केदारं शरणं याहि मया सह भयङ्करि ॥ देहत्यागेन योगेन गच्छावः परमं पदम् ॥ अथ ते निर्गते चोभे केदारं भूतभावनम् ॥गत्वा मनः समाधाय कुक्कुटी मनसा स्मरन् । उत्पत्स्येऽहं सत्कुले च धनाढ्ये वेदपारगे ॥ इति मत्वा स्वदेहं सा ह्रदमध्ये न्यपातयत् । यास्येऽहं शरणं गौरीं नवमीत्येव मे तिथिः ॥ पुनर्भवामि राज्ञश्च पत्नी मत्वा च मर्कटी । अकरोत्स्वतनुत्यागं तद्वाक्येन सुबोधिता ॥ कुक्कुटी सा महादेव्याः प्रसादेन तथा कुले । विप्रस्य कन्यका भूत्वा भर्तारमलभद् द्विजम् ॥ दिव्याम्बरा धर्मशीला

निरता पतिसेवने । इतरा राजपत्नी त्वं प्राप्ता सा मर्कटी
॥१७२॥ सदा ॥ ५० ॥ उभे जातिस्मरे जाते महादेव्याः प्रसादतः ।
अथ सा कुक्कुटी पञ्च पुत्रान् जज्ञे पितुः समान् ॥ बहुबोधेन
सम्पन्नान् रूपशीलगुणान्वितान् । मर्कटी पुत्रशोकार्ता
बभूव व्यथिता भृशम् ॥ पूर्वकर्म स्मरन्ती सा कदाचिद्दैव-
योगतः । अपश्यत्कुक्कुटीपुत्रान् पञ्च चैव पितुः समान् ॥
अमारयत्स्वभृत्यैस्तान् पुत्रकान्मर्कटी तदा । तच्छिरांसि
गृहीत्वा तु कुक्कुट्यै वाणकं ददौ ॥ अदुःखनवमी प्राप्त-
व्रतस्था सा बभूव ह । गौरी कृपावती जाता जननी भक्त-
वत्सला ॥ शिरांस्यादाय सर्वेषां पुत्रकांस्तानजीवयत् ।
तद्वाणकं सुवर्णस्य शिरोभिः परिकल्पयत् ॥ कुक्कुटीपूजनं
चक्रे गौरी दुःखविनाशिनी ॥ तत्प्रसादाज्जीवितास्ते भोक्तुं
गृहमथागताः ॥ तदा तद्वाणकं प्रेक्ष्य सौवर्णं प्रेषितं त्वभूत् ।
स्वभर्तृपुत्रयुक्ता च दृष्ट्वा द्विजसतीं तदा ॥ पुनर्वनं गता
तस्माद्ददर्श तत्र पुत्रकान् । पुनः पुनश्च पश्यन्ती रुरोद
भृशदुःखिता ॥ आत्मानं निन्दयामास मर्कटी विह्वला सती ।
आगत्य सख्या सदनमात्मांहिंसां निवेदयत् ॥ ६० ॥
पापिन्यहं दुराचारा दुर्भगा मृतपुत्रका । ब्रह्महत्या समा-
युक्ता मरिष्ये नाऽत्र संशयः ॥ इत्याकर्ण्य सखीवाक्यं
कुक्कुटी विस्मिताऽभवत् । अपृच्छत्कारणं विप्र शोकसा-
गरदायकम् ॥ इदं शीलं कथं भद्रे कस्माद् दृष्टासि चात्म-
जान् । विभवा राजपत्नी त्वं मान्या मम सखीष्वपि ॥
मर्कटी कुक्कुटीवाक्यं श्रुत्वा वृत्तं निवेदयत् । तच्छ्रुत्वा
कुक्कुटी पुत्रैः प्रायश्चित्तमकारयत् ॥ स्मरेदं च व्रतं देव्या
कुरु त्वं च यथाविधि । अथ देव्याः प्रसादेन मर्कटी सुषुवे
सुतम् । सुन्दरं सुवरं नाम पृथ्वीभारहरं परम् । राजपत्नी

विप्रपत्नी सुखिन्यौ सम्बभूवतुः ।। इह लोके दुःखितस्य अदुःखनवमीव्रतम् । सीतया च कृतं चैव दमयन्त्या कृतं त्विदम् ॥ अन्याभिर्बहुभिः स्त्रीभिर्व्रतं चाचरितं त्विदम् । या करोति व्रतमिदं शृणोति च कथामिमाम् ॥ अदुःखभाग्भवति सा सत्यं सत्यं वदाम्यहम् । सर्वदुःखहरं लोके किमन्यच्छ्रोतुमिच्छसि ॥ इति श्रीस्कन्दपुराणे व्याससप्तर्षिसंवादे अदुःखनवमीव्रतकथा समाप्ता ॥

॥ भाद्रपदशुक्लद्वादश्यां विष्णुपरिवर्तनविधिः ॥

द्वादश्यां श्रवणमध्यभागे वा सायंकालव्यापिनि श्रवणे वा विष्णुपरिवर्तनोत्सवं कुर्यात् । तत्र सन्ध्यायां कृतनित्यक्रियः, आचम्य देशकालौ सङ्कीर्त्य, मम महापातकाद्यशेषपापनिवृत्तिपूर्वकश्रीमहाविष्णुप्रसादसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं कृतविष्णुशयनोत्सवाङ्गभूतं भाद्रपदशुक्लद्वादश्यां विष्णुपरिवर्तनं करिष्ये । इति सङ्कल्प्य, देवं विविधोपचारैः सम्पूज्य, प्रार्थयेत् । वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव । पार्श्वेन परिवर्तस्व सुखं स्वपिहि माधव ॥ अनेन विष्णुपरिवर्तनाख्येन कर्मणा तेन श्रीभगवान् श्रीमहाविष्णुः प्रीयताम् ॥

॥ भाद्रपदशुक्लश्रवणद्वादश्यां जनार्दनपूजाविधिः ॥

श्रवणयुतायां द्वादश्यां यं कञ्चित्सङ्गमं गत्वा द्वादशापामार्गसमिद्भिः मुखदुर्गन्धीतिमन्त्रेण दन्तान् संशोध्य, द्वादशगण्डूषान् कृत्वा, सङ्गमं प्रार्थयेत् । त्वमेव तीर्थराजोऽसि त्वमेव सरितां पतिः । सङ्गमस्त्वं प्रसन्नो मे प्रसादं कुरु सङ्गम इति ॥ ततः आचम्य देशकालौ स्मृत्वा,

मम समस्तपापक्षयपूर्वकविष्णुलोकप्राप्त्यर्थं शरीरशुद्ध्यर्थं (अमुक) सङ्गमे स्नानमहं करिष्ये। इति सङ्कल्प्य, वरो वरेण्यो वरदो वराहो धरणीधरः। अपवित्रं पवित्रं मां करोतु भगवान् हरिः ॥ इति मन्त्रेण स्नात्वा देवपितृतर्पणं कृत्वा शुक्ले वाससी परिधाय आचम्य जलैर्घटं पूरयित्वा मौनेन गृहमागच्छेत्। ततो भूमिं गोमयेनोपलिप्य रङ्गवल्यादिभिरलङ्कृत्य तत्र पीठोपरि आनीतघटं ब्राह्मणद्वारा महीद्यौरित्यादिना स्थाप्य, पूर्णपात्रनिधानान्तं कृत्वा, तदुपरि सौवर्णीं लक्ष्मीसहितां जनार्दनप्रतिमामग्न्युत्तारणप्राणप्रतिष्ठापूर्वकं स्थापयेत्। तत्समीपे दध्योदनसहितं शिक्यं कौपीनं मेखलां यज्ञोपवीतं पालाशदण्डं छत्रं पादुके कमण्डलुं च स्थापयेत् ॥ अथ पूजाविधिः ॥ आचम्य देशकालौ स्मृत्वा, मम इह जन्मनि जन्मान्तरे च पिशाचादिदुर्योनित्वादिसकलदोषपरिहारपूर्वकसमस्तपापक्षयार्थं पुत्रपौत्राद्यभिवृद्ध्यर्थं श्रीविष्णुलोकप्राप्त्यर्थं आचरितश्रवणद्वादशीव्रताङ्गभूतं यथामिलितषोडशोपचारद्रव्यैः (पुरुषसूक्तेन) पुराणोक्तमन्त्रैर्वा, श्रीजनार्दनपूजनमहं करिष्ये। गणपतिपूजनादिसम्भारप्रोक्षणान्तं कृत्वा, ध्यायेत्। शान्ताकारं०। ध्यायेज्जनार्दनं देवं शङ्खशार्ङ्गविभूषितम्। सितवस्त्रयुगच्छन्नं सितचन्दनचर्चितम् ॥ श्रीलक्ष्मीसहितजनार्दनाय नमः जनार्दनं ध्यायामि ॥ सहस्रशी०। नमो नमस्ते गोविन्द बुधश्रवणसंज्ञक। अघौघसंक्षयं कृत्वा सर्वसौख्यप्रदो भव ॥ इति मन्त्रेण सर्वा पूजा कार्या। श्रीलक्ष्मीसहितं जनार्दनं साङ्गं सपरिवारं सायुधं सशक्तिकं आवाहयामि। ततः आसनादिपुष्पसमर्पणान्तं कृत्वा, अङ्गपूजां कुर्यात्।

१ वासुदेवाय० शिरः पू० ।	६ व्यापकाय न० कुक्षी पू० ।
२ श्रीधराय० मुखं पू० ।	७ केशवाय न० उदरं पू० ।
३ वैकुण्ठाय न० हृदयं पू० ।	८त्रैलोक्यजनका०मेढ्रं पू० ।
४ श्रीपतये न० नेत्रे पू० ।	९सर्वाधिपतये०जङ्घे पू० ।
५ सर्वास्त्रधारिणे० भुजौ० ।	१०सर्वात्मने न०पादौ पू० ।

पूर्वोक्तमन्त्रेण धूपदीपादिभिः पूजां समाप्य, जगदादिर्जगद्रूप अनादिर्जगदन्तकृत् । जलाशयो जगद्योनिः प्रीयतां मे जनार्दनः ॥ इति सम्प्रार्थ्य, शिक्योऽसि दधिभक्तोऽसि लम्बितोऽसि ममोपरि । सूत्रेणैवाश्रितोऽसि त्वं वामनः प्रीयतां मम ॥ इति शिक्यं बध्वा, तदुपरि दध्यन्नकरकं स्थापयेत् । अन्नं प्रजापतिर्ब्रह्माविष्णुरुद्रेन्द्रभास्कराः । सर्वमन्नमयं विश्वं सर्वपापं व्यपोहतु ॥ तदुपरि सुगन्धजलपूरितकरकं स्थापयेत् ॥ पर्जन्यो वरुणः सोमो विष्णू रुद्रः प्रजापतिः । त्रैलोक्यबीजरूपोऽसि प्रीतो भव सुरेश्वर ॥ यस्य स्मृ० । अनेन श्रवणद्वादशीव्रताङ्गपूजनेन श्रीजनार्दनः प्रीयताम् । ततो रात्रौ जागरणं कृत्वा कथां शृणुयात् । प्रातः स्नात्वा नित्यकर्म निर्वर्त्य, आचम्य देशकालौ स्मृत्वा, स्थापितदेवताया उत्तरपूजनं ब्रह्मचारिणे दध्योदनसहितशिक्यदानं सोपस्करपीठदानं च करिष्ये । लक्ष्मीसहितजनार्दनाय नमः इति नाममन्त्रेण पञ्चोपचारपूजां कृत्वा दध्योदननैवेद्यं समर्प्य, यान्तुदेवेति देवतां विसृज्य ब्रह्मचारिणं पूजयेत् । गन्धाः पातु० । स्वस्त्यस्तु दीर्घ० । दानमन्त्रः-दध्योदनयुतं शिक्यं वारिधानीयुतं विभो । छत्रोपानहसंयुक्तं ब्राह्मणाय ददाम्यहम् ॥ इदं दध्योदनशिक्यं छत्रोपानहादिस्थापितपदार्थसहितं सोपस्करपीठं च ब्रह्मचारिणे अमुकशर्मणे ब्राह्मणाय तुभ्यमहं

सम्प्रददे । प्रति०प्रतिगृ० । दान०इमां दक्षिणां० । यस्य स्मृत्या० । अनेन श्रवणद्वादशीव्रताख्येन कर्मणा श्रीजनार्दनः प्रीयताम् । यथाशक्ति ब्रह्मचारिणो ब्राह्मणांश्च भोजयित्वा निर्णीतपारणाकाले स्वयं भुञ्जीत ॥

॥ अथ भाद्रशुक्लद्वादश्यां वामनपूजाविधिः ॥

द्वादशी मध्याह्नव्यापिनी श्रवणयुता ग्राह्या । उभयदिने श्रवणयोगे पूर्वैव । सर्वथा श्रवणयोगाभावे एकादश्यामेव श्रवणसत्वे मध्याह्नव्यापिनीं द्वादशीं विहाय एकादश्यामेव व्रतं कार्यम् । तिथिद्वये श्रवणयोगाभावे मध्याह्नव्यापिन्यां द्वादश्यां कार्यम् । दशमीविद्धैकादश्यां श्रवणयोगे सैव ग्राह्या । अत्र मध्याह्नशब्दः द्वेधा विभक्तस्य दिनस्य सन्धिकालवाचकः । अत्रापि श्रवणद्वादशीवत् दन्तधावनादिसङ्गमस्नानं कुर्यात् । गृहमागत्य भूमिं गोमयेनोपलिप्य रङ्गवल्लीभिरलङ्कृते पीठे पूर्वाग्रान् कुशान् प्रसार्य तदुपरि कृष्णाजिनं प्रस्थमात्रतिलपूर्णं निधाय अभावे यवगोधूमपूर्णं वा तदुपरि सङ्गमजलपूरितं घटं महीद्यौरित्यादिना स्थापनादिपूर्णपात्रनिधानान्तं कृत्वा, तत्र यथाशक्त्या सौवर्णीं वामनप्रतिमां अग्न्युत्तारणप्राणप्रतिष्ठापूर्वकं स्थापयेत् । तत्समीपे पीतवस्त्रयुग्मं, कमण्डलुं, छत्रं, उपानहौ च स्थापयेत् ॥ अथ पूजाविधिः ॥ आचम्य देशकालौ स्मृत्वा, मम इह जन्मनि जन्मान्तरे च समस्तपापक्षयपूर्वकसकलदोषपरिहारद्वारा पुत्रपौत्राद्यभिवृद्ध्यर्थं श्रीविष्णुलोकप्राप्त्यर्थं आचरितवामनजयन्तीव्रताङ्गभूतं यथामिलितषोडशोपचारद्रव्यैः (पुरुषसूक्तेन) पुराणोक्तमन्त्रैश्च श्रीवामनपूजनमहं करिष्ये । तदङ्गं

गणपतिपूजनं आसनविधिं कलशशङ्खघण्टापूजनं च करिष्ये।
॥१७७॥ गणपतिपूजनादिसम्भारप्रोक्षणान्तं कृत्वा आवाहयेत् ।
ब्रह्माण्डमुदरे यस्य महद्भूतैरधिष्ठितम् । मायावी वाम-
नः श्रीशो समायातु जगत्पतिः ॥ श्रीवामनाय नमः वा-
मनं साङ्गं सपरिवारं सायुधं सशक्तिकं आवाहयामि ।
अथ ध्यानम् ॥ ह्रस्वपादं ह्रस्वकायं महाशिरसमर्भकम् ।
पाणिपादोदरकृशं ह्रस्वजङ्घोरुकेसरम् ॥ मौञ्ज्या मेखलया
वीतमुपवीताजिनोत्तरम् ॥ जटिलं वामनं विप्रं मायामाण-
वकं हरिम् ॥ श्रीवामनाय नमः वामनं ध्यायामि ॥ पद्म-
रागादिसंयुक्तं मुक्तामणिविभूषितम् । स्वर्णसिंहासनं
चारु वामन प्रतिगृ० ॥ आसनं० ॥ कमण्डलुशिखाधारी
कुब्जरूपोऽसि वामन । छत्रदण्डधरो देव पाद्यं गृह्ण न-
मोऽस्तु ते ॥ पाद्यं० ॥ सहस्रशीर्षा त्वं देव श्रवणर्क्षसम-
न्वित । अर्घ्यं गृहाण देवेश रमया सहितो हरे ॥ अर्घ्यं० ॥
कमण्डलुस्थितं चारु गङ्गातोयप्रपूरितम् । देवेशाचमनार्थं
च वामन प्रतिगृ० ॥ आचमनीयं० ॥ गङ्गासरस्वतीरेवा-
पयोष्णीनर्मदाजलैः । स्नापितोऽसि मया देव तथा शान्तिं
प्रयच्छ मे ॥ स्नानं० ॥ पयोदधिघृतक्षौद्रशर्करास्नानमु-
त्तमम् । गृह्यतां देवदेवेश त्रिविक्रम नमोऽस्तु ते ॥ पञ्चामृ-
तस्नानं० ॥ आचमनीयं० ॥ पञ्चोपचारपूजां कृत्वा, अभि-
षेकः । अतसीपुष्पसङ्काशं तिलकृष्णाजिनोपरि । कुरु-
क्षेत्रे प्रतिष्ठाप्य वामनं स्थापयाम्यहम् ॥ इति प्रतिमां
पीठे स्थापयेत् । नमः कमलकिञ्जल्कपीतनिर्मलवाससे ।
वासो वै देवदेवेश गृहाण पुरुषोत्तम ॥ पीतवस्त्रयुग्मं० ॥
२३ नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् । उपवीतं सुर-
श्रेष्ठ गृहाण पुरुषोत्तम ॥ यज्ञोपवीतं० । आचमनीयं० ।

मलयाचलसम्भूतं घनसारं मनोहरम्। हृदयानन्दनं चारु चन्दनं प्रतिगृ० ॥ चन्दनं० ॥ किरीटं कुण्डले दिव्ये केयूरं रत्ननिर्मितम्। कण्ठसूत्रं नूपुरे च वामन प्रतिगृ० ॥ अलङ्कारान्० ॥ अक्षताः परमादिव्याः सर्वकामफलप्रदाः। पूजासंरक्षणार्थाय गृह्यतां परमेश्वर ॥ अक्षतान्० ॥ मल्लिका शतपत्रं च जातीपुष्पं सुगन्धकम्। चम्पकैर्जलजैर्युक्तं पुष्पं गृह्ण नमोऽस्तु ते ॥ पुष्पाणि स० ॥

॥ अङ्गपूजा ॥

१ मत्स्याय० पादौ पू० ।	६ परशुरामा० भुजौ पू० ।
२ कूर्माय० जानुनी० ।	७ रामाय० कर्णौ पू० ।
३ वराहाय० गुह्यं पू० ।	८ कृष्णाय० मुखं पू० ।
४ नृसिंहाय० उदरं पू० ।	९ बौद्धाय० नेत्रे पू० ।
५ वामनाय० कण्ठं पू० ।	१० कल्किने न० शिरः पू० ।

धूपोऽयं गृह्यतां देव शङ्खचक्रगदाधर। अच्युतानन्त गोविन्द वासुदेव नमोऽस्तु ते ॥ धूपं० ॥ त्वमेव पृथिवी ज्योतिर्वायुराकाशमेव च। त्वमेव ज्योतिषां ज्योतिर्दीपोऽयं प्रतिगृ० ॥ दीपं० ॥ त्वं माता सर्वदेवानां त्वमेव जगतःपिता। मया निवेदितं भक्त्या नैवेद्यं प्रतिगृ० ॥ अन्नं च० नैवेद्यं ॥ आचमनं० ॥ करोद्वर्तनं० ॥ इदं फलं स० फलं० ॥ पूगीफलं० ताम्बूलं० ॥ हिरण्यग० दक्षिणां० ॥ चन्द्रादित्यौ च० नीराजनदीपं द० ॥ यानि का० प्रदक्षिणां० ॥ नमो वामनरूपाय नमस्तेऽस्तु त्रिविक्रम। नमस्ते बलिबन्धाय वासुदेव नमोऽस्तु ते ॥ नमस्कारान्० ॥ नमोऽस्त्वनन्ताय० पुष्पाञ्जलिं स० ॥ प्रार्थयेत्–अनेककर्मनिर्बन्धध्वंसिनं जलशायिनम्। नतोऽस्मि

मथुरावासं माधवं मधुसूदनम् ॥ आवाहनं न० । नमो नमस्ते गोविन्द नमस्ते जलशायिने । द्वादश्यां मे गृहाणार्घ्यं युक्तायां श्रवणेन तु ॥ श्रीवाम० इदं विशेषार्घ्यं स० ॥ यस्य० । अनेन मया कृतेन पूजनेन श्रीवामनः प्रीयताम् । रात्रौ जागरणं कुर्यात् । ततः प्रभाते नित्यविधिं निर्वर्त्य, आचम्य देशकालौ स्मृत्वा, श्रीवामनप्रीत्यर्थं उत्तरपूजनं करिष्ये । तदङ्गं पीठदानं ब्राह्मणपूजनं च करिष्ये । पञ्चोपचारैः वामनं सम्पूज्य देवता विसृजेत् । यान्तु देवग० । ततः ब्राह्मणं पूजयेत् । स्वस्त्यस्तु, दीर्घमा० । वामनः प्रतिगृह्णाति वामनो वै ददाति च । वामनस्तारकोभाभ्यां वामनाय नमो नमः ॥ इदं पीठं छत्रोपानहदण्डकमण्डलुसहितं वामनस्वरूपिणे अमुकश० ब्राह्मणाय तुभ्यमहं सम्प्रददे । प्रतिगृ० प्रति० । दानसां० इमां द० । अनेन पीठदानाख्येन कर्मणा श्रीभगवान् श्रीवामनः प्रीयताम् । कृतस्य कर्मणः सां० यथाशक्ति ब्रह्मचारिणः ब्राह्मणांश्च भोजयिष्ये । ब्राह्मणान् सम्भोज्य निर्णीते पारणाकाले स्वयं भुञ्जीत ॥ इति वामनपूजाविधिः ॥

॥ अथ श्रवणद्वादशीकथाप्रारम्भः ॥

उपवासासमर्थानां किं स्यादेकमुपोषणम् । महाफलं महादेव तन्ममाचक्ष्व पृच्छतः ॥ श्रीकृष्ण उवाच ॥ या राजञ्छ्रवणोपेता द्वादशी महती तु सा । तस्यामुपोषितः स्नातः पूजयित्वा जनार्दनम् ॥ प्राप्नोत्ययत्नाद्धर्मज्ञ द्वादशद्वादशीफलम् । दध्योदनयुतं तस्यां जलपूर्णं तथा घटम् ॥ वस्त्रसंवेष्टितं दत्वा छत्रोपानहमेव च । न दुर्गतिमवाप्नोति गतिमग्र्यां च विन्दति ॥ अक्षय्यं स्थानमाप्नोति नात्र

कार्या विचारणा । श्रवणद्वादशीयोगे बुधवारो भवे-
॥१८०॥ द्यदि ॥ अत्यन्तं महती नाम द्वादशी सा प्रकीर्तिता ।
स्नानं जाप्यं तथा दानं होमः श्राद्धं सुरार्चनम् ॥ सर्वम-
क्षय्यमाप्नोति तस्यां शृणु कुलोद्वह । तस्मिन्दिने तथा
स्नातो यत्र क्वचन सङ्गमे ॥ स गङ्गास्नानजं राजन् फलं
प्राप्नोत्यसंशयम् । श्रवणे सङ्गमाः सर्वे परतुष्टिप्रदाः
सदा ॥ विशेषाद् द्वादशीयुक्ता बुधयुक्ता विशेषतः। तथैव
द्वादशी प्रोक्ता बुधश्रवणसंयुता ॥ शुद्धा श्रवणसंयुक्ता
सङ्गमे विजया स्मृता । वारिकुम्भं प्रदायास्यां दध्योदन-
समायुतम् ॥ १० ॥ प्रेतयोनौ न जायेत पूजयित्वाऽत्र
वामनम् । वंशः समुद्धृतस्तेन मुक्तः पितृऋणादसौ ॥ नभ-
स्ये सङ्गमे स्नात्वा वामनो येन पूजितः । स याति परमं
स्थानं विष्णुसायुज्यमाप्नुयात् ॥ युधिष्ठिर उवाच ॥ उप-
वासासमर्थानां तदैव पुरुषोत्तम । एका या द्वादशी पुण्या
तां वदस्व ममानघ ॥ श्रीकृष्ण उवाच ॥ मासे भाद्रपदे
शुक्ला द्वादशी श्रवणान्विता । सर्वकामप्रदा पुण्या उप-
वासमहाफला ॥ सङ्गमे सरितां स्नात्वा द्वादश्यां समुपो-
षितः । समग्रं समवाप्नोति द्वादशद्वादशीफलम् ॥ त्वमेव
तीर्थराजोऽसि त्वमेव सरितां पतिः । सङ्गमस्त्वं प्रसन्नो
मे प्रसादं कुरु सङ्गम ॥ सा धेनुद्वादशी ज्ञेया तस्यां भाद्र-
पदे शुभा । दशम्यैकादशी यत्र सा नोपोष्या भवेत्तिथिः ॥
श्रवणेन तु संयुक्ता सा शुभा सर्वकामदा । पारणं तिथि-
वृद्धौ तु द्वादश्यामुडुसङ्क्षयात् ॥ वृद्धौ कुर्यात्त्रयोदश्यां
तत्र दोषो न विद्यते । इत्येषा कथिता राजन् द्वादश्यां
श्रवणेन या ॥ कर्तव्या सा प्रयत्नेन इहामुत्र फलप्रदा । द्वाद-
श्यामुपवासोऽत्र त्रयोदश्यां तु पारणम् ॥२०॥ निषिद्धम-

पि कर्तव्यमित्याज्ञा पारमेश्वरी। बुधश्रवणसंयुक्ता सैव चेद् द्वादशी भवेत् ॥ अतीव महती तस्यां सर्वं कृतमिहाक्षयम्। द्वादशी श्रवणोपेता यदा भवति भारत ॥ सङ्गमे सरितां स्नात्वा गङ्गादिस्नानजं फलम्। सोपवासः समाप्नोति नात्र कार्या विचारणा ॥ जलपूर्णं तदा कुम्भं स्थापयित्वा विचक्षणः। पञ्चरत्नसमोपेतं सोपवीतं सवस्त्रकम् ॥ तस्योपरि स्थापयित्वा लक्ष्म्या सह जनार्दनम्। यथाशक्त्या स्वर्णमयं शङ्खशार्ङ्गविभूषितम् ॥ स्थापयित्वा विधानेन सितचन्दनचर्चितम्। सितवस्त्रयुगच्छन्नं छत्रोपानद्युगान्वितम् ॥ ॐ नमो वासुदेवाय शिरः सम्पूजयेत्ततः। श्रीधराय मुखं तद्वद्वैकुण्ठाय हृदञ्जकम् ॥ नमः श्रीपतये नेत्रे भुजौ सर्वास्त्रधारिणे। व्यापकाय नमः कुक्षी केशवायोदरं नमः ॥ त्रैलोक्यजनकायेति मेढ्रं सम्पूजयेद्धरेः। सर्वाधिपतये जङ्घे पादौ सर्वात्मने नमः ॥ अनेन विधिना राजन्पुष्पधूपैः समर्चयेत्। ततस्तस्याग्रतो देयं नैवेद्यं घृतपाचितम् ॥३०॥ द्वादशब्राह्मणान्कुम्भान् शक्त्या दद्याच्च दक्षिणाम्। एवं सम्पूज्य गोविन्दं जागरं तत्र कारयेत् ॥ प्रभाते विमले स्नात्वा सम्पूज्य गरुडध्वजम्। पुष्पधूपादिनैवेद्यैः फलैर्वस्त्रैः सुशोभनैः ॥ पुष्पाञ्जलिं ततो दत्वा मन्त्रमेतमुदीरयेत्। नमो नमस्ते गोविन्द बुधश्रवणसंज्ञक ॥ अघौघसंक्षयं कृत्वा सर्वसौख्यप्रदो भव। अनन्तरं ब्राह्मणे तु वेदवेदाङ्गपारगे ॥ पुराणज्ञे विशेषेण विधिवत्सम्प्रदापयेत्। प्रीयतां देवदेवेशो मम नित्यं जनार्दनः ॥ अनेनैव विधानेन दद्यात्स्त्री वा नरोत्तमः। सर्वं निवर्तयेत्सम्यक् एकभक्तिरतोऽपि सन् ॥ श्रीकृष्ण उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनम्। महत्यरण्ये यद्वृत्तं भूमिपाल

शृणुष्व तत् ॥ देशो दशार्णको नाम तस्य भागे तु पश्चिमे ।
॥१८२॥ अस्ति राजन्मरुद्देशः सर्वसत्त्वभयङ्करः ॥ सुतप्तवालुकाभू-
मिर्यत्र दुष्टा महोरगाः। अल्पच्छाया द्रुमास्तत्र मृतप्राणि-
समाकुलाः ॥ शमीखदिरपालाशकरीरैश्च सपीलुभिः। यत्र
भीमगणा वृक्षा मर्कटैः परिवेष्टिताः ॥ ४० ॥ दग्धप्राणि-
गणाकीर्णा यत्र भूर्दृश्यते क्वचित् । अर्कप्रतापैः सन्तप्ता
परुषा निस्तृणा मही ॥ ज्वलिताग्निसमं चैव यत्किञ्चि-
त्तत्र दृश्यते। तथापि लोका जीवन्ति सर्वे कर्मनिबन्धनात् ॥
नोदकं नो तृषा भीता राजंस्तत्र बलाहकाः । कदाचिदपि
दृश्यन्ते प्लवमाना विहङ्गमाः ॥ तैः कान्तारगतैः कैश्चित्तृ-
षितैः शिशुभिः समम् । सैकतेष्वेव नश्यन्ति जलैः सैकत-
सेतुवत् ॥ तस्मिंस्तथाविधे देशे कश्चिद्दैववशाद्वणिक् ।
हरिदत्त इति ख्यातो वणिक्धर्मोगजीवकः ॥ निजसार्थपरि-
भ्रष्टः प्रविष्टो मरुजाङ्गले । दृष्टवान्मलिनान् रूक्षान्निर्मां-
सान्भीमदर्शनान् ॥ बभ्राम भ्रान्तहृदयः क्षुत्तृषाश्रमकर्शितः ।
क्व ग्रामः क्व जनः क्वाहं क्व यास्यामि किमाचरे ॥ अथ
प्रेतान्ददर्शासौ क्षुत्तृषाव्याकुलेन्द्रियान् । क्षुत्क्षामान् लम्ब-
वृषणान् निर्मांसान्स च कीकसान् ॥ स्नायुबद्धास्थिचर-
णान् धावमानानितस्ततः । वणिक् सोऽपि तदाश्चर्यं दृष्ट्वा
भयमुपागतः ॥ भीतभीतस्तु तैः सार्धं जगाम पथि वञ्च-
यन् । ततो गत्वा पिशाचास्ते न्यग्रोधं महदाश्रयम् ॥५०॥
शीतच्छायं सुविस्तीर्णं तत्र ते समुपाविशन् । निविष्टेषु
ततस्तेषु एकदेशे स्थितो वणिक् ॥ प्रेतस्कन्धसमारूढमेकं
विकृतदर्शनम् । ददर्श बहुभिः प्रेतैः समन्तात्परिवारितम् ॥
आगच्छन् शवभक्षी स स्तुतिशब्दः पुरःसरम् । प्रेतस्कन्धा-
न्महीं गत्वा तस्यान्तिकमुपागतम् ॥ सोऽपि वाचा वणि-

कश्रेष्ठमिदं वचनमब्रवीत् । अस्मिन् घोरतरे देशे प्रवेशो भवतः कथम् ॥ तमुवाच वणिक् धीमान्सार्थभ्रष्टस्तदा-वशः । प्रवेशो दैवयोगेन कष्टकर्मकृतेन तु ॥ तृष्णा मे बाधतेऽत्यर्थं क्षुत्तृषौ च भृशं तथा । प्राणाः कण्ठमनुप्राप्ता वचनं नश्यतीव मे ॥ अत्रोपायं न पश्यामि जीवेयं येन केनचित् । श्रीकृष्ण उवाच ॥ इत्येवमुक्तः प्रेतस्तु वणिजं वाक्यमब्रवीत् ॥ पुन्नागमिममाश्रित्य प्रतीक्षस्व मुहूर्तकम् । कृतातिथ्यो यथा पश्चाद् गमिष्यसि यथासुखम् ॥ एवमुक्त-स्तथा चक्रे स वणिक् तृषयार्दितः । मध्याह्नसमये प्राप्ते ततस्तं देशमागतः ॥ पुन्नागवृक्षाच्छीतोदा वारिधानी मनो-रमा । दध्योदनसुयुक्तेन वर्धमानेन संयुता ॥ ६० ॥ अव-तीर्य ततः सोऽग्रे ददावतिथये तदा । दध्योदनं च तोयं च क्षुत्तृड्भ्यां पीडिताय वै ॥ दध्योदनेन तोयेन परां तृप्ति-मुपागतः । वितृष्णो विज्वरश्चापि क्षणेन च बभूव ह ॥ ततस्तु प्रेतसङ्घस्य तस्माद्भागं क्रमाद्ददौ । दध्योदनात्स-पानीयात्प्रेतास्तृप्तिं परां गताः ॥ अतिथिं तर्पयित्वा च प्रेतलोकं च सर्वशः । ततः स्वयं च बभुजे भुक्तशेषं यथासु-खम् ॥ ततो भुक्तवतस्त्वन्नं पानीयं च स्वयं पपौ । प्रेताधि-पं ततस्तुष्टो वणिक्वचनमब्रवीत् ॥ वणिगुवाच ॥ आश्च-र्यमेतत्परमं वनेऽस्मिन्प्रतिभाति मे । अन्नपानस्य सम्प्राप्तिः परमस्य कुतस्तव ॥ स्तोकेन च तथान्नेन बिभर्षि सुबहून्वने । तृप्तिं गताः कथं त्वेते निर्मांसा भीमकुक्षयः ॥ अपरं च कथं स्नेहमवाप्तावपरिच्छ्यम् । हिमाचलं च कस्मात्त्वं सम्प्राप्तो निर्जले वने ॥ तृप्तश्चासि कथं ग्रासमात्रेणैव शुभं ब्रवीः । पिशाचपतिरुवाच ॥ शृणु भद्रं प्रवक्ष्यामि दुष्कृतं कर्म चात्मनः ॥ शाकले नगरे रम्ये अहमासं सुदु-

मतिः । वणिगासं पुरा काले ततो भद्रमवाप ह ॥७०॥ शाकले नगरे रम्ये नास्तिकस्य दुरात्मनः । धनलोभात्तथा तत्र कदाचित्प्रमदेरिता ॥ न दत्ता भिक्षवे भिक्षा तृषिते नु कदाचन । प्रतिवैश्यस्तु तत्रासीद् ब्राह्मणो गुणवान्मम ॥ श्रवणद्वादशीयोगे मासि भाद्रपदे तथा । स कदाचिन्मया सार्धं तापीं नाम नदीं ययौ ॥ तस्यास्तु सङ्गमः पुण्यो यत्रासीच्चन्द्रभागया । चन्द्रभागा सोमसुता तापी चैवार्कनन्दिनी ॥ तयोः शीतोष्णसलिले सङ्गमे सुमनोहरे । तत्तीर्थवरमासाद्य प्रतिवैश्यः स मे द्विजः ॥ श्रवणद्वादशीयोगे स्नातश्चैवोपवासकृत् । चान्द्रभागस्य तोयस्य वारिकुम्भं नवं दृढम् । दध्योदनयुतैः सार्धं सम्पूर्णं वर्धमानकैः । छत्रोपानद्युगं वस्त्रं प्रतिमां विधिवद्गुरेः ॥ प्रददौ विप्रमुख्याय रहस्यज्ञो महामुनिः । वित्तसंरक्षणार्थाय तस्यापि च ततो मया ॥ सोपवासेन दत्ता वै वारिधानी सुशोभना । चान्द्रभागस्य विप्राय दध्योदनयुता तदा ॥ एतत्कृत्वा गृहं प्राप्तस्ततः कालेन केनचित् । पञ्चत्वमहमासाद्य नास्तिक्यात्प्रेततां गतः ॥ ८० ॥ अस्यामटव्यां घोरायां यथास्वं कुशलं तदा । पुरोहितो मया दृष्टः स्नात्वा गृहमुपागतः ॥ शिक्यहस्तः सकलशो द्वादश्यां समुपोषितः । तेनापि कथिता तत्र श्रवणद्वादशी शुभा ॥ सविनयं सोपदेशं व्रतं कृत्वा मयानघ । तस्येयं कर्मणः पुष्टिर्येयं दृष्टा त्वयानघ ॥ यदन्नं च मया दत्तं सजलं घटकाञ्चनम् । तत्तन्मां भजते नित्यं पिशाचत्वेऽपि नित्यशः ॥ सेयं मध्याह्नसमये दिवसे दिवसे मम । उपतिष्ठति वैश्येह यथा दृष्टं त्वयानघ ॥ उपवासफलेनैव जातिस्मरणमेव च । दधिभक्तप्रदानेन जलान्नं चाक्षयं मम ॥ ब्रह्मस्वहारिणस्त्वेते पापाः प्रेतत्वमागताः ।

परदाररताः केचित्स्वामिद्रोहरताः परे ॥ मित्रद्रोहरताः
॥१८५॥ केचिद्देशेऽस्मिंस्तु सुदारुणे । ममैते भृत्यतां प्राप्ता अन्नदा-
नादिकेन च ॥ अक्षय्यो भगवान्विष्णुः परमात्मा सनातनः ।
यद्दीयते तमुद्दिश्य अक्षय्यं तत्प्रकीर्तितम् ॥ तेनाक्षय्येन
चान्नेन तृप्ता एते पुनः पुनः । प्रेतभावाच्च दौर्बल्यं न मुञ्च-
न्ति कदाचन ॥ ९०॥ अहं च पूजयित्वा त्वामतिथिं समु-
पस्थितम् । प्रेतभावाद्विनिर्मुक्तो यास्यामि परमां गतिम् ॥
मया विहीनाः किन्त्वेते वनेऽस्मिन्भृशदारुणे । पीडामनुभव-
न्त्येते दारुणां कर्मयोनिजाम् ॥ एतेषां तु महाभाग ममा-
नुग्रहकाम्यया । अनेकनामगोत्राणि गृह्णीयास्त्वखिलेन च ॥
अस्ति कक्षागता चैव तत्वसम्पुटिका शुभा । हिमवन्तम-
थासाद्य तत्र त्वं लप्स्यसे निधिम् ॥ गयाशीर्षं ततो
गत्वा श्राद्धं कुरु महामते । एकमेकमथोद्दिश्य प्रेते प्रेते
यथासुखम् ॥ एवं सम्भाष्यमाणस्तं जप्तजाम्बूनदप्रभः ।
समारुह्य विमानं स स्वर्गलोकमितो गतः ॥ स्वर्गते प्रेत-
नाथे वै प्रभावात्सवणिक् क्रमात् । नामगोत्राणि सङ्गृह्य
प्रयातः स हिमालये ॥ तत्र प्राप्य निधिं गत्वा विनिक्षिप्य
स्वकं गृहे । धनभारमुपादाय गयाशीर्षवटं ययौ ॥ प्रेतानां
क्रमशस्तत्र चक्रे श्राद्धं दिने दिने । यस्य यस्य यथाश्राद्धं
स करोति दिने वणिक् ॥ सोऽपि तस्य तदा स्वप्ने दर्श-
यत्यात्मनस्तनुम् । ब्रवीति च महाभाग प्रसादेन तवा-
नघ ॥ १०० ॥ प्रेतभावमिमं त्यक्त्वा प्राप्तोऽस्मि परमां
गतिम् । ततस्तु ते विमानस्था ऊचुश्च वणिजं तथा ॥
त्वया हि तारिताः सर्वे किल्बिषाद्वणिजोत्तम । प्रयामः
२४ स्वर्गतिं सर्वे इदानीं त्वत्प्रसादतः ॥ साधुसङ्गो न हि
वृथा कदाचिदपि जायते । एवमुक्त्वा गताः सर्वे विमानैः

सूर्यसन्निभैः ॥ दिव्यरूपधराः सर्वे द्योतयन्तो दिशो दश । हरिदत्तश्च तान् सर्वान्समुद्धृत्य जगाम ह ॥ स्वदेशस्थं च नगरं स्वगृहं च विवेश ह । स कृत्वा धनलोभेन प्रेतानां सद्गतिं वणिक् ॥ जगाम स्वगृहं तत्र मासि भाद्रे युधिष्ठिर । श्रवणद्वादशीयोगे पूजयित्वा जनार्दनम् ॥ दानं दत्वा च विप्रेभ्यः सोपवासो जितेन्द्रियः । सङ्गमं च महानद्योः प्रतिवर्षमतन्द्रितः ॥ चकार विधिवद्दानं ततो दृष्टान्तमागतः । अवाप परमं स्थानं दुर्लभं सर्वमानवैः ॥ यत्र कामफला वृक्षा नद्यः पायसकर्दमाः । शीतलामलपानीयाः पुष्करिण्यो मनोरमाः ॥ तद्देशमासाद्य वणिक् महात्मा प्रतप्तजाम्बूनदभूषिताङ्गः । कल्पं समग्रं सुरसुन्दरीभिः स्वर्गे सुरेमे मुदितः सदैव ॥ ११० ॥ बुधश्रवणसंयुक्ता द्वादशी सर्वकामदा । दानं दध्योदनं शस्तमुपवासः परो विधिः ॥ सगरेण ककुत्स्थेन धुन्धुमारेण गाधिना । एतैश्चान्यैश्च राजेन्द्र कामदा द्वादशी कृता ॥ या द्वादशी बुधयुता श्रवणेन सार्धं सा वै जयेति कथिता मुनिभिर्नभस्ये । तामादरेण समुपोष्य सम्यक् प्राप्नोति सिद्धिमणिमादिगुणोपपन्नाम् ॥ इति श्रीभविष्योत्तरपुराणे श्रवणद्वादशीकथा समाप्ता ॥

॥ भाद्रपदशुक्लचतुर्दश्यां अनन्तपूजाविधिः ॥

चतुर्दशी त्रिमुहूर्ताधिकव्यापिनी पूर्णिमायुता ग्राह्या, तदभावे तु पूर्वैव । उभयदिने औदयिकत्वे पूर्णत्वात्पूर्वैव । इति निर्णयसिन्धावुक्तम् । तत्र मध्याह्ने विमले जले स्नात्वा, गृहमागत्य, भूमिं गोमयेनोपलिप्य, रङ्गवल्लीभिरलङ्कृत्य, कदलीस्तम्भमण्डिते पीठे धान्यराशिं निधाय, उपरि अष्टदलं पद्मं विरच्य, तत्र आम्रपल्लवयुतं वस्त्रवे-

ष्ठितं कुम्भं संस्थाप्य, तत्पुरतः मुष्टिमात्रदर्भैः सप्तफणा-
न्वितं शेषं कृत्वा निधाय, तत्समीपे नवं सुदृढं चतुर्दश-
ग्रन्थियुतं कुङ्कुमाक्तं दोरकद्वयं निर्माय स्थाप्य पूजामारभेत।
आचम्य देशकालौ स्मृत्वा, मम सकुटुम्बस्य सपरिवार-
स्य क्षेमस्थैर्यआयुरारोग्यचतुर्विधपुरुषार्थसिद्ध्यर्थं मया
आचरितस्य अनन्तव्रतस्य यथावत्प्रतिष्ठाफलसिद्ध्यर्थं
श्रीमदनन्तप्रीत्यर्थं यथामिलितषोडशोपचारद्रव्यैः पुरुष-
सूक्तेन पुराणोक्तमन्त्रैश्च पूजनमहं करिष्ये। आदौ नि०
महागणपतिपूजनं आसनविधिं पुरुषसूक्तन्यासान् कलश-
शङ्खघण्टापूजनं च करिष्ये। गणानां त्वा० गणपतिं सम्पू-
ज्य, वक्रतुण्ड० प्रार्थयेत्। पृथ्वि त्वया०। अपसर्प तु०।
सहस्रशीर्षेति० न्यासे विनियोगः।

१ सहस्र० वामकराय०।	९ तस्माद्य० ऋ० नाभ्यै०।
२ पुरुष० दक्षिणकरा०।	१० तस्माद० हृदया०।
३ एतावा० वामपादा०।	११ यत्पुरुषं० कण्ठाय०।
४ त्रिपाद्० दक्षिणपा०।	१२ ब्राह्म० वामबाहवे०।
५ तस्माद्वि० वामजानुने०।	१३ चन्द्रमा० दक्षिणबाहवे०।
६ यत्पुरुषेण० दक्षिणजानु०।	१४ नाभ्या० मुखाय०।
७ तंयज्ञं० वामकट्यै०।	१५ सप्तास्या० नेत्राभ्यां०।
८ तस्माद्य०सं०दक्षिणकट्यै०।	१६ यज्ञे० शिरसे न०।

कलशस्य० वरुणं सम्पूज्य, शङ्खादौ० शङ्खं स०,
आगमार्थं० घण्टां च सम्पूज्य, अपवित्रः प० पूजासम्भा-
रान् प्रोक्ष्य आत्मानं प्रोक्ष्य, पीठस्थकलशे यमुनां पूजयेत्।
श्रीमदनन्तव्रताङ्गत्वेन यमुनापूजनं करिष्ये। ध्यायेत्।
लोकपावनसम्भूते इन्द्रनीलसमप्रभे। यमुने त्वामहं
ध्याये सर्वकामार्थसिद्धये॥ श्रीयमुनायै नमः यमुनां

ध्यायामि । सरस्वति नमस्तुभ्यं सर्वकामप्रदायिनि । आगच्छ देवि यमुने व्रतसम्पूर्णहेतवे ॥ गङ्गे च०, सर्वे समु०, इमंमेगंगे०, याः प्रवतो० इत्येतैर्मन्त्रैः कलशे उदकमापूर्य, आपोहिष्ठेति तिसृभिरभिमन्त्र्य, श्रीयमुनां साङ्गां सपरिवारां सायुधां सशक्तिकां आवाहयामि ॥ सिंहासनसमारूढे देवि शक्तिसमप्रभे । सर्वलक्षणसम्पूर्णे यमुनायै नमोऽस्तु ते ॥ श्रीयमुनायै० आसनं० ॥ रुद्रपादे नमस्तुभ्यं सर्वलोकहितप्रिये । सर्वपापप्रशमनि तरङ्गिण्यै नमोऽस्तु ते ॥ पाद्यं० ॥ अर्घ्यं गृहाण हेदेवि शङ्करप्रियभामिनि । सर्वकामप्रदे देवि यमुने ते नमो नमः ॥ अर्घ्यं० ॥ विष्णु पादोद्भवे देवि सर्वाभरणभूषिते । कृष्णमूर्ते महादेवि कृष्णावेण्यै नमोऽस्तु ते ॥ आचमनीयं० ॥ पञ्चामृतं मयाऽऽनीतं पयो दधि घृतं मधु । शर्कराभिः समायुक्तं स्नानार्थं प्रतिगृ० ॥ पञ्चामृतस्नानं० ॥ नन्दपादोद्भवे देवि शङ्करार्धशरीरिणि । सर्वलोकहिते देवि भीमरथ्यै नमोऽस्तु ते ॥ स्नानं० ॥ पञ्चोपचारपूजां कृत्वा, अभिषेकः । विष्णुपादाब्जसम्भूते गङ्गे त्रिपथगामिनि । सर्वपापहरे देवि भागीरथ्यै नमोऽस्तु ते ॥ वस्त्रं० ॥ पीततन्तुयुतां दिव्यां रक्तकौशेयसम्भवाम् ॥ शुभ्रन्मुक्तावलीयुक्तां कञ्चुकीं प्रतिगृ० ॥ कञ्चुकीं० ॥ माणिक्यमुक्तावलिकौस्तुभांश्च गोमेदवैडूर्यसुपुष्परागैः । वज्रैश्च नीलैश्च सुशोभितानि गृहाण सर्वाभरणानि देवि ॥ आभरणानि० ॥ कण्ठसूत्रं ताडपत्रं हरिद्रां कुङ्कुमाञ्जनम् । सिन्दूरादि प्रदास्यामि सौभाग्यं देहि मेऽव्ययम् ॥ सौभाग्यद्रव्यं० ॥ चन्दनागरुकस्तूरिरोचनं कुङ्कुमान्वितम् । कर्पूरेण समायुक्तं गन्धं दद्मि च भक्तितः ॥ चन्दनं० ॥ श्वेतांश्च चन्द्रवर्णा-

भान् हरिद्रारागरञ्जितान् । अक्षतांश्च सुरश्रेष्ठे ददामि यमुने शुभे ॥ अक्षतान्० ॥ मन्दारमालतीजातीकेतकीपाटलैः शुभैः । पूजयामि च देवेशि यमुने भक्तवत्सले ॥ पुष्पाणि० ॥

॥ अथाङ्गपूजा ॥

१ चञ्चलायै० पादौ पू० ।	८ अघहन्त्र्यै० भुजौ पू० ।
२ चपलायै० जानुनी पू० ।	९ रक्तकण्ठ्यै० कण्ठं पू० ।
३ भक्तवत्सलायै० कटी० ।	१० भवहन्त्र्यै० मुखं पू० ।
४ हरायै० नाभिं पू० ।	११ गौर्यै नमः नेत्रे पू० ।
५ मन्मथवासिन्यै० गुह्यं० ।	१२ भागीरथ्यै० ललाटं० ।
६ अज्ञाननाशिन्यै० हृद० ।	१३ यमुनायै० शिरः पू० ।
७ भद्रायै० स्तनौ पू० ।	१४ सरस्वत्यै० सर्वाङ्गं पू० ।

॥ अथ नामपूजा ॥

१ यमुनायै नमः ।	१४ कृष्णावेण्यै नमः ।
२ सितायै नमः ।	१५ भवनाशिन्यै नमः ।
३ कमलायै नमः ।	१६ सरस्वत्यै नमः ।
४ उत्पलायै नमः ।	१७ कावेर्यै नमः ।
५ अभीष्टप्रदायै नमः ।	१८ सिन्धवे नमः ।
६ विधात्र्यै नमः ।	१९ गौतम्यै नमः ।
७ हरिहररूपिण्यै नमः ।	२० गोमत्यै नमः
८ गङ्गायै नमः ।	२१ गायत्र्यै नमः ।
९ नर्मदायै नमः ।	२२ गरुडायै नमः ।
१० गौर्यै नमः ।	२३ गिरिजायै नमः ।
११ भागीरथ्यै नमः ।	२४ चन्द्रचूडामण्यै नमः ।
१२ तुङ्गायै नमः ।	२५ सर्वेश्वर्यै नमः ।
१३ भद्रायै नमः ।	२६ महालक्ष्म्यै नमः ।

सर्वपापहरे देवि सर्वोपद्रवनाशिनि ।
सर्वसम्पत्प्रदे देवि यमुनायै नमोऽस्तु ते ॥

दशाङ्गो गुग्गुलोद्भूतश्चन्दनागरुसंयुतः । कपिलाघृतसंयुक्तो धूपोऽयं प्रतिगृ० ॥ धूपमा० ॥ घृतवर्त्तिसमायुक्तं वह्निना योजितं मया । गृहाण दीपकं देवि सर्वैश्वर्यप्रदायिनि ॥ दीपं द० ॥ शर्करामधुसंयुक्तं दधि क्षीरं च सर्पिषा । पक्वमन्नं मया दत्तं नैवेद्यं प्रतिगृ० ॥ नैवेद्यं० ॥ करोद्वर्तनं स०॥ इदं फलं० फलं० ॥ पूगीफलं म० ताम्बूलं०॥ हिरण्यग० दक्षिणां० ॥ त्रैलोक्यपावने गङ्गे ह्यन्धकारविनाशिनि । पञ्चार्तिक्यं गृहाणेदं विश्वप्रीत्यै नमोऽस्तु ते ॥ आर्तिक्यदीपं द० ॥ यानि कानि च० प्रदक्षिणां०॥ अन्यथा श० नमस्कारान० ॥ केतकीजातिकुसुमैर्मल्लिकामालतीभवैः । पुष्पाञ्जलिर्मया दत्तस्तव प्रीत्यै नमोऽस्तु ते ॥ पुष्पाञ्जलिं० ॥ सुरासुरेन्द्रादिकिरीटमौक्तिकैर्युक्तं सदा यत्तव पादपङ्कजम् ॥ परावरं पातुवरं सुमङ्गलं नमामि भक्त्या मम कामसिद्धये ॥ भवानि ते महालक्ष्मि सर्वकामप्रदायिनि । व्रतं सम्पूर्णतां यातु यमुनायै नमोऽस्तु ते ॥ प्रार्थयामि ॥ अनेन पूजनेन श्रीयमुना प्रीयताम् ॥ यमुनाकलशोपरि वंशपात्रं ताम्रपात्रं वा तण्डुलपूरितं निधाय तस्योपरि अष्टदलं विरच्य तत्र शेषं स्थापयेत् ॥ शेषपूजाविधिः ॥ श्रीमदनन्तव्रताङ्गत्वेन शेषपूजनं करिष्ये ॥ अथ ध्यानम् ॥ शेषं च पन्नगाधीशं फणानेकशतोज्ज्वलम् । दिव्याम्बरधरं दीप्तं रत्नकुण्डलमण्डितम् ॥ फणासप्तान्वितं देवं पिङ्गलाक्षं चतुर्भुजम् । शङ्खचक्रगदापद्मयुक्तैर्दोर्भिः सुशोभितम् ॥ आयंगोःपृ० ॥ श्रीशेषाय नमः शेषं ध्यायामि ॥ शेषं सप्तफणायुक्तं कालीयं नागनाय-

कम् । अनन्तशयनार्थं त्वां भक्त्या चावाहयाम्यहम् ॥ आयंगौः पू०॥ आवाहनं० ॥ आयंगौरिति मन्त्रेण आसनादिपुष्पसमर्पणान्तं कृत्वा, अङ्गपूजां कुर्यात् ।

१ सहस्रपदे नमः पादौ पू० ।	८ उरगाय० स्तनौ पू० ।
२ गूढगुल्फाय० गुल्फौ पू० ।	९ कालियाय० भुजौ पू० ।
३ हेमजङ्घाय० जङ्घे पू० ।	१०कम्बुकण्ठाय० कण्ठं पू० ।
४ मन्दगतये० जानुनी पू० ।	११ विषवक्त्राय० मुखं पू० ।
५ पीताम्बरधरा०कटी पू० ।	१२ फणिभूषणा० ललाटं० ।
६गम्भीरनाभाय०नाभिं पू० ।	१३ लक्ष्मणाय० शिरः पू० ।
७ पवनाशनाय० उदरं पू० ।	१४ अनन्तप्रिया० सर्वाङ्गं पू० ।

आयंगौरित्यनेन धूपादिनमस्कारान्तं कृत्वा, प्रार्थयेत् । अनन्तव्रतकल्पोक्तं फलं देहि फणाधिप । त्वत्पूजारहितश्चाथ फलं नाप्नोति कर्हिचित् ॥ अनेन मया कृतेन पूजनेन श्रीशेषः प्रीयताम् ।

अनन्तदोरकपूजाविधिः। प्राणायामं कृत्वा षडङ्गन्यासं कुर्यात् ।

ॐ नमो भगवते वासुदेवाय, हृदयाय नमः ।
ॐ नमो भगवते नारायणाय, शिरसे स्वाहा ।
ॐ नमो भगवते विष्णवे, शिखायै वषट् ।
ॐ नमो भगवते पद्मनाभाय, कवचायहुम् ।
ॐ नमो भगवते श्रीधराय, नेत्रत्रयायवौषट् ।
ॐ नमो भगवते नृसिंहाय, अस्त्रायफट् ।
ॐ भूर्भुव० इति दिग्बन्धः ।

चतुर्दशग्रन्थियुतकुङ्कुमाक्तदोरकद्वयस्य मोहिनीसहितअनन्तसंज्ञकस्य प्राणप्रतिष्ठां कुर्यात् । अद्य पूर्वोच्च० मोहिनीसहितश्रीमदनन्तप्राणप्रतिष्ठां करिष्ये । अस्य

श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः। ऋग्यजुः सामाथर्वाणि च्छन्दांसि। पराप्राणशक्तिर्देवता। आं बीजम्। ह्रीं शक्तिः। क्रों कीलकम्। मोहिनीसहितश्रीमदनन्तस्य प्राणप्रतिष्ठापने विनियोगः। ॐ आंह्रींक्रों अंयंरंलंवंशंषंसंहंळंक्षंअः। क्रोंह्रींआं। मोहिनीसहितश्रीमदनन्तस्य प्राणा इह प्राणाः। ॐ आंह्रीं० जीव इह स्थितः। ॐ आंह्रीं० सर्वेन्द्रियाणि, वाङ्मनस्त्वक्चक्षुश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि सुखं चिरं तिष्ठन्तु स्वाहा। असुनी०। गर्भाधानादिपञ्चदशसंस्कारसिध्यर्थं पञ्चदशप्रणवावृत्तीः करिष्ये। ॐ १५। रक्ताम्भो० परानः। तच्चक्षुरिति मन्त्रेण नेत्रोन्मीलनं कृत्वा, नैवेद्यं समर्पयेत्। अनेन प्राणप्रतिष्ठापनेन श्रीमदनन्तः प्रीयताम्।

॥ पूर्णपात्रे पीठदेवता आवाहयेत् ॥

(मध्ये)	(दक्षिणद्वारे)	५ वह्निमण्डलाय नमः।
१ श्रीमदनन्ताय नमः।	१ केसरेभ्यो नमः।	(उत्तरद्वारे)
२ योगाय नमः।	२ कर्णिकाभ्यो नमः।	१ वह्निमण्डलाधिपतये०।
३ विमलाय नमः।	३ आचाराय नमः।	२ रुद्राय नमः।
४ अनन्तासनाय नमः।	४ अनाचाराय नमः।	३ धर्माय नमः।
(पूर्वद्वारे)	५ ज्ञानाय नमः।	४ अधर्माय नमः।
१ कूर्माय नमः।	६ अज्ञानाय नमः।	(मध्ये)
२ वास्तुपुरुषाय नमः।	७ ऐश्वर्याय नमः।	१ सत्वात्मने नमः।
३ क्षेत्रपालाय नमः।	(पश्चिमद्वारे)	२ रजसे नमः।
४ स्कन्दाय नमः।	१ सूर्यमण्डलाय नमः।	३ तमसे नमः।
५ नागाय नमः।	२ सूर्याधिपतये नमः।	४ मनसे नमः।
६ पद्माय नमः।	३ ब्रह्मणे नमः।	५ आत्मने नमः।
७ पद्मपत्रेभ्यो नमः।	४ सोममण्डलाय नमः।	६ परमात्मने नमः।

अथ ध्यानम् । नवाम्रपल्लवाभासं पिङ्गभ्रूश्मश्रुलोचनम् ।
पीताम्बरधरं देवं विश्वरूपं विचिन्तये ॥ सहस्र० । आग-
च्छानन्त देवेश तेजोराशे जगत्पते । इमां मया कृतां पूजां
गृहाण पुरुषोत्तम ॥ श्रीमोहिनीसहितानन्ताय नमः अन-
न्तं साङ्गं सपरिवारं सायुधं सशक्तिकं आवाहयामि ॥ त-
दस्तु० गृहाणैप्रति० ॥ पुरुषए० । विष्टरं धेहि गोविन्द गोव-
र्धनधर प्रभो । अनन्त दीयते यन्मे रत्नसिंहासने विश ॥
श्रीमोहिनीसहितश्रीमदनन्ताय नमः आसनं० ॥ एता-
वा० । यथा त्वं सर्वदेवानामिन्द्रादीनां च रक्षकः । तथा
मां पालयानन्त त्वदङ्घ्रिशरणागतम् ॥ पाद्यं० ॥ त्रिपाद्० ।
अनन्तानन्त देवेश अनन्तफलदायक । अनन्तानन्तरूपोऽ-
सि गृहाणार्घ्यं नमोऽस्तु ते ॥ अर्घ्यं० ॥ तस्माद्वि० । गङ्गो-
दकं समानीतं हेमकुम्भेन योजितम् । आचम्यतां हृषी-
केश प्रसीद पुरुषोत्तम ॥ आचमनीयं० ॥ मधुवाताऋ० ।
दधि क्षौद्रं घृतं चैव गुडखण्डविमिश्रितम् ॥ तुष्ट्यर्थं
सर्वदेवानां मधुपर्कं ददामि ते ॥ मधुपर्कं० ॥ यत्पुरुषे० ।
अनन्तगुणरूपाय विश्वरूपधराय च । नमो माहात्म्यदे-
वाय अनन्ताय नमो नमः ॥ स्नानं० ॥ आप्याय० ।
सुरभेस्तु समुत्पन्नं देवानामपि दुर्लभम् । पयो ददामि देवेश
स्नानाय प्रतिगृ० ॥ पयस्नानं० ॥ चन्द्रमण्डलसङ्काशं
सर्वदेवप्रियं हि तत् । ददामि दधि देवेश स्नानार्थं प्रति० ॥
दधिस्नानं० ॥ घृतंमि० । घृतकुम्भसमायुक्तं घृतयोनेर्घृ-
तप्रिय । घृतभुग् घृतधामासि घृतं स्नानाय गृ० ॥ घृत-
स्नानं० ॥ मधुवाताऋ० । मधुरूपो वसन्तस्त्वं त्वमेव-
२५ जगतां मधु । मधुसूदनसम्प्रीत्या मधु स्नानाय गृह्यताम् ॥
मधुस्नानं० ॥ स्वादुःपव० । इक्षुदण्डात्समुद्भूतां शर्करां

मधुरां शुभाम् । स्नानाय ते मया दत्तां गृहाण परमेश्वर॥ शर्करास्नानं० ॥ गन्धद्वारां० गन्धोदकस्नानं० ॥ कनिक्रदज्ज० अभ्यङ्गअङ्गोद्वर्तनउष्णोदकस्नानं० ॥ नाममन्त्रेण पञ्चोपचारपूजां कृत्वा पुरुषसूक्तविष्णुसूक्तेनाभिषेकः । तंयज्ञं० । तप्तकाञ्चनवर्णाभं कौशेयं च सुनिर्मितम् । वस्त्रं गृहाण देवेश लक्ष्मीयुक्त नमोऽस्तु ते ॥ वस्त्रं० ॥ वस्त्रान्ते आचमनीयं०॥ तस्माद्यज्ञा० सं०। दामोदर नमस्तेऽस्तु त्राहि मां भवसागरात् । ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम ॥ यज्ञोपवीतं०॥ यज्ञोपवीतानन्तरेण आचमनीयं०। तस्माद्य० ऋ० । श्रीखण्डं चन्दनं० चन्दनं० ॥ अक्षताश्च सु० अक्षतान्० । अहिरिव भोगैः प० सौभाग्यद्रव्यं० नानापरिमलद्रव्यं स० ॥ तस्मादश्वा० । माल्यादीनि सु० पुष्पाणि स० ॥

॥ अथ अनन्तग्रन्थिपूजा ॥

१ अनन्ताय नमः प्रथमग्रन्थिं पू० ।	८ भास्कराय० अष्टमग्रन्थिं पू० ।
२ कालरूपाय० द्वितीयग्रन्थिं पू० ।	९ शेषाय नमः नवमग्रन्थिं पू० ।
३ विष्णवे नमः तृतीयग्रन्थि पू० ।	१० सर्वव्यापिने० दशमग्रन्थिं पू० ।
४ महाविष्णवे चतुर्थग्रन्थि पू० ।	११ ईशानाय नमः एकादशग्रन्थि पू० ।
५ हरये नमः पञ्चमग्रन्थि पू० ।	१२ विश्वरूपाय० द्वादशग्रन्थिं पू० ।
६ शिवाय नमः षष्ठग्रन्थि पू० ।	१३ महात्मने न० त्रयोदशग्रन्थि पू० ।
७ ब्रह्मणे नमः सप्तमग्रन्थिं पू० ।	१४ स्थितिधराय०चतुर्दशग्रन्थि पू० ।

॥ अथ मोहिनीग्रन्थिपूजा ॥

१ श्रियै नमः प्र० ग्रं० पू० ।	८ शुभायै नमः अष्टमग्रं० पू० ।
२ मोहिन्यै न० द्वि० ग्रं० पू० ।	९ जयायै नमः नवमग्रं० पू० ।
३ पद्मिन्यै न० तृती० ग्रं० पू० ।	१० विजयायै० दशमग्रं० पू० ।
४ महाबलायै० च० ग्रं० पू० ।	११ जयन्त्यै नमः एकाद० ग्रं० पू० ।
५ अजायै नमः पञ्च० ग्रं० पू० ।	१२ पापनाशिन्यै० द्वादशग्रं० पू० ।
६ मङ्गलायै न० षष्ठग्रन्थि पू० ।	१३ विश्वरूपायै० त्रयोदशग्रं० पू० ।
७ वरदायै नमः सप्तमग्रं० पू० ।	१४ सर्वमङ्गलायै० चतुर्दशग्रं० पू० ।

॥ अथाङ्गपूजा ॥

१ मत्स्याय नमः पादौ पू० ।
२ कूर्माय नमः गुल्फौ पू० ।
३ वराहाय न० जानुनी पू० ।
४ नारसिंहा० उरू पू० ।
५ वामनाय० कटी पू० ।
६ रामाय नमः उदरं पू० ।
७ श्रीरामाय० हृदयं पू० ।
८ कृष्णाय न० मुखं पू० ।
९ सहस्रशिरसे० शिरः पू० ।
१० श्रीमदनन्ताय० सर्वाङ्गं पू० ।

॥ आवरणपूजा ॥

अनन्तस्य दक्षिणपार्श्वे रमायै नमः । वामपार्श्वे भूम्यै नमः । इति प्रथमावरणम् । आवरणदेवता आवाह्य हस्तं प्रक्षाल्य गन्धपुष्पं तर्जनीमध्यमाङ्गुष्ठैर्धृत्वा मध्ये शङ्खोदकं गृहीत्वा, दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति मन्त्रमुच्चार्य शङ्खोदकं भूमौ निक्षिप्य पुष्पं देवोपरि न्यसेत् । एवं सर्वत्र ।

पूर्वादिक्रमेण । वृद्धोल्काय न० १ । महोल्काय० २ । शतोल्काय० ३ । सहस्रोल्काय० ४ । दयाब्धे० द्वितीयावरणार्चनम् ॥ २ ॥

वासुदेवाय० १ । सङ्कर्षणाय० २ । प्रद्युम्नाय० ३ । अनिरुद्धाय० ४ । दयाब्धे० तृतीयावरणार्चनम् ॥ ३ ॥

प्राच्याम् । केशवाय० १ । नारायणाय० २ । माधवाय० ३ । गोविन्दाय० ४ । विष्णवे० ५ । मधुसूदनाय० ६ । त्रिविक्रमाय० ७ । वामनाय० ८ । श्रीधराय० ९ । हृषीकेशाय० १० । पद्मनाभाय० ११ । दामोदराय० १२ । दयाब्धे० चतुर्थावरणार्चनम् ॥ ४ ॥

पूर्वादिक्रमेण । मत्स्याय० १ । कूर्माय० २ । वराहाय० ३ । नारसिंहाय० ४ । वामनाय न० ५ । परशुरामाय० ६ । श्रीरामाय० ७ । कृष्णाय० ८ । बौद्धाय० ९ । कल्किने० १० । अनन्ताय० ११ । विश्वरूपिणे न० १२ । दयाब्धे० पञ्चमावरणार्चनम् ॥ ५ ॥

पूर्वादिक्रमेण । अनन्ताय० १ । दक्षिणायाम्, ब्रह्मणे न० २ । पश्चिमायाम्, वायवे न० ३ । उत्तरायाम्, ईशानाय० ४ । आग्नेय्याम्, वारुण्यै० ५ । नैर्ऋत्याम्, गायत्र्यै न० ६ । वायव्याम्, भारत्यै० ७ । ईशान्यां गिरिजायै० ८ । अग्रे, गरुडाय० ९ । वामे, सुपुण्याय० १० । दयाब्धे० षष्ठावरणार्चनम् ॥ ६ ॥

पूर्वादिक्रमेण । इन्द्राय० १ । अग्नये० २ । यमाय० ३ । निर्ऋतये० ४ । वरुणाय० ५ । वायवे० ६ । सोमाय० ७ । ईशानाय० ८ । दयाब्धे० सप्तमावरणार्चनम् ॥ ७ ॥

आग्नेय्याम्, शेषाय० १ । नैर्ऋत्याम्, विष्णवे० २ । वायव्याम्, विधये० ३ । ईशान्याम्, प्रजापतये० ४ । दयाब्धे० अष्टमावरणार्चनम् ॥ ८ ॥

आग्नेय्याम्, गणपतये० १ । नैर्ऋत्याम, सप्तमातृभ्यो नमः २ । वायव्याम्, दुर्गायै० ३ । ईशान्याम्, क्षेत्राधिपतये नमः ४ । दयाब्धे० नवमावरणार्चनम् ॥ ९ ॥

मध्ये, ब्रह्मणे न० १ । भास्कराय० २ । शेषाय० ३ । सर्वव्यापिने० ४ । ईश्वराय० ५ । विश्वरूपाय० ६ । महाकामाय० ७ । सृष्टिकर्त्रे० ८ । कृष्णाय० ९ । हरये नमः १० ।

शिवाय० ११ । स्थितिकारकाय० १२ । अन्तकाय० १३ । दयाब्धे० दशमावरणार्चनम् ॥ १० ॥

पूर्वे, शौरये० १ । वैकुण्ठाय० २ । महाबलाय० ३ । पुरुषोत्तमाय० ४ । अजाय० ५ । पद्मनाभाय० ६ । मङ्गलाय० ७ । हृषीकेशाय० ८ । वरदाय० ९ । माधवा० १० । मधुसूदनाय० ११ । अच्युता० १२ । अनन्ताय० १३ । गोविन्दाय० १४ । विजयाय० १५ । अपराजिताय० १६ । कृष्णाय० १७ । दयाब्धे० एकादशावरणार्चनम् ॥ ११ ॥

अनन्ताय० १ । कपिलाय० २ । शेषाय० ३ । सङ्कर्षणाय० ४ । हलायुधाय० ५ । तारणाय० ६ । सीरपाणये० ७ । बलभद्राय० ८ । दयाब्धे० द्वादशावरणार्चनम् ॥१२॥

क्षीराब्धिशायिने० १। अच्युताय० २। भूम्याधाराय० ३। लोकनाथाय० ४। फणामणिविभूषणाय० ५। सहस्रमूर्ध्ने न० ६ । सहस्रार्चिषे नमः ७। दयाब्धे० त्रयोदशावरणार्चनम् ॥ १३ ॥

केशवाय० १। नारायणाय० २। माधवाय० ३। गोविन्दाय० ४। विष्णवे० ५। मधुसूदनाय० ६। त्रिविक्रमाय० ७। वामनाय० ८। श्रीधराय० ९। हृषीकेशाय० १०। पद्मनाभाय० ११। दामोदराय० १२। सङ्कर्षणाय० १३। वासुदेवाय० १४ । प्रद्युम्नाय० १५ । अनिरुद्धाय० १६ । पुरुषोत्तमा० १७। अधोक्षजाय० १८। नारसिंहाय० १९। अच्युताय० २०। जनार्दनाय० २१। उपेन्द्राय० २२। हरये न० २३। श्रीकृष्णा० २४। दयाब्धे० चतुर्दशावरणार्चनम् ॥ १४ ।

॥ इत्यावरणं समाप्तम् ॥

॥ अथ पत्रपजा ॥

१ कृष्णाय० पलाशपत्रं० ।
२ विष्णवे० औदुम्बरपत्रं० ।
३ हरये न० अश्वत्थपत्रं० ।
४ शम्भवे० भृङ्गिराजपत्रं० ।
५ ब्रह्मणे० तुलसीपत्रं० ।
६ भास्करा० अशोकपत्रं० ।
७ शेषाय० कपित्थपत्रं० ।
८ सर्वव्यापिने० वटपत्रं० ।
९ ईश्वराय न० आम्रपत्रं० ।
१० विश्वरूपिणे०कदलीपत्रं० ।
११ महाकायाय०अपामार्गपत्रं० ।
१२ सृष्टिकर्त्रे न०करवीरपत्रं० ।
१३ स्थितिकर्त्रे०पुन्नागपत्रं० ।
१४ अन्तकाय०नागवल्लीपत्रं० ।

॥ अथ पुष्पपूजा ॥

१ अनन्ताय० पद्मपुष्पं० ।
२ विष्णवे न० जातीपुष्पं० ।
३ केशवाय० चम्पकपुष्पं० ।
४ अव्यक्ताय० कल्हारपुष्पं० ।
५ सहस्रजिते० केतकीपुष्पं० ।
६ अनन्तरूपिणे० वकुलपुष्पं० ।
७ इष्टाय न० शतपुष्पं० ।
८ विशिष्टा० पुन्नागपुष्पं० ।
९ शिष्टेष्टाय० करवीरपुष्पं० ।
१० शिखण्डिने०धत्तूरपुष्पं स० ।
११ नहुषाय० कुन्दपुष्पं० ।
१२ विश्वबाहवे० मल्लिकापुष्पं० ।
१३ महीधराय०मालतीपुष्पं० ।
१४ अच्युताय०गिरिकर्णिकापुष्पं० ।

॥ अथ अष्टोत्तरशतनामभिः पूजयेत् ।

१ अनन्ताय नमः ।
२ अच्युताय नमः ।
३ अद्भुतकर्मणे नमः ।
४ अमितविक्रमाय० ।
५ अपराजिताय० ।
६ अखण्डाय नमः ।
७ अग्निनेत्राय न० ।
८ अग्निवपुषे नमः ।
९ अदृश्याय नमः ।
१० अग्निपुत्राय० ।
११ अनुकूलाय० ।
१२ अविनाशिने न० ।
१३ अनघाय नमः ।
१४ अप्सुनिलयाय० ।
१५ अहरहाय नमः ।
१६ अष्टमूर्तये न० ।
१७ अनिरुद्धाय न०
१८ अनिर्विण्णाय० ।
१९ अचञ्चलाय न० ।
२० अब्दादिकाय० ।
२१ अचलरूपाय० ।
२२ अखिलाधारा० ।
२३ अव्यक्ताय न० ।
२४ अनुरूपाय न० ।
२५ अभयङ्कराय० ।
२६ अक्षताय न० ।
२७ अवपुषे नमः ।
२८ अयोनिजाय० ।
२९ अरविन्दाक्षाय० ।
३० अशनवर्जिता० ।
३१ अधोक्षजाय० ।
३२ अदितिपुत्राय न० ।
३३ अम्बिकापतिपूर्वजाय नमः ।
३४ अपस्मारनाशि० ।
३५ अव्ययाय नमः ।

३६ अनादिने नमः ।
३७ अप्रमेयाय न० ।
३८ अघशत्रवे नमः ।
३९ अमरारिघ्ने न० ।
४० अनीश्वराय नमः ।
४१ अजाय नमः ।
४२ अघोराय नमः ।
४३ अनादिनिधनाय०
४४ अमरप्रभवे न० ।
४५ अग्राह्याय न० ।
४६ अक्रूराय नमः ।
४७ अनुत्तमाय नमः ।
४८ अरूपाय नमः ।
४९ अन्हे नमः ।
५० अमोघाधिपतये० ।
५१ अजाय नमः ।
५२ अक्षमाय न० ।
५३ अमृताय न० ।
५४ अघोरवीर्या० ।
५५ अव्यङ्गाय न० ।
५६ अविघ्नाय नमः ।
५७ अतीन्द्रियाय० ।
५८ अमिततेजसे० ।
५९ असितये नमः ।
६० अष्टमूर्तये न० ।
६१ अनिलाय न० ।
६२ अवशाय न० ।
६३ अणोरणीयसे० ।
६४ अशोकाय नमः ।
६५ अरविन्दाक्षाय० ।
६६ अधिष्ठाय न० ।
६७ अमिततनयाय० ।
६८ अरण्यवासिने० ।
६९ अप्रमत्ताय न० ।
७० अनन्तरूपाय० ।
७१ अनलाय नमः ।
७२ अनिमिषाय० ।
७३ अस्त्ररूपाय० ।
७४ अग्रगण्याय० ।
७५ अप्रमिताय० ।
७६ अन्तकाय नमः ।
७७ अचिन्त्याय नमः ।
७८ अपां निधये न० ।
७९ अतिसुन्दराय न०
८० अमरप्रियाय०
८१ अष्टसिद्धिप्रदाय० ।
८२ अरविन्दप्रिया० ।
८३ अरविन्दोद्भवाय० ।
८४ अनयाय नमः ।
८५ अर्थाय नमः ।
८६ अक्षोभ्याय न० ।
८७ अर्चिष्मते नमः ।
८८ अनेकमूर्तये० ।
८९ अनन्तब्रह्माण्डपतये०
९० अनन्तशयनाय० ।
९१ अमराधिपतये न० ।
९२ अनाधाराय नमः ।
९३ अनन्तनाम्ने नमः ।
९४ अनन्तश्रिये नमः ।
९५ अक्षराय नमः ।
९६ अमाय नमः ।
९७ आश्रमस्थाय नमः
९८ आश्रमातीताय० ।
९९ अन्नाय नमः ।
१०० अन्नादाय नमः ।
१०१ आत्मयोनये न० ।
१०२ अवनीपतये० ।
१०३ अवनीधराय० ।
१०४ अनादिने नमः ।
१०५ आदित्याय० ।
१०६ सहस्रजिते० ।
१०७ अनन्तरूपिणे० ।
१०८ अपवर्गप्रदा० ।

यत्पुरुषं० । दशाङ्गं गुग्गुलोद्भूतं चन्दनागरुसंयुतम् । सर्वेषामुत्तमं धूपं गृहाण सुरपूजित ॥ धूपं० । ब्राह्मणोऽस्य० । आज्यं च० दीपं० । चन्द्रमा० । अन्नं चतुर्विधं स्वादु पयो दधि घृतं तथा । नानाव्यञ्जनसंयुक्तं नैवेद्यं प्रति० ॥ नैवेद्यं० । उत्तरापोशनार्थं ते दद्मि तोयं सुवासितम् ॥ गृहाण सुमुखो भूत्वा अनन्ताय नमो नमः ॥ उत्तरापोशनं० ।

हस्तप्र० । मुखप्र० । करोद्वर्तनकं देव मया दत्तं हि शक्तितः । चारु चन्द्रप्रभं दिव्यं गृहाण जगदीश्वर ॥ करोद्वर्तनं० । इदं फलं० फलं० । पूगीफलं महद्दिव्यं० ताम्बूलं० । हिरण्यगर्भ० दक्षिणां० । नाभ्याआसी० । यानि कानि च० प्रदक्षिणां० । सप्तास्यासन्० । नमस्ते भगवन् भूयो नमस्ते धरणीधर । नमस्ते सर्वनागेन्द्र नमस्ते मधुसूदन ॥ नमस्कारान्० । श्रियेजातः० कर्पूरदीपं० । यज्ञेनयज्ञ० । मालतीमल्लिकापुष्पैः शतपत्रैः समन्वितम् । पुष्पाञ्जलिं गृहाणेश पादाम्बुज इहार्पितम् ॥ पुष्पाञ्जलिं० । अथ दोरकप्रार्थना । अनन्ताय नमस्तुभ्यं सहस्रशिरसे नमः । नमोऽस्तु पद्मनाभाय नागानां पतये नमः ॥ इति प्रार्थयेत् । अनन्तसंसारमहासमुद्रमग्नं समभ्युद्धर वासुदेव । अनन्तरूपे विनियोजयस्व ह्यनन्तसूत्राय नमो नमस्ते ॥ इति दोरकं गृहीत्वा, संसारसागरगुहासु सुखं विहर्तुं वाञ्छन्ति ये कुरुकुलोद्भवशुद्धसत्वाः । सम्पूज्य च त्रिभुवने शमनं तदेवं बध्नन्ति दक्षिणकरे वरदोरकं ते ॥ इति दोरकं दक्षिणकरे बध्वा, जीर्णदोरकं पञ्चोपचारैः सम्पूज्य, नमः सर्वहितार्थाय जगदानन्दकारक । जीर्णदोरममुं देव विसृजेऽहं त्वदाज्ञया ॥ इति विसृजेत् । पूर्वोच्च० जीर्णदोरकदानं करिष्ये । तदङ्गं ब्राह्मणपूजनं करिष्ये । अनन्तस्वरू० इदमासनमित्यादिना ब्राह्मणं सम्पूज्य, प्रार्थयेत् । अनन्तानन्त देवेश अनन्तफलदायक । अनन्तानन्तरूपेण अनन्ताय नमो नमः ॥ स्वस्त्यस्तु दी० । जीर्णदोरकदानमन्त्रः—प्रतिगृह्ण द्विजश्रेष्ठ अनन्तफलदायक । त्वत्प्रसादादहं विप्र मुच्येयं कर्मबन्धनात् ॥ अनन्तः प्रतिगृह्णाति अनन्तो वै ददाति च । अनन्तस्तारकोभाभ्यामनन्ताय

नमो नमः ॥ इदं जीर्णदोरकदानं सदक्षिणाकं सताम्बूलं
॥२०१॥ अमुकश० । प्रति० । पूजासाङ्गतासिध्यर्थं ब्राह्मणाय
चतुर्दशसङ्ख्याकअपूपवायनदानं करिष्ये । तदङ्गब्राह्मणपू-
जनं क० । अनन्तस्वरू० इदमासनमित्यादिना ब्राह्मणं
सम्पूज्य, स्वस्त्यस्तु दी० । पक्वान्नफलसंयुक्तं सधान्यं
घृतसंयुतम् । गृहाणेदं द्विजश्रेष्ठ वायनं दक्षिणायुतम् ॥ इदं
चतुर्दशसङ्ख्याकअपूपवायनदानं सोपस्करं अमुकशर्म० ।
प्रति० । देवस्यत्वा० प्रतिगृह्णामि । इति विप्रः पठेत् ।
दानसाङ्गतासि० इमां द० । प्रार्थना—अनन्तः सर्वनागा-
नामधिपः सर्वकामदः । व्रतेनानेन सुप्रीतो भवत्विह सदा
मम । कृतस्य क० यथाशक्ति ब्राह्मणान् दम्पती च भोज-
यिष्ये । नानानामगो० भूयसीदक्षिणां दा० । न्यूनाति-
रिक्तानि परिस्फुटानि यानीह कर्माणि मया कृतानि ।
क्षम्याणि चैतानि मम क्षमस्व प्रयाहि तुष्टः पुनरागमाय ॥
यान्तु देवग० । इति पीठदेवता विसर्जयेत् । यस्य स्मृ० ।
अनेन यथाज्ञा० मया कृतेन पूजनेन श्रीमदनन्तः प्रीय-
ताम् । कथां शृणुयात् ।

॥ अथ अनन्तव्रतकथाप्रारम्भः ॥

सूत उवाच । अरण्ये वर्तमानास्ते पाण्डवा दुःख-
कर्शिताः । कृष्णं दृष्ट्वा महात्मानं प्रणिपत्य यथाक्रमम् ॥
युधिष्ठिर उवाच । अहं दुःखीह सञ्जातो भ्रातृभिः परि-
वारितः । कथं मुक्तिर्भवेदस्माकमनन्ताद् दुःखसागरात् ॥
कं देवं पूजयिष्यामि राज्यं प्राप्स्याम्यनुत्तमम् । अथवा
२६ किं व्रतं कृत्वा त्वत्प्रसादाद्भवेद्धितम् ॥ श्रीकृष्ण उवाच ।
अनन्तव्रतमस्त्येकं तिथावस्यामनुत्तमम् । सर्वपापहरं नृणां

स्त्रीणां चैव युधिष्ठिर ॥ शुक्लपक्षे चतुर्दश्यां मासि भाद्र-
पदे भवेत् । तस्यानुष्ठानमात्रेण सर्वपापं व्यपोहति ॥
युधिष्ठिर उवाच । कृष्ण कोऽयमनन्तेति प्रोच्यते यस्त्वया
विभो । किं शेषनाग आहोस्विदनन्तस्तक्षकः स्मृतः ॥
परमात्माथवानन्त उताहो ब्रह्म गीयते । क एषोऽनन्तसंज्ञो
वै तथ्यं मे ब्रूहि केशव ॥ कृष्ण उवाच । अनन्त इत्यहं पार्थ
मम रूपं निबोधत ॥ आदित्यादिग्रहात्मासौ यः काल इति
पठ्यते ॥ कलाकाष्ठामुहूर्तादिदिवारात्रिशरीरवान् । पक्षमा-
सर्तुऋक्षाणि युगकालव्यवस्थया ॥ १० ॥ योऽयं कालो
मयाऽऽख्यातः सोऽनन्त इति कीर्त्यते । सोऽहं कृष्णोऽवती-
र्णोऽत्र भूभारोत्तारणाय च ॥ दानवानां वधार्थाय वसुदेव-
कुलोद्भवम् । मां विद्धि सततं पार्थ साधूनां पालनाय च ॥
अनादिमध्यनिधनं कृष्णं विष्णुं हरिं शिवम् ॥ वैकुण्ठं
भास्करं सोमं सर्वव्यापिनमीश्वरम् ॥ विश्वरूपं महाबाहो
योगिध्येयमनुत्तमम् । विश्वरूपमनन्तं च यस्मिन्निन्द्राश्च-
तुर्दश ॥ वसवो द्वादशादित्या रुद्रा एकादश स्मृताः । सप्त-
र्षयः समुद्राश्च पर्वताः सरितो द्रुमाः ॥ नक्षत्राणि दिशो
भूमिः पातालं भूर्भुवादिकम् । मा कुरुष्वात्र सन्देहं सोऽहं
पार्थ न संशयः ॥ युधिष्ठिर उवाच । अनन्तव्रतमाहात्म्यं
विधिं वेदविदां वर । किं पुण्यं किं फलं चास्य अनुष्ठानवतां
नृणाम् ॥ केन चादौ पुरा चीर्णं मर्त्ये केन प्रकाशितम् । एवं
सविस्तरं सर्वं ब्रूह्यनन्तव्रतं मम ॥ कृष्ण उवाच ॥ आसी-
त्पुरा कृतयुगे सुमन्तुर्नाम वै द्विजः । वसिष्ठगोत्रसम्भूतां
सुरूपां च भृगोः सुताम् ॥ दीक्षानाम्नीं चोपयेमे वेदोक्तवि-
धिना नृप । तस्याःकालेन सञ्जाता दुहितानन्तलक्षणा
॥ २० ॥ शीलानाम्नी सुशीला सा वर्धते पितृवेश्मनि ।

॥२०३॥

माता च तस्याः कालेन ज्वरदाहेन पीडिता ॥ विनष्टा सा नदीतोये ययौ स्वर्गं पतिव्रता । सुमन्तुस्तु ततोऽन्यां वै धर्मपुंसः सुतां पुनः ॥ उपयेमे विधानेन दुःशीलां नाम नामतः । दुःशीलां कर्कशां चण्डीं नित्यं कलहकारिणीम् ॥ सापि शीला पितुर्गेहे गृहार्चनपरा बभौ । कुड्यस्तम्भबहिर्द्वारदेहलीतोरणादिषु । वर्णकैश्चित्रमकरोन्नीलपीतसितासितैः ॥ स्वस्तिकैः शङ्खपद्मैश्च अर्चयन्ती पुनः पुनः ॥ ततः काले बहुगते कौमारवशवर्तिनी । एवं सा वर्धते शीला पितृवेश्मनि मङ्गला ॥ तां दृष्ट्वा चिन्तयामास वरानुगुणान्भुवि । कस्मै देया मया कन्या विचार्येति सुदुःखितः ॥ एतस्मिन्नेव काले तु मुनिर्वेदविदां वरः । कन्यार्थी चागतः श्रीमान् कौण्डिण्यो मुनिसत्तमः ॥ उवाच रूपसम्पन्नां त्वदीयां तनयां वृणे । पिता ददौ द्विजेन्द्राय कौण्डिण्याय शुभे दिने । गृह्योक्तविधिना पार्थ विवाहमकरोत्तदा । मङ्गलाचारनिर्घोषं तत्र कुर्वन्ति योषितः ॥ ३० ॥ ब्राह्मणाः स्वस्तिवचनं जयघोषं च बन्दिनः । निर्वर्त्यौद्वाहिकं सर्वं प्रोक्तवान् कर्कशां द्विजः ॥ सुमन्तुरुवाच । किञ्चिद्दायादिकं देयं जामातुः परितोषकम् । तच्छ्रुत्वा कर्कशा क्रुद्धा प्रोत्सार्य गृहमण्डनम् ॥ पेटके सुस्थिरं बध्वा स्वगृहं गम्यतामिति । उवाच वित्तं नैवास्ति गृहे पश्य यदि स्थितम् ॥ तच्छ्रुत्वा विमनाः पार्थ संयतात्मा मुनिस्तदा । भोज्यावशिष्टचूर्णेन पाथेयं च चकार सा ॥ कौण्डिण्योऽपि विवाह्यैनां पथि गच्छन् शनैः शनैः । शीलां सुमन्तोरादाय नवोढां गोरथेन हि ॥ ददर्श यमुनां पुण्यां तामुत्तीर्य तटे रथम् । संस्थाप्यावश्यकं कर्तुं गतः शिष्यान्नियुज्य वै ॥ मध्याह्ने भोज्यवेलायां समुत्तीर्य सरित्तटे । ददर्श शीला सा स्त्रीणां समूहं

रक्तवाससम् ॥ चतुर्दश्यामर्चयन्तं भक्त्या देवं जनार्द-
॥२०४॥ नम् । उपगम्य शनैः शीला पप्रच्छ स्त्रीकदम्बकम् ॥
आर्याः किमेतन्मे ब्रूत किं नाम व्रतमीदृशम् । ता ऊचुर्योषि-
तस्तां तु शीलां शीलविभूषणाम् ॥ अनन्तव्रतमेतद्धि व्रते-
ऽनन्तस्तु पूज्यते । साऽब्रवीदहमप्येतत्करिष्ये व्रतमुत्तमम्
॥ ४० ॥ विधानं कीदृशं तत्र किं दानं कोऽत्र पूज्यते । स्त्रिय
ऊचुः । शीले सदन्नप्रस्थस्य पुन्नाम्ना संस्कृतस्य च ॥
अर्धं विप्राय दातव्यमर्धमात्मनि भोजनम् । शक्त्या च
दक्षिणां दद्याद्वित्तशाठ्यविवर्जितः ॥ कर्तव्यं यत्सरित्तीरे
कथां श्रुत्वा हरेरिमाम् । शेषं कुशमयं कृत्वा वंशपात्रे नि-
धाय च ॥ स्नात्वाऽनन्तं समभ्यर्च्य मण्डले दीपगन्धकैः ।
पुष्पैर्धूपैश्च नैवेद्यैर्नानापक्वान्नसंयुतैः ॥ तस्याग्रतो दृढं सूत्रं कु-
ङ्कुमाक्तं सुदोरकम् । चतुर्दशग्रन्थियुतं वामे करतले न्यसेत् ॥
अनन्तसंसारमहासमुद्रमग्नं समभ्युद्धर वासुदेव । अन-
न्तरूपे विनियोजयस्व ह्यनन्तसूत्राय नमो नमस्ते ॥ अन-
न्तं च करे बध्वा भोक्तव्यं स्वस्थमानसैः । ध्यात्वा नारा-
यणं देवमनन्तं विश्वरूपिणम् । भुक्त्वा चान्ते व्रजेद्वेश्म
भद्रे प्रोक्तं व्रतं तव ॥ कृष्ण उवाच ॥ एवमाकर्ण्य राजेन्द्र
प्रहृष्टेनान्तरात्मना । सापि चक्रे व्रतं शीला करे बध्वा
सुदोरकम् ॥ चतुर्दशग्रन्थियुतं वामे बाहौ यथोदितम् ।
पाथेयमर्धं विप्राय दत्वा भुक्त्वा स्वयं ततः ॥ पुनर्जगाम
संहृष्टा गोरथेन स्वकं गृहम् । भर्त्रा सहैव शनकैः प्रत्ययस्त-
त्क्षणादभूत् ॥ ५० ॥ तेनानन्तव्रतेनास्य बभौ गोधन-
सङ्कुलम् । गृहाश्रमं श्रिया जुष्टं धनधान्यसमन्वितम् ॥
आकुलं व्याकुलं रम्यं सर्वदाऽतिथिपूजनैः । सापि माणिक्य-
काञ्चीभिर्मुक्ताहारैर्विभूषिता ॥ देवाङ्गनेव सम्पन्ना

सावित्री प्रतिमाऽभवत् । विचचार गृहे भर्तुः समीपे सुख-
॥२०५॥ रूपिणी ॥ कदाचिदुपविष्टाया दृष्टो बद्धः सुदोरकः । शी-
लाया हस्तमूले तु भर्त्रा तस्या द्विजन्मना ॥ किमिदं दोर-
कं शीलं मम वश्याय कल्पितम् । धृतं सुदोरकं त्वेतत्कि-
मर्थं ब्रूहि तत्वतः ॥ शीलोवाच ॥ यस्य प्रसादात्सकला
धनधान्यादिसम्पदः ॥ लभ्यन्ते मानवैश्चापि सोऽनन्तोऽयं
मया धृतः ॥ शीलायास्तद्वचः श्रुत्वा भर्त्रा तेन द्विजन्मना ।
श्रीमदान्धेन कौरव्य साक्षेपं त्रोटितस्तदा ॥ कोऽनन्त इति
मूढेन जल्पता पापकारिणा । क्षिप्तो ज्वालाकुले वह्नौ
हाहाकृत्वा प्रधावती ॥ शीला गृहीत्वा तत्सूत्रं क्षीरमध्ये
समाक्षिपत् । तेन कर्मविपाकेन सा श्रीस्तस्य क्षयं गता ॥
गोधनं तस्करैर्नीतं गृहं दग्धं धनं गतम् । यद्यथैवागतं
गेहे तत्तथैव पुनर्गतम् ॥ ६० ॥ स्वजनैः कलहो नित्यं
बन्धुभिस्ताडनं तथा । अनन्ताक्षेपदोषेण दारिद्र्यं पतितं
गृहे ॥ न कश्चिद्वदते लोकस्तेन सार्द्धं युधिष्ठिर । शरीरेणा-
तिसन्तप्तो मनसाप्यतिदुखितः ॥ निर्वेदं परमं प्राप्तः कौ-
ण्डिण्यः प्राह तां प्रियाम् । कौण्डिण्य उवाच । शीले ममेद-
मुत्पन्नं सहसा शोककारणम् ॥ येनातिदुःखमस्माकं जातः
सर्वधनक्षयः । स्वजनैः कलहो गेहे न कश्चिन्मां प्रभाषते ॥
शरीरे नित्यसन्तापः खेदश्चेतसि दारुणः । जानासि दुर्नयः
कोऽत्र किं कृत्वा सुकृतं भवेत् ॥ शीलोवाच ॥ प्रत्युवाचाथ तं
शीला सुशीला शीलमण्डना । प्रायोऽनन्तकृताक्षेपपापस-
म्भवजं फलम् ॥ भविष्यति महाभाग तदर्थं यत्नमाचर ।
एवमुक्तः स विप्रर्षिर्जगाम मनसा हरिम् ॥ निर्वेदं निर्ज-
गामाथ कौण्डिण्यः प्रगतो वनम् । तपसे कृतसङ्कल्पो
वायुभक्षो द्विजोत्तमः ॥ मनसा ध्यायमानस्तं क्व द्रक्ष्यामि च

तं विभुम् । यस्य प्रसादात्सञ्जातमाक्षेपान्निधनं गतम् ॥
॥२०६॥ धनादिकं ममातीव सुखदुःखप्रदायकम् । एवं सञ्चिन्तयन्सो-
ऽथ बभ्राम गहने वने ॥ ७० ॥ तत्रापश्यन्महाचूतं पुष्पितं
फलितं द्रुमम् । वर्जितं पक्षिसङ्घातैः कीटकोटिसमावृतम् ।
तमपृच्छद् द्विजोऽनन्तः क्वचिद् दृष्टो महाद्रुम । ब्रूहि सौम्य
ममातीव दुःखं चेतसि वर्तते ॥ सोऽब्रवीद्द्रुम नानन्तः क्वचिद्
दृष्टो मया द्विज ॥ एवं निराकृतस्तेन स जगामाथ
दुःखितः ॥ क्व द्रक्ष्यामीति गच्छन्स गां ददर्श सवत्सकाम् ॥
वनमध्ये प्रधावन्तीमितश्चेतश्च पाण्डव ॥ सोऽब्रवीद्धेनुके
ब्रूहि यद्यनन्तस्त्वयेक्षितः ॥ गौरुवाचाथ कौण्डिण्यं नानन्तं
वेद्म्यहं द्विज ॥ ततो व्रजन्ददर्शाग्रे वृषभं शाद्वले स्थितम् ।
दृष्ट्वा पप्रच्छ गोस्वामिन्ननन्तो वीक्षितस्त्वया ॥ वृषभस्त-
मुवाचेदं नानन्तो वीक्षितो मया ॥ ततो व्रजन्ददर्शाग्रे रम्यं
पुष्करिणीद्वयम् । अन्योऽन्यजलकल्लोलैर्वीचीपर्यन्तसङ्ग-
तम् । छन्नं कमलकल्हारैः कुमुदोत्पलमण्डितम् ॥ सेवितं
भ्रमरैर्हंसैश्चक्रकारण्डवैर्बकैः । ते अपृच्छद् द्विजो-
ऽनन्तो युवाभ्यां नोपलक्षितः ॥ ऊचतुस्ते
पुष्करिण्यौ नानन्तो वीक्षितो द्विज । ततो व्रजन्ददर्शाग्रे
गर्दभं कुञ्जरं तथा ॥ ८० ॥ तावपृच्छद् द्विजोऽनन्तो भ-
वद्भ्यां नोपलक्षितः । एवं स पृच्छन्नष्टाशस्तत्रैव निषसाद
ह ॥ कौण्डिण्यो विह्वलीभूतो निराशो जीविते नृप ।
दीर्घमुष्णं च निःश्वस्य पपात भुवि भारत ॥ प्राप्य सं-
ज्ञामनन्तेति जल्पन्नुत्थाय स द्विजः । नूनं त्यक्ष्याम्यहं
प्राणानिति सङ्कल्प्य चेतसि ॥ यावदुद्बन्धनं वृक्षे चक्रे
तावद्युधिष्ठिर ॥ कृपयाऽनन्तदेवोऽपि प्रत्यक्षं समजायत-
त ॥ वृद्धब्राह्मणरूपेण इत एहीत्युवाच तम् । प्रगृह्य

दक्षिणे पाणौ गुहायां प्रविवेश तम् । स्वां पुरीं दर्शयामास
॥२०७॥ दिव्यनारीनरैर्युताम् । यस्यां निविष्टमात्मानं दिव्यसिंहा-
सने शुभे ॥ पार्श्वस्थशङ्खचक्राब्जगदागरुडशोभितम् । दर्श-
यामास विप्राय विश्वरूपमनन्तकम् ॥ विभूतिभेदैश्चान-
न्तैरनन्तममितौजसम् । कौतुकेन विराजन्तं वनमाला-
विभूषितम् ॥ तं दृष्ट्वा तादृशं रूपमनन्तमपराजितम् ॥
वन्द्यमानो जगादोच्चैर्जयशब्दपुरःसरम् ॥ पापोऽहं पाप-
कर्माहं पापात्मा पापसम्भवः । त्राहि मां पुण्डरीकाक्ष
सर्वपापहरो भव ॥ ९० ॥ तच्छ्रुत्वाऽनन्तदेवेशः प्राह
सुस्निग्धया गिरा । मा भैस्त्वं ब्रूहि विप्रेन्द्र यत्ते मनसि
वर्तते ॥ कौण्डिण्य उवाच ॥ मया भूत्यवलिप्तेन त्रोटितोऽन-
न्तदोरकः । तेन पापविपाकेन भूतिर्मे प्रलयं गता ॥ स्व-
जनैः कलहो गेहे न कश्चिन्मां प्रभाषते । निर्वेदाद् भ्रमतो-
ऽरण्ये तव दर्शनकाङ्क्षया ॥ कृपया देवदेवेश त्वयात्मा
सम्प्रदर्शितः । तस्य पापस्य मे शान्तिं कारुण्याद्वक्तुमर्हसि ।
श्रीकृष्ण उवाच ॥ तच्छ्रुत्वाऽनन्तदेवश उवाच द्विजस-
त्तमम् । भक्त्या सन्तोषितो देवः किं न दद्याद्युधिष्ठिर ॥
अनन्त उवाच ॥ स्वगृहे गच्छ कौण्डिण्य मा विलम्बं कुरु
द्विज । चरानन्तव्रतं भक्त्या नववर्षाणि पञ्च च ॥ सर्व-
पापविशुद्धात्मा प्राप्स्यसे सिद्धिमुत्तमाम् । पुत्रपौत्रान्स-
मुत्पाद्य भुक्त्वा भोगान्यथेप्सितान् ॥ अन्ते मत्स्मरणं
प्राप्य मामुपैष्यस्यसंशयम् । अन्यं च ते वरं दद्मि सर्व-
लोकोपकारकम् ॥ इदमाख्यानकवरं शीलानन्तव्रतादिकम् ।
करिष्यति नरो यस्तु कुर्वन्व्रतमिदं शुभम् ॥ सोऽचिरा-
त्पापनिर्मुक्तः प्राप्नोति परमां गतिम् । गच्छ विप्र गृहं
शीघ्रं यथा येनागतो ह्यसि ॥१००॥ कौण्डिण्य उवाच ॥

स्वामिन्पृच्छामि ते ब्रूहि किञ्चित्कौतूहलं मया। अरण्ये भ्रमता दृष्टं तद्वदस्व जगद् गुरो ॥ यश्चूतवृक्षः कस्तत्र का गौः को वृषभस्तथा। कमलोत्पलकल्हारैः शोभितं सुमनोहरम् ॥ मया दृष्टं महारण्ये किं तत्पुष्करिणीद्वयम्। कः खरः कुञ्जरः कोऽसौ कोऽसौ वृद्धो द्विजोत्तमः ॥ अनन्त उवाच। स चूतवृक्षो विप्रोऽसौ विद्यावेदविशारदः। विद्या न दत्ता शिष्येभ्यस्तेनासौ तरुतां गतः ॥ या गौर्वसुन्धरा दृष्टा पूर्वं सा बीजहारिणी। वृषो धर्मस्त्वया दृष्टः शाद्वलं सत्यमास्थितः ॥ धर्माधर्मव्यवस्थानं तच्च पुष्करिणीद्वयम्। ब्राह्मण्यौ केचिदप्यास्तां भगिन्यौ ते परस्परम् ॥ धर्माधर्मादि यत्किञ्चित्तन्निवेदयतो मिथः। विप्राय वेदविदुषे न दत्तं दुर्बलाय वै। भिक्षा दत्ता न चार्थिभ्यस्तेन पापेन कर्मणा। वीचीकल्लोलमालाभिर्गच्छतस्ते परस्परम् ॥ खरः क्रोधस्तथा दृष्टः कुञ्जरो मद उच्यते। ब्राह्मणोऽसावनन्तोऽहं गुहासंसारगह्वरम् ॥ इत्युक्त्वा देवदेवेशस्तत्रैवान्तरधीयत। स्वप्नप्रायं ततो दृष्ट्वा ततः स्वगृहमागतः ॥११०॥ कृत्वानन्तव्रतं सम्यक् नववर्षाणि पञ्च च। भुक्त्वा सर्वमनन्तेन यथोक्तं पाण्डुनन्दन ॥ अन्ते च स्मरणं प्राप्य गतोऽनन्तपुरे द्विजः। तथा त्वमपि राजर्षे कथां शृण्वन् व्रतं कुरु ॥ प्राप्स्यसे चिन्तितं सर्वमनन्तस्य वचो यथा। यद्वच्चतुर्दशे वर्षे फलं प्राप्तं द्विजन्मना। वर्षैकेण तदाप्नोति कृत्वोपाख्यानकव्रतम् ॥ एतत्ते कथितं भूप व्रतानामुत्तमं व्रतम्। यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ येऽपि शृण्वन्ति सततं पठ्यमानं पठन्ति ये। तेऽपि पापविनिर्मुक्ताः प्राप्स्यन्ति च हरेः पदम् ॥ इति श्रीभविष्योत्तरपुराणे कृष्णयुधिष्ठिरसंवादे अनन्तव्रतकथा समाप्ता॥

॥ अथ कपिलाषष्ठीपर्वयोगः ॥

भाद्रपदकृष्णपक्षे व्यतीपातभौमवाररोहिणीयुता षष्ठी सा कपिला। षण्णां योगो मुख्यः। हस्तस्थे सूर्ये फलातिशयः। अयं योगो दिवा ग्राह्यो न तु रात्रावित्यन्ये । रात्रावपि योगो ग्राह्य इत्यपरे । उभयथापि वचनसत्वात्। अत्र श्राद्धकरणे विशेषवचनाभावेऽपि अलभ्ययोगे श्राद्धविधानाद्दर्शवत्षट्दैवतं श्राद्धं कार्यम्। अथात्र सङ्क्षेपतः स्नानसूर्यपूजनकपिलादानविधिः। देवदारूशीरकुङ्कुमैलामनःशिलापद्मकाष्ठतण्डुलान् मधुगव्याभ्यां लेपयित्वा क्षीरालोडितकल्केनाङ्गं विलिप्य स्नायात्। तत्र मन्त्रः— आपस्त्वमसि देवेश ज्योतिषां पतिरेव च। पापं नाशय मे देव वाङ्मनःकायकर्मजम् ॥ ततः पञ्चगव्येन स्नात्वा पञ्चपल्लवैर्मार्जयित्वा मृत्तिकास्नानं कुर्यात्। ततो नित्यविधिं कृत्वा कलशे सौवर्णं सूर्यं वरुणं चावाह्य करवीरार्कादिपुष्पैः पूजयेत्। द्वादशार्घ्यान् दद्यात्। प्रभाकर नमस्तुभ्यं संसारान्मां समुद्धर। भक्तिमुक्तिप्रदो यस्मात्तस्माच्छान्तिं प्रयच्छ मे॥ नमो नमस्ते वरद ऋक्सामयजुषां पते । नमोऽस्तु विश्वरूपाय विश्वधात्रे नमोऽस्तु ते ॥ इति प्रार्थयेत् । ततः कपिलां गां सवत्सां सम्पूज्य विप्राय दद्यात्। आचम्य, देशकालौ० मम समस्तपापक्षयपूर्वकसकलमनोरथसिध्यर्थं कपिलाषष्ठीपर्वनिमित्तं ब्राह्मणाय कपिलागोदानं करिष्ये । गोदानोक्तविधिना गां विप्रं च सम्पूज्य, दानमन्त्रः—नमस्ते कपिले देवि सर्वपापप्रणाशिनि। संसारार्णवमग्नं मां गोमातस्त्रातुमर्हसि॥ इमां कपिलां गां सवत्सां वस्त्रयु-

गच्छन्नां सघण्टामित्याद्युक्त्वा तुभ्य० सम्प्रददे। दानसां० सुवर्णदक्षिणां० सम्प्रददे । तस्मै विप्राय सूर्यप्रतिमां च दद्यात् । तत्र मन्त्रः-दिव्यमूर्तिर्जगच्चक्षुर्द्वादशात्मा दिवाकरः । कपिलासहितो देवो मम मुक्तिं प्रयच्छतु ॥ यथा त्वं कपिला पुण्या सर्वलोकस्य पावनी । प्रदत्ता सह सूर्येण मम मुक्तिप्रदा भव ॥-इति सङ्क्षेपतः कपिलाषष्ठीव्रतविधिः ॥

॥ इति प्रथमोभागः समाप्तः ॥

॥ श्रीः ॥

प्रतिवार्षिकपूजाकथासंग्रहः ।

द्वितीयो भागः

॥ श्रीः ॥

प्रातिवर्षिकपूजाकथासङ्ग्रहः ।

द्वितीयो भागः

इदं पुस्तकं घैंसासोपाव्हहरिशर्मतनुजनुपा वेदाचार्यविनायकशर्मणा
स्वीयघैसासगुरुजीवेदपाठशालाद्वारा प्रकाशितम ।

शके १९०७, सन १९८६

॥ अथ प्रातिवर्षिकपूजाकथासङ्ग्रहस्य
द्वितीयभागस्थमन्त्रानुक्रमणिका ॥

॥ ॐ गणानांत्वागणपतिंहवामहेकविंकवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतऽआनःशृण्वन्नूतिभिःसीदसादनम् ॥

ॐ निषुसीदगणपतेगणेषुत्वामाहुर्विप्रतमंकवीनाम् ।
नऽऋतेत्वत्क्रियतेकिंचनारेमहामर्कंमघवञ्चित्रमर्च ॥

ॐ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ।
सभूमिंविश्वतोवृत्वाऽत्यतिष्ठद्दशांगुलम् ॥

ॐ पुरुषऽएवेदंसर्वंयद्भूतंयच्चभव्यम् ।
उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥

ॐ एतावानस्यमहिमाऽतोज्यायाँश्चपूरुषः ।
पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि ॥

ॐ त्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः ।
ततोविष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥

ॐ तस्माद्विराळजायतविराजोऽअधिपूरुषः ।
सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ १ ॥

ॐ यत्पुरुषेणहविषादेवायज्ञमतन्वत ।
वसंतोऽअस्यासीदाज्यंग्रीष्मऽइध्मःशरद्धविः ॥

॥ २॥

ॐ तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः ।
तेनदेवाअयजंतसाध्याऽऋषयश्चये ॥

ॐ तस्माद्यज्ञात्सर्वहुतःसंभृतंपृषदाज्यम् ।
पशून्ताँश्चक्रेवायव्यानारण्यान्ग्राम्याश्चये ॥

ॐ तस्माद्यज्ञात्सर्वहुतऽऋचःसामानिजज्ञिरे ।
छन्दांसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ॥

ॐ तस्मादश्वाऽअजायंतयेकेचोभयादतः ।
गावोहजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः ॥ २ ॥

ॐ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयंन् ।
मुखंकिमस्यकौबाहूकाऽऊरूपादाऽउच्येते ॥

ॐ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृतः ।
ऊरुतदस्ययद्वैश्यःपद्भ्यांशूद्रोऽअजायत ॥

ॐ चन्द्रमामनसोजातश्चक्षोःसूर्योऽअजायत ।
मुखादिंद्रश्चाग्निश्चप्राणाद्वायुरजायत ॥

ॐ नाभ्याऽआसीदंतरिक्षंशीर्ष्णोद्यौःसमवर्तत ।
पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकाँअकल्पयन् ॥

ॐ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधःकृताः ।
देवायद्यज्ञंतन्वानाऽअबध्नन्पुरुषंपशुम् ॥

ॐ यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन् ।

।। ३।। तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः ।। ३ ।। इति पुरुषसूक्तम् ।

ॐ अतोदेवाअवंतुनोयतोविष्णुर्विचक्रमे ।

पृथिव्याःसप्तधामभिः ।।

ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ।

समूळ्हमस्यपांसुरे ।।

ॐ त्रीणिपदाविचक्रमेविष्णुर्गोपाऽअदाभ्यः ।

अतोधर्माणिधारयन् ।।

ॐ विष्णोःकर्माणिपश्यतयतोव्रतानिपस्पशे ।

इन्द्रस्ययुज्यःसखा ।।

ॐ तद्विष्णोःपरमंपदंसदापश्यंतिसूरयः ।

दिवीवचक्षुराततम् ।।

ॐ तद्विप्रासोविपन्यवोजागृवांसःसमिंधते ।

विष्णोर्यत्परमंपदम् ।। इति विष्णुसूक्तम् ।

ॐ हिरण्यवर्णांहरिणींसुवर्णरजतस्रजाम् ।

चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह ।।

ॐ तांमआवहजातवेदोलक्ष्मीमनपगामिनीम् ।

यस्यांहिरण्यंविन्देयंगामश्वंपुरुषानहम् ।।

ॐ अश्वपूर्णांरथमध्यांहस्तिनादप्रमोदिनीम् ।

॥ ५ ॥ श्रियंदेवीमुपह्वयेश्रीर्मादेवीजुषताम् ॥

ॐ कांसोस्मितांहिरण्यप्राकारामार्द्रांज्वलंतींतृप्तांतर्पयंतीम् ।

पद्मेस्थितांपद्मवर्णांतामिहोपह्वयेश्रियम् ॥

ॐ चंद्रांप्रभासांयशसाज्वलंतींश्रियंलोकेदेवजुष्टामुदाराम् ।

तांपद्मनेमींशरणमहंप्रपद्येअलक्ष्मीर्मेनश्यतांत्वांवृणोमि ॥ १ ॥

ॐ आदित्यवर्णेतपसोधिजातोवनस्पतिस्तववृक्षोथबिल्वः ।

तस्यफलानितपसानुदंतुमायांतरायाश्चबाह्याअलक्ष्मीः ॥

ॐ उपैतुमांदेवसखःकीर्तिश्चमणिनासह ।

प्रादुर्भूतोसुराष्ट्रेस्मिन्कीर्तिवृद्धिंददातुमे ॥

ॐ क्षुत्पिपासामलाज्येष्ठाअलक्ष्मीर्नाशयाम्यहम् ।

अभूतिमसमृद्धिंचसर्वांनिर्णुदमेगृहात् ॥

ॐगंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम् ।

ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम् ॥

ॐ मनसःकाममाकूतिंवाचःसत्यमशीमहि ।

पशूनांरूपमन्यस्यमयिश्रीःश्रयतांयशः ॥ २ ॥

ॐ कर्दमेनप्रजाभूतामयिसंभ्रमकर्दम ।

श्रियंवासयमेकुलेमातरंपद्ममालिनीम् ॥

॥ ५॥ ॐ आपःस्रजंतुस्निग्धानिचिक्लीतवसमेगृहे ।
नीचदेवींमातरंश्रियंवासयमेकुले ॥
ॐ आर्द्रायःकरिणींयष्टींसुवर्णांहेममालिनीम् ।
सूर्यांहिरण्मयींलक्ष्मींजातवेदोममावह ॥
ॐ आर्द्रांपुष्करिणींपुष्टींपिंगलांपद्ममालिनीम् ।
चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह ॥
ॐ तांमआवहजातवेदोलक्ष्मीमनपगामिनीम् ।
यस्यांहिरण्यंप्रभूतिंगावोदास्योश्वान्विन्देयंपुरुषानहम् ॥ ३ ॥
ॐ यःशुचिःप्रयतोभूत्वाजुहुयादाज्यमन्वहम् ।
सूक्तंपंचदशर्चश्चश्रीकामःसततंजपेत् ॥
पद्माननेपद्मनिपद्मपत्रेपद्मप्रियेपद्मदलायताक्षि ।
विश्वप्रियेविश्वमनोनुकूलेत्वत्पादपद्मंहृदिसंनिधत्स्व ॥
पद्माननेपद्मऊरूपद्माक्षीपद्मसंभवे ।
तन्मेभजसिपद्माक्षियेनसौख्यंलभाम्यहम् ॥
अश्वदायैगोदायैधनदायैमहाधने ।
धनंमेलभतांदेवींसर्वकामांश्चदेहिमे ॥
पुत्रपौत्रधनंधान्यंहस्त्यश्वादिगवेरथम् ।
प्रजानांभवसीमाताआयुष्मंतंकरोतुमे ॥ ४ ॥

धनमग्निर्धनंवायुर्धनंसूर्योधनंवसुः ।

धनमिंद्रोबृहस्पतिर्वरुणंधनमश्विना ॥

वैनतेयसोमंपिबसोमंपिबतुवृत्रहा ।

सोमंधनस्यसोमिनोमह्यंददातुसोमिनः ॥

नक्रोधोनचमात्सर्यंनलोभोनाशुभामतिः ।

भवंतिकृतपुण्यानांभक्तानांश्रीसूक्तंजपेत् ॥

सरसिजनिलयेसरोजहस्तेधवलतरांशुभगंधमाल्यशोभे ।

भगवतिहरिवल्लभेमनोज्ञेत्रिभुवनभूतिकरिप्रसीदमह्यम् ॥

महालक्ष्मीचविद्महेविष्णुपत्नीचधीमहि ।

तन्नोलक्ष्मीःप्रचोदयात् ॥ ५ ॥

विष्णुपत्नींक्षमांदेवींमाधवींमाधवप्रियाम् ।

विष्णोःप्रियसखींदेवींनमाम्यच्युतवल्लभाम् ॥

आनंदःकर्दमश्चैवचिक्लीतइतविश्रुता ।

ऋषयःश्रियःपुत्राश्चस्वयंश्रीर्देविदेवता ॥

ऋणरोगादिदारिद्र्यंपापक्षुदपमृत्यवः ।

भयशोकमनस्तापंनश्यंतुममसर्वदा ॥

श्रीवर्चस्वमायुष्यमारोग्यमाविधात्पवमानंमहीयते ।

धान्यंधनंपशुंबहुपुत्रलाभंशतसंवत्सरंदीर्घमायुः ॥ ६ ॥

॥ इति श्रीसूक्तं समाप्तम् ॥

ॐ कद्रुद्रायप्रचेतसेमीळ्हुष्टमायतव्यसे ।

॥ ७ ॥ वोचेमशंतमंहृदे ॥

यथानोअदितिःकरत्पश्वेनृभ्योयथागवे ।

यथातोकायरुद्रियं ॥

यथानोमित्रोवरुणोयथारुद्रश्चिकेतति ।

यथाविश्वेसजोषसः ॥

गाथपतिंमेघपतिंरुद्रंजलाषभेषजं ।

तच्छंयोःसुम्नमीमहे ॥

यःशुक्रइवसूर्योहिरण्यमिवरोचते ।

श्रेष्ठोदेवानांवसुः ॥ १ ॥

शंनःकरत्यर्वतेसुगंमेषायमेष्ये ।

नृभ्योनारिभ्योगवे ॥

अस्मेसोमश्रियमधिनिधेहिशतस्यनृणां ।

महिश्रवस्तुविनृम्णं ॥

मानःसोमपरिबाधोमारातयोजुहुरंत ।

आनइंदोवाजेभज ॥

यास्तेप्रजाअमृतस्यपरस्मिन्धामन्नृतस्य ।

मूर्धानाभासोमवेनऽआभूषंतीःसोमवेदः ॥ २ ॥

॥ इति रुद्रसूक्तम् ॥

॥ ८ ॥

ॐ तमुष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य ।
यक्ष्वामहे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य ॥ १ ॥
ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं ।
उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् ॥ २ ॥
ॐ अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभर्म्यहमिंद्राग्नी ऽअहमश्विनोभा ॥
अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगं ।
अहं दधामि द्रविणं हविष्मते सुप्राव्ये ३ यजमानाय सुन्वते ॥
अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानां ।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयंतीं ॥
मया सो ऽअन्नमत्ति यो विपश्यति यः प्राणिति य ऽईं शृणोत्युक्तं ।
अमंतवो मां त ऽउपक्षियंति श्रुधि श्रुत श्रद्धिवं ते वदामि ॥
अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ।
यं कामये तं तमुग्रं कृणोमि तं ब्रह्मणं तमृषिं तं सुमेधां ॥ १ ॥
अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हंतवा ऽउ ।
अहं जनाय समदं कृणोम्यहं द्यावापृथिवी ऽआविवेश ॥
अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वं १ तः समुद्रे ।
ततो वितिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोपस्पृशामि ॥

अहमेववातऽइवप्रवाम्यारभमाणाभुवनानिविश्वा ।

॥ ९ ॥ परोदिवापरऽएनापृथिव्यैतावतीमहिनासंबभूव ॥ २ ॥

॥ इति देवीसूक्तम् ॥

॥ अथ सरस्वतीसूक्तम् ॥

ॐ इयमददाद्रभसमृणच्युतंदिवोदासंवध्र्यश्वायदाशुषे ।

याशश्वंतमाचखादावसंपणिंतावेदात्राणितविषासरस्वति ॥

इयंशुष्मेभिर्बिसखाइवारुजत्सानुगिरीणांतविषेभिरूर्मिभिः ।

पारावतघ्नीमवसेसुवृक्तिभिःसरस्वतीमाविवासेमधीतिभिः ॥

सरस्वतिदेवनिदोनिबर्हयप्रजांविश्वस्यबृसयस्यमायिनः ।

उतक्षितिभ्योवनीरविंदोविषमेभ्योऽअस्रवोवाजिनीवति ॥

प्रणोदेवीसरस्वतीवाजेभिर्वाजिनीवती ।

धीनामवित्र्यवतु ॥

यस्त्वादेविसरस्वत्युपब्रूतेधनेहिते ।

इंद्रंनवृत्रतूर्ये ॥ १ ॥

त्वंदेविसरस्वत्यवावाजेषुवाजिनि ।

रदापूषेवनःसनिं ॥

उतस्यानःसरस्वतीघोराहिरण्यवर्तनिः ।

व वृत्रघ्नीवष्टिसुष्टुतिं ॥

यस्याऽअनंतोऽअह्रुतस्त्वेषश्चरिष्णुरर्णवः ।

॥ १० ॥ अमश्चरतिरोरुवत् ॥

सानोविश्वाऽअतिद्विषःस्वसॄरन्याऽऋतावरी ।

अतन्नहेवसूर्यः ॥

उतनःप्रियाप्रियासुसप्तस्वसासुजुष्टा ।

सरस्वतीस्तोम्याभूत् ॥ २ ॥

आपप्रुषीपार्थिवान्युरुरजोऽअंतरिक्षं ।

सरस्वतीनिदस्पातु ॥

त्रिषधस्थासप्तधातुःपंचजातावर्धयंती ।

वाजेवाजेहव्याभूत् ॥

प्रयामहिम्नामहिनासुचेकितेद्युम्नेभिरन्याऽअपसामपस्तमा ।

रथऽइवबृहतीविभ्वनेकृतोपस्तुत्याचिकितुषासरस्वती ॥

सरस्वत्यभिनोनेषिवस्योमापस्फरीःपयसामानऽआधक् ॥

जुषस्वनःसख्यावेश्याचमात्वत्क्षेत्राण्यरणानिगन्म ॥ ३ ॥

॥ इति सरस्वतीसूक्तम् ॥

ॐ शांतापृथिवीशिवमंतरिक्षंद्यौर्नोदेव्यभयंनोऽअस्तु ।

शिवादिशःप्रदिशऽउद्दिशोनऽआपोविद्युतःपरिपांतुसर्वतःशांतिःशांतिःशांतिः ॥ १ ॥

ॐ मातारुद्राणांदुहितावसूनांस्वसादित्यानाममृतस्यनाभिः ।

प्रनुवोचंचिकितुषेजनायमागामनागामदितिंवधिष्ट ॥ १ ॥

॥ ११ ॥ ॐ रात्रींप्रपद्येजननींसर्वभूतनिवेशनीं ।

भद्रांभगवतींकृष्णांविश्वस्यजगतोनिशां ॥

संवेशनींस ग्रमनींगृहनक्षत्रमालिनीम् ।

प्रपन्नोहंशिवांरात्रींभद्रेपारमशीमहिभद्रेपारमशीमह्योंनमः ॥ २ ॥

ॐ क्षेत्रस्यपतिनावयंहितेनेवजयामसि ।

गामश्वंपोषयित्न्वासनोमृळातीदृशे ॥ १ ॥

॥ अथाग्न्युत्तारणविधिः ॥

आचम्य प्राणानायम्य देशकालौ स्मृत्व. अस्याः प्रतिमायाः अङ्ग-प्रत्यङ्गसन्धिसमुत्पन्नवास्याग्निकुद्दालाग्निटङ्काग्न्यातपनिरासार्थं अग्न्यु-त्तारणं करिष्ये । अग्निःसप्तिमिति सूक्तेन अग्निपदरहितेन पठितेन पुनरग्निपदसहितेन पठितेनैकमावर्तनं भवति । एवं अष्टशतवारमष्टाविंशति-वारं वा पठित्वा संततजलधारां कुर्यात् । यथा—अग्निः सप्तिमिति सप्तर्चस्य सूक्तस्य सोचिकोवैश्वानरस्त्रिष्टुप् । अग्न्युत्तारणे विनियोगः ।

ॐ सप्तिंवाजंभरंददातिवीरंश्रुत्यंकर्मनिष्ठाम् ।

रोदसीविचरत्समंजन्नारींवीरकुक्षिंपुरंधिम् ॥

अप्नसःसमिदस्तुभद्रामहीरोदसीआविवेश ।

एकंचोदयत्समत्सुवृत्राणिदयतेपुरूणि ॥

हत्यंजरतःकर्णमावाद्भ्योनिरदहज्जरूथम् ।

अत्रिंघर्मऽउरुष्यदंतर्नृमेधंप्रजयासृजत्सम् ॥

दाद्रविणंवीरपेशाऽऋषिंयःसहस्रासनोति ।

॥ १२ ॥ दिविह्व्यमाततानधामानिविभृतापुरुत्रा ॥

उक्थैर्ऋषयोविह्वयंतेनरोयामनिबाधितासः ।

वयोअंतरिक्षेपतंतःसहस्रापरियातिगोनाम् ॥

विशऽईळतेमानुषीर्यामनुषोनहुषोविजाताः ।

गाधर्वींपथ्यामृतस्यगव्यूतिर्घृतऽआनिषत्ता ॥

ब्रह्मऽऋभवस्ततक्षुर्महामवोचामासुवृक्तिम् ।

प्रावजरितारंयविष्ठमहिद्रविणमायजस्व ॥

ॐ अग्निःसप्तिंवाजंभरंददात्यग्निर्वीरंश्रुत्यंकर्मनिष्ठाम् ।

अग्नीरोदसीविचरत्समंजन्नग्निर्नारींवीरकुक्षिंपुरंधिम् ॥

अग्नेरप्नसःसमिदस्तुभद्राऽग्निर्महीरोदसीऽआविवेश ।

अग्निरेकंचोदयत्समत्स्वग्निर्वृत्राणिदयतेपुरूणि ॥

अग्निर्हत्यंजरतःकर्णमावाग्निरद्भ्योनिरदहज्जरूथम् ।

अग्निरत्रिंघर्मऽउरुष्यदंतरग्निर्नृमेधंप्रजयासृजत्सम् ॥

अग्निर्दाद्रविणंवीरपेशाऽअग्निर्ऋषिंयःसहस्रासनोति ।

अग्निर्दिविह्व्यमाततानाग्नेर्धामानिविभृतापुरुत्रा ॥

अग्निमुक्थैर्ऋषयोविह्वयंतेऽग्निंनरोयामनिबाधितासः ।

अग्निर्वयोऽअंतरिक्षेपतंतोऽग्निःसहस्रापरियातिगोनाम् ॥

अग्निंविशऽईळतेमानुषीर्याऽअग्निंमनुषोनहुषोविजाताः ।

॥१३॥ अग्निर्गान्धर्वीपथ्यामृतस्याग्नेर्गव्यूतिर्घृतऽआनिषत्ता ॥

अग्नयेब्रह्मऽऋभवस्ततक्षुरग्निंमहामवोचामासुवृक्तिम् ।

अग्नेप्रावजरितारंयविष्ठाग्नेमहिद्रविणमायजस्व ॥

॥ इत्यग्न्युत्तारणविधिः ॥

ॐ ऋषभंमासमानानांसपत्नानांविषासहिम् ।

हंतारंशत्रूणांकृधिविराजंगोपतिंगवाम ॥

ॐ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यां

पूष्णोहस्ताभ्यांप्रतिगृह्णामि ॥

॥ अथ प्राणप्रतिष्ठाविधिः ॥

अस्यां (अमुक) मूर्तौ देवताधिष्ठानयोग्यतासिध्यर्थं प्राणप्रतिष्ठां करिष्ये । दक्षिणेन पाणिना प्रतिमायाः कपोलौ स्पृष्ट्वा, अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुःसामाथर्वाणि छन्दांसि । परा प्राणशक्तिर्देवता । आं बीजम् । ह्रीं शक्तिः । क्रों कीलकम् । (अमुक) मूर्तौ प्राणप्रतिष्ठापने वि० । ॐ आंह्रींक्रोंअंयंरंलंवंशंषंसंहंक्षंअः क्रोंह्रींआं (अमुक) मूर्तौ प्राणा इह प्राणाः । ॐ आं ह्रीं क्रों० जीव इह स्थितः । ॐ आंह्रींक्रों० सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा । असुनी० । गर्भाधानादि पञ्चदशसंस्कारसिध्यर्थं पञ्चदश प्रणवावृत्तीः करिष्ये, ॐ १५ । रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः पाशं कोदण्डमिक्षूद्भवमथगुणमप्यङ्कुशं पञ्चबाणान् बिभ्राणा सृक्कपालं त्रिनयनलसिता पीनवक्षो-

रुद्राढ्या, देवो बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥ देवाग्रे नैवेद्यं निधाय पार्श्वभागे तिष्ठन् आज्येन नेत्रोन्मीलनं कुर्यात्, तच्चक्षुर्दे० इत्यनेन ।

॥ इति प्राणप्रतिष्ठाविधिः ॥

ॐ यत्पुरुषं० हृदयाय नमः ।

ॐ ब्राह्मणोस्य० शिरसे स्वाहा ।

ॐ चन्द्रमामनसो० शिखायै वषट् ।

ॐ नाभ्याआसी० कवचाय हुम् ।

ॐ सप्तास्या० नेत्रत्रयाय वौषट् ।

ॐ यज्ञेनयज्ञ० अस्त्राय फट् ।

वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभो ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥
पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥
अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ।
सर्वेषामविरोधेन पूजाकर्म समारभे ॥
तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यं अनुज्ञां दातुमर्हसि ॥
समुद्रवसने देवि पर्वतस्तनमण्डले ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
॥ १५ ॥ मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥
कुक्षौ तु सागरास्सर्वे सप्तद्वीपा वसुन्धरा ॥
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ।
अङ्गैश्च सहितास्सर्वे कलशं तु समाश्रिताः ॥
अत्र गायत्री सावित्री शान्तिपुष्टिकरी तथा ।
आयान्तु देवपूजार्थं दुरितक्षयकारकाः ॥
गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन्सन्निधिं कुरु ॥
सरितः सागराः शैलास्तीर्थानि जलदा नदाः ।
आयान्तु देवपूजार्थं दुरितक्षयकारकाः ॥
शङ्खादौ चन्द्रदैवत्यं कुक्षौ वरुणदेवता ।
पृष्ठे प्रजापतिश्चैव अग्रे गङ्गा सरस्वती ॥
त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।
निर्मितः सर्वदेवानां पाञ्चजन्यं नमोऽस्तु ते ॥
ॐ पाञ्चजन्याय विद्महे पावमानाय धीमहि ।
तन्नः शङ्खः प्रचोदयात् ॥
आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ।
कुरु घण्टारवं तत्र देवताह्वानसिद्धये ॥
अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा ॥
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥
शान्ताकारं भुजगशयनं पद्मनाभं सुरेशम्
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यम्

वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥
॥:१६॥ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥
शुद्धस्फटिकसङ्काशं त्रिनेत्रं पञ्चवक्त्रकम् ।
गङ्गाधरं दशभुजं सर्वाभरणभूषितम् ॥
नीलग्रीवं शशाङ्काङ्कं नागयज्ञोपवीतिनम् ।
व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदम् ॥
कमण्डल्वक्षसूत्राभ्यामन्वितं शूलपाणिनम् ।
ज्वलन्तं पिङ्गलजटाशिखामुद्योतकारिणम् ॥
अमृतेनाप्लुतं हृष्टमुमादेहार्धधारिणम् ।
दिव्यसिंहासनासीनं दिव्यभोगसमन्वितम् ॥
दिग्देवतासमायुक्तं सुरासुरनमस्कृतम् ।
नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम् ॥
सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणम ।
एवं ध्यात्वा द्विजः सम्यक् ततो यजनमारभेत् ॥
आराधितो मनुष्यैस्तु सिद्धैर्देवासुरादिभिः ।
आराधयामि भक्त्या त्वां मां गृहाण महेश्वर ॥
सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः ॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयायते ।
आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा ॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ।
ब्रह्मणा सहिताः सर्वे दिक्पालाः पान्तु ते सदा ॥

कीर्तिलक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ।
बुद्धिर्लज्जा वपुः शान्तिः कान्तिस्तुष्टिश्च मातरः ॥
॥ १७ ॥ एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः ।
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः ।
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ॥
ऋषयो मुनयो गावो देवमातर एव च ।
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥
अस्त्राणि सर्वशास्त्राणि राजानो वाहनानि च ।
औषधानि च रत्नानि कालस्यावयवाश्च ये ॥
सरितः सागराः शैलास्तीर्थानि जलदा नदाः ।
एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥
अभ्यङ्गार्थं मयाऽऽनीतं तैलं पुष्पादिवासितम् ।
प्रयत्नेनार्जितं शुद्धं स्नानार्थं प्रतिगृह्यताम् ॥
अङ्गोद्वर्तनकं देवि कस्तूर्या कुङ्कुमेन च ।
अन्यैः सुगन्धद्रव्यैश्च निर्मितं प्रतिगृह्यताम् ॥
हरिद्रायाः कृतं चूर्णं सतैलं ससुगन्धिकम् ।
मया निवेदितं साम्बूद्वर्तनं प्रतिगृह्यताम् ॥
नानातीर्थादाहृतं च तोयमुष्णं मया कृतम् ।
स्नानार्थं च प्रयच्छामि गृह्यतां परमेश्वर ॥
श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥
अक्षताश्च सुरश्रेष्ठाः कुङ्कुमाक्ताः सुशोभनाः ।
मया निवेदिता भक्त्या गृहाण परमेश्वर ॥
माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयाऽऽहृतानि पूजार्थं पुष्पाणि प्रतिगृह्यताम् ॥
वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥
आज्यं च वर्तिसंयुक्तं वन्हिना योजितं मया ।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापह ॥
अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् ।

॥ १८ ॥

दध्याज्यमधुसंयुक्तं नैवेद्यं प्रतिगृह्यताम् ॥
पूगीफलं महद्दिव्यं नागवल्यादलैर्युतम् ।
कर्पूरैलासमायुक्तं ताम्बूलं प्रतिगृह्यताम् ॥
इदं फलं मया देव स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥
हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥
चक्षुर्दं सर्वलोकानां तिमिरस्य निवारणम् ।
आर्तिक्यं कल्पितं भक्त्या गृहाण परमेश्वर ॥
चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च ।
त्वमेव सर्वज्योतींषि आर्तिक्यं प्रतिगृह्यताम् ॥
यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि तानि विनश्यन्ति प्रदक्षिणपदे पदे ॥
अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात्कारुण्यभावेन रक्ष रक्ष परमेश्वर ॥
जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर ॥
आवाहनं न जानामि न जानामि तवार्चनम् ।
पूजां चैव न जानामि क्षम्यतां परमेश्वर ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥
यस्य स्मृत्या च नामोक्त्या तपःपूजाक्रियादिषु ।
न्यूनं सम्पूर्णतां यातु सद्यो वन्दे तमच्युतम् ॥
प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥
उपायनमिदं तुभ्यं व्रतसम्पूर्णहेतवे ।
वाणकं द्विजवर्याय सहिरण्यं ददाम्यहम् ॥
नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः ॥

ॐ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामग्नेस्तेजसा

सूर्यस्यवर्चसेन्द्रस्येन्द्रियेणाभिषिञ्चामि ॥ बलायश्रियैयशसेन्नाद्याय ॥

ॐ भूर्भुवःस्वः ॥ अमृताभिषेकोऽस्तु ॥ शांतिःपुष्टिस्तुष्टिश्चास्तु ॥

ॐ आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यम् । भवावाजस्यसंगथे ॥ ॥

ॐ दधिक्राव्णोऽअकारिषंजिष्णोरश्वस्यवाजिनः ।

सुरभिनोमुखाकरत्प्रणऽआयूँषितारिषत् ॥

ॐ घृतंमिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतम्वस्यधाम ।

अनुष्वधमावहमादयस्वस्वाहाकृतंवृषभवक्षिहव्यम् ॥

ॐ मधुवाताऽऋतायतेमधुक्षरंतिसिन्धवः । माध्वीर्नःसंत्वोषधीः ॥

ॐ स्वादुःपवस्वदिव्यायजन्मनेस्वादुरिन्द्रायसुहवीतुनाम्ने ।

स्वादुर्मित्रायवरुणायवायवेबृहस्पतयेमधुमाँऽअदाभ्यः ॥

ॐ कनिक्रदज्जनुषंप्रब्रुवाणऽइयर्तिवाचमरितेवनावम् ।

सुमंगलश्चशकुनेभवासिमात्वाकाचिदभिभाविश्व्याविदत् ॥

मात्व.श्येनऽउद्वधीन्मासुपर्णोमात्वाविददिषुमान्वीरोऽअस्ता ।

पित्र्यामनुप्रदिशंकनिक्रदत्सुमंगलोभद्रवादीवदेह ॥

अवक्रंददक्षिणतोगृहाणांसुमंगलोभद्रवादीशकुंते ।

मानःस्तेनईशतमाघशंसोबृहद्वदेमविदथेसुवीराः ॥ १ ॥

प्रदक्षिणिदभिगृणंतिकारवोवयोवदंतऽऋतुथाशकुंतयः ।

॥ २० ॥ उभेवाचौवदतिसामगाऽइवगायत्रंचत्रैष्टुभंचानुराजति ॥

उद्गातेवशकुनेसामगायसिब्रह्मपुत्रऽइवसवनेषुशंससि ।

वृषेववाजीशिशुमतीरपीत्यासर्वतोनःशकुनेभद्रमावदविश्वतोनः-

शकुनेपुण्यमावद ॥

आवदंस्त्वंशकुनेभद्रमावदतूष्णीमासीनःसुमतिंचिकिद्धिनः ।

यदुत्पतन्वदसिकर्करिर्यथाबृहद्वदेमविदथेसुवीराः ॥ २ ॥

ॐ श्रियेजातःश्रियऽआनिरियायश्रियंवयोजरितृभ्योदधाति ।

श्रियंवसानाऽअमृतत्वमायन्भवंतिसत्यासमिथामितद्रौ ॥

श्रियएवैनंतच्छ्रियामादधाति संततमृचावषट्कृत्यं

संतत्यैसंधीयते प्रजयापशुभिर्यऽएवंवेद ॥

ॐ महींद्यौःपृथिवीचनऽइमंयज्ञंमिमिक्षताम् । पिपृतांनोभरीमभिः ॥

ॐ ओषधयःसंवदंतेसोमेनसहराज्ञा ।

यस्मैकृणोतिब्राह्मणस्तंराजन्पारयामसि ॥

ॐ आकलशेषुधावतिपवित्रेपरिषिच्यते । उक्थैर्यज्ञेषुवर्धते ॥

ॐ इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या ।

असिक्न्यामरुद्वृधेवितस्तयाऽऽर्जीकीयेशृणुह्यासुषोमया ॥

ॐ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम् ।

ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम् ॥

ॐ याऽओषधीःपूर्वाजातादेवेभ्यस्त्रियुगंपुरा ।

॥ २१ ॥ मनैनुबभ्रूणामहंशतंधामानिसप्तच ॥

ॐ कांडात्कांडात्प्ररोहंतीपरुषःपरुषःपरि ।

एवानोदूर्वेप्रतनुसहस्रेणशतेनच ॥

ॐ अश्वत्थेवोनिषदनंपर्णेवोवसतिष्कृता ।

गोभाजऽइत्किलासथयत्सनवथपूरुषम् ॥

ॐ स्योनापृथिविभवाऽनृक्षरानिवेशनी ।

यच्छानःशर्मसप्रथः ॥

ॐ याःफलिनीर्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः ।

बृहस्पतिप्रसूतास्तानोमुंचन्त्वंहसः ॥

ॐ सहिरत्नानिदाशुषेसुवातिसविताभगः ।

तंभागंचित्रमीमहे ॥

ॐ हिरण्यरूपःसहिरण्यसंदृगपांनपात्सेदुहिरण्यवर्णः ।

हिरण्ययात्परियोनेर्निषद्याहिरण्यदाददत्यन्नमस्मै ॥

ॐ युवासुवासाःपरिवीतऽआगात्सऽउश्रेयान्भवतिजायमानः ।

तंधीरासःकवयऽउन्नयन्तिस्वाध्यो३मनसादेवयंतः ॥

ॐ पूर्णादर्विपरापतसुपूर्णापुनरापत ।

वस्नेवविक्रीणावहाइषमूर्जंशतक्रतो ॥

तत्वायामिशुनःशेपोवरुणस्त्रिष्टुप् । वरुणावाहने विनियोगः ।

॥ २२ ॥ ॐ तत्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः ।

अहेळमानोवरुणेहबोध्युरुशंसमानऽआयुःप्रमोषीः ॥

ॐ याःप्रवतोनिवतऽउद्वतऽउदन्वतीरनुदकाश्चयाः ।

ताऽअस्मभ्यंपयसापिन्वमानाःशिवादेवीरशिपदाभवंतुसर्वानद्योऽअशिमिदा-

भवंतु ॥

ॐ असुनीतेपुनरस्मासुचक्षुःपुनःप्राणमिहनोधेहिभोगम् ।

ज्योक्पश्येमसूर्यमुच्चरंतमनुमतेमृळयानःस्वस्ति ॥

ॐ तच्चक्षुर्देवहितंशुक्रमुच्चरत् ।

पश्येमशरदःशतंजीवेमशरदःशतम् ॥

ॐ याज्ययायजतिप्रत्तिर्वैयाज्या पुण्यैवलक्ष्मीः पुण्यामेवतँलक्ष्मीं संभाभात्र-

यति पुण्यांल्लक्ष्मींसंस्कुरुते ॥

ॐ उत्तिष्ठब्रह्मणस्पतेदेवयंतस्त्वेमहे ।

उपप्रयंतुमरुतःसुदानवऽइंद्रप्राशूर्भवासचा ॥

ॐ राजाधिराजायप्रसह्यसाहिने । नमोवयंवैश्रवणायकुर्महे ।

समेकामान्कामकामायमह्यं । कामेश्वरोवैश्रवणोददातु ।

कुबेरायवैश्रवणाय । महाराजायनमः । ॐ स्वस्ति । साम्राज्यं भौज्यं

स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समंतपर्यायीस्या-

त्सार्वभौमः सार्वायुष आंतादापरार्धात् । पृथिव्यैसमुद्रपर्यन्तायाएकराळिति

॥ २३ ॥ तदप्येषश्लोकोभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन्गृहे आविक्षितस्य

कामप्रेर्विश्वेदेवाः सभासद इति ।

ॐ विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् ।

संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएकः ॥

ॐ तदस्तुमित्रावरुणातदग्नेशंयोरस्मभ्यमिदमस्तुशस्तम् ।

अशीमहिगाधमुतप्रतिष्ठांनमोदिवेबृहतेसादनाय ॥

गृहावैप्रतिष्ठासूक्तं तत्प्रतिष्ठिततमयावाचाशंस्तव्यं तस्माद्यद्यपिदूरइव

पशूंल्लभते गृहानेवैनानाजिगमिषति गृहाहिपशूनांप्रतिष्ठाप्रतिष्ठा ॥

ॐ अहिरिवभोगैःपर्येतिबाहुंज्यायाहेतिंपरिबाधमानः ।

हस्तघ्नोविश्वावयुनानिविद्वान्पुमान्पुमांसंपरिपातुविश्वतः ॥

ॐ योजागारतमृचःकामयंतेयोजागारतमुसामानियंति ।

योजागारतमयंसोमऽआहतवाहमस्मिसख्येन्योकाः ॥

ॐ अग्निर्जागारतमृचःकामयंतेऽग्निर्जागारतमुसामानियंति ।

अग्निर्जागारतमयंसोमऽआहतवाहमस्मिसख्येन्योकाः ॥

ॐ जागर्षित्त्वंभुवनेजातवेदोजागर्षियत्रयजतेहविष्मान् ।

इदंहविःश्रद्धधानोजुहोमितेनपासिगुह्यंनामगोनां ॥

ॐ कइदंकस्माऽअदात्कामःकामायादात्कामोदाताकामःप्रतिग्रहीताकामं·

॥ २४ ॥ समुद्रमाविशकामेनत्वाप्रतिगृएह्णामिकामैतत्तेवृष्टिरसिद्यौस्त्वाददातुपृथिवीप्रति-
गृह्णातु ॥

ॐ येनतोकायतनयायधान्यं१बीजंवहध्वेऽअक्षितं ।

अस्मभ्यंतद्धत्तनयद्वऽईमहेराधोविश्वायुसौभगं ॥

ॐ दृळ्हाचिद्यावनस्पतीन्क्ष्मयादर्धर्ष्योजसा।

यत्तेऽअभ्रस्यविद्युतोदिवोवर्षन्तिवृष्टयः ॥

ॐपर्जन्यायप्रगायतदिवस्पुत्रायमीळ्हुषे । सनोयवसमिच्छतु ॥

योगर्भमोषधीनांगवांकृणोत्यर्वतां । पर्जन्यःपुरुषीणां ॥

तस्माऽइदास्येहविर्जुहोतामधुमत्तमं। इळांनःसंयतंकरत् । इति पर्जन्यसूक्तम् ।

ॐ नवोनवोभवतिजायमानोन्हांकेतुरुषसामेत्यग्रं ।

भागंदेवेभ्योविदधात्यायन्प्रचंन्द्रमास्तिरतेदीर्घमायुः ॥

ॐ सक्तुमिवतितउनापुनंतोयत्रधीरामनसावाचमक्रत। अत्रासखायःसख्यानि-
जानतेभद्रैषांलक्ष्मीर्निहिताधिवाचि ॥

ॐ चरणंपवित्रंविततंपुराणं । येनपूतस्तरतिदुष्कृतानि ।

तेनपवित्रेणशुद्धेनपूताः । अतिपाप्मानमरातिंतरेम ।

लोकस्यद्वारमर्चिमत्पवित्रं । ज्योतिष्मद्भ्राजमानंमहस्वत् ।

अमृतस्यधारावहुधादोहमानं । चरणन्नोलोकेसुधितान्दधातु ।

॥ श्रीः ॥

॥ अनुक्रमणिका ॥

प्रकरणानि	पृष्ठे
॥ आश्विनमासः ॥	
देवीनवरात्रविधिः	१
कुलदेवतास्थापनविधिः	३
आरतीदुर्गेची	५
अखण्डदीपस्थापनविधिः	६
मालाबन्धनमन्त्रः	६
कुमारीपूजनवि०	६
सप्तशतीपाठकर्तॄब्राह्मणवर्णं०	७
उपाङ्गललितापूजावि०	७
उपाङ्गललिताकथा	१३
सरस्वतीपूजनविधिः	२२
घटध्मानमहालक्ष्मीपूजनवि०	२६
घ०प्रथमेवत्सरेव्रतग्रहण-सङ्कल्पः	२७
घ०उत्तरपूजाप्रकारः	२७
कूष्माण्डबलिदानवि०	३२
पाठकर्तॄब्रा०दक्षिणादान०	३३
नवरात्रोत्था० विधिः	३३
विजयादशमीनिर्णयः	३४
सिंहासनादिरा०चि०पू०	३४
अपराजि० पू० विधिः	३५
शमीवृक्षपूजनविधिः	३७
कार्तिकस्नानसङ्कल्पः	३७
आकाशदीपदानविधिः	३८
धात्रीपूजाविधिः	३९
धात्रिमू०चि०पू०विधिः	४१
कोजागरलक्ष्मीन्द्रपूजासं-क्षेपविधिः	४१
को०व्रताङ्गल०पू०वि०	४२
कोजागरव्रतकथा	४६
गोवत्सद्वादश्यांगोपूजा०	५१
दीपरचनासङ्कल्पः	५१
यमदीपदानविधिः	५२
नरकच०अभ्यं०स्ना०वि०	५२
यमतर्पणविधिः	५३
उल्काप्रक्षेपविधिः	५४
लक्ष्मीकुबेरपूजा०	५४
व्यवहारस०पूजाविधिः	५५
अलक्ष्मीनिष्कासनवि०	५७
॥ कार्तिकमासः ॥	
गोवर्धनसहितगोपाल-पूजाविधिः	५७
भ्रातृभोजनविधिः	५८
कूष्माण्डदानविधिः	५६

प्रकरणानि	पृष्ठे
विष्णुप्रबोधोत्सववि०	६०
शायितलक्ष्मीसहितविष्णुप्रतिमादानविधिः	६०
चातुर्मास्यव्रतसमाप्ति०	६१
विष्णुप्रबोधोत्सवतुलसीविवाहविधिः	६१
कार्तिकशुक्लचतुर्दश्यां विष्णुशिवपूजनविधिः	६७
का०पौ०दीपदानविधिः	६८
त्रिपुरोत्सवविधिः	६९
कार्तिककृष्णाष्टम्यां भैरवपूजनविधिः	६६
॥ मार्गशीर्षमासः ॥	
शुक्लप्रतिपदि मल्लारिनवरात्रारम्भः	७०
शुक्लपञ्चम्यां नागपू०	७०
शुक्लषष्ठ्यां चम्पाषष्ठीनि०	७०
॥ पौषमासः ॥	
अर्धोदयपर्वयोगः	७१
मकरसङ्क्रान्तिनिमित्तस्नानदानादिविधिः	७१
तिलपात्रदानविधिः	७२
हिरण्यरहिततत्पात्रदा०	७२
पात्ररहिततिलदान०	७२
शर्करायुक्ततिलदान०	७२

प्रकरणानि	पृष्ठे
दधिमन्थनदान०	७२
होरदीपदानविधिः	७३
घासग्रासदान०	७३
सुघटदान०	७३
सिद्धस्थालीदानविधिः	७३
अत्रुटितवल्लीदान०	७४
वहज्झरीदानविधिः	७४
ताम्बूलदानविधि।	७४
शिवगौरीदान०	७४
वरहस्तदानविधि।	७४
कण्डणदान०	७५
घरट्टदान०	७५
चुल्हिदान०	७५
सौभाग्यवायनदान०	७५
रसरङ्गदान०	७५
अपाकदान० (आवा)	७५
प्रत्येकवर्षरामग्र०वि०	७६
रामग्रहणोद्यापनवि०	७७
॥ माघमासः ॥	
शुक्लचतुर्थ्यां ढुण्ढिराजपू०	७७
शुक्लपञ्चम्यां वसन्तोत्सव०	७८
रथसप्तम्यां स्नानवि०	७८
रथस०सूर्यपूजनवि०	७८
शुक्लाष्टम्यां भीष्मतर्प०	८१
शिवरात्रिपूजनवि०	८२

प्रकरणानि ।	पृष्ठे
शीवाष्टो०शतना०	८४
आरतीशिवाची	८६
शिवरात्रौ चतुर्यामो पू०	८७
शिवरात्रौप्रभातेउ०पू०	८७
पक्वान्नपूरितकुम्भदान०	८७
लघुरुद्राभिषेकसङ्कल्प०	८८
॥ फाल्गुनमासः ॥	
होलिकापूजाविधिः	८६
धूलिवन्दनविधिः	६०
वसन्तोत्सवविधिः	९१
कृष्णाष्टम्यां शीतलापू०	९१
वारुणीपर्वयोगः	६१
विशेषव्रतपू०दानादि०	६२
व्यतीपातदानविधिः	६२
वसन्तोदककुम्भदान०	६३
अधिमासनिमित्तदान०	९३
षोडश-अष्ट-फलदान०	६४
ग्रहणे शुभाशुभविचारः	९५
अशुभग्रहणे नागविम्ब-दानविधिः	६५
सत्यनारायणपूजा०	९६
सत्यनारायणकथा	१००
बुधाष्टमीव्रताङ्गपूजा०	११२
बुधाष्टमीव्रताङ्गकथा	११४
हस्तगौरीव्रताङ्गपूजा०	११९
हस्तगौरीकथा	१२१
प्रदक्षिणानुष्ठानसङ्कल्प०	१२५
पुष्पसमर्पणसङ्कल्पः	१२६
वर्तिकाप्रज्वालनसङ्कल्पः	१२७
सोमवतीव्रतपूजावि०	१२७
धर्मार्थउदकदानविधिः	१३१
प्रपादानवि० (पोसरा)	१३१

मन्त्रसूची ।

	पृ०	पं०		पृ०	पं०
अग्न्युत्तारणविधिः ।	१३	८	पर्जन्यसूक्तम् ।	२६	७
असुनीते०	२४	७	पृथ्वि त्वया०	१६	१३
आप्यायस्व०	२१	४	पुरुषसूक्तम् ।	३	७
उत्तिष्ठ०	२४	१३	प्रमादात्कुर्वतां०	२०	२६
उपायनमिदं०	२०	२८	महीद्यौः०	२२	११
कइदंकस्मा०	२५	१८	मातारुद्राणां०	१२	१८
कनिक्रद०	२१	१२	यस्य स्मृत्या०	२०	२४
कलशस्य०	१७	१	याज्यया०	२३	११
क्षेत्रस्यप०	१३	६	या प्रवतो०	२४	४
गणानांत्वा०	३	३	येनतोकाय०	२६	३
चक्षुर्दं स०	२०	८	योजागार०	२५	१२
चन्द्रादित्यौ च०	२०	१०	राजाधिरा०	२४	१५
चरणं पवित्रं०	२६	१५	रात्रींप्रपद्ये०	१३	२
जयन्तीमङ्गला०	२०	१६	रुद्रसूक्तम् ।	६	१
तच्चक्षुर्दे०	२४	६	वक्रतुण्ड०	१६	११
तदस्तुमि०	२५	६	विश्वतश्च०	२१	४
तमुष्टुहि०	१०	१	विष्णुसूक्तम् ।	५	३
त्र्यंबकंयजा०	१०	३	शान्तापृथि०	१२	१८
देवस्यत्वा०	२१	१	शान्ताकारं०	१७	२२
देवस्यत्वा०	१५	८	श्रियेजातः०	२२	७
देवीसूक्तम् ।	१०	५	श्रीसूक्तम् ।	५	१५
द्रव्हाविद्या०	२६	५	षडङ्गन्यासाः ।	१६	५
नमोऽस्त्वनन्ताय०	२०	३०	सक्तुमिवति०	२६	१२
नवोनवो०	२६	१०	सरस्वतीसूक्तम् ।	११	५
निषुसीद०	३	५	सुरास्त्वाम०	१८	२०

मन्त्रविषये 'फडके' इत्युपाह्वविनायकदीक्षित-
वैदिकमहानुभावानां साहाय्यम् ।

॥ श्रीः ॥

प्रातिवार्षिकपूजाकथासङ्ग्रहः।

॥ द्वितीयो भागः ॥

॥ अथ आश्विनमासः ॥

॥ तत्र शुक्लप्रतिपदि देवीनवरात्रारम्भः ॥

सा च प्रतिपत्सूर्योदयव्यापिनी द्विमुहूर्तापि परैव ग्राह्येति सकलसिद्धान्तः। दिनद्वये उदयव्यापिन्यां पूर्णत्वात्पूर्वैव। अत्र चित्रावैधृती त्याज्ये। अपरिहार्ये तु तयोः प्रथमः पादस्त्याज्यः, तस्याप्यसम्भवेऽभिजिन्मुहूर्ते कलशस्थापनादि कार्यम्। अस्मिन्नवरात्रे देवीपूजनमुपवासो नक्तमेकभक्तायाचितान्यतमनियमः, अखण्डघृततैलदीपप्रज्वालनं पुष्पमालाबन्धनं कुमारीपूजनं सप्तशतीपाठः सुवासिनीकुमारिकाब्राह्मणभोजनमित्यादीन्यनेकानि कर्माणि विहितानि तथापि स्वकुलाचारानुसारेणैव तेषामनुष्ठानम्॥ अथ प्रयोगः॥ प्रतिपदि यजमानः कर्माङ्गत्वेनाभ्यङ्गस्नानं विधाय धौतवस्त्रं परिधाय कुङ्कुमचन्दनादिना धृतपुण्ड्रः स्वासने सपत्नीक उपविश्य, आचम्य प्राणानायम्य, देशकालौ स्मृत्वा, अमुकगोत्रोत्पन्नस्य अमुकश-

मेणः मम सकुटुम्बस्य सपरिवारस्य क्षेमस्थैर्यआयुरारोग्यदीर्घायुर्विपुलधनधान्यपुत्रपौत्राद्यनवच्छिन्नसन्ततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयसदभीष्टसिद्ध्यर्थं महाकालीमहालक्ष्मीमहासरस्वतीकुलदेवताप्रीत्यर्थं अद्य प्रतिपत्प्रभृतिमहानवमीपर्यन्तं प्रत्यहं दुर्गापूजनं मालाबन्धनं अखण्डदीपप्रज्वालनं, कुमारीपूजनं, खड्गपूजनं, सप्तशतीपाठः (इत्यादि स्वकुलाचारप्राप्तमुद्दिश्य) एवमादि शारदनवरात्रोत्सवाख्यं कर्म करिष्ये। (अपूर्वारम्भे तु गणपतिपूजनादिनान्दीश्राद्धान्तं कुर्यात्) तत्रादौ शारदनवरात्रोत्सवाङ्गभूतं श्रीमहाकालीमहालक्ष्मीमहासरस्वतीकुलदेवताप्रीत्यर्थं यथामिलितषोडशोपचारद्रव्यैः पुरुषसूक्तेन श्रीसूक्तेन पुराणोक्तमन्त्रैश्च पूजनमहं करिष्ये। आदौ निर्विघ्नतासिध्यर्थं महागणपतिपूजनं आसनविधिं षडङ्गन्यासान् कलशशङ्खघण्टापूजनं च करिष्ये। गणानांत्वेति गणपतिं सम्पूज्य, वक्रतुण्ड०। अनया पू०। आसनविधिः। पृथिवित्व०। अपस०। अपक्रा०। तीक्ष्णदं०। वामपादेन भूमिं त्रिस्ताडयेत्।

॥ षडङ्गन्यासः ॥

१ यत्पुरुषं० हृदयाय नमः।	४ नाभ्याआ० कवचायहुम्।
२ब्राह्मणोस्य० शिरसे स्वाहा।	५ सप्तास्या० नेत्रत्रयाय०।
३ चन्द्रमा० शिखायैवषट्।	६ यज्ञेन० अस्त्रायफट्।

कलशस्य मु० कलशं सम्पूज्य, शङ्खं घण्टां च पूजयेत्। अपवित्रः प० पूजाद्रव्याणि प्रोक्षेत्।

देवतापूजाङ्गत्वेन घटस्थापनं करिष्ये। महीद्यौरित्यादिना भूमिं प्रार्थ्य, स्योनापृथि० अङ्कुरारोपणार्थं मृदं

निक्षिप्य वेदिं कुर्यात् । येनतोकाय० वेद्यां यवादिधान्यानि
॥ ३ ॥ क्षिपेत् । इळहाविद्या० इति प्रार्थ्य, पर्जन्याय० इति
सूक्तेन उदकं प्रोक्ष्य, आकलशेष्वित्यादिना घटस्थापना-
दिपूर्णपात्रनिधानान्तं कृत्वा वरुणं सम्पूजयेत् ।

शारदनवरात्रोत्सवाङ्गत्वेन कुलदेवतास्थापनपूजनं च करिष्ये । तण्डुलोपरि अष्टदलं विलिख्य, तदुपरि नूतनां देवीं प्रतिमां जीर्णां वा मूर्तिं संस्थाप्य, आवाहयेत् । नूतनमूर्तिकरणे अग्न्युत्तारणं कुर्यात् । सहस्र० । हिरण्यवर्णां० । आगच्छ वरदे देवि दैत्यदर्पनिषूदनि । पूजां गृहाण सुमुखि नमस्ते शङ्करप्रिये ॥ सर्वतीर्थमयं वारि सर्वदेवसमन्वितम् । इमं घटं समागच्छ तिष्ठ देवि गणैः सह ॥ दुर्गे देवि समागच्छ सान्निध्यमिह कल्पय । बलिं पूजां गृहाण त्वमष्टभिः शक्तिभिः सह ॥ जयन्ती मं० ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वतीरूपकुलदेवतायै नमः देवतां साङ्गां सपरिवारां सायुधां सशक्तिकां आवाहयामि ॥ पुरुष० । तांमआ० । नानाप्रभासमाकीर्णं नानावर्णविचित्रितम् । आसनं कल्पितं देवि प्रीत्यर्थं तव गृह्यताम् ॥ आसनं० ॥ एतावा० । अश्वपूर्वां० ॥ गङ्गादिसर्वतीर्थेभ्य आनीतं तोयमुत्तमम् । पाद्यं तेऽहं प्रदास्यामि गृहाण प० ॥ पाद्यं० ॥. त्रिपादू० । कांसोस्मि० । गन्धाक्षतैश्च संयुक्तं फलपुष्पयुतं तव । अर्घ्यं गृहाण दत्तं मे प्रसीद पर० ॥ अर्घ्यं० ॥ तस्माद्वि० । चन्द्राप्र० । गङ्गा गोदावरी चैव यमुना च सरस्वती ॥ ताभ्य आचमनीयार्थमानीतं तोयमुत्तमम् ॥ आचमनीयं० ॥ पञ्चामृतं मयाऽऽनीतं पयो दधि घृतं मधु । शर्करासहितं देवि

॥ ४ ॥

स्नानार्थं प्रतिगृह्यताम् ॥ आप्यायस्व० ॥ दधिक्राव्णो० ॥ घृतंमि० ॥ मधुवाता० ॥ स्वादुः प० इति पञ्चभिर्मन्त्रैः पञ्चामृतस्नानं स० ॥ यत्पुरुषे० । आदित्य० । ज्ञानमूर्ते भद्रकालि दिव्यमूर्ते सुरेश्वरि । स्नानं गृहाण देवि त्वं नारायणि नमोऽस्तु ते ॥ स्नानं० । कनिक्रद० ॥ अभ्यङ्गार्थं मयाऽऽनीतं तैलं पुष्पादिवासितम् । प्रयत्नेनार्जितं शुद्धं स्नानार्थं प्र० ॥ सुगन्धतैलस्नानं० ॥ अङ्गोद्वर्तनकं देवि कस्तूर्या कुङ्कुमेन च । अन्यैः सुगन्धद्रव्यैश्च निर्मितं प्र० ॥ अङ्गोद्वर्तनं० ॥ नानातीर्थादाहृतं च तोयमुष्णं मया कृतम् । स्नानार्थं च मया दत्तं गृ० ॥ उष्णोदकस्नानं० ॥ स्नानानन्तरं आचमनीयं० ॥ नाममन्त्रेण पञ्चोपचारपूजां कृत्वा,पुरुषसूक्तेन लक्ष्मीसूक्तेनाभिषेकः । तंयज्ञं० । उपैतु० । सूक्ष्मतन्तुमयं दिव्यं नानावर्णविचित्रितम् । वस्त्रं गृहाण भो देवि प्रीत्यर्थं चार्पितं मया ॥ वस्त्रं० ॥ तस्माद्य० सं० । क्षुत्पिपा० । मुक्तामणिगणोपेतामनर्घ्यां च सुखप्रदाम् । कञ्चुकीं ते सुखस्पर्शां ददामि हरिवल्लभे ॥ कञ्चुकीं० ॥ कण्ठसूत्रं ताडपत्रं हरिद्रां कुङ्कुमाञ्जनम् । सिन्दूरादि प्रदास्यामि सौभाग्यं देहि मेऽव्ययम् ॥ अहिरिव० ॥ सौभाग्यद्रव्यं नानापरिमलद्रव्यं स० ॥ हारकङ्कणकेयूरमेखलाकुण्डलानि च । रत्नाढ्यं मुकुटोपेतं भूषणानि प्रगृ० ॥ आभूषणानि स० ॥ तस्मा० ऋ० ॥ गन्धद्वा० ॥ मलयाद्रिसमुद्भूतं कर्पूरागरुवासितम् । मया निवेदितं भक्त्या चन्दनं प्रतिगृ० ॥ चन्दनं० ॥ अक्षताश्च० अक्षतान् स० ॥ तस्माद० । मनसः का० । मन्दारपारिजाताश्च पाटलं केतकी तथा । मारुतं मोगरं चैव शतपत्राणि चम्पकम् ॥ पुष्पाणि स० ॥

॥ अथाङ्गपूजा ॥

१ दुर्गायै नमः पादौ पू० ।	८ क्षमायै न० हृदयं पू० ।
२ महाकाल्यै० गुल्फौ० ।	९ स्कन्दायै न० कण्ठं पू०
३ मङ्गलायै० जानुनी० ।	
४ कात्यायन्यै० उरू पू० ।	१० महिषासुरमर्दिन्यै० नेत्रे पूजयामि ।
५ भद्रकाल्यै० कटी पू० ।	
६ कमलायै० नाभिं पू० ।	११ उमायै० शिरः पू० ।
७ शिवायै नमः उदरं पू० ।	१२ विन्ध्यवासिन्यै० सर्वाङ्गं पू०

यत्पुरु० । कर्दमेन० । वनस्पत्युद्भवं देवि धूपगन्धाभिशोभनम् । जगन्नाथे प्रयच्छामि कृपया मिश्रितं सदा ॥ धूपमा० ॥ ब्राह्मणो० ।आपःस्र० । आज्यं च वर्ति० दीपं द० ॥ चंद्रमा० ॥ आर्द्रांपु० । अन्नं चतु० नैवेद्यं० ॥ आचमनीयं० ॥ उत्तरा० । हस्तप्र० । मुखप्र० । मलयाचलसम्भूतं कस्तूर्या च समन्वितम् । करोद्वर्तनकं देवि गृहाण प० ॥ करोद्वर्तनं० ॥ इदं फलं म० नानाविधफलानि स० ॥ पूगीफलं म० ताम्बूलं० ॥ हिरण्यगर्भ० दक्षिणां० ॥ श्रियेजातः श्रि० ॥ याज्यया० ।

॥ आरती ॥

दुर्गेदुर्घटभारीतुजविणसंसारीं । अनाथनाथेअंबेकरुणाविस्तारी ॥ वारीवारीजन्ममरणातेवारी । हारींपडलोंआतांसंकटनिवारी ॥ जयदेविजयदेविमहिषासुरमथनी । सुरवरईश्वरवरदेतारकसंजिवनी ॥ जयदे० ॥ १ ॥ त्रिभुवनभुवनींपाहातां तुजऐशीनाहीं । चथारोश्रमलेपरंतुनबोलवेकाहीं ॥ साहीविवादकरितांपडलेप्रवाहीं । तेतूंभक्तालागींपावसीलवलाहीं ॥ जयदे० ॥२॥ प्रसन्नवदनेप्रसन्नहोशीनिजदासा । क्लेशापासुनसोडी

दुःखापासुनतोडीशीभवपाशा ॥ अंबेतुजवाचूनकोणपुरवि-लश्राशा । नरहरितल्लिनझालापदपंकजलेशा ॥जयदे० ॥३॥

आर्तिक्यदीपं स० । नाभ्याआ० । आर्द्रांयष्क० । यानि कानि० प्रदक्षिणां० ॥ सप्तास्या० । तांमआ० । नमस्ते सर्वलोकेशि नमो भक्तजनप्रिये । जमदग्निप्रिये देवि रक्ष मां शरणागतम् ॥ नमस्कारान् स० ॥ यज्ञेन० । यः शुचिः० ॥ पारिजातादिजातीयं नानाकुसुमसञ्चयम् । अर्पयेऽनल्पसंसिध्यै पूजासम्पूर्णताकृते ॥ पुष्पाञ्जलिं० ॥ अश्वदायैगोदायै० । मन्त्रहीनं० ॥ महिषघ्नि महामाये चामुण्डे मुण्डमालिनि । यशो देहि धनं देहि सर्वान्कामांश्च देहि मे ॥ प्रार्थयामि ॥

ततः अखण्डदीपं स्थाप्य प्रज्वालयेत् । दीपं गन्धाक्षतपुष्पैः सम्पूज्य, नवोनवोभ० ॥ अखण्डदीपकं देव्याः प्रीतये नवरात्रकम् । उज्वालये ह्यहोरात्रमेकचित्तो धृतव्रतः ॥ इति मन्त्रेण दीपं अर्पयेत् ।

प्रत्यहं पुष्पमालाबन्धनमन्त्रः । पुष्पमालां शुभां रम्यामर्पयामि सुरेश्वरि । प्रीता भव गृहाणेमां प्रथमे दिवसेऽम्बिके ॥ द्वितीयादिदिने तु द्वितीये दिवसे, तृतीये दिवसे, इत्याद्यूहः कार्यः ।

कुमारीपूजनपक्षे तु अद्य०थं श्रीमहाकालीमहालक्ष्मीमहासरस्वतीश्रीकुलदेवताप्रीत्यर्थं कुमारीपूजनं करिष्ये । कुमारीमाहूय, मन्त्राक्षरमयीं लक्ष्मीं मातॄणां रूपधारिणीम् । नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम् ॥ इत्यावाह्य, जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते ॥ इति मन्त्रेण तस्याः हस्तौ पादौ प्रक्षाल्य कुङ्कुमादिना लेपयित्वा, सौ-

भाग्यद्रव्यालङ्कारकञ्चुकीवस्त्रगन्धपुष्पफलताम्बूलादिभिः सम्पूज्य, नानाविधैर्भक्ष्यभोज्यैः पायसादिभिर्भोजयेत् ।

॥ ७ ॥

सप्तशतीपाठकरणपक्षे अद्य० थं श्रीम० थं, शुक्लप्रतिपदमारभ्य नवमी (अथवा) दशमीपर्यन्तं प्रत्यहं ब्राह्मणद्वारा सप्तशतीपाठं करिष्ये । तदङ्गत्वेन ब्राह्मणवरणं पूजनं च करिष्ये । यजमानः, अमुकप्रवरान्वितअमुकगोत्रोत्पन्नः अमुकशर्माहं, अमुकप्रवरान्वितामुकगोत्रोत्पन्नं अमुकशर्माणं ब्राह्मणं अद्य प्रतिपत्प्रभृतिनवमीपर्यन्तं प्रत्यहं कवचार्गलाकीलकरहस्यत्रयसहिताष्टोत्तरशतसङ्ख्याकनवार्णमन्त्रसम्पुटितरात्रिसूक्तदेवीसूक्तसम्पुटितसप्तशतीस्त्रीत्रैकावृत्तिपाठार्थं त्वां वृणे । वृतोऽस्मीति विप्रः । गन्धाः पान्तु इत्यादिना ब्राह्मणं सम्पूजयेत् । यस्य स्मृत्या० । अनेन मया कृतेन नवरात्रोत्सवाङ्गपूजनेन श्रीमहा० कुलदेवता प्रीयताम् ॥

एवं प्रत्यहं यथाकुलाचारं पूजनादिविहितं सर्वं कुर्यात् । एकस्मिन् दिने द्वयोस्तिथ्योः सन्निपाते तन्त्रेणोपवासः, पूजनादिकं भेदेन । तिथिवृद्धौ तत्तिथिनिमित्तकोपवासादिसर्वं दिनद्वयेऽपि कार्यम् । अत्र सुवासिनीनामुपवासे गन्धताम्बूलादिग्रहणे न दोषः ॥ इति नवरात्रपूजाविधिः ॥

॥ शुक्लपञ्चम्यां उपाङ्गललिताव्रताङ्गपूजाविधिः ॥

पञ्चमी चापराह्णव्यापिनी ग्राह्या । दिनद्वये तद्व्याप्ताव्याप्तौ पूर्वैव । परत्रैवापराह्णव्याप्तौ परैव ॥ अथ पूजाविधिः ॥ भूमिं गोमयेनोपलिप्य रङ्गवल्लीभिरलङ्कृत्य तदुपरि धान्यं निधाय, तस्योपरि कलशं निधाय, उपरि पूर्णपात्रं संस्थाप्य, अष्टदलं विलिख्य, सौवर्णराजतताम्रा-

॥ ८ ॥ न्यतमपिधानं निधाय पूजामारभेत। आचम्य देशकालौ स्मृत्वा, मम मनेप्सितकामनासिध्यर्थं पुत्रपौत्रधनविद्यारोगनिर्मुक्तिसुखगोविजयपुष्ट्यायुष्यादिकामः (स्त्रीचेत् अवैधव्यकामा) श्रीउपाङ्गललितादेवीप्रीत्यर्थं श्रीसूक्तेन पुराणोक्तमन्त्रैश्च यथामिलितषोडशोपचारद्रव्यैः पूजनं करिष्ये। आदौ निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं आसनविधिं कलशपूजनादि करिष्ये। गणानांत्वा० गणपतिं सम्पूज्य, आसनविध्यादिसम्भारप्रोक्षणान्तं कृत्वा मही-द्यौरित्यादिना कलशस्थापनादिपूर्णपात्रनिधानान्ते उपरि देवीं आवाहयेत्। आगच्छ ललिते देवि सर्वसम्पत्प्रदायिनि। यावद्व्रतं समाप्येत तावत्त्वं सन्निधा भव॥ श्रीउपाङ्गललितादेवीं साङ्गां सपरिवारां सायुधां सशक्तिकां आवाहयामि। हिरण्य०। नीलकौशेयवसनां हेमाभां कमलासनाम्। भक्तानां वरदा नित्यं ललितां चिन्तयाऽम्यहम्॥ श्रीउपां० ध्यायामि॥ तांम आ०। कार्तस्वरमयं दिव्यं नानामणिगणान्वितम्। अनेकशक्तिसंयुक्तमासनं प्र०॥ श्रीउपाङ्गललितादेव्यै नमः। आसनं०। अश्वपू०। गङ्गादिसर्वतीर्थेभ्यो मया प्रार्थनयाऽऽहृतम्। तोयमेतत्सुखस्पर्शं पाद्यार्थं प्र०॥ श्रीउपां० पाद्यं०॥ कांसोस्मि०। निधीनां सर्वरत्नानां त्वमनर्घ्यगुणा ह्यसि। तथापि भक्त्या ललिते गृहाणार्घ्यं नमोऽस्तु ते॥ श्रीउपां० अर्घ्यं०॥ चंद्रांप्र०। पाटलोशीरकर्पूरसुरभिस्वादुशीतलम्। तोयमाचमनीयार्थं ललिते प्रति०॥ श्रीउपां० आचमनीयं०। आप्याय०। दधिक्रा०। घृतंमि०। मधुवा०। स्वादुःप०। इत्येतैर्मन्त्रैः, पयो दधि घृतं चैव शर्करा मधुसंयुतम्। पञ्चामृतेन स्नपनं क्रियतां परमेश्वरि॥ श्रीउपां० पञ्चामृतस्नानं०। आदि-

त्य० । मन्दाकिन्याः समुद्धृतं हेमाम्भोरुहवासितम् । स्नानार्थं ते मया भक्त्या दत्तं स्वीक्रियतां जलम् ॥ श्रीउपां० स्नानं० ॥ कनिक्र० । अभ्यङ्गार्थं मयाऽऽनीतं तैलं पुष्पादिवासितम् । प्रयत्नेनार्जितं शुद्धं स्नानार्थं प्रति० ॥ श्रीउपां० सुगन्धतैलस्नानं० ॥ अङ्गोद्वर्तनकं देवि कस्तूर्या कुङ्कुमेन च । अन्यैः सुगन्धद्रव्यैश्च निर्मितं प्रति० ॥ श्रीउपा० अङ्गोद्वर्तनकं० ॥ नानातीर्थादाहृतं च तोयमुष्णं मया कृतम् । स्नानार्थं च मया दत्तं ललिते प्रति० ॥ श्रीउपां० उष्णोदकस्नानं० ॥ पञ्चोपचारपूजां कृत्वा श्रीसूक्तादिनाभिषेकः । तत आचमनीयं० । उपैतु० । सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे । मयोपपादिते तुभ्यं वाससी प्र० ॥ श्रीउपां० वस्त्रयुग्मं० ॥ क्षुत्पिपा० । मुक्तामणिगणोपेतामनर्घ्यां च सुखप्रदाम् । कञ्चुकीं ते सुखस्पर्शां ललिते प्र० ॥ श्रीउपां० कञ्चुकीं स० । अहिरिव० । कण्ठसूत्रं ताडपत्रं हरिद्रां कुङ्कुमाञ्जनम् । सिन्दूरादि प्रदास्यामि सौभाग्यं देहि मेऽव्ययम् ॥ श्रीउपां० सौभाग्यद्रव्यं० ॥ गन्धद्वा० । मलयाचलसम्भूतं घनसारं मनोहरम् । हृदयानन्दनं चारु चन्दनं प्रति० ॥ श्रीउपां० चन्दनं० ॥ अक्षता विमला शुद्धा मुक्ताभाससमप्रभाः । भूषणार्थं मया दत्ता गृ० ॥ श्रीउपां० अक्षतान्० ॥ मनसः० । मालतीकेतकीजातीतुलसीचम्पकानि च । पद्मादीनि सुगन्धीनि पुष्पाणि प्रति० ॥ श्रीउपां० पुष्पाणि स० ॥

॥ अथाङ्गपूजा ॥

१ उपाङ्गललितायै० पादौ पू० ।	३ सिद्धेश्वर्यै० जङ्घे पू० ।
२ भवान्यै नमः गुल्फौ पू० ।	४ भद्रकाल्यै० जानुनी पू० ।

५ श्रियै नमः ऊरू पू० ।
६ विश्वरूपिण्यै० कटी पू० ।
७ देव्यै नमः नाभिं पू० ।
८ वरदायै नमः कुक्षी पू० ।
९ शिवायै नमः हृदयं पू० ।
१० वागीश्वर्यै०स्कन्धौ पू० ।
११ महादेव्यै० बाहू पू० ।
१२ प्रकृतिभद्रायै० करौ पू० ।
१३ पद्मिन्यै० कण्ठं पू० ।
१४ सरस्वत्यै० मुखं पू० ।
१५ कमलासनायै०नासिकां०
१६ महिषमर्दिन्यै० नेत्रे पू०।
१७ लक्ष्म्यै नमः कर्णौ पू० ।
१८ भवान्यै नमः० ललाटं पू०
१९ विन्ध्यवासिन्यै० शिरः पू०
२० सिंहवाहिन्यै० सर्वाङ्गं पू०

॥ पत्रपूजा ॥

१ महामायायै०सेवन्तिकाप०
२ पार्वत्यै नमः तुलसीपत्रं० ।
३ गिरिशप्रियायै० मल्लिकाप०
४ गौर्यै नमः जातीपत्रं० ।
५ कपालिन्यै० पुन्नागपत्रं० ।
६ कालिकायै०विष्णुक्रान्तप०
७ विकरालिन्यै०धत्तूरपत्रं० ।
८ भवान्यै नमः० बिल्वपत्रं०।
९ मेधायै नमः दूर्वापत्रं० ।
१० दुर्गायै नमः मरीचिपत्रं०
११अम्बिकायै० कस्तूरिकापत्रं
१२शिवायै० गोकर्णिकापत्रं०।
१३ उमायै० धात्रीपत्रं० ।
१४ चण्डिकायै० नमः ।
नागचम्पकपत्रं० ।
१५ सुन्दर्यै नमः आम्रपत्रं०।
१६ सुभगायै० अर्कपत्रं० ।
१७ शुभायै नमः दाडिमपत्रं०
१८ मृडान्यै० भृङ्गराजपत्रं०।
१९ आर्यायै०अपामार्गपत्रं०।
२० कुमार्यै० जम्बीरपत्रं० ।
२१ कामाख्यै० बदरीपत्रं० ।

॥ पुष्पपूजा ॥

१ ईशप्रियायै० मल्लिकापु० ।
२ शक्त्यै० बकुलपुष्पं० ।
३ जगन्मात्रे० चम्पकपुष्पं० ।
४ लीलावतारायै० पाटलपुष्पं
५ चण्डिकायै० अब्जपुष्पं० ।
६ अम्बिकायै० पुन्नागपु० ।
७ ईश्वर्यै नमः जातीपुष्पं० ।
८ कात्यायन्यै० करवीरपुष्पं०।
९ लक्ष्म्यै० रसालपुष्पं० ।
१०कमलवासिन्यै०मालतीपु०

कर्दमेन० । देवद्रुमरसोद्भूतः कालागरुसमन्वितः ।

आघ्रेयतामयं धूपो भवानि घ्राणतर्पणः॥ श्रीउपां० धूपमा०॥ आपः सृ० । चक्षुर्दं सर्वलोकानां तिमिरस्य निवारणम् । आर्तिक्यं कल्पितं भक्त्या गृ० ॥ श्रीउपां० दीपं द० ॥ आर्द्रां-पु० । मोदकापूपलड्डूकवटकोदुम्बरादिभिः । सघृतं पायसान्नं च नैवेद्यं प्रति० ॥ अन्नं च० श्रीउपां० नैवेद्यं० । मध्ये-पानीयं० । उत्तरापोशनं० । हस्तप्र० । मुखप्र० । मलयाचलसम्भूतं घनसारं मनोहरम् । करोद्वर्तनकं चारु गृ० ॥ श्रीउपां० करोद्वर्तनार्थं चन्दनं० ॥ कर्पूरैलालवङ्गादिताम्बूलीदलसंयुतम् । क्रमुकस्य फलं तुभ्यं ताम्बूलं प्र०॥ ताम्बूलं०। मातुलिङ्गं नारिकेलं फलं खर्जूरसम्भवम् । जम्बीरं पनसं चापि गृ०॥ श्रीउपां० फलं स० ॥ हिरण्यगर्भ० दक्षिणां०॥ अथ दूर्वार्पणम् । अथ दूर्वाङ्कुरान् साग्रान् चत्वारिंशत्तथा-ष्टभिः । अधिकान् हस्त आदाय मन्त्रमेतज्जपेद्बुधः॥त्वं दूर्वेऽमृतसम्पन्ने वन्दितासि सुरासुरैः॥ सौभाग्यं सन्ततिं देहि सर्वकामफलप्रदे ॥ इति दूर्वां प्राथ्यं, गन्धाक्षतयुतान् दूर्वाङ्कुरान् अर्पयेत् । तत्र मन्त्रः—बहुप्ररोहा सततममृता हरिता लता । यथेयं ललिते मातस्तथा मे स्युर्मनोरथाः ॥ इति मन्त्रावृत्त्या अर्पयेत् । स्वच्छं जलप्रतीकाशं रत्नकाञ्चनमण्डितम् । दर्पणं ते मया दत्तं गृ० ॥ दर्पणं० ॥ हरिन्मणिगणाकीर्णदण्डं शशिकरप्रभम् । सुवर्णकलशं छत्रं ललिते प्र० ॥ छत्रं० ॥ लक्ष्मीं वर्धयते नित्यं चामरं सौख्यदायकम् । चामरं गृह्यतां देवि प्रसन्ना वरदा भव॥ चामरं० ॥ सुवर्णशृङ्खलायुक्तं मुक्ताफलविभूषितम् । आन्दोलं गृह्यतां देवि प्रसन्ना वरदा भव ॥ आन्दोलं० ॥ उशीरनिर्मितं दिव्यं हेमदण्डपरिष्कृतम् । व्यजनं कल्पितं

भक्त्या गृहा० ॥ व्यजनं० ॥ शङ्खभेरीमृदङ्गादिदुन्दुभीनां
॥ १२ ॥ च निःस्वनः । कृतस्त्वत्प्रीतये देवि प्रसन्ना भव सर्वदा ॥
वाद्यं० ॥ स्तुतिभिस्तवदिव्याभिः सहितं नृत्यगीतकम् ।
अद्य वैकल्पितं भक्त्या गृहाण प० ॥ नृत्यगीतं० ॥
श्रियेजा० ॥ चन्द्रादित्यौ० ॥ आर्द्रांयष्क० । प्रदक्षिणात्रयं
देवि प्रयत्नेन मया कृतम् । तेन पापानि सर्वाणि व्यपोहन्तु
नमाम्यहम् ॥ प्रदक्षिणाः स० ॥ तांमआ० । साष्टाङ्गोऽयं
प्रणामस्ते मत्कृतस्तु यथाविधि । त्वद्दास इति मां मत्वा
प्रसीद परमेश्वरि ॥ नमस्कारान् स० ॥ यःशुचिः० ।
उपाङ्गललिते मातर्नमस्ते विन्ध्यवासिनि । दुर्गे देवि
नमस्तुभ्यं नमस्ते विश्वरूपिणि ॥ पुष्पाञ्जलिं स० ॥
दामोदरि नमस्तेऽस्तु नमस्ते लोकनायके । नमस्तेऽस्तु
महादेवि त्राहि मां परमेश्वरि ॥ दीनोऽहं पापयुक्तोऽहं
दारिद्र्यैकनिकेतनः । समुद्धर कृपासिन्धो कामान्मे
सफलान्कुरु ॥ अवैधव्यं च मे देहि सौख्यं सौभाग्यमेव
च । पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे ॥
प्रार्थयामि ॥ आवाहनं० ॥ मन्त्रहीं० । यस्य स्मृ० । अनेन
मया कृतेन षोडशोपचारपूजनाख्येन कर्मणा श्रीउपाङ्गल-
लितादेवता प्रीयताम् ॥ अद्य०र्थं पूजासाङ्गतासिद्ध्यर्थं
ब्राह्मणाय विंशतिसङ्ख्याकवायनदानं करिष्ये । तदङ्गत्वेन
ब्राह्मणपू० । गन्धाःपान्तु० ॥ स्वस्त्यस्तु दी० । वायन-
दानमन्त्रः-उपाङ्गललितादेव्या व्रतसम्पूर्णहेतवे । वायनं
द्विजवर्याय सहिरण्यं ददाम्यहम् ॥ इदं विंशतिसङ्ख्या-
कापूपवायनं सफलं सदक्षिणाकं अमुकशर्मणे ब्राह्मणाय
तुभ्यमहं सम्प्रददे । प्रति०, प्रति० । अनेन वायनदानाख्येन
कर्मणा तेन श्रीउपाङ्गललितादेवता प्रीयताम् ॥ ततः

कथां श्रुत्वा विंशतिसङ्ख्याकैरपूपैर्बान्धवैर्ब्राह्मणैः सह
॥ १२ ॥ स्वयं भुञ्जीत । ततो रात्रौ नृत्यगीतादिपुरःसरं जागरणं
कुर्यात् । प्रभाते देवीं पञ्चोपचारैः पूजयित्वा, विसर्जयेत् ।
सवाहना शक्तियुता वरदा पूजिता मया । मातर्मामनु-
गृह्याथ गम्यतां निजमन्दिरम् ॥ इति ॥

॥ उपाङ्गललिताकथाप्रारम्भः ॥

सूत उवाच । पुरा कैलासशिखरे महर्षिगणसेविते । षडाननं सुखासीनमिदमूचुर्महर्षयः ॥ ऋषय ऊचुः ॥ महासेन महादेव नन्दनानन्दविक्रम । आख्यानानि सुपुण्यानि श्रुतानि त्वत्प्रसादतः ॥ कथास्त्वद्वचनादेव प्रसूता भूरि भूतयः । न तृप्तिमधिगच्छामःपायं पायं सुधामिव ॥ शुश्रूषवो वयं देव्या व्रतं तत्कथयस्व नः । मनोऽभिलषितार्थानां सिद्धिर्यस्मिन्कृते भवेत् ॥ स्कन्द उवाच ॥ साधु पृष्टं महादेव्या माहात्म्यं मुनिपङ्गवाः । वच्मि सर्वं विधानेन तच्छृणुध्वं जगद्धितम् ॥ भृगुक्षेत्रे किल पुरा विप्रोऽभूद् गौतमाभिधः । श्रुतिस्मृतिपुराणज्ञो धनी च बहु बान्धवः ॥ अनपत्यस्य तस्याथ जज्ञाते जरसः सुतौ । श्रीपतिर्गोपतिश्चैव नामनी विदधे तयोः ॥ अचिरेणैव कालेन स पञ्चत्वमगाद् द्विजः । तौ तु बालौ धनं बन्धून् हित्वा सा धर्मचारिणी ॥ सती विवेश दहनं स्वर्यातुं पतिना सह । अथ ते बान्धवाः सर्वे हा कष्टमिति चुक्रुशुः ॥ निन्दितो दुःखिताश्चक्रुस्तत्क्रियां पारलौकिकीम् । अथ तस्य सपत्नोऽभूद् भ्राता स जगृहे धनम् ॥ १० ॥ आक्रोशन्तौ च तौ गेहं निजमानीय दुर्मनाः । नास्ति चक्रे धनं सर्वं ताभ्यां किञ्चिन्न वै ददौ ॥ ततो मौञ्जीधरौ बालौ बन्धुभिः

कथितं वस्तु । ययाचतुः पितृव्यं तं देहि नो द्रविणं हि
॥ १४ ॥ तत् ॥ स तावूचे गतं द्रव्यं युवां केन प्रतारितौ । निर्ग-
च्छतां मम गृहादित्यादि परुषं बहु ॥ तौ तद्वचोभिर्नि-
र्विण्णौ बालौ श्रीपतिगोपती । बभाषाते मिथः कष्टं
धिगहो पितृहीनता ॥ यावो देशान्तरं यत्र स्वजनो
नास्ति कश्चन । अनाभाष्यैव स्वजनान् जग्मतुर्दिशमुत्त-
राम् ॥ भिक्षाचारौ बहून् देशान् वनानि सरितो गिरीन् ।
समतिक्रम्य ययतुर्विशालां नामतः पुरीम् ॥ कासारमीक्षां
चक्राते ततो स्याः सन्निधौ शुभम् । पुण्डरीकवनाकीर्णं
रक्तसन्ध्याविभूषितम् ॥ सन्ध्याभ्रभूषितं चारु यथा
तारकितं नभः । श्रान्तौ पथि गतौ बालौ क्षणं विश्रम्य
तत्तटे ॥ आचम्य शिशिरं तोयं सस्नतुस्तौ यथाविधि ।
गताध्वखेदौ विप्राग्र्यौ पुरं प्राविशतां ततः ॥ वीथी
चतुष्पथयुतं चारुगोपुरमण्डितम् । देवतागाररुचिरसौ-
धराजिविराजितम् ॥ २० ॥ नानावीथीरतिक्रम्य विप्रा-
वासमवापतुः । कस्यचित्त्वथ विप्रस्य क्षुत्पिपासार्दितौ
गृहम् ॥ ईयतुर्वेदिकायां तावुपविष्टौ श्रमातुरौ । स्वामी
ततोऽस्य गेहस्य विवेक इति विश्रुतः ॥ आयातौ वैश्वदे-
वान्ते स ददर्शातिथी द्विजौ । अनापृच्छंस्तथा शीलं तथा
च कुलनामनी ॥ ऋषिवत्पूजयामास स्मरन्धर्मं सना-
तनम् । अतिथी भोजयामास स्वाद्वन्नं सह चात्मना ॥
तौ ब्रह्मचारिणौ विप्रौ सपर्यान्तां विलोक्य च । देश-
बन्धुपरित्यागखेदमुक्तौ बभूवतुः ॥ अथापृच्छद्द्विजस्तौ
तु कौ युवां कुत आगतौ । किमर्थमल्पवयसौ निर्गतौ
स्वगृहादिति ॥ तद्विवेकस्य वचनमाकर्ण्य श्रीपतिस्तदा ।
आनुपूर्वेण सकलं वृत्तान्तं समभाषत ॥ पितृहीनौ च तौ

ज्ञात्वा त्यक्तौ बन्धुजनेन च । आश्वास्य स्थापयामास
॥ १५ ॥ स्वगृहे बहुवासरम् । प्रचक्रमेऽथ शिष्यैश्च सहाध्यापयितुं
श्रुतिम् । बभूवतुश्च तौ बालौ गुरुशुश्रूषणे रतौ ॥
गुरोर्गृहे ऽध्यवसतामागता निर्मला शरत् । फुल्लपद्मविशा-
लाक्षी प्रसन्नेन्दुशुभानना ॥ ३० ॥ तस्यां सशिष्यमा-
चार्यं चरन्तं व्रतमुत्तमम् । पप्रच्छतुर्भो किमिदमावाभ्या-
मिति कथ्यताम् ॥ ताभ्यामेवं कृते प्रश्ने विवेक इदम-
ब्रवीत् । विवेक उवाच ॥ उपाङ्गललितादेव्या व्रतं देवर्षि-
पूजितम् ॥ सर्वकामकरं नृणामस्माभिः समुपास्यते ।
विद्याकामेन कर्तव्यं तथैव धनकाम्यया ॥ सुतार्थिना
प्रकर्तव्यं व्रतमेतदनुत्तमम् । विद्याकामौ च तौ बालौ
व्रतमाचरतुर्मुदा । भक्तितो गुर्वनुज्ञातौ यथाशक्ति
यथाविधि । व्रतप्रसादात्सकलं वेदशास्त्रमवापतुः ॥
अन्यस्मिन् हायने भक्त्या विवाहार्थं प्रचक्रतुः । श्रीपति-
र्गोपतिश्चैव व्रतमेतत्तपोधनाः ॥ अचिरेणैव कालेन मासि
माघे तयोर्गुरुः । स्वां विवाहोचितां कन्यां नाम्ना गुणव-
तीमिति ॥ विनीताय श्रुतवते यूने श्रीपतये तदा ।
विचार्य बान्धवैः साकं ददौ पुण्यर्क्षवासरे ॥ पारिबर्हं बहु
मुदा प्रादाद् दुहितृवत्सलः । विवेकोऽपि मुदं लेभे सानुरागो
विलोक्य तौ ॥ अन्याब्दे पुनरेतत्तु व्रतं देव्याश्च चक्रतुः ।
भ्रातरौ तौ निजं देशमिच्छन्तौ च धनादिकम् ॥ ४० ॥
अथान्येऽहनि कस्मिंश्चित्तावुपाध्यायमूचतुः । स्वामिन्यु-
ष्मत्प्रसादेन लब्धविद्यौ तथा वसु ॥ अनुजानीहि
गच्छावो निजं देशमितः पुनः । इत्याकर्ण्य समालोक्य
शुभं वासरमादतः ॥ स्वयं प्रापयितुं तां तौ विप्रौ कन्यां
च निर्ययौ । अथ देव्याः प्रसादेन पितृव्यस्य तयोः किल ॥

अन्वेषणे मतिर्जाता गतौ श्रीपतिगोपती । निर्गतौ क्व
॥ १६ ॥ गतौ देशं वसतः क्वेत्यचिन्तयत् ॥ लोका निन्दन्ति मां
नित्यं जाता अन्वेषणे मतिः । दिदृक्षुस्तौ ततः सोऽपि
निर्जगाम निजात्पुरात् ॥ किञ्चित्स नगरं प्राप द्विजबालौ
गवेषयन् । तदेव नगरं प्राप्तो विवेकाख्यो द्विजोत्तमः ॥
सशिष्यः कन्यया सार्धं क्रमन्मार्गं शनैः शनैः । तत्र तेषां
समजनि सङ्गमो मुनिपुङ्गवाः ॥ विदाञ्चकार तौ कृच्छा-
न्मध्यमे वयसि स्थितौ । मूर्ध्न्यवघ्राय तौ पश्चान्मुदं लेभे
परन्तपाः ॥ न शक्नुवन्मुदा वक्तुं प्रेमगद्गदया गिरा ।
पादानतां गुणवतीं विवेकेन प्रणोदिताम् ॥ आशीर्वादैर्ब-
हुविधैस्तां स्नुषां समयोजयत् । विवेकस्तु तदा तत्र
सम्भाष्य च परस्परम् ॥५०॥ विवेक उवाच ॥ सुतावेतौ
मया विप्र पालितौ पाठितौ तव । सम्प्रापयितुं प्रयातोऽस्मि
भवतां ग्राममुत्तमम् ॥ इति सम्भाष्यमाणास्ते भृगुक्षेत्रं
ययुर्मुदा । ज्ञातिभिः सह सङ्गम्य शृण्वद्भिस्तद्विचेष्टितम् ॥
तौ पितृव्यगृहे स्थित्वा हायनान्यष्ट सप्त च । स्वपितृव्य-
गृहे काञ्चिदुषित्वा दिवसांस्तदा ॥ लब्ध्वा पितृधनं गेहं
सर्वं श्रीपतिगोपती । ईयतुस्तदनुज्ञातो विवेकः स्वां पुरीं
ययौ ॥ श्रीपतिर्गोपतेस्तत्र विवाहमकरोत्तदा । तावेकचे-
तसौ सत्रं चक्रतुर्द्विजतर्पणम् ॥ श्रीपतिः श्रद्धया युक्तः
कनीयान्व्ययशङ्कितः । विचार्य भार्यया साकं विभक्तः
श्रीपतेरभूत् ॥ स भोगान्विविधान् भुञ्जन्प्रमत्तो बहु सम्प-
दा । न देव्याराधनं चक्रे गोपतिः सुखलम्पटः ॥ अथ स्व-
ल्पेन कालेन नष्टं तस्य शनैर्धनम् । अकिञ्चनो गतश्चिन्तां
भार्ययाऽऽश्वासितस्तदा ॥ तव भ्रातृगृहे विप्रा भुञ्जते बहवः
सदा । गच्छावोऽनुदिनं कान्त तत्र भोक्तुमुभावपि ॥ एवं

भोजनवेलायामागत्यागत्य तद्गृहम् । भुञ्जन् भुञ्जन् निज-
॥ १७ ॥ गृहे गतौ तौ बहुवासरम् ॥ ६० ॥ कदाचिदागतो यावद्
गोपतिर्भार्यया सह । उपविष्टेषु विप्रेषु भोक्तुं गोविन्ददास-
नम् ॥ अथान्नराशेरभ्याशे भोजनाय क्षुधातुरः । उपविष्टः
श्रीपतेस्तु भार्यया स निवारितः ॥ अस्मादुत्तिष्ठ वै तूर्णं
त्वमुच्छिष्टं करिष्यसि । तिष्ठ तिष्ठ क्षणं चैव पश्चाद्
भुङ्क्ष्वेति साऽब्रवीत् ॥ गोपतेः कान्तया दृष्टं ततो विम-
नसावुभौ । अभुक्तावेव निष्क्रान्तौ जग्मतुर्निजमन्दिरम् ॥
ततः स्वजायां प्रोवाच निजमार्गं विचन्तयन् । भ्रात्रा
मया समं वित्तं संविभक्तमपि प्रिये ॥ दुर्बलोऽहं धनो-
न्मत्तः श्रूयतामत्र कारणम् । पुराऽऽवाभ्यां गुरुगृहे व्रत-
माचरितं शुभम् ॥ उपाङ्गललितादेव्या विद्यादिसकलं
ततः । प्राप्तं मया तत्सकलं परित्यक्तं प्रमादतः ॥ ज्येष्ठ
आचरते नित्यं तस्माच्छ्रीस्तत्र वर्तते । तस्मादहं तदा
भोक्ष्ये यदा द्रक्ष्यामि तां शिवाम् ॥ इत्युक्त्वा निर्गतस्त-
स्माद् गृहादकृतभोजनः । तद्भार्या चिन्तयाविष्टा सापि
तस्थावनश्नती ॥ भुक्तवत्सु ब्राह्मणेषु श्रीपतिः पर्यपृच्छ-
त । क्व गतो गोपतिरिति तच्छ्रुत्वा सोऽपि दुःखितः ॥
॥७०॥ गोपतिस्तु सरिद् दुर्गं वनानि बहुशो भ्रमन् । पृच्छंश्च
पथिकान्मार्गे न देव्याः पदमभ्यगात् ॥ पञ्चमे वासरे
प्राप्ते क्षुत्पिपासार्दितो वने । अलब्धदर्शनो देव्या दुःखितो
निपपात ह ॥ तं कृच्छ्रगतमालोक्य भवानी भक्तवत्सला ।
कृतापराधमपि तमनुजग्राह वै तदा ॥ गतमूर्च्छः समुत्थाय
दिगन्तान्प्रविलोकयन् । ददर्श दूरतो गोपं चारयन्तं गवां
२ गणम् ॥ तं दृष्ट्वा किञ्चिदाश्वस्तो ययौ तस्यान्तिकं शनैः ।
अपृच्छत्क्व भवान्यातः कुत्रत्यः कुत आगतः ॥ कोऽयं देशः

क भूपालः किं पुरं नाम तद्वद । निशम्य वचनं तस्य वक्तुं
गोपः प्रचक्रमे ॥ गोप उवाच ॥ उपाङ्गं नाम नगरमुपाङ्गो
नाम भूपतिः। तत्रत्योऽहं समायातःपुनस्तत्र व्रजाम्यहम् ॥
उपाङ्गललिता देव्या विद्यते तत्र मन्दिरम् । इत्याकर्ण्य
वचस्तस्य विप्रः समुदितोऽभवत् ॥ स गोपसहितः सायं
विचरन्प्रविवेश ह । दूराद्ददर्श भवनं पुरमध्ये तपोधनाः ॥
उपाङ्गललितादेव्याः स्फाटिकं गगनंलिहम् । सौवर्णेन
विचित्रेण कलशेनोपशोभितम् ॥८०॥ यथोदयाचलः शैलो
दधानो भानुमण्डलम् । त्वरितो गोपमामन्त्र्य प्रासादं स
ययौ मुदा ॥ प्रणम्य दण्डवद् भूमौ बद्धाञ्जलिपुटस्तदा ।
उपाङ्गललितां देवीमथ स्तोतुं प्रचक्रमे । गोपतिरुवाच ॥
नमस्तुभ्यं जगद्धात्रि भक्तानां हितकारिणि ।
जगद्भीतिविनाशिन्यै सर्वमङ्गलमूर्तये ॥ हत्वा निशुम्भ-
महिषप्रभृतीन् सुरारीनिन्द्रादयो निजपदेषु यथाभिषिक्ताः।
लोकत्रयावनगृहीतमहावतारे मातः प्रसीद सततं कुरु
मेऽनुकम्पाम् ॥ त्वां मुक्तये निजजनाः कुटिलीकृताङ्गीं
गौरीं निजे वपुषि कुण्डलिनीं भजन्ति । मुक्तौ
च देवमनुजाः कनकारविन्दबद्धासनामविरतं कमलां
स्तुवन्ति ॥ सापराधोऽस्मि सततं प्राप्तस्त्वां जगदम्बिके ।
इदानीमनुकम्प्योऽहं यद्वाञ्छामि कुरुष्व तत् ॥ इति स्तु-
त्वाथ शर्वाणीं प्रणिपत्य पुनः पुनः । कृतसन्ध्याविधिस्तत्र
सुष्वापाकृतभोजनः ॥ स्वप्ने मूर्तिमयी देवी विप्रमेवं
समादिशत् । गोपते वत्स तुष्टास्मि गच्छोपाङ्गमहीपतिम् ॥
मत्पूजनकरण्डस्य प्रार्थय स्वपिधानकम् । तत्पूजय निज-
गृहे परामृद्धिमवाप्स्यसि ॥ स्वप्न इत्याप्तसन्देशः प्रभाते
गोपतिस्तदा । राजदर्शनवेलायां नृपद्वारं समभ्यगात्

॥ ९० ॥ प्रविष्टोऽसौ नृपसभां प्रतीहारैर्निवेदितः ।
॥ १९ ॥ राज्ञा सम्भावितस्तत्र निषसादासने शुभे ॥ पृष्टो
गमनहेतूंश्च ययाचे नृपपुङ्गवम् । देव्यर्चनकरण्डस्य पिधानं
देहि मे नृप ॥ इत्यर्थितः स विप्रेण जातादेशो नृपो ददौ।
पिधानकं नमस्कृत्य तस्मै चाभ्यर्चनादिकम् ॥ आशीर्भिर-
भिनन्द्याथ तमामन्त्र्य च भूपतिम् । उपाङ्गललितादेव्याः
प्रासादं पुनरागमत् ॥ प्रणिपत्याम्बिकां विप्रस्त्वरितो
निर्ययौ पुरात्। समीपे स्वपुरं दृष्ट्वा हृष्टो गृहमुपागमत् ॥
सुहृद्भिः सह सङ्गम्य सर्वं तत्कथयन्मुदा। पूजयित्वा
पिधानं तद्विदधे पारणं द्विजः ॥ एवमाराध्यमानस्तु स
समृद्धोऽभवत्पुनः । सोऽपि सत्रं समारेभे द्विजाग्र्यो बहु-
वासरम् ॥ एका तस्याभवत्कन्या ललिता नाम सुन्दरी।
कन्या पिधानमादाय विहर्तुं याति सर्वदा ॥ प्रमत्तत्वात्प्रि-
यत्वाच्च पितृभ्यामनिवारिता । कदाचित्स्ववयस्याभिः
स्नातुं गङ्गाजले शुभे ॥ क्रीड़न्ती ददृशे तोये नीयमानं कले-
वरम् । पिधानहस्ता सा सिञ्चदन्यांश्चाञ्जलिभिस्तदा ॥१००॥
स सर्पदष्ट उत्तस्थौ ततो देव्याः प्रसादतः । सातिश्रान्तं
द्विजं दृष्ट्वा मनसा चिन्तयत्पतिम् ॥ जुहावाभ्यवहाराय
जनकस्य निकेतनम् । मार्गे च परिपप्रच्छ कुलं शीलं च
तस्य सा ॥ सोऽपि सर्वं समाचख्यौ गुणराशीति नाम च ।
ललिता मन्त्रयामास गुणराशिं द्विजोत्तमम् ॥ परिविष्टेषु
चान्नेषु पितृवेश्मनि मे द्विज । गृहीतापोशनो भूत्वा भार्यार्थं
मां त्वमर्थय ॥ मयानुमोदितस्तातः स मां तुभ्यं प्रदास्यति ।
यथोक्तो गुणराशिस्तु तथा सर्वं चकार ह ॥ गोपतिर्भार्यया
भ्रात्रा स्वमालोक्य स्वबान्धवैः। परीक्षिताय विप्राय विद्यायां
कुलशीलयोः ॥ प्रतिजज्ञे ततः कन्यां ललितां गुणशालिने।

शुभे मुहूर्ते च तयोर्विवाहं कृतवान्प्रभुः ॥ वराय ब्राह्मणे-भ्यश्च ददौ बहु धनं तदा । विदधे च तयोर्गेहं नातिदूरं स्ववेश्मतः ॥ तत्रोषतुः सानुरागौ मिथस्तौ दम्पती चिरम् । पिधानकं तया नीतं निजं ललितया गृहम् ॥ शनैरथ धनं सर्वं गोपतेरगमद् गृहात् । गुणराशिर्धनी जातो महादेव्याः प्रसादतः ॥ १० ॥ करण्डस्य पिधानं तज्जनन्या बहुवासरम् । याचितापि न वै प्रादाल्ललिता पूजितं गृहे ॥ अथ सा गोपतेर्भार्या तस्यैवानर्चनाद् गतम् । इत्थं विचिन्त्य पापात्मा जामातरमघातयत् ॥ समिदर्थं वनं यातः स्वयं तद्गेहमाययौ । शोचन्तीं किल तां कन्यां स तु देव्याः प्रसादतः ॥ उत्थाय विपिनादेत्य भुक्त्वा शेते सुखं गृहे । पादसंवाहनं तस्य कुरुते ललिता तदा ॥ तं दृष्ट्वा दुःखिता भूमौ प्रणिपत्य पुनः पुनः । लज्जिता कृच्छ्रतः पृष्टा निजपापं न्यवेदयत् ॥ स्कन्द उवाच ॥ गुणराशिस्तदा तस्याः प्रायश्चित्तं ददौ बहु । आत्मानं बहुकालेन पूतं कृच्छ्रैश्चकार ह ॥ श्रीपतेस्त्वचलां लक्ष्मीं समालोक्य तपोधनाः । गोपतिस्तु यथापृच्छद् भ्रातस्त्वं वर्तसे कथम् ॥ किमाचरसि कल्याणं येन श्रीरनपायिनी । इति तस्य वचः श्रुत्वा श्रीपतिर्विस्मितः पुनः ॥ अस्माभिस्तद्व्रतं देव्या यत्कृतं गुरुमन्दिरे । सोऽपि देव्या व्रतं चक्रे पुनर्भ्रात्रोपदेशितम् ॥ लेभे स परमामृद्धिं पुत्रांश्च मुदितोऽभवत् । उपाङ्गललितादेव्याः कुर्यादाराधनं ततः ॥ २० ॥ एवमेतत्पुरावृत्तं माहात्म्यं कथितं मया । कृतमन्यैश्च बहुभिस्तेऽपि लब्धमनोरथाः ॥ स्कन्द उवाच ॥ विधानमस्य वक्ष्येऽहं तच्छृणुध्वं तपोधनाः । शुक्लपक्षे तु पञ्चम्यामिषे मासि चरेद् व्रतम् ॥ गर्जितं सन्ध्ययोस्त्याज्यं दिनवृद्धिक्षयौ तथा । निर्वर्त्यावश्यकं कर्म शुची रागविव-

जितः ॥ चत्वारिंशत्तथाष्टौ च कल्पयित्वा विधानतः । दन्तकाष्ठान्युपादाय तडागं वा नदीं व्रजेत् ॥ आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च । ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥ दन्तधावनपूर्वाणि मज्जनानि समाचरेत् । ततो यथाविधि स्नात्वा शुक्लवासा गृहं व्रजेत् ॥ उपचारैः षोडशभिरेभिर्मन्त्रैः समाहितः । कुर्यात्पूजां प्रयत्नेन दूर्वाभिश्च विशेषतः ॥ शुचौ देशे मण्डपिकां कृत्वातीव मनोहराम् । सौवर्णीं प्रतिमां शक्त्या कल्पयेन्मन्त्रपूर्विकाम् ॥ द्विजाय वाणकं दद्याद्विंशत्यावटकादिभिः । ततः कथां समाकर्ण्य वाणकान्नस्य सङ्ख्यया ॥ स्वयमद्यात्तदेवान्नं वाग्यतः सह बान्धवैः । रात्रौ जागरणं कुर्यान्नृत्यगीतादिमङ्गलैः ॥३०॥ प्रभाते पूजयेद्देवीं ततः कुर्याद्विसर्जनम् । सवाहना शक्तियुता वरदा पूजिता मया ॥ मातर्मामनुगृह्याथ गम्यतां निजमन्दिरम् । तामर्चां गुरवे दद्यान्निशि वास्याद्विसर्जनम् ॥ व्रतमेवं च यः कुर्यात्पुत्रवान्धनवान्भवेत् । विद्यावान्रोगनिर्मुक्तो सुखी गोप्ता च जायते ॥ अवैधव्यं च लभते स्त्रीकन्यावरमुत्तमम् । विजयं पुष्टिमायुष्यं यच्चान्यदपि वाञ्छितम् ॥ इत्येतद् व्रतमाख्यातं सेतिहासं महर्षयः । शृण्वन्नपि नरो भक्त्या सुखमाप्नोति निश्चितम् ॥ निर्मुक्तः स सुखी धीमान् व्रतराजप्रसादतः । वित्तमारोग्यमायुष्यं प्राप्नोति च प्रसादतः ॥ १३६ ॥ इति श्रीस्कन्दपुराणे स्वामिकार्तिकेयसंवादे उपाङ्गललिताव्रतकथा सम्पूर्णा ॥

॥ अथ सरस्वतीस्थापनपूजाविधिः ॥

आश्विनशुक्लपक्षे मूलस्य प्रथमपादे सूर्यास्तात् प्राक् त्रिमुहूर्तव्यापिनि सरस्वत्या आवाहनम् ॥ तदसम्भवे

द्वितीयादिपादे परदिने वा । एवं पूर्वाषाढादिनक्षत्रं पूजादौ दिनव्याप्येव ग्राह्यम् ॥ विसर्जनं तु श्रवणप्रथमपादे सार्धप्रहरपर्यन्तं रात्रिगतेऽपि कार्यम् । तदसम्भवे परदिने द्वितीयादिपादेऽपि । तत्र भद्रपीठे सर्वाणि पुस्तकानि आहृत्य स्थापयेत् ।

आचम्य देशकालौ सङ्कीर्त्य, मम सरस्वतीप्रीतिद्वारा मूलनक्षत्रे पुस्तकेषु सरस्वत्यावाहनं पञ्चोपचारपूजनं च करिष्ये । अत्रागच्छ जगद्वन्द्ये सर्वलोकैकपूजिते । मया कृतामिमां पूजां गृहाण जगदीश्वरि ॥ प्रणोदेवी-स० ॥ श्रीसरस्वत्यै नमः सरस्वतीं साङ्गां सपरिवारां सायुधां सशक्तिकां आवाहयामि ॥ ॐसरस्वत्यै नमः इति नाममन्त्रेण गन्धादिपञ्चोपचारपूजां कुर्यात् । अनेन सरस्वत्यावाहनेन श्रीसरस्वती प्रीयताम् ॥

पूर्वाषाढानक्षत्रे विधिवन्मङ्गलस्नानं कृत्वा क्षौमवस्त्रं परिधाय नित्यकर्म समाप्य गुरूणां वन्दनं कृत्वा मण्डपं प्रविश्य पूजामारभेत । आचम्य देशकालौ सङ्कीर्त्य, मम श्रीसरस्वतीप्रीतिद्वारा सर्वशास्त्रार्थविज्ञानकवितापुत्रपौत्राद्यभिवृद्धिधनधान्यादिसम्पत्तिकीर्तिप्राप्त्यर्थं परत्रमोक्षार्थं च पूर्वाषाढानक्षत्रे पुस्तकेषु यथामिलितषोडशोपचारद्रव्यैः पुराणोक्तमन्त्रैः सरस्वतीपूजनं करिष्ये । तदङ्गत्वेन गणपतिपूजनमासनविध्यादिपूजासम्भारप्रोक्षणान्तं कृत्वा ध्यायेत् । प्रणवासनसंरूढां तदर्थत्वेन निश्चिताम् । अङ्कुशं चाक्षसूत्रं च पाशपुस्तकधारिणीम् ॥ ॥ १ ॥ मुक्ताहारसमायुक्तां मोदरूपां मनोहराम् । सितेन दर्पणाभेन वक्त्रेण परिशोभिताम् ॥ २ ॥ सुस्तनीं वेदमध्यान्तां चन्द्रार्धकृतशेखराम् । जटाकलापसंयुक्तां पूर्णचन्द्र-

निभाननाम् ॥ ३ ॥ त्रिलोचनां महादेवीं स्वर्णनूपुरधारि-
॥ २३ ॥ णीम् । कटकैः स्वर्णरत्नाढ्यैर्महावलयशोभिताम् ॥ ४ ॥
कम्बुकण्ठीं सुताम्रोष्ठीं सर्वाभरणभूषिताम् । केयूरैर्मेख-
लाद्यैश्च द्योतयन्तीं जगत्त्रयम् । शब्दब्रह्मारणिं ध्याये-
द्ध्यानकामः समाहितः ॥ ५ ॥ श्रीसरस्वत्यै नमः सर-
स्वतीं ध्यायामि । अनेकरत्नसंयुक्तं सुवर्णेन विराजितम् ।
मुक्तामण्यङ्कितं चारु चासनं ते ददाम्यहम् ॥ आसनं० ॥
गन्धपुष्पाक्षतैः सार्धं शुद्धतोयेन संयुतम् । शुद्धस्फटिक-
तुल्याङ्गि पाद्यं ते प्रति० ॥ पाद्यं० ॥ भक्ताभीष्टप्रदे देवि
देवदेवादिवन्दिते । आधारादि जगद्धात्रि ददाम्यर्घ्यं गृ-
हाण मे ॥ अर्घ्यं० ॥ पूर्णचन्द्रसमास्ये त्वं कोटिसूर्यसमप्रभे ।
भक्त्या समर्पितं वाणि गृहाणाचमनीयकम् ॥ आचमनी-
यं० ॥ कमलभवनजाये कोटिसूर्यप्रकाशे शिवदशुचिविला-
से कोमलाहारयुक्ते । दधिमधुघृतयुक्तं क्षीररम्भाफलाढ्यं
शुचि रुचि मधुपर्कं गृह्यतां देववन्द्ये ॥ मधुपर्कं० । दधि
क्षीरं घृतोपेतं शर्करामधुसंयुतम् । पञ्चामृतस्नानमिदं
स्वीकुरुष्व महेश्वरि ॥ पञ्चामृतस्नानं० ॥ सुवर्णकलशानी-
तैर्नानागन्धसुवासितैः । शुद्धोदकस्नानमिदं स्वीकुरुष्व
सुरेश्वरि ॥ शुद्धोदकस्नानं० । पञ्चोपचारपूजां कृत्वा सर-
स्वतीसूक्तेनाभिषेकः । शुक्लवस्त्रद्वयं देवि कोमलं कुटि-
लालके । भक्त्या मयार्पितं वाणि ब्रह्माणि प्रतिगृ० ॥ वाग्-
देव्यै नमः वस्त्रयुग्मं० ॥ आचमनीयं० ॥ शब्दब्रह्मारणे देवि
शब्दशास्त्रकृतालये । ब्रह्मसूत्रं गृहाण त्वं ब्रह्मशक्रादिपूजिते ॥
ब्रह्माण्यै० यज्ञोपवीतं० ॥ आचमनं० ॥ कटकमुकुटहारै-
र्नूपुरैरङ्गदाद्यैर्विविधसुमणियुक्तैर्मेखलामुक्तहारैः । कमल-
दलविलासे कामदात्रि गृहीष्व प्रकटितकरुणार्द्रे भूरिशो

भूषणानि ॥ लोकमात्रे नमः आभरणानि सौभाग्यद्रव्याणि स० ॥ चन्दनागरुकस्तूरीकर्पूराद्यैश्च संयुतम् । गन्धं गृहाण वरदे विधिपत्नि नमोऽस्तु ते ॥ गम्भीरावर्तनायै० चन्दनं० ॥ अक्षतान्धवलान् दिव्यान् शालितण्डुलनिर्मितान् । गृहाण वरदे देवि ब्रह्मशक्ति शुभाक्षतान् ॥ चारुवेण्यै० अक्षतान् स० ॥ नन्द्यावर्तादिपुष्पैश्च मल्लिकाभिर्मनोहरैः । करवीरैर्मनोरम्यैर्बकुलैः केतकैः शुभैः ॥ पुन्नागैर्जातिकुसुमैर्मन्दारैश्च सुशोभितैः । नीलोत्पलैः शुभैश्चान्यैस्तत्कालतरुसम्भवैः ॥ प्रकल्पितानि माल्यानि गृहाणामरवन्दिते ॥ निखिलार्थदायै० पुष्पाणि स० ॥

॥ अथाङ्गपूजा ॥

१ ब्रह्माण्यै० पादौ पू० ।	१३ स्कन्दप्रपूज्यायै० स्कन्धौ० ।
२ ब्रह्मण्यमूर्तये० गुल्फौ० ।	१४ दीर्घसुबाहवे० बाहू० ।
३ जगत्स्वरूपायै० जङ्घे० ।	१५ पुस्तकधारिण्यै० हनुं० ।
४ जयदादायै० जानुनी० ।	१६ श्रोत्रियजन्मने० श्रोत्रे० ।
५ चारुविलासिन्यै० ऊरू० ।	१७ वेदस्वरूपायै० वक्त्रं० ।
६ कमलभूतये० कटी० ।	१८ सुनासायै० नासिकां० ।
७ जन्महीनायै० जघनं० ।	१९ बिम्बसमानोष्ठ्यै० ओष्ठौ० ।
८ गम्भीरनाभये० नाभिं० ।	२० कमलचक्षुषे० नेत्रे० ।
९ वारिपूज्यायै० उदरं० ।	२१ तिलकधारिण्यै० भालं० ।
१० लोकमात्रे० स्तनौ० ।	२२ चन्द्रमूर्तये० केशान्० ।
११ विशालवक्षसे० वक्षः० ।	२३ सर्वेश्वर्यै सरस्वत्यै० शिरः०
१२ सुविपश्चिते० कण्ठं पू० ।	२४ ब्रह्मरूपिण्यै० सर्वाङ्गं पू० ।

दशाङ्गं गुग्गुलोपेतं सुगन्धं च मनोहरम् । धूपं गृहाण कल्याणि भक्तिं मय्यचलां कुरु ॥ श्रीवाण्यै० ॥ धूपं० । घृताक्तवर्तित्रितयैर्दीपितं दीपमम्बिके । गृहाण चित्स्व-

रूपे त्वं कमलासनवल्लभे ॥ वागीश्वर्यै० दीपं० ॥ अपूपान्विविधान् स्वादून् शालिपिष्टोपपाचितान् । मृदुलान् गुडसंमिश्रान् सजीरकमरीचिकान् ॥ कदलीपनसाम्राणां सुपक्वानि फलानि च । कन्दमूलव्यञ्जनादि सोपदंशं मनोहरम् । अन्नं चतुर्विधोपेतं क्षीरान्नं सघृतं दधि ॥ चित्स्वरूपायै० नैवेद्यं० । शीतोदकं च सुस्वादु कर्पूरैलादिवासितम् । मध्ये मध्ये गृहाणेदं कामधेनुशताधिके ॥ कमलासनवल्लभायै० पानीयं० । उत्तरापोशनं० । हस्तप्र० । मुखप्रक्षालनं० । करोद्वर्तनार्थे चन्दनं० । ताम्बूलं च सकर्पूरं पूगनागदलैर्युतम् । गृहाण देवि देवेशि तत्त्वरूपे नमोऽस्तु ते । विश्वमूर्त्यै० ताम्बूलं० । इदं फलं० फलं० ॥ हिरण्यगर्भ० दक्षिणां० । नीराजनं गृहाण त्वं जगदानन्ददायिनि । जगत्तिमिरमार्तण्डमण्डले ते नमो नमः ॥ नीराजनं० । ज्ञानानन्दैकहेतवे० कर्पूरदीपं० । शारदे लोकमातस्त्वमाश्रिताभीष्टदायिनि । पुष्पाञ्जलिं गृहाणेमं मया भक्तिसमर्पितम् ॥ पुष्पाञ्जलिं० । ततः शिष्यादियुतः यानि कानि० प्रदक्षिणां कृत्वा, पाहि पाहि जगद्वन्द्ये नमस्ते भक्तवत्सले । नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ नमस्कारं कुर्यात् ॥ ततः प्रार्थयेत्–पाशाङ्कुशधरा वाणी वीणापुस्तकधारिणी । मम वक्त्रे वसेन्नित्यं दुग्धकुन्देन्दुनिर्मला ॥ चतुर्दशसु विद्यासु रमते या सरस्वती । चतुर्दशसु लोकेषु यैवैका पूज्यपादुका ॥ आवाहनं० इत्यादि प्रार्थयेत् । यस्य स्मृत्या० । अनेन मया कृतेन पूजनेन श्रीसरस्वती प्रीयताम् ।

ततः विप्राग्रे चतुर्दशलड्डुकान् घृतसंपृक्तान् दक्षिणाताम्बूलसहितान् निधाय वायनं दद्यात् । पूजासाङ्ग-

तासिध्यर्थं ब्राह्मणाय लड्डुकवायनदानं ब्राह्मणपूजनं च करिष्ये। गन्धाः पान्तु०, स्वस्त्यस्तु दीर्घ०। सरस्वति नमस्तुभ्यं वरदे भक्तवत्सले। उपायनं प्रदास्यामि विद्यावृद्धिं कुरुष्व मे ॥ भारती प्रतिगृह्णाति भारतीयं ददाति च। भारती तारकोभाभ्यां भारत्यै ते नमो नमः ॥ इदं चतुर्दशसङ्ख्याकलड्डुकवायनं सघृतं सदक्षिणाकं सताम्बूलं अमु० ब्राह्म० तुभ्य०। प्रति०, प्रति०। अनेन वायनदानेन श्रीसरस्वती प्रीयताम् ॥

ततः उत्तराषाढासु बलिदानं तदङ्गत्वेन पूजनं करिष्ये। पञ्चोपचारैः सम्पूज्य, सरस्वत्यै साङ्गायै सपरिवारायै सायुधायै सशक्तिकायै इमं यथासोपस्करबलिं समर्पयामि। तेन श्रीसरस्वती प्रीयताम् ॥

ततः श्रवणे विसर्जनं कर्तुं आदौ तदङ्गत्वेन पूजनं करिष्ये। पञ्चोपचारैः सम्पूज्य, उत्तिष्ठब्रह्मण० इति उत्थापयेत् ॥ इति सरस्वतीपूजाविधिः ॥

॥ घटध्मानमहालक्ष्मीव्रतविधिः ॥

आश्विनशुक्लाष्टम्यां चित्तपावनप्रसिद्धोऽयमाचारः। अत्र पूजाजागरणं च प्रधानम्। अष्टमी चार्धरात्रव्यापिनी ग्राह्या, शिष्टाचारात्। तत्र विवाहोत्तरप्रथमाश्विनशुक्लाष्टम्यां प्रातस्तिलामलकपूर्वकमभ्यङ्गस्नानं विधाय नूतने श्वेतवाससी परिधाय मध्याह्ने मिलिताः सौभाग्यवत्यस्त्रियः जलाशयसमीपस्थाः क्षुद्राः शिलाः विवाहात् प्रथमवर्षादिक्रमेण तत्सङ्ख्याका आनीय तत्र महालक्ष्मीं आवाह्य तत्समीपे षोडशतन्तुमयं कुङ्कुमाक्तं दोरकं निर्माय वर्षादिसङ्ख्यया ग्रन्थियुतं कृत्वा तत्सहितां

महालक्ष्मीं सम्पूज्य, तण्डुलपिष्टनिर्मितान् षोडशदीपान्
॥ २७ ॥ पिण्डीश्च भक्षयेयुः। ततः रात्रौ कदलीस्तम्भमण्डिते तो-
रणाद्यलङ्कृते पीठे धान्यपूरितभाण्डोपरि तण्डुलपिष्टमयीं
शिरोमात्रां महालक्ष्मीप्रतिमां संस्थाप्य तां भूषणादिभिर-
लङ्कृत्य पञ्चोपचारपूजां कृत्वा शृङ्गाटकान् नारिकेलख-
ण्डान् ताम्बूलानि च समर्प्य स्वयं भक्षयित्वा तद्दोरकं
वामकरे बध्वा तत्पुरतः घटं धूपयित्वा तद्ध्मानपूर्वकं
गीतनृत्यादिना निशीथपर्यन्तं जागरणं कुर्युः। ततः
प्रभाते पञ्चोपचारपूजां कृत्वा दधिभक्तनैवेद्यं समर्प्य
दोरकं उत्तार्य तां प्रतिमां क्षुद्राः शिलाश्च यांतुदेवेति वि-
सृज्य नद्यां क्षिपेयुः। तद्दोरकं संरक्ष्य तदुत्तराष्टमीचतु-
र्दशीद्वये दोरकं पञ्चोपचारैः सम्पूज्य, षोडशार्घ्यान् दत्वा
षोडश नमस्कारान् कृत्वा तद्दोरकं नद्यां विसृजेयुः। एवं
पञ्चवर्षपर्यन्तं कुर्युः॥

प्रथमे वत्सरे व्रतग्रहणसङ्कल्पः। भर्ता पत्न्यासहोपविश्य, आचम्य देशकालौ सङ्कीर्त्य, मम सपत्नीकस्य पुत्रपौत्राद्यैहिकनानाविधभोगप्राप्तिपूर्वकअवैधव्यप्राप्तये च श्रीघटध्मानमहालक्ष्मीप्रीत्यर्थं पञ्चवर्षपर्यन्तं घटध्मानमहालक्ष्मीव्रतग्रहणं करिष्ये॥ अथ पूजाविधिः॥ आचम्य देशकालौ सङ्कीर्त्य, हस्तेऽक्षतोदकं गृहीत्वा, मम इह जन्मनि जन्मान्तरेण च अखण्डितसुखसौभाग्यावाप्त्यर्थं पुत्रपौत्राद्यभिवृद्धये अवैधव्यायुरारोग्यैश्वर्याद्यभीष्टसफलसिद्धिद्वारा श्रीमहालक्ष्मीप्रीत्यर्थं मया आचरितपञ्चवर्षात्मकघटध्मानमहालक्ष्मीव्रताङ्गत्वेन विहितं यथामिलितषोडशोपचारद्रव्यैः पुराणोक्तमन्त्रैः दोरकसहितमहालक्ष्मीपूजनमहं करिष्ये। आदौ निर्विघ्नतासिद्ध्यर्थं महाग-

णपतिपूजन कलशघण्टापूजनं च करिष्ये। गणपतिं कलशं घण्टां च सम्पूज्य, अपवित्रः प० पूजासम्भारान् प्रोक्ष्य महालक्ष्मीदोरकं आवाह्य पूजयेत् ॥ अथ ध्यानम् ॥ शारदेन्दुकलाकान्तिस्निग्धनेत्रां चतुर्भुजाम्। पद्मयुग्माभयदां वरव्यग्रकराम्बुजाम्। अभितो गजयुग्मेन सिच्यमानां घटाम्बुभिः॥ श्रीमहालक्ष्म्यै नमः महालक्ष्मीं ध्यायामि ॥ महालक्ष्मि समागच्छ पद्मनाभपदादिह। पञ्चोपचारपूजेयं त्वदर्थं देवि संभृता ॥ आवाहनं० ॥ आलयस्ते हि कथितः कमलं कमलालये। विमले कमले ह्यस्मिन् स्थितिं त्वं कमले कुरु ॥ आसनं० ॥ गङ्गादिसलिलाधारं तीर्थमन्त्राभिमन्त्रितम्। दूरयात्राश्रमहरं पाद्यं मे प्रति० ॥ पाद्यं० ॥ निधीनां सर्वरत्नानां त्वमनर्घ्यगुणा ह्यसि। तथापि भक्तिसंयुक्तं गृहाणार्घ्यं नमोऽस्तु ते ॥ अर्घ्यं० ॥ आचम्य जगदाधारे सिद्धिलक्ष्मि जगत्प्रिये। चपले देवि ते दत्तं तोयं गृह्ण नमोऽस्तु ते ॥ आचमनीयं० ॥ इदं तव महालक्ष्म्याः कर्पूरागरुवासितम्। तीर्थेभ्यः सुसमानीतं स्नानार्थं प्रति० ॥ स्नानं० ॥ पयो दधि घृतं क्षौद्रं सितया च समर्पितम्। स्नानं पञ्चामृतेनाद्य कुरु देवि दयानिधे ॥ पञ्चामृतस्नानं० ॥ आचमनीयं० ॥ अभ्यङ्गार्थं मयाऽऽनीतं तैलं पुष्पादिवासितम्। प्रयत्नेनार्जितं शुद्धं महालक्ष्मि गृहाण भोः ॥ सुगन्धतैलस्नानं० ॥ अङ्गोद्वर्तनकं देवि कस्तूर्या कुङ्कुमेन च। अन्यैः सुगन्धद्रव्यैश्च निर्मितं प्रतिगृ० ॥ अङ्गोद्वर्तनकं० ॥ नानातीर्थादाहृतं च तोयमुष्णं मया कृतम्। स्नानार्थं च मया दत्तं गृह्य० ॥ उष्णोदकस्नानं० ॥ नाममन्त्रेण पञ्चोपचारपूजां कृत्वा, सुरास्त्वेत्यादिनाऽभिषेकः। तन्तुसन्तानसंसिद्धं कलाकौ-

शेयकल्पितम् । सर्वाङ्गाभरणं श्रेष्ठं वसनं परिधीयताम् ॥
॥ २९ ॥ वस्त्रं० ॥ मुक्तामणिगणोपेतामनर्घ्यां च सुखप्रदाम् । कञ्चुकीं ते सुखस्पर्शां ददामि हरिवल्लभे ॥ कञ्चुकीं० ॥ कण्ठसूत्रं ताडपत्रं हरिद्रां कुङ्कुमाञ्जनम् । सिन्दूरादि प्रदास्यामि सौभाग्यं देहि मेऽव्ययम् ॥ सौभाग्यद्रव्याणि स० । हारकङ्कणकेयूरमेखलाकुण्डलानि च । रत्नाढ्यं मुकुटोपेतं भूषणानि प्रगृह्यताम् ॥ आभूषणानि स० ॥ मलयाचलसम्भूतं नानापन्नगसेवितम् । शीतलं बहुलामोदं चन्दनं प्रति० ॥ चन्दनं० ॥ अक्षतानरविन्दाक्षि नक्षत्रेण सहोदरि । माणिक्यप्रतिमाः पद्मे गृहाण त्वं मयार्पितान् ॥ अक्षतान्० ॥ मिलत्परिमलामोदं मत्तालिकुलसङ्कुलम् । आनन्दि नन्दनोद्यानं पद्मायै कुसुमं नमः ॥ पुष्पाणि० ॥

॥ अथाङ्गपूजा ॥

१ लक्ष्म्यैनमः पादौ पूजयामि ।	७ मन्मथवासि० स्तनौ पू० ।
२ पद्मायै नमः गुल्फौ पूज० ।	८ क्षमायै० हृदयं पू० ।
३ कमलायै न० जानुनी पू० ।	९ क्षीराब्धितनयायै० कण्ठं पू० ।
४ हरिप्रियायै न० उरू पू० ।	१० उमायै नमः नेत्रे पू० ।
५ इन्दिरायै न० कटी पूज० ।	११ रमायै नमः शिरः पू० ।
६ मङ्गलायै० नाभिं पू० ।	१२ श्रीमहालक्ष्म्यै० सर्वाङ्गं पू० ।

॥ पत्रपूजा ॥

१ महालक्ष्म्यै० अपामार्गप० ।	६ शान्तिरूपिण्यै० सेवन्तिकाप० ।
२ गौर्यै नमः दूर्वापत्रं० ।	
३ पार्वत्यै न० धत्तूरपत्रं० ।	७ देव्यै नमः सिन्दूरपत्रं० ।
४ जगद्धात्र्यै० बिल्वपत्रं० ।	८ लोकवन्द्यायै० जातीपत्रं० ।
५ जगत्प्रतिष्ठा० चम्पकपत्रं० ।	९ काल्यै न० अशोकप० ।

१० शिवायै० शमीपत्रं० ।	१४ मङ्गलायै० बकुलपत्रं० ।
११ भवान्यै० कदलीपत्रं० ।	१५ पुत्रदायिन्यै० अगस्तिपत्रं० ।
१२ इन्द्राण्यै० बदरीपत्रं० ।	१६ भक्तवत्सलायै० तुलसीपत्रं० ।
१३ शर्वाण्यै० करवीरपत्रं० ।	

॥ अथ षोडशदूर्वापत्रपूजा ॥

१ श्रियै नमः दूर्वापत्रं० ।	९ राममात्रे नमः दूर्वापत्रं०
२ लक्ष्म्यै नमः ,,	१० शिवायै नमः ,,
३ कालिकायै नमः ,,	११ भूतनाथायै नमः ,,
४ महाकाल्यै नमः ,,	१२ भक्तवत्सलायै नमः ,,
५ विकराल्यै नमः ,,	१३ भवान्यै नमः ,,
६ त्रैलोक्यजनन्यै नमः ,,	१४ सिद्धेश्वर्यै नमः ,,
७ एकनाथायै नमः ,,	१५ विश्वरूपिण्यै नमः ,,
८ रेणुकायै नमः ,,	१६ शिवायै नमः ,,

गन्धसम्भारसन्नद्धं कस्तूरीमोदसम्भवम् । सुरासुरनरानन्दि धूपं देवि गृहाण मे ॥ धूपमा० ॥ मार्तण्डमण्डलाखण्डचन्द्रबिम्बाग्नितेजसाम् । निधानं देवि दीपोऽयं निर्मितस्तव भक्तितः ॥ दीपं द० ॥ देवतालयपातालभूतलाधारधान्यजम् । षोडशाकारसम्भारं नैवेद्यं ते नमः श्रिये ॥ नैवेद्यं स० ॥ मध्येपानीयं । उ०, ह०, मु० । सुगन्धद्रव्यसंयुक्तं सुवासितजगत्त्रयम् । करोद्वर्तनकं मातर्गृहा० ॥ करोद्वर्तनं स० ॥ बीजपूराम्रपनसखर्जूरीदलसंयुतम् । नारिकेलफलं दिव्यं गृहाण कमलालये ॥ फलानि स० ॥ पातालतलसम्भूतं वदनाम्भोजभूषणम् । नानागुणसमाकीर्णं ताम्बूलं देवि ते नमः ॥ ताम्बूलं० ॥ सुवर्णं सर्वधातूनां श्रेष्ठं देवि प्रियं सदा ।

भक्त्या ददामि वरदे स्वर्णवृष्टिं प्रदेहि मे ॥ दक्षिणां० ॥
॥ ३१ ॥ सुरासुरशिरोरत्नप्रभानीराजितक्रमे । रूपसाम्राज्यसंसिध्यै कुर्वे नीराजनं विधिम् ॥ आर्तिक्यदीपं द० ॥ कर्पूरनिर्मितं दीपं स्वर्णपात्रे निवेशितम् । नीराजनं मया दत्तं गृहा० ॥ कर्पूरदीपं द० ॥ कायवाङ्मानसं पापं यत्कृतं जन्मजन्मनि । तन्मे नाशय देवि त्वं प्रदक्षिणविधानतः ॥ प्रदक्षिणां स० ॥ या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता । नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ नमस्कारान्० ॥ पारिजातादिजातीयं नानाकुसुमसञ्चयम् । अर्पयेऽनल्पसंसिध्यै पूजासम्पूर्णताकृते ॥ पुष्पाञ्जलिं स० ॥ विष्णोर्वक्षसि पद्मे च शङ्खे चक्रे तथाम्बरे । लक्ष्मीर्नित्या यथासि त्वं मयि नित्या तथा भव ॥ प्रार्थनां० । ततः तंदोरकं ताम्रपात्रे निधाय तदुपरि गन्धाक्षतोदकफलपुष्पहिरण्यसहितान् षोडशार्घ्यान्दद्यात् । तत्र मन्त्रः—महालक्ष्मि जगन्मातः सुखसौभाग्यदायिनि । महालक्ष्मि जगन्नाथे अर्घ्यं गृह्ण नमोऽस्तु ते ॥ श्रीमहालक्ष्म्यै नमः इदमर्घ्यं स० इति मन्त्रेण षोडशार्घ्यान् दद्यात् । षोडशनमस्कारांश्च कुर्यात् । यस्य स्मृ० । अनेन मया कृतेन पूजनेन श्रीमहालक्ष्मी प्रीयताम् ॥ पूजासाङ्गतासिध्यर्थं ब्राह्मणाय सौभाग्यवायनदानं ब्राह्मणपूजनं च करिष्ये । इदमर्घ्यं० अस्त्व० स्वस्त्यस्तु, दी० । उपायनमिदं तुभ्यं व्रतसम्पूर्णहेतवे । वायनं द्विजवर्याय सहिरण्यं ददाम्यहम् ॥ इदं सौभाग्यवायनदानं सदक्षिणाकं सताम्बूलं अमुकशर्मणे ब्रा० प्र०, प्र० । अनेन वायनदानेन श्रीमहालक्ष्मी प्रीयताम् ॥ ततः सायङ्काले पिष्टमय्या महालक्ष्म्याः पञ्चोपचारपूजां कृत्वा, मधुकैः शङ्खपुष्पैश्च शतपत्रैर्विचि-

र्पिताम् । पुष्पमालां प्रयच्छामि गृहाण परमेश्वरि ॥ इति पुष्पमालां समर्प्य, घटं धूपयित्वा, दोरकं वामकरं बध्वा प्रार्थयेत्—स्तुतिभिः सह दिव्याभिः सहितं नर्तितं मया । नृत्यं सङ्कल्पितं भक्त्या गृहाण परमेश्वरि ॥ घटध्मानं निशीथपर्यन्तं कुर्युः । ततः प्रातः पञ्चोपचारपूजां कृत्वा दधिभक्तनैवेद्यं समर्प्य यान्तुदेवेति विसृज्य, प्रतिमां शिलाश्च नद्यां क्षिपेयुः । दोरकमुत्तार्य संरक्ष्य स्थापयेयुः । यस्य स्मृत्या० । अनेन घटध्मानमहालक्ष्मीव्रताख्येन कर्मणा महालक्ष्मी प्रीयताम् ॥

॥ शुक्लनवम्यां कूष्माण्डबलिदानविधिः ॥

नवम्यां प्रातः देव्या नित्यपूजां विधाय, आचम्य देशकालौ सङ्कीर्त्य, मया कृतस्य शारददुर्गानवरात्रोत्सवकर्मणः साङ्गतासिध्यर्थं तत्सम्पूर्णफलावाप्तये श्रीमहाकालीमहालक्ष्मीमहासरस्वतीश्रीकुलदेवतातृप्त्यर्थं कूष्माण्डबलिप्रदानं करिष्ये । कूष्माण्डं देव्यग्रे निधाय, गन्धपुष्पाक्षतैः सम्पूज्य प्रार्थयेत्—कूष्माण्डो बलिरूपेण मम भाग्यादवस्थितः । प्रणमामि ततः सर्वरूपिणं बलिरूपिणम् ॥ १ ॥ चण्डिकाप्रीतिदानेन दातुरापद्विनाशनम् । चामुण्डाबलिरूपाय बले तुभ्यं नमोऽस्तु ते ॥ यज्ञार्थं बलयः सृष्टाः स्वयमेव स्वयंभुवा । अतस्त्वां घातयाम्यद्य तस्माद्यज्ञे वधोऽवधः ॥ इत्यनेन कूष्माण्डं घातयेत् । पूजामन्त्रमुच्चार्य, जयंतीमं० । श्रीम० श्रीकुलदेवतायै साङ्गायै सपरिवारायै सायुधायै सशक्तिकायै इमं कूष्माण्डबलिं समर्पयामि । भोश्रीम०श्रीकुलदेवते इमं बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्य आयुष्कर्त्री शान्तिकर्त्री पुष्टि-

॥ ३३ ॥ कर्त्री तुष्टिकर्त्री निर्विघ्नकर्त्री आरोग्यकर्त्री सर्वारिष्टनि-
रसनकर्त्री वरदा भव। अनेन बलिदानेन श्रीम०श्रीकुल-
देवता प्रीयताम्। हस्तौ पादौ प्रक्षाल्य आचम्य, शांता-
पृथिवी०। इत्यनेन बहिरुदकं सिञ्चेत्॥

अद्य० महाकाली० प्रीत्यर्थं सप्तशतीपाठकर्त्रे ब्राह्मणाय दक्षिणाप्रदानं करिष्ये। तदङ्गत्वेन ब्राह्मणपूजनं करिष्ये। गन्धाः पान्तु०। स्वस्त्यस्तु, दीर्घं०। इदं सुवर्णनिष्क्रयभूतं द्रव्यं सप्तशतीपाठकर्त्रे अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। प्रति०, प्रति०। अनेन दक्षिणाप्रदानाख्येन कर्मणा श्रीमहा०प्रीयताम्॥

॥ अथ नवरात्रोत्थापनविधिः॥

तत्र नवम्यां दशम्यां यथाकुलाचारेण वा उत्थापनं कार्यम्। आचम्य देशकालौ स्मृत्वा, श्रीम० कुलदेवता-प्रीत्यर्थं उत्थापनाङ्गत्वेन उत्तरपूजनं करिष्ये। गन्धपुष्पधूप-दीपमहानैवेद्यं च समर्प्य नीराजनं कृत्वा पुष्पाञ्जलिं समर्प्य, रूपं देहि यशो देहि भगं भगवति देहि मे। पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे॥ १॥ महि-षघ्नि महामाये चामुण्डे मुण्डमालिनि। आयुरारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते॥ २॥ इति प्रार्थयेत्। उत्तिष्ठब्र०। उत्तिष्ठ देवि चण्डेशि शुभां पूजां प्रगृह्य च। कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह॥ इति मन्त्रेण परम्पर-या पूजितायाः धातुप्रतिमाया उत्थापनमात्रं कृत्वा पूर्वस्थाने

निधाय पूजनं कुर्यात्, न विसर्जनम्। ततः घृतमीलित-
५ दुग्धेन दीपं प्रोक्षेत्॥

नूतनप्रतिमायास्तु, उत्तिष्ठ देवि चं० इति मन्त्रेण

उत्थापनं कृत्वा, दुर्गे देवि जगन्मातः स्वस्थानं गच्छ
॥३४॥ पूजिते। संवत्सरे व्यतीते तु पुनरागमनाय वै॥ इमां
पूजां मया देवि यथाशक्त्योपपादिताम्। रक्षार्थं त्वं समा-
दाय व्रजस्व स्थानमुत्तमम्॥ इत्यनेन विसर्जनं कृत्वा,
सोपस्करां सदक्षिणां आचार्याय दद्यात्। मृदादिप्रतिमा-
यास्तु विसर्जनान्ते जले प्रक्षेपः तत्र मन्त्रविशेषः-गच्छ
गच्छ परं स्थानं स्वस्थानं देवि चण्डिके। व्रज स्रोतोजलं
वृध्यै स्थीयतां च जले त्विह॥ इति॥ ततः यथाशक्ति
ब्राह्मणकुमारिकाभोजनसङ्कल्पं कृत्वा भूयसीं च दक्षिणां
दत्वा, यस्यस्मृ०। अनेन मया कृतेन शारददुर्गानवरात्रो-
त्सवाख्येन कर्मणा श्रीम० श्रीकुलदेवता प्रीयताम्। ततः
ब्राह्मणादीन् भोजयित्वा स्वयं सुहृद्युतः पारणं कुर्यात्॥

॥ अथ विजयादशमी ॥

सा च अपराह्णव्यापिनी ग्राह्या। दिनद्वये तद्योगे पूर्वैव। दिनद्वये प्रदोषव्याप्तौ परा, श्रवणो रोहिणीवदप्रयोजकः। दिनद्वयेऽपराह्णास्पर्शे तु पूर्वा। तत्रापि परदिनेऽपराह्णस्पर्शे तु परैव। अपराह्णे श्रवणयोगे तद्युक्तैव पूर्वा परा वा।

॥ सिंहासनादिराजचिन्हपूजाविधिः ॥

दशम्यां प्रातः आचम्य, देशकालौ स्मृत्वा, मम विजयकीर्तिआयुर्यशोबलप्राप्त्यर्थं सिंहासनादिराजचिन्हपूजनमहं करिष्ये। गणपतिपूजनादि कृत्वा, वक्रतुण्डेति प्रार्थयेत्। सिंहासनादिराजचिन्हपदार्थाः, भाषया तन्नामानि च प्रदर्श्यन्ते। सिंहासनाय नमः इत्यादिनाममन्त्रैः सिंहासनादीन् गन्धादिभिः सम्पूजयेत्।

१ सिंहासनाय नमः, गादी।
२ ध्वजाय नमः, जरीपटका।
३ पताकायै नमः, लग्या।
४ दुन्दुभये नमः, नगारखाना।
५ तूर्याय नमः, तूतारी।
६ शङ्खाय नमः, शंख।
७ घटीयन्त्राय नमः, घटका।
८ गजाय नमः, हत्ती।
९ अश्वाय नमः, घोडा।
१० शिबिकायै नमः, पालखी।
११ रथाय नमः, बग्गी।
१२ छत्राय नमः, अब्दागीर।
१३ चामराय न०, चंवरी।
१४ रत्नाय नमः, जवाहिरखाना।
१५ राजमुद्रिकायै० सिक्कामोहर।
१६ भाण्डाराय नमः, जामदारखाना।
१७ कट्टारकाय नमः, शिकेकट्टार।
१८ खड्गाय नमः, तलवार।
१९ चर्मणे नमः, ढाल।
२० कवचाय नमः, लोहकवच।
२१ अग्नियन्त्राय०, बंदूक।
२२ महाग्नियन्त्राय०, तोफ।
२३ कुन्ताय नमः, भाला।
२४ धनुषे नमः, धनुष्य।
२५ बाणाय नमः, बाण।
२६ छुरिकायै नमः, छुरी।
२७ व्यवहारसरस्वत्यै० दफ्तर।
२८ मसीलेखनीदेवताभ्यो नमः, कलमदान।
२९ कनकदण्डाय० चोबदारकाठी।

अनेन सिंहासनादिराजचिन्हपूजनाख्येन कर्मणा परमेश्वरः प्रीयताम् ॥

॥ अपराजितापूजनविधिः ॥

दशम्यां, अपराह्णे ग्रामाद्बहिः सीमानं समुल्लङ्घ्य ईशान्यां दिशि गत्वा शुचौ देशे भूमिं गोमयेनोपलिप्य,

तत्र चन्दनादिना अष्टदलं पद्मं विरच्य अपराजितां पूजयेत् । आचम्य देशकालौ सङ्कीर्त्य, मम सकुटुम्बस्य सपरिवारस्य क्षेमविजयसिध्यर्थं अपराजितापूजनं करिष्ये। महागणपतिपूजनादिसम्भारप्रोक्षणान्तं कृत्वा, पद्ममध्ये, अक्षतपुञ्जोपरि पूगफलं निधाय आवाहयेत् । ॐ अपराजितायै नमः अपराजितां आवाहयामि । तद्दक्षिणे, ॐ जयायै नमः जयां आ० । वामे,ॐ विजयायै० विजयां आ० । इत्यावाह्य, अपराजिताद्यावाहितदेवताभ्यो नमः इति ध्यानादिषोडशोपचारैः सम्पूज्य, चारुणा मुखपद्मेन विचित्रकनकोज्वला । जया देवी शिवे भक्ता सर्वकामान्ददातु मे ॥ काञ्चनेन विचित्रेण केयूरेण विभूषिता । जयप्रदा महामाया शिवभावितचेतसा ॥ विजया च महाभागा ददातु विजयं मम । हारेण सुविचित्रेण भास्वत्कनकमेखला ॥ अपराजिता रुद्रलता करोतु विजयं मम ॥ इति सम्प्रार्थ्य। हरिद्रारक्तवस्त्रं दूर्वायुक्तसिद्धार्थकान् प्रदक्षिणं वलयाकारेणाबध्य, सदापराजिता यस्मात्त्वं लतासूत्रमाश्रिता । सर्वकामार्थसिध्यर्थं तस्मात्त्वां पूजयाम्यहम् ॥ भवापराजिते देवि मम सर्वसमृद्धये । पूजितायां त्वयि श्रेयो ममास्तु दुरितं हतम् ॥ इत्यनेन तद्वलयमभिमन्त्र्य, जयदे वरदे देवि दशम्यामपराजिते । धारयामि भुजे दक्षे जयलाभाभिवृद्धये ॥ बलमाधेहि मयि च मम शत्रौ पराजयम् । त्वद्धारणाद् भवेयुर्मे धनधान्यसमृद्धयः ॥ इति मन्त्रेण दक्षिणबाहौ धृत्वा, इमां पूजां मया देवि यथाशक्ति निवेदिताम् । रक्षार्थं तु समादाय व्रज स्वस्थानमुत्तमम् ॥ इति विसर्जयेत् ॥ अनेन मया कृतेन पूजनेन अपराजिताद्यावाहितदेवताः प्रीयन्ताम् ॥

अथ शमीवृक्षपूजनविधिः ॥

॥ २७ ॥ तत्र ग्रामाद्बहिरीशानदिगवस्थितां शमीं गत्वा पूजयेत् । आचम्य देशकालौ स्मृत्वा, मम दुष्कृतामङ्गलदुःखादिनिरासार्थं क्षेमार्थं विजयार्थं च शमीवृक्षपूजनं करिष्ये । गणपतिपूजनादिसम्भारप्रोक्षणान्तं कृत्वा, अमङ्गलानां शमनीं शमनीं दुष्कृतस्य च । दुःखप्रणाशिनीं धन्यां प्रपद्येऽहं शमीं शुभाम् ॥ इति मन्त्रेण ध्यानावाहनादिषोडशोपचारैः सम्पूज्य जगन्नाथदर्शनं कृत्वा, प्रार्थयेत्- शमी शमयते पापं शमी लोहितकण्टका । धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी ॥ करिष्यमाणयात्रायां यथाकालं सुखं मया । तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजिते ॥ यस्य स्मृ० । अनेन मया कृतेन पूजनेन शमीदेवता प्रीयताम् । शम्यलाभे अश्मन्तकवृक्षं पूजयेत् । तत्प्रार्थनामन्त्रस्तु, अश्मन्तक महावृक्ष महादोषनिवारण । इष्टानां दर्शनं देहि शत्रूणां च विनाशनम् ॥ ततः साक्षतामार्द्रां शमीमूलगतां मृत्तिकां शमीपत्राणि च गृहीत्वा गीतवाद्यादिनिर्घोषैः स्वगृहं आनयेत् । ततः भूषणवस्त्रादि धारयित्वा युवतीभिः स्त्रीभिः नीराजनं कारयित्वा गोगोष्ठजलसन्निधौ खञ्जनं शोभनं पश्येत् ।

॥ अथ कार्तिकमासकृत्यानि ॥

तेषामारम्भः शुक्लदशम्येकादशीपौर्णमासीतुलासङ्क्रमणदिनान्यतमदिने कार्यः । तत्र मुहूर्तमात्रापि सूर्योदयव्यापिनी तिथिर्ग्राह्या । तत्रादौ स्नानविधिः । मुहूर्तावशिष्टायां रात्रौ तीर्थादौ गत्वा विष्णुं स्मृत्वा, देशकालौ सङ्कीर्त्य, ममानेकजन्मार्जितमहापातकादिसमस्तपापक्षयद्वारा श्रीराधादामोदरप्रीत्यर्थं कार्तिकस्नानमहं करि-

ष्ये । इति सङ्कल्प्य, नमः कमलनाभाय नमस्ते जलशायिने । नमस्तेऽस्तु हृषीकेश गृहाणार्घ्यं नमोऽस्तु ते ॥ इत्यर्घ्यं दत्वा, कार्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्दन । प्रीत्यर्थं तव देवेश दामोदर मया सह ॥ १ ॥ ध्यात्वाऽहं त्वां च देवेश जलेऽस्मिन् स्नातुमुद्यतः । तव प्रसादात्पापं मे दामोदर विनश्यतु ॥ २ ॥ इति मन्त्राभ्यां स्नात्वा पुनरर्घ्यं द्विर्दद्यात् । तत्र मन्त्रौ—व्रतिनः कार्तिके मासि स्नातस्य विधिवन्मम । गृहाणार्घ्यं मया दत्तं दनुजेन्द्र निषूदन ॥ १ ॥ नित्ये नैमित्तिके कृष्ण कार्तिके पापनाशने । गृहाणार्घ्यं मया दत्तं राधया सहितो हरे ॥ २ ॥ अयं विधिः प्रतिदिनं समानः । अनुदितहोमवत्कालापकर्षेण नित्यस्नानं सन्ध्यावन्दनं कृत्वाऽनन्तरं कार्तिकस्नानमिति मुख्यः पक्षः । अशक्तस्य तु, नित्यस्नानं कार्तिकस्नानं च तन्त्रेण करिष्ये इति सङ्कल्पः । नमः कमलनाभायेत्यर्घ्यं दत्वा नित्यस्नानमन्त्रान् पठित्वा, कार्तिकेऽहमिति मन्त्रद्वयं पठित्वा स्नायात् । नित्यस्नानार्घ्यान्ते व्रतिन इत्यादिमन्त्राभ्यामर्घ्यद्वयं दद्यादिति विशेषः । अन्यत्समानम् । समाप्तिस्तु कार्तिकपौर्णमास्यामेव ॥

॥ आकाशदीपदानविधिः ॥

सन्ध्यायां विंशतिहस्तात्मकवंशोपरि तन्नवमांशेन विचित्रां पताकां मयूरपिच्छमुष्टिं कलशं च निधाय अभ्रादिकरण्डेषु दीपं दद्यात् । मम समस्तपितृणामुद्धारणपूर्वकविष्णुप्रीत्यर्थं आकाशदीपदानं करिष्ये । दामोदराय नभसि तुलायां लोलया सह । प्रदीपन्ते प्रयच्छामि नमोऽनन्ताय वेधसे ॥ नमः पितृभ्यः प्रेतेभ्यो नमो धर्माय

विष्णवे । नमो यमाय रुद्राय कान्तारपतये नमः ॥ इति प्रज्वालयेत् ॥

॥ अथ धात्रीपूजाविधिः ॥

धात्रीसमीपं गत्वा, आचम्य देशकालौ स्मृत्वा, मम समस्तपापक्षयपूर्वकपुत्रादिसन्ततियशोबलप्रज्ञामेधासौभाग्यारोग्यविष्णुभक्तिप्राप्त्यर्थं यथामिलितषोडशोपचारद्रव्यैः धात्रीपूजनं करिष्ये । गणपतिपूजनादिसम्भारप्रोक्षणान्तं कृत्वा, ॐ धात्र्यै नमः इति नाममन्त्रेण ध्यानादिषोडशोपचारैः हरिद्राकुङ्कुमादिसौभाग्यद्रव्यसमर्पणपूर्वकं सम्पूज्य, नाममन्त्रैः पुष्पाणि समर्पयेत् ।

१ धात्र्यै नमः ।
२ शान्त्यै नमः ।
३ कान्त्यै नमः ।
४ मेधायै नमः ।
५ प्रकृत्यै नमः ।
६ विष्णुपत्न्यै नमः ।
७ महालक्ष्म्यै नमः ।
८ रमायै नमः ।
९ कमलायै नमः ।
१० इन्द्राण्यै नमः ।
११ लोकमात्रे नमः ।
१२ कल्याण्यै नमः ।
१३ कमनीयायै नमः ।
१४ सावित्र्यै नमः ।
१५ जगद्धात्र्यै नमः ।
१६ गायत्र्यै नमः ।
१७ सुधृत्यै नमः ।
१८ अव्यक्तायै नमः ।
१९ विश्वरूपायै नमः ।
२० सुरूपायै नमः ।
२१ अब्धिभवायै नमः ।

ततो धात्रीमूले सव्येन मन्त्राभ्यां तर्पणं कार्यम् । पिता पितामहश्चान्ये अपुत्रा ये च गोत्रिणः । वृक्षयोनिगता ये च ये च कीटत्वमागताः ॥ रौरवे नरके ये च महारौरवसंज्ञके । तिर्यग्योनिगता ये च ये च ब्रह्माण्डमध्यगाः ॥

पिशाचत्वं गता ये च ये च प्रेतत्वमागताः। तेऽपि ऽयन्तु मया दत्तं धात्रीमूलेऽक्षयं पयः ॥ १ ॥ आब्रह्मस्तंब०मातृमातामहादयः ॥ २ ॥ ततो धात्रीं सूत्रेण वेष्टयेत्। दामोदरनिवासायै धात्र्यै देव्यै नमोऽस्तु ते। सूत्रेणानेन बध्नामि सर्वदेवनिवासिनीम् ॥ ततः धात्र्यै नमः इति चतुर्दिक्षु अन्नबलिं दत्वा अष्टौ घृतदीपान् प्रज्वाल्य, समर्पयेत्–इमे दीपा मया दत्ताः प्रदीप्ता घृतपूरिताः। धात्रि देवि नमस्तुभ्यमतः शान्तिं प्रयच्छ मे ॥ ततः धात्रीं अष्टप्रदक्षिणाः कृत्वा, नमेत्—धात्रि देवि नमस्तुभ्यं सर्वपापक्षयङ्करि। पुत्रान्देहि महाप्राज्ञे यशो देहि बलं च मे ॥ प्रज्ञां मेधां च सौभाग्यं विष्णुभक्तिं च शाश्वतीम्। नीरोगं कुरु मां नित्यं निष्पापं कुरु सर्वदा ॥ सर्वस्वं कुरु मां देवि धनवन्तं तथा कुरु। संवत्सरकृतं पापं दूरीकुरु ममाक्षये॥ यस्य स्मृ०। अनेन मया कृतेन पूजनेन श्रीधात्रीदेवता प्रीयताम्। पूजासाङ्गतासिध्यर्थं श्रीमहाविष्णुप्रीत्यर्थं ब्राह्मणाय घृतपूर्णसहेमकांस्यपात्रदानं करिष्ये। ब्राह्मणं सम्पूज्य, दानमन्त्रः–आज्यं तेजः समुद्दिष्टमाज्यं पापहरं स्मृतम्। आज्यं सुराणामाहारआज्ये देवाः प्रतिष्ठिताः॥ इदं घृतपूरितसहेमकांस्यपात्रं सदक्षिणाकं सताम्बूलं अमुकशर्मणे० प्रददे०। प्रति०, प्र०। अनेन घृतपूरितसहेमकांस्यपात्रदानाख्येन कर्मणा तेन श्रीमहाविष्णुः प्रीयताम् ॥

एवं शक्तेन मासपर्यन्तं प्रतिदिनं कार्यम्। अशक्तेन त्रिदिनं एकदिनं वा। उक्तविधिना पूजाकरणासम्भवे यथासम्भवं पूजयेत्। दम्पतीब्राह्मणान् सुवासिनीश्च भोजयेत् ॥

धात्रीमूले विष्णुपूजनविधिः। देशकालौ स्मृत्वा, अद्य०
॥ ४१ ॥ प्राप्त्यर्थं, धात्रीमूले महाविष्णुपूजनं करिष्ये। महाविष्णवे
नमः इति नाममन्त्रेण षोडशोपचारैः सम्पूज्य, गन्ध-
पुष्पफलयुतं विशेषार्घ्यं दद्यात् । अर्घ्यं गृहाण भगव-
न् सर्वकामप्रदो भव । अक्षय्या सन्ततिर्मेऽस्तु दामोदर
नमोऽस्तु ते ॥ महाविष्णवे नमः इदं विशेषार्घ्यं समर्पया-
मि । यस्य स्मृत्या० । अनेन पूजनेन श्रीमहाविष्णुः
प्रीयताम् ॥

॥ पौर्णमास्यां लक्ष्मीन्द्रपूजनविधिः ॥

पौर्णमासी च निशीथव्यापिनी ग्राह्या । दिनद्वये तत्सत्वे तदभावे वा परैव । केचित्प्रदोषव्यापिनो परेत्याहुः। अस्यां अक्षक्रीडाजागरणं च विहितम् ।

रात्रौ आचम्य देशकालौ स्मृत्वा, ममायुरारोग्यस्थिर-
लक्ष्मीप्राप्त्यर्थं आश्विनपौर्णमास्यां विहितं लक्ष्मीपूज-
नमिन्द्रपूजनं च करिष्ये । गणपतिपूजनादिसम्भारप्रोक्ष-
णान्तं कृत्वा, अक्षतपुञ्जस्थपूगफले ॐ लक्ष्म्यै नमः लक्ष्मीं
आवाहयामि । ॐ इन्द्राय नमः इन्द्रं आवाहयामि इत्या-
वाह्य, पद्मासनां पद्महस्तां पद्मां पद्मदलैर्युताम् । दिग्गजैः
सेव्यमानां च काञ्चनैः कलशोत्तमैः॥ श्रीलक्ष्म्यै नमः लक्ष्मीं
ध्यायामि॥ चतुर्दन्तसमारूढो वज्रपाणिः पुरन्दरः। शची-
पतिश्च ध्यातव्यो नानाभरणभूषितः ॥ इन्द्राय नमः इन्द्रं
ध्यायामि। ततः लक्ष्मीन्द्राभ्यां नम इति नाममन्त्रेण
षोडशोपचारैः स्नानकाले नारिकेलोदकैः स्नापयित्वा नैवेद्य-
९ काले पयः नारिकेलखण्डं च समर्प्य पूजां समाप्य, नमस्ते
सर्वदेवानां वरदासि हरिप्रिये ।या गतिस्त्वत्प्रपन्नानां सा

मे याभूत्त्वदर्चनात् ॥ विचित्रैरावतस्थाय भास्वत्कुलिश-पाणये । पौलोम्यालिङ्गिताङ्गाय सहस्राक्षाय ते नमः ॥ इति प्रार्थयेत् । कृतस्य० ब्राह्मणान् गन्धादिभिः पूजयिष्ये । तेभ्यश्च भूयसीं दक्षिणां० । यस्य स्मृ० । अनेन मया कृतेन पूजनेन लक्ष्मीन्द्रौ प्रीयेताम् । ततः ब्राह्मणान् पूजयित्वा पानार्थं पयो दत्वा दक्षिणां च दद्यात् मन्त्राशिषो गृह्णीयात् स्वयं च नारिकेलोदकं पीत्वा सुहृद्युतः पयः पिबेत् । रात्रौ जागरणं कृत्वाऽक्षक्रीडां कुर्यात् ॥

॥ कोजागरव्रताङ्गलक्ष्मीन्द्रपूजाविधिः ॥

पौर्णमासी रात्रिव्यापिनी ग्राह्या । तस्यां उपोषणं कृत्वा सायंसन्ध्यावन्दनोत्तरं भूमिं गोमयेनोपलिप्य, रङ्गवल्लीभिरलङ्कृते पीठोपरि कलशं संस्थाप्य, अभितः यथाशक्ति घृतदीपान् वा प्रज्वाल्य, उपरि मण्डपिकां विधाय कलशस्थपूर्णपात्रोपरि अष्टदलं विलिख्य मृन्मयादिप्रतिमायां नारिकेलफलादौ वा ऐरावतस्थितलक्ष्मीं इन्द्रं च आवाह्य पूजां कुर्यात् । आचम्य, देशकालौ स्मृत्वा, मम दीर्घायुरारोग्यपुत्रपौत्रादिसमृद्धिगजाश्वादिराज्यसम्पदाद्यवाप्तिद्वारा श्रीलक्ष्मीन्द्रदेवताप्रीत्यर्थं कोजागरव्रताङ्गभूतं श्रीसूक्तेन पुराणोक्तमन्त्रैश्च यथामिलितषोडशोपचारद्रव्यैः लक्ष्मीन्द्रपूजनं करिष्ये । आदौ निर्विघ्नतासिध्यर्थं महागणपतिपूजनं आसनविधिं कलशशङ्खघण्टापूजनं च करिष्ये । गणानां त्वा० गणपतिं सम्पूज्य वक्रतुण्डेति प्रार्थयेत् । आसनविध्यादिसम्भारप्रोक्षणान्तं कृत्वा ऐरावतस्थितलक्ष्मीन्द्रौ ध्यायेत् । चतुर्भुजां महालक्ष्मीं गजपृष्ठगतां शुभाम् । दण्डाक्षसूत्रवरदां तथैवाभयपा

णिनीम्॥पद्मासनां पद्महस्तां पद्मां पद्मदलैर्युताम्। दिग्गजैः सेव्यमानां च काञ्चनैः कलशोत्तमैः॥ अभितः सिच्यमानां च श्वेतच्छत्रविराजिताम्। सर्वालङ्कारसंयुक्तां महालक्ष्मीं विचिन्तये॥ ऐरावतसमारूढं सहस्राक्षं शचीयुतम्। त्रैलोक्याधिपतिं देवं ध्यायामि सुरनायकम्॥ श्रीलक्ष्मीन्द्राभ्यां नमः लक्ष्मीन्द्रौ ध्यायामि॥ हिरण्यव०। आवाहयामि देवि त्वामाहूतासुरकिन्नरैः। मदीयभवने देवि भव सन्निहिताधुना॥ आवाहनं०॥ तांमआव०। नानारत्नप्रभज्योतिप्रभासितदिगन्तरे। रत्नासनं गृहाणेदं लक्ष्मि दिव्याम्बरान्वितम्॥ आसनं०॥ अश्वपूर्वां०। पद्मासनसमासीने पद्मपत्रायतेक्षणे। गन्धपुष्पाक्षतोपेतं पाद्यार्थं गृह्यतां जलम्॥ पाद्यं०॥ कांसोस्मितां०। अनर्घ्यं रत्नविमलैर्हैमकल्पैर्विभूषितैः। अर्घ्यं गन्धादिसंयुक्तं गृहाण हरिवल्लभे॥ अर्घ्यं०॥ चंद्रांप्रभा०। आराधितासि देवि त्वं सुरकिन्नरमानवैः। आराधयामि भक्त्या त्वं गृहाणाचमनीयकम्॥ आचमनीयं०॥ शर्करा दधिमध्वाज्यैः पूजार्थं चाहृतं मया। मधुपर्कं गृहाणेदं वरदे भक्तवत्सले॥ मधुपर्कं स०॥ आचमनीयं०॥ सरत्नहेमकलशैरानीतैः परमादरात्। पञ्चामृतैरतिप्रीत्या स्नानं कुरु हरिप्रिये॥ आप्यायस्व०॥ दधिक्रा०॥ घृतंमिमि०॥ मधुवाता०॥ स्वादुः पवस्व०॥ इति मन्त्रैः पञ्चामृतस्नानं स०॥ नारिङ्गसहकारादिनानारत्नपदाम्बुभिः। नारिकेलोदकैः स्नानं मन्दिरे कुरु साम्प्रतम्॥ नारिकेलोदकस्नानं स०॥ पञ्चरत्नोदकैः स्वच्छं गङ्गायाः सुमनोहरैः। रत्नाकरस्य तनये कुरु स्नानं हरिप्रिये॥ रत्नोदकस्नानं स०॥ सुवर्णवर्णे हेदेवि भक्तदारिद्र्यनाशिनि। स्वर्णोदकेन स्नपनं

कुरु नारायणि स्वयम् ॥ स्वर्णोदकस्नानं० ॥ आदित्यव० ।
कर्पूरपाटलोशीरकस्तूर्यादिसुवासितैः । गङ्गोदकैः कुरु
स्नानं पुण्डरीकाक्षवल्लभे ॥ कर्पूरादिसुगन्धस्नानं० ॥ तुलसी-
शतपत्रादिपाटलाचम्पकैरपि । सरोजवासितैर्नीरैः स्ना-
नं पद्मालये कुरु ॥ पुष्पोदकस्नानं० ॥ कनिक्रदज्ज० ।
अभ्यङ्गार्थं मयाऽऽनीतं तैलं पुष्पादिवासितम् । प्रय-
त्नेनार्जितं शुद्धं स्नानार्थं प्रतिगृ० ॥ अभ्यङ्गस्नानं
स० ॥ हरिद्रायाः कृतं चू० अङ्गोद्वर्तनकं स० ॥ नानाती-
र्थादाहृ० उष्णोदकस्नानं स० ॥ पञ्चोपचारपूजां कृत्वा
श्रीसूक्तेन देवीसूक्तेन चाभिषेकः ॥ उपैतुमां० ।
दुकूलवाससी वीते देवगन्धर्वसेविते । पीतवासयुगं मा-
तरिन्दिरे प्रतिगृ० ॥ वस्त्रं० । विमलं वसनं लक्ष्मि कञ्चु-
कीसहितं शुभे । उपवस्त्रं मयाऽऽनीतं गृहाण परमेश्वरि ॥
कञ्चुकीं स० ॥ रत्नकुण्डलकेयूरकाञ्चीमौक्तिकहारकैः ।
स्वर्णकङ्कणकेयूरैः पूजयामि मुदाऽऽहृतैः ॥ अलङ्कारान्
स० ॥ शुद्धं कार्पासरचितं काञ्चनं सुमनोहरम् । यज्ञोप-
वीतं वरद दीयमानं गृहाण मे ॥ इन्द्राय नमः यज्ञोपवीतं
स० ॥ कण्ठसूत्रं ताडपत्रं हरिद्रां कुङ्कुमाञ्जनम् ।
सिन्दूरादि प्रदास्यामि सौभाग्यं देहि मेऽव्ययम् ॥ सौ-
भाग्यद्रव्यं० ॥ गन्धद्वारां० ॥ कर्पूरकुङ्कुमयुतमष्टगन्धं
मनोहरम् । अङ्गीकुरु जगद्धात्रि देवि सौभाग्यदायिनि ॥
चन्दनं० ॥ मुक्ताफलस्वच्छतरानक्षतान् सुरपूजिते ।
गृहाण वरदे लक्ष्मि जगन्मातर्नमोऽस्तु ते ॥ अक्षतान्० ॥
मनसः काम० ॥ मल्लिकामालतीजातीचम्पकायूथकानि च ।
माल्यानि गृह्यतां भक्त्या सरोजेन्दिरमन्दिरे ॥ पुष्पा-
णि स० ॥

॥ अथाङ्गपूजा ॥

१ चञ्चलायै नमः पादौ पूजयामि ।
२ विपुलायै० गुल्फौ पू० ।
३ देव्यै नमः जङ्घे पू० ।
४ चपलायै० जानुनी पू० ।
५ कमलवासिन्यै० कटी पू० ।
६ क्षान्त्यै नमः नाभिं पू० ।
७ लक्ष्म्यै नमः हृदयं पू० ।
८ मदनमात्रे नमः स्तनौ पू० ।
९ ललितायै नमः भुजौ पू० ।
१० उत्कण्ठिन्यै नमः कण्ठं पू० ।
११ महामायायै० मुखं पू० ।
१२ श्रियै नमः शिरः पूज० ।
१३ श्रीमहालक्ष्म्यै० सर्वाङ्गं पू० ।

कर्दमेन०। गुग्गुलागरुकर्पूरदशाङ्गः सुमनोहरः । गृह्यतां परया भक्त्या धूपोऽयं गरुडध्वजे ॥ धूपमा० ॥ आप स्र० । मार्तण्डमण्डलाखण्डप्रभाभास्वरविग्रहे । गृहाण दीपं कमले सर्वान् कामान् प्रयच्छ मे ॥ दीपं द० ॥ आर्द्रांपुष्क० । नैवेद्यं षड्रसोपेतं पायसापूपसंयुतम् । दधिदुग्धाज्यसंयुक्तं गृहाण त्वं हरिप्रिये ॥ नैवेद्यं० ॥ मध्येपानीयं० । उत्तरापो० । मुखप्र० । हस्त० । करोद्व० । नारिकेलं च नारिङ्गं कदलीमातुलिङ्गकम् । ऋतुदेशोद्भवं पद्मे गृहाण फलमुत्तमम् ॥ फलं स० ॥ पातालतलसम्भूतं वदनाम्भोजभूषणम् । पूगीफलादिसंयुक्तं ताम्बूलं प्रतिगृ० ॥ ताम्बूलं० ॥ अनर्घ्यरत्नमाणिक्यमुक्ताफलयुतां बहु । अनेकहेममुद्रां च दक्षिणां स्वीकुरुष्व मे ॥ दक्षिणां स० ॥ हरिन्मणिगणाबद्धदण्डं शशिकरप्रभम् । सुवर्णछत्रं शोभाढ्यं गृहाण पर० ॥ छत्रं० ॥ सुवर्णवेणुसंयुक्तं चमर्याः केशसंयुतम् । चामरं कल्पितं भक्त्या गृहाण० ॥ चामरं० ॥ नृत्यगीतवाद्यादिराजोपचारान्० ॥ श्रियेजातः० ॥ मङ्गलार्त्तिं करिष्यामि

॥ ४६ ॥ दीपमालाभिरिन्दिरे। विलोकयामि सद्भक्त्या साम्राज्यपददायिके॥ आर्तिक्यदीपं स०॥ आर्द्रांयष्क०। नमस्ते सर्वलोकेशि नमो भक्तजनप्रिये। जनार्दनप्रिये गृह्ण प्रदक्षिणपरिक्रमम्॥ प्रदक्षिणां०॥ तांमआव०। नमस्तेऽस्तु महालक्ष्मि नमस्तेऽस्तु हरिप्रिये। नमो भक्तप्रिये नित्यं वरदे कमलालये॥ नमस्कारान्०॥ यःशुचिः प्र०। पुष्पाञ्जलिं गृहाणेमं मन्दिरे कमलालये। सम्यक् पूजाफलं देहि गोविन्दगृहिणि स्वयम्॥ पुष्पाञ्जलिं०॥ सरसिजनिलये सरोजहस्ते धवलतरांशुभगन्धमाल्यशोभे। भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम्॥ ऐरावतसमारूढ शचीनाथ सुरेश्वर। त्रैलोक्याधीश मघवन् मह्यं भूतिप्रदो भव॥ प्रार्थयामि। चन्द्रायार्घ्यदानविधिः। चन्द्रं सम्पूज्य, नीराज्य, अर्घ्यपात्रे गन्धाक्षतोदकफलहिरण्यं निधाय अर्घ्यं दद्यात्। तत्र मन्त्रः—नमस्तेऽस्तु निशानाथ लक्ष्मीभ्रातर्नमोऽस्तु ते। व्रतसम्पूर्णताहेतोर्गृहाणार्घ्यं विधो मम॥ चन्द्रमसे नमः इदमर्घ्यं समर्पयामि॥ आवाहनं न०। कृतस्य लक्ष्मीन्द्रपूजासाङ्गतासिध्यर्थं तत्सम्पू० ब्राह्मणान् सुवासिनीश्च भोजयिष्ये। नानानामगोत्रान् ब्राह्मणान् गन्धादिभिः पूजयिष्ये। तेभ्यश्च भूयसीं दक्षिणां दातुमहमुत्सृजे। यस्य स्मृ०। अनेन मया कृतेन पूजनेन श्रीलक्ष्मीन्द्रौ प्रीयेताम्॥ ततः नारिकेलोदकं प्राश्य, ब्राह्मणान् पयः पाययित्वा, स्वयं च पीत्वा, अक्षैः दीव्यन् रात्रौ निशीथपर्यन्तं जागरणं कुर्यात्॥ इति कोजागरव्रताङ्गलक्ष्मीन्द्रपूजाविधिः॥

॥ अथ कोजागरव्रतकथाप्रारम्भः॥

अस्ति कोजागरं नाम व्रतानामुत्तमं व्रतम्। यत्कृत्वा

समवाप्नोति जन्तुर्लोकाननुत्तमान् ॥ ऋषय ऊचुः। कार्तिकस्य उपाङ्गानि व्रतानि कथयन्तु नः । कृतेषु येषु भवति सम्पूर्णं कार्तिकव्रतम् ॥ बालखिल्या ऊचुः ॥ आश्विने शुक्लपक्षे तु भवेद्या चैव पूर्णिमा । तद्रात्रौ पूजनं कुर्याच्छ्रियो जागृतिपूर्वकम् ॥ नारिकेलोदकं पीत्वा अक्षक्रीडां समारभेत् । निशीथे वरदा लक्ष्मीः को जागर्तीति भाषिणी ॥ जगत्प्रभुमतीतस्यां लोकचेष्टावलोकनी । तस्मै वित्तं प्रयच्छामि यो जागर्ति महीतले ॥ सर्वथैव प्रकर्तव्यं व्रतं दारिद्र्यभीरुभिः । एतद्व्रतप्रभावेण वलितोऽप्यभवद्धनी ॥ ऋषय ऊचुः ॥ वलितः प्रोच्यते कोऽसौ लब्धवान्स कुतो व्रतम् । एतद्विस्तरतो ब्रूत बालखिल्यास्तपोधनाः ॥ बालखिल्या ऊचुः ॥ ब्राह्मणो वलितो नाम मागधः कुशसम्भवः। नानाविद्याप्रवीणोऽसौ सन्ध्यास्नानपरायणः ॥ याचनं मरणं तुल्यं मन्यते स द्विजोत्तमः । गृहागतं स गृह्णाति नान्यद्याचयते क्वचित् ॥ यस्य भार्या महाचण्डी नित्यं कलहकारिणी । मद्धगिन्थः स्वर्णरौप्यालङ्कारादिविभूषिताः ॥ १० ॥ नानामाल्याम्बरधरा दृश्या देवाङ्गना इव । अहं दरिद्रस्य गृहे पतिताऽस्मि दुरात्मनः ॥ लज्जा मां बाधतेऽत्यन्तं ज्ञातीनां मुखदर्शने । धिगस्तु चैव विद्याया निर्धनस्य कुलस्य च ॥ एवं वदति लोकेषु न करोति पतीरितम् । सङ्कल्पं कृतवानेकं यद्यद्भर्ता वदिष्यति ॥ विपरीतं करिष्यामि यावल्लक्ष्मीः प्रसीदति । भर्तः पाषाणबुद्ध त्वं चौर्यं कुरु नृपालये ॥ आनीयतां धनं भूरि नोचेत्संताडयाम्यहम् । क्षणं रोदिति नाश्नाति कदाचिद्बहु खादति ॥ सा कपालं ताडयतीत्येवं क्लेशयते पतिम् । दृष्ट्वा तस्यास्तु चरितं याचनादुःखभीतितः ॥ नोवाच वचनं किञ्चि-

यथालाभेन तोषितः । एकस्मिन् श्राद्धपक्षे तु ह्युद्विग्नोऽभूद् द्विजोत्तमः ॥ एतस्मिन्वत्सरे सर्वं श्राद्धसामग्रिकं गृहे ॥ वर्तते गृहिणी चेयं न करिष्यति किञ्चन ॥ इत्युद्विग्नमना विप्रो न भाषयति किञ्चन । चिन्तयाविष्टमेवं तमाययौ मित्रमुत्तमम् ॥ नाम्ना गणपतिख्यातं तस्मिन्नभ्यागते सति । नोवाच पूर्ववद्वार्तां मित्रं वचनमब्रवीत् ॥ २० ॥ भो भो वलित चित्तं ते किमर्थं चिन्तयान्वितम् । अवश्यं स्वधिया कृत्वा चिन्तां ते निर्हराम्यहम् ॥ वलित उवाच ॥ अधुना पितृपक्षे तु पितुः श्राद्धं समागतम् । सामग्रिकं चास्ति गृहे विपरीतकरी प्रिया ॥ कथं सम्पाद्यते श्राद्धमिति चिन्तायुतोऽस्म्यहम् ॥ गणपतिरुवाच ॥ धन्योऽसि कृतकृत्योऽसि भार्या यस्येदृशी गृहे ॥ ब्रूहि त्वं वैपरीत्येन भार्या कार्यं करिष्यति । वलितस्तु तथेत्युक्त्वा सायं भार्यामभाषत ॥ अनर्थकारके चण्डि परश्वः श्राद्धकं पितुः । न स्थापितं धनं यस्मान्मदर्थं तैस्तु पापकैः ॥ तस्मान्न शीघ्रं पाकं त्वं कुरु दुष्टे करोषि चेत् । ब्राह्मणा ये द्यूतकाराः शौचाचारविवर्जिताः ॥ निमन्त्र्यास्ते त्वया भद्रे नोत्तमास्तु कदाचन । इति भर्तृवचः श्रुत्वा सम्भारस्तु महान्कृतः ॥ निमन्त्रितास्तु सद्विप्राः काले पाकः कृतस्तया । विपरीतैरेव वाक्यैः श्राद्धं सम्पादितं तया ॥ पिण्डदानं ततः कृत्वा भार्यावचनमब्रवीत् । विसर्ज्य पिण्डान्नीत्वा त्वं क्षिप गङ्गाजले शुभे ॥ पिण्डान्नीतांस्तथेत्युक्त्वा शौचकूपे व्यचिक्षिपत् । तच्छ्रुत्वा वलितो दुःखी बभूवाकुलिताननः ॥ ३० ॥ क्रोधाद्विनिर्ययौ गेहात्सङ्कल्पं कृतवानिति । लक्ष्मीर्यदि प्रसन्नास्यात्तदान्नं भक्षयाम्यहम् ॥ इति सङ्कल्प्य विप्रोऽसौ गहने निर्जने

वने । एको धर्मनदीतीरे वृत्तवल्कलधारकः ॥ त्रिंशद्दिनानि
॥ ४६ ॥ न्यवसदागता त्विषपूर्णिमा । कालिवंशसमुद्भूता नाग-
कन्याः सुलोचनाः ॥ निवसन्ति वने तस्मिन्व्रतं चक्रू रमा-
मये ॥ श्वेतीकृतं तु सुधया गृहं चन्द्रगृहोपमम् ॥ मण्ड-
लानि विचित्राणि नानापिष्टैः कृतानि च । पञ्चामृतानि
रत्नानि दर्पणाच्छादनानि च ॥ स्थापयित्वेन्दिरापूजा
कृता ताभिः प्रयत्नतः । एवं तु प्रथमो यामो बालाभिर्नीत
एव हि ॥ प्रारब्धं च ततो द्यूतं तुर्यन्तास्तु न लेभिरे । चतु-
र्भिस्तु विनाक्षाणां क्रीडनं नैव जायते ॥ तस्मान्मृगयस्तु-
रीयस्तु विचार्यैवं विनिर्गता । कन्यका तु नदीतीरे ददर्श
वलितं द्विजम् ॥ ज्ञात्वा तं साधु चरितं सचिन्तं च मुखा-
कृतेः । उवाच वचनं चारु द्विज कोऽसि समागतः ॥ या
ह्यद्य क्रीडितुं द्यूतं लक्ष्म्याः प्रीतिकरं परम् । इत्थं तद्व-
चनं श्रुत्वा वलितो वाक्यमब्रवीत् ॥४०॥ वलित उवाच ॥
द्यूतेन क्षीयते लक्ष्मीर्द्यूताद्धर्मो विनश्यति । मुधैतद्वदसे
किं त्वं कथं लक्ष्मीः प्रसीदति ॥ कन्योवाच ॥ भाषसे
त्वं पण्डितवत् कर्म तेऽस्ति तु मूर्खवत् । इषस्य शुक्लपू-
र्णायां द्यूताल्लक्ष्मीः प्रसीदति ॥ द्यूतक्रीडां तु कृत्वैवं कौतुकं
पश्य चैन्दिरम् । इत्युक्त्वासौ तया नीतो क्रीडार्थं स्वस्य
मन्दिरे ॥ दत्वा तस्मै नारिकेलजलं भक्ष्यादिकं तथा ॥
आरब्धं च ततो द्यूतं श्रीलक्ष्मीः प्रीयतामिति ॥ लापि-
७ तानि च रत्नानि कन्याभिर्ब्राह्मणेन तु । कौपीनं लापितं
स्वीयं ताभिर्निर्जितमेव तत् ॥ ब्राह्मणः क्रोधसंयुक्तः किं
कर्तव्यं मयाधुना । उपवीतं लापयित्वा ततः स्वीयं कले-
वरम् ॥ लापयिष्ये विनिश्चित्य ह्युपवीतं ललाप सः । ताभि-
र्जितं च तदपि शरीरं लापितं स्वकम् ॥ ततोऽर्धरात्रे

सञ्जाते लक्ष्मीनारायणावुभौ । आगतौ लोकचरितं द्रष्टुं
॥ ५० ॥ विप्रं ददर्शतुः ॥ हीनोपवीतकौपीनं चिन्तयातिकृशीकृतम् ।
उवाच वचनं विष्णुः शृणु त्वं पद्मलोचने ॥ तव व्रतकरो
विप्रः कथं जातः सचिन्तकः । तस्मादेनं कुरु क्षिप्रं लक्ष्मी-
वन्तं सुखान्वितम् ॥ ५० ॥ इति विष्णुवचः श्रुत्वा पद्मयाऽ
सौ कटाक्षितः । बालाचित्तहरो जातस्तत्कालं मदनोपमः ॥
ततः कामेन संविद्धास्तास्तु या नागकन्यकाः । विप्राय
वचनं प्रोचुः शृणु विप्र तपोधन ॥ यद्यस्माभिर्जितस्त्वं च
भर्तास्माकं वचोनुगः । वयं त्वया निर्जिताश्चेद्यथेच्छसि
तथा कुरु ॥ इति तद्वचनं श्रुत्वा तथा मेने स च द्विजः ।
क्रीडनात्ता जिताः कन्या गान्धर्वेण विवाहिताः । तासां
रत्नानि ताश्चापि गृहीत्वा स्वगृहं ययौ । प्राप्तं चण्डी तिर-
स्कारान्मयेदं भाग्यमुत्तमम् ॥ तस्मात्संमानिता चण्डी
सापि प्रीता बभूव ह । चकार स्वामिनश्चाज्ञामित्थं लक्ष्मी-
व्रतं त्विदम् ॥ बहुरात्रिव्यापिनी या सात्र पूर्णा विशिष्यते
तत्राराध्य महालक्ष्मीमिन्द्रमैरावतस्थितम् ॥ उपवासं प्रकु-
र्वीत दीपान्दद्याच्च भक्तितः । लक्षं तदर्धमयुतं सहस्रं
शतमेव वा ॥ घृतेन दद्याद्दीपांस्तु तिलतैलेन वा व्रती ।
रात्रौ जागरणं कुर्यान्नृत्यगीतपुरःसरम् ॥ यथाविभवतो
देयाः पुरो वीथीषु दीपकाः । देवतायतने चैव आरामेषु
गृहेषु च ॥ ६० ॥ ततः प्रभाते सुस्नातः सम्पूज्य च शत-
क्रतुम् । ब्राह्मणान्भोजयेत्क्षीरघृतशर्करपायसैः ॥ वासो-
भिर्दक्षिणाभिश्च सवस्त्रान् पूजयेद् द्विजान् । यथाशक्ति
च दातव्या दीपाः स्वर्णविनिर्मिताः ॥ एवं विधिं विनिर्वर्त्य
ततः पारणमाचरेत् । व्रतस्यास्य प्रभावेण कल्पसङ्ख्या वसेद्
ध्रुवम् ॥ अप्सरोभिः परिवृतः स्वर्गलोके महीयते । इह

चायुष्यमारोग्यं पुत्रपौत्रादिसम्पदः ॥ एवं लक्ष्मीव्रतं कृत्वा न दरिद्रो न दुःखभाक् । कथां श्रुत्वा विधानेन व्रतस्यापि फलं लभेत् ॥ ६५ ॥ इति सनत्कुमारसंहितायां कोजागरव्रतकथा समाप्ता ॥

॥ आश्विनकृष्णगोवत्सद्वादश्यां गोपूजनविधिः ॥

द्वादशी च प्रदोषव्यापिनी ग्राह्या । दिनद्वये तत्सत्वे पूर्वा । तस्यां सायंसन्ध्योत्तरं वत्सतुल्यवर्णां पयस्विनीं सवत्सां तदलाभेऽन्यां वा गां पूजयेत् । आचम्य देशकालौ स्मृत्वा, मम सकलाभीष्टसिद्धिद्वारा सवत्सगोदेवताप्रीत्यर्थं गोवत्सद्वादश्यां विहितं सवत्सगोःपूजनं करिष्ये । रुद्ररूपिण्यै सवत्सायै गवे नम इति मन्त्रेण चन्दनहरिद्राकुङ्कुमादिभिः पुष्पमालाभिश्च सम्पूज्य, ताम्रपात्रे गन्धपुष्पतिलाक्षतहिरण्ययुतं जलं गृहीत्वा मातारुद्राणां० दधिष्ट । क्षीरोदार्णवसम्भूते सुरासुरनमस्कृते । सर्वदेवमये मातर्गृहाणार्घ्यं नमोऽस्तु ते ॥ रुद्ररूपिण्यै सवत्सायै गवे इदमर्घ्यं समर्पयामि इति गोःपादमूले दद्यात् । तज्जलं साक्षतं स्वमूर्ध्नि निक्षिप्य, गोग्रासार्थं माषादिसंसिद्धान् वटकान् दद्यात् । तत्र मन्त्रः–सुरभिस्त्वं जगन्मातर्नित्यं विष्णुपदे स्थिते । सर्वदेवमये ग्रासं मया दत्तमिमं ग्रस ॥ ततो गां प्रदक्षिणीकृत्य नमस्कृत्वा, प्रार्थयेत्–सर्वदेवमये देवि सर्वदेवैरलङ्कृते । मातर्ममाभिलषितं सफलं कुरु नन्दिनि ॥ ततः गां दीपैर्नीराजयेत् । यस्य स्मृत्या० । अनेन सवत्सपूजनाख्येन कर्मणा गोदेवता प्रीयताम् । तद्दिने तैलपक्वं स्थालीपक्वं गोःक्षीरादि च न भक्षयेत् ॥

अद्य० अद्यप्रभृतिपञ्चदिनपर्यन्तं देवादीनां नीरा-

जनं करिष्ये। एतत्प्रभृतिपञ्चदिनेषु योषितः देवादीन् नीराजयेयुः, देवागारे दीपरचनां च कुर्युः ॥

॥ त्रयोदश्यां यमदीपदानविधिः ॥

त्रयोदशी प्रदोषव्यापिनी ग्राह्या। दिनद्वये तत्सत्वेऽस्तोत्तरं किञ्चिद्व्यासावपि परैव ॥ अथ प्रयोगः ॥ त्रयोदश्यां सायंसन्ध्यावन्दनोत्तरं आचम्य देशकालौ स्मृत्वा, मम अपमृत्युनिरसनद्वारा श्रीयमप्रीत्यर्थं आश्विनकृष्णत्रयोदश्यां विहितं यमदीपदानं करिष्ये। तिलतैलयुतं दीपं प्रज्वाल्य, दीपदेवताभ्यो नम इति चन्दनादिभिरभ्यर्च्य गृहाद् बहिर्दक्षिणस्यां दिशि निधाय मन्त्रं पठेत्—मृत्युना पाशदण्डाभ्यां कालेन श्यामया सह। त्रयोदश्यां दीपदानात्सूर्यजः प्रीयतां मम ॥ अनेन दीपदानेन श्रीयमः प्रीयताम्। हस्तौ पादौ प्रक्षालयेत् ॥

॥ अथ नरकचतुर्दश्यामभ्यङ्गस्नानविधिः ॥

चतुर्दशी अभ्यङ्गस्नाने चन्द्रोदयव्यापिनी ग्राह्या। दिनद्वये चन्द्रोदयव्यापित्वे पूर्वा। दिनद्वयेऽपि चन्द्रोदयव्याप्त्यलाभेऽरुणोदयव्यापिनी पूर्वविद्धा ग्राह्या। उदयात्प्राक् चतुर्घटिकात्मकोऽरुणोदय इति सकलसिद्धान्तः। उक्तकाले देशकालौ सङ्कीर्त्य मम नरकभयपरिहारार्थं आश्विनकृष्णचतुर्दश्यां चन्द्रोदये सुगन्धतिलतैलाभ्यङ्गपूर्वकं मङ्गलस्नानं करिष्ये। इति सङ्कल्प्य, स्नानसमये अपामार्गं तुम्बीफलवृन्तं चक्रमर्दवृन्तं*चानीय शिरःप्रभृत्यङ्गेषु पादक्षिणयेन त्रिवारं भ्रामयेत्। तत्र मन्त्रः—सीता-

* टकाळा इति भाषया प्र०।

लोष्टसमायुक्तसकण्टकदलान्वित । हर पापमपामार्ग भ्राम्यमाणः पुनः पुनः ॥ प्रतिभ्रामणं मन्त्रावृत्तिः । उक्तवृत्तालाभे केवलेनापामार्गेण तदलाभे तत्पत्रैर्वा भ्रामयेत्, मन्त्रलिङ्गे तस्यैव प्राधान्यात् ॥ यमतर्पणविधिः ॥ अभ्यङ्गस्नानोत्तरं कार्तिकस्नानान्ते प्रातःसन्ध्यावन्दनं विधाय, यमतर्पणं कार्यम् तच्च जीवत्पितृकेण यज्ञोपवीतिना देवतीर्थेन साक्षताभिरद्भिः प्राङ्मुखेन सकृत्सकृत्कार्यम् । तद्भिन्नेन प्राचीनावीतिना, संतिलाभिरद्भिः पितृतीर्थेन दक्षिणामुखेन त्रिस्त्रिः कार्यम् । तत्र देशकालौ सङ्कीर्त्य, मम नरकभयनिरासार्थं संवत्सरकृतपापप्रणाशनार्थं यमप्रसादसिध्यर्थं नरकचतुर्दश्यां विहितं यमतर्पणं करिष्ये ।

१ यमाय नमः यमं तर्पयामि ।	८ औदुम्बराय० औदुम्बरं त० ।
२ धर्मराजा० धर्मराजं त० ।	९ दध्नाय० दध्नं त० ।
३ मृत्यवे नमः मृत्युं त० ।	१० नीलाय० नीलं त० ।
४ अन्तकाय० अन्तकं त० ।	११ परमेष्ठिने० परमेष्ठिनं त० ।
५ वैव वताय० वैवस्वतं त० ।	१२ वृकोदराय० वृकोदरं त० ।
६ कालाय० कालं त० ।	१३ चित्राय० चित्रं त० ।
७ सर्वभूतक्षयाय० सर्वभूतक्षयं त० ।	१४ चित्रगुप्ताय० चित्रगुप्तं त० ।

ततः--यमो निहन्ता पितृधर्मराजो वैवस्वतो दण्डधरश्च कालः । भूताधिपो दत्तकृतानुसारी कृतान्तमेतद् दशभिर्जपन्ति ॥ इमं श्लोकं दशवारं पठेत् । यस्य स्मृत्या० । अनेन मया कृतेन तर्पणेन श्रीयमः प्रीयताम् ॥

यद्यपि चतुर्दश्यां दिवाभोजननिषेधस्तथापि तद्दिने माषपत्रशाकेन दिवैव भोक्तव्यं, विशेषवचनात् ।

ततःप्रदोषसमये देवागारे मार्गे प्राकारोद्यानवीथिषु

गेहाङ्गणेषु गोवाजिहस्तिशालासु च दिनत्रयं दीपान् द-
॥ ५४ ॥ द्यात् ॥

अत्रोल्काग्रहणं पितॄणां मार्गदर्शनार्थं कार्यम् । प्रदीपनयोग्या तृणादिनिर्मिता दीर्घा दीपिकाकारा सोल्का । तां एकतः प्रदीप्तां गृहाद् बहिर्दक्षिणामुखस्तिष्ठन् गृह्णीयात् । तत्र मन्त्रः-शस्त्राशस्त्रहतानां च भूतानां भूतदर्शयोः। उज्ज्वलज्योतिषा देहं दहेयं व्योमवह्निना । ततस्तामुल्कां दक्षिणस्यां दिशि दर्शयन् मन्त्रं पठेत्-अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम । उज्ज्वलज्योतिषा दग्धास्ते यान्तु परमां गतिम् ॥ तामुल्कां दक्षिणस्यां दिशि त्यजेत् । अद्य०प्त्यर्थं पितॄणां मार्गदर्शनार्थं विहितमुल्काप्रक्षेपं करिष्ये । तत्र मन्त्रः-यमलोकं परित्यज्य आगता ये महालये । उज्ज्वलज्योतिषा वर्त्म प्रपश्यन्तु व्रजन्तु ते ॥ तत आगत्य हस्तौ पादौ प्रक्षाल्य आचम्य गृहं प्रविशेत् । चतुर्दश्यादिदिनत्रये दीपावलिसंज्ञके प्रतिदिनं प्रातर्मङ्गलस्नाननीराजने प्रदोषे दीपदानं च नित्यम् ॥

॥ अमावास्यायां लक्ष्मीकुबेरपूजाविधिः ॥

अमावास्या च प्रदोषव्यापिनी ग्राह्या। दिनद्वये प्रदोषव्याप्तौ सूर्यास्तोत्तरं घटिकैकमात्रव्याप्तौ च परा । पूर्वदिने एव प्रदोषव्यापिनी, न परदिने । दिनद्वये प्रदोषव्याप्त्यभावे वा लक्ष्मीपूजादौ पूर्वा । अभ्यङ्गस्नानादौ परा । तत्रामावास्यायामेव लक्ष्मीपूजनं, न चतुर्दश्याम् । अमायां प्रातरभ्यङ्गपूर्वकं पञ्चत्वगुदकस्नानं विधाय मध्याह्ने दर्शश्राद्धं विधाय सायंकाले नित्यकर्म निर्वर्त्य, दीपान् प्रज्वाल्य देवसमीपे यथाशक्तिदीपवृक्षान्निर्माय पूर्वोक्तप्र-

कारेण उल्कादर्शनं कृत्वा स्वलङ्कृतो लक्ष्मीपूजनं प्रतिमायामक्षतपुञ्जादौ सुवर्णादिद्रव्ये वा कुर्यात्। अथ प्रयोगः। आचम्य, देशकालौ स्मृत्वा, मम महालक्ष्मीप्रीतिद्वारा सर्वापच्छान्तिपूर्वकधनधान्यपुत्रपौत्रादिसन्तत्यैश्वर्याभिवृद्ध्यर्थं आश्विनकृष्णामायां विहितं श्रीसूक्तेन सक्तुमिवेति मन्त्रेण वा यथामिलितषोडशोपचारद्रव्यैः श्रीलक्ष्मीपूजनं कुबेरपूजनं (व्यवहारसरस्वतीमशीलेखनीदेवतापूजनं च) तन्त्रेण करिष्ये। आदौ० महागणपतिपूजनं कलशपूजनादि करिष्ये । गणपतिपूजनादिसम्भारप्रोक्षणान्तं विधाय देवता आवाहयेत्।

श्रीमहालक्ष्म्यै नमः महालक्ष्मीं आवाहयामि । राजाधिराजाय० महाराजाय नमः। श्रीकुबेराय० कुबेरं आवा०। (श्रीव्यवहारसरस्वत्यै० सरस्वतीं आवा० । मशीलेखनीदेवता० देवता आवा०) तदस्तु०। हिरण्यवर्णां०। सक्तुमिव० । श्रीलक्ष्मीकुबेराद्यावाहितदेवताः ध्यायामि। तांमआ०। श्रीलक्ष्मी० आसनं० । अश्वपूर्वां०। श्रीलक्ष्मी० पाद्यं०। कांसोस्मि०। श्रीलक्ष्मी० अर्घ्यं० । चन्द्राम्प्रभा० । श्रीलक्ष्मी० आचमनीयं०। आदित्यव०। श्रीलक्ष्मी० स्नानं०। आप्याय०। दधिक्रा०। घृतंमि०। मधुवाता०। स्वादुः प० इत्यादिभिः पञ्चामृतस्नानं०। पञ्चोपचारैः पूजां कृत्वा श्रीसूक्तादिना अभिषेकः। उपैतु० । श्रीलक्ष्मी० वस्त्रं०। आचमनीयं०। क्षुत्पिपासा०। श्रीलक्ष्मी० आभूषणं० । गन्धद्वारां० । श्रीलक्ष्मी० चन्दनं०। अक्षताश्च० अक्षतान्०। अहिरिव० सौभाग्यद्रव्यं०। लाजान्, धान्यानि* स०। मन-

---

* धने इति प्रसिद्धाः।

स॰का॰। श्रीलक्ष्मी॰ पुष्पाणि। कर्दमेन॰। श्रीलक्ष्मी॰ धूपमा॰। आपःसृ॰। श्रीलक्ष्मी॰ दीपं द॰। आर्द्रांपुष्क॰। श्रीलक्ष्मी॰ पृथुकादि* नैवेद्यं॰। उत्तरापोशनं॰। ह॰, मु॰, करोद्वर्तनं॰। इदं फलं॰ फलानि॰। पूगीफलं॰ ताम्बूलं॰। हिरण्यगर्भ॰ दक्षिणां॰। श्रियेजा॰ कर्पूरदीपं॰। आर्द्रांयष्क॰। नमस्कारान्॰। तांमआव॰। प्रदक्षिणां॰। यःशुचिः॰। पुष्पाञ्जलिं॰। एवं सम्पूज्य, प्रार्थयेत्—नमस्ते सर्वदेवानां वरदासि हरिप्रिया। या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्चनात्॥ या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ इति लक्ष्मीं प्रार्थ्य, कुबेरं प्रार्थयेत्—धनदाय नमस्तुभ्यं निधिपद्माधिपाय च। भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पदः॥ ततो दीपस्वरूपां लक्ष्मीं भावयित्वा, प्रार्थयेत्—विश्वरूपस्य भार्यासि पद्मे पद्मालये शुभे। महालक्ष्मि नमस्तुभ्यं सुखरात्रिं कुरुष्व मे॥ वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतम्। सुखरात्रिं प्रभातेऽद्य तन्मेऽलक्ष्मीर्व्यपोहतु॥ या रात्रिः सर्वभूतानां या च देवेष्ववस्थिता। संवत्सरप्रिया या च सा ममास्तु सुमङ्गला॥ माता त्वं सर्वभूतानां देवानां सृष्टिसम्भवा। आख्याता भूतले देवि सुखरात्रि नमोऽस्तु ते॥ कृतस्य क॰ ब्राह्मणान् गन्धादि॰। भूयसीं द॰ दातु॰। यस्य स्मृत्या॰। अनेन मया कृतेन पूजनेन लक्ष्मीकुबेराद्यावाहितदेवताः प्रीयन्ताम्॥ ततो विविधमधुरपक्वान्नादिना विप्रान् सम्भोज्य स्वयं सुहृद्युतो भुञ्जीत। अत्र रात्रावेव भोजनं विहितं बालातुराणां तु दिवैव। तां रात्रिं द्यूतविनोदादिना नयेत्॥

---

* पोहे इति प्रसिद्धाः।

॥ अलक्ष्मीनिष्कासनविधिः ॥

अर्धरात्रसमये नारीभिः शूर्पडिण्डिमवादनपुरःसरं गृहाङ्गणात् अलक्ष्मीं निष्कासयेत् ॥

॥ अथ कार्तिकमासः ॥

॥ शुक्लप्रतिपदि गोवर्धनसहितगोपालपूजाविधिः ॥

प्रतिपत् यदि दशमुहूर्ता तदा तस्यामेव सर्वाणि कार्याणि कर्तव्यानि । ततो न्यूने पूर्वत्रैव । प्रातः अभ्यङ्गपूर्वकं मङ्गलस्नानं विधाय, सुवासिनीभिः नीराजनं कारयित्वा, नववस्त्राणि अलङ्कारांश्च धृत्वा, गोमयेन अन्नकूटेन वा गोवर्धनं कृत्वा, तत्सहितगोपालपूजनं गोबलीवर्दपूजनं च कार्यम् । आचम्य, देश० मम गोकोटिप्राप्तिद्वारा श्रीगोपालप्रीत्यर्थं यथामिलितषोडशोपचारद्रव्यैः गोवर्धनसहितगोपालपूजनं गोबलीवर्दपूजनं च करिष्ये । गणपतिपूजनादिप्रोक्षणान्तं विधाय, गोवर्द्धनसहितश्रीगोपालाय नमः, गवे नमः, बलीवर्दाय नमः इति नाममन्त्रैः आवाहनादिषोडशोपचारैः सम्पूज्य, महानैवेद्यं समर्प्य, प्रार्थयेत्–गोपालमूर्ते विश्वेश शक्रोत्सवविभेदक । गोवर्धनकृतच्छत्र पूजां मे हर गोपते ॥ गोवर्धनधराधार गोकुलत्राणकारण । बहुबाहुकृतच्छाय गवां कोटिप्रदो भव ॥ गां प्रार्थयेत्—लक्ष्मीर्या लोकपालानां धेनुरूपेण संस्थिता । घृतं वहति यज्ञार्थे मम पापं व्यपोहतु ॥ अग्रतः सन्तु मे गावो गावो मे सन्तु पृष्ठतः । गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥ यस्य स्मृ० । अनेन पूजनेन श्रीगोपालः प्रीयताम् ॥

तद्दिने गाः भूषयित्वा ताभ्यः तृणादिकं दद्यात् । दोहनभारवाहनादिकं वर्जयेत् । अत्र प्रातः सर्वैर्जनैः

द्यूतं कार्यम् । तत्र यस्य जयः स्यात् तस्य संवत्सरं जयो
॥५८ ज्ञेयः ॥

॥ शुक्लद्वितीयायां भ्रातृभोजनविधिः ॥

द्वितीया च अपराह्णव्यापिनी मध्याह्नव्यापिनी वा ग्राह्या । उभयदिनव्याप्तौ प्रतिपद्युता ग्राह्या । अस्यां भ्रात्रा भगिन्या च यमचित्रगुप्तयमदूतपूजनं, अर्घ्यदानं, भगिन्यै वस्त्रालङ्कारादिदानं, तद्धस्तभोजनं च कार्यम् ॥

॥ अथ विधिः ॥ आचम्य देश० मम आत्मनः यमलोकगमनावष्टम्भकफलसुखधनधान्यादि प्राप्त्यर्थं श्रीयमचित्रगुप्तयमदूतप्रीत्यर्थं यथामिलितोपचारद्रव्यैः पूजनमहं करिष्ये । गणपतिपूजनादि कृत्वा महीद्यौरित्यादिना कलशस्थापनादिपूर्णपात्रनिधानान्तं कृत्वा तदुपरि लोहमयीषु तिसृषु प्रतिमासु पूगफलेषु वा अग्न्युत्तारणप्राणप्रतिष्ठापूर्वकं व्याहृतिसहितनाममन्त्रैः देवता आवाहयेत् ।

ॐ भूर्भुव:० यमाय नमः यमं आवाहयामि ।

ॐ भूर्भुव:० चित्रगुप्ताय नमः चित्रगुप्तं आ० ।

ॐ भूर्भुव:० यमदूतेभ्यो नमः यमदूतान् आवाहयामि । तदस्तु० गृहाणे० । ॐभू० यमाद्यावाहितदेवताभ्यो नमः इति मन्त्रेण षोडशोपचारैः सम्पूज्य, ततः पात्रे गन्धाक्षतपुष्पफलहिरण्योदकं निधाय विशेषार्घ्यं दद्यात् ।

एह्येहि मार्तण्डज पाशहस्त यमान्तकालोकधरामरेश ।
भ्रातृद्वितीयाकृतदेवपूजां गृहाण चार्घ्यं भगवन्नमस्ते ॥ श्रीयमादिदेवताभ्यो नमः इदं विशेषार्घ्यं स० । ततो धर्मराजं प्रणमेत्–धर्मराज नमस्तुभ्यं नमस्ते यमुनाग्रज । पाहि मां किङ्करैः सार्धं सूर्यपुत्र नमोऽस्तु ते ॥ ततः यमुनां नमेत् यमस्वसर्नमस्तेऽस्तु यमुने लोकपूजिते । वरदा भव मे

नित्यं सूर्यपुत्रि नमोऽस्तु ते ॥ आवाहनं० । यस्य स्मृ० । अनेन पू० श्रीयमाद्यावाहितदेवताः प्रीयन्ताम् ॥

अस्यां स्वगृहे न भोक्तव्यम् । भगिनीहस्तात् अवश्यं भोक्तव्यम् । तां स्वर्णालङ्कारवस्त्रादिना पूजयेत् । स्वभगिन्यभावे मित्रभगिन्येव पूज्या । भ्रातुर्भोजने मन्त्रः- भ्रातस्तवानुजाताहं भुङ्क्ष्व भक्तमिदं शुभम् । प्रीतये यमराजस्य यमुनाया विशेषतः ॥ ज्येष्ठा तु, भ्रातस्तवाग्रजाताहमिति पठेत् । भगिनीभिरपि भ्रातरः ताम्बूलवस्त्रालङ्कारादिभिः पूज्याः ॥

॥ शुक्लनवम्यां कूष्माण्डदानविधिः ॥

इयमक्षय्यनवमी, सा च पूर्वाह्णव्यापिनी अष्टमीविद्धा ग्राह्या । आचम्य देशकालौ स्मृत्वा, मम ब्रह्महत्यादिसमस्तपापक्षयपूर्वकबहुपुत्रपौत्रश्रीसौभाग्यादिसकलमनोरथावाप्तिकूष्माण्डबीजसमसहस्रसङ्ख्याकाब्दब्रह्मलोकनिवासकामनया श्रीपरमेश्वरप्रीत्यर्थं अक्षय्यनवमीपर्वनिमित्तं ब्राह्मणाय कूष्माण्डदानमहं करिष्ये । तदङ्गत्वेन ब्राह्मणपूजनं करिष्ये । महाविष्णुस्वरू० इदमासनमित्यादिपूजां कृत्वा, नमोऽस्त्वनं० स्वस्त्यस्तु दीर्घ० । दानमन्त्रः-ब्रह्महत्यादिपापघ्नं ब्रह्मणा निर्मितं पुरा । कूष्माण्डं बहु बीजाढ्यं पुत्रपौत्रादिवृद्धिदम् ॥ मुक्ताप्रवालहेमादियुक्तं दत्तं तव द्विज । अनन्तपुण्यफलदमतः० ॥ इदं कूष्माण्डफलं मुक्ताप्रवालरत्नहेमफलताम्बूलवस्त्रादियुतं गोधूमराशिस्थितं वनस्पतिदैवतं सुवर्णदक्षिणायुतं अमुकश० ब्राह्मणाय तुभ्य० सम्प्रददे । प्रति०, प्रति० । यस्य स्मृत्या० । अनेन कूष्माण्डदानाख्येन कर्मणा श्रीपरमेश्वरः प्रीयताम् ॥

॥ विष्णुप्रबोधोत्सवविधिः ॥

स च एकादश्यां द्वादश्यां वा, पूर्वरात्रौ दिवा वा कार्यः। आचम्य देशकालौ स्मृत्वा, मम महापातकाद्यशेषपापनिवृत्तिपूर्वकश्रीमहाविष्णुप्रसादसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं कृतविष्णुशयनोत्सवाङ्गभूतं कार्तिकशुक्लैकादश्यां विष्णुप्रबोधोत्सवं करिष्ये। तदङ्गत्वेन महाविष्णुपूजनं करिष्ये। देवं विविधोपचारैः सम्पूज्य, यथासम्भववीणादिमङ्गलवाद्यगीतघण्टावादनादिभिः देवं प्रबोधयेत्। तत्र मन्त्राः–योजागारत० ऋ० २। इदं विष्णुर्वि०सुरे। ब्रह्मेन्द्ररुद्राग्निकुबेरसूर्यसोमादिभिर्वन्दितवन्दनीय। बुध्यस्व देवेश जगन्निवास मन्त्रप्रभावेण सुखेन देव॥ इयं तु द्वादशी देव प्रबोधार्थं विनिर्मिता। त्वयैव सर्वलोकानां हितार्थं शेषशायिना॥ उत्तिष्ठोत्तिष्ठ गोविन्द त्यज निद्रां जगत्पते॥ त्वयि सुप्ते जगन्नाथ जगत्सुप्तं भवेदिदम्। उत्थिते चेष्टते सर्वमुत्तिष्ठोत्तिष्ठ माधव॥ एवं उत्थाप्य, चरणं पवि०। गता मेघा वियच्चैव निर्मलं निर्मला दिशः। शारदानि च पुष्पाणि गृहाण मम केशव॥ पुष्पाञ्जलिं दद्यात्। आवाहनं न०। अनेन विष्णुप्रबोधोत्सवाख्येन कर्मणा तेन श्री भगवान् महाविष्णुः प्रीयताम्॥

॥ शायितलक्ष्मीसहितविष्णुप्रतिमादानविधिः ॥

कार्तिकशुक्लैकादश्यां द्वादश्यां वा प्रातः स्नात्वा नित्यकर्म निर्वर्त्य, आचम्य देशका० मम सकुटुम्बस्य सपरिवारस्य पुत्रपौत्राद्यभिवृध्यर्थं मया आषाढशुक्लैकादशीमारभ्य कार्तिकशुक्लैकादशीपर्यन्तं कृतस्य श्रीलक्ष्मीसहितमहाविष्णोः शयनपर्यावर्तनप्रबोधव्रतस्य साङ्गतासिध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं ब्राह्मणाय लक्ष्मीसहित-

महाविष्णुप्रतिमादानं करिष्ये। तदङ्गत्वेन ब्राह्मणपूजनं करिष्ये। आसनादिना विप्रं सम्पूज्य, स्वस्त्यस्तु दीर्घमा०। दानमन्त्रः-लक्ष्मीयुत महाविष्णो चतुर्मासेषु शायित। विप्राय त्वां प्रदास्यामि मम शान्तिप्रदो भव॥ इमां शायितलक्ष्मीसहितमहाविष्णुप्रतिमां शय्यावस्त्राद्युपचारयुतां दक्षिणाफलसहितां अमुकश० प्रददे। प्रति०, प्र०। अनेन लक्ष्मीसहितविष्णुप्रतिमादानाख्येन कर्मणा तेन श्रीमहाविष्णुः प्रीयताम्॥

॥ चातुर्मास्यनियमव्रतसमाप्तिप्रकारः॥

कार्तिकशुक्लद्वादश्यां प्रातः स्नात्वा, नित्यकर्म विधाय, आचम्य देशकालौ स्मृत्वा, मया कृतस्य [अमुक] चातुर्मास्यनियमव्रतस्य साङ्गतासिध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं ब्राह्मणाय वर्जितपदार्थदानं यथाशक्तिगोनिष्क्रयद्रव्यदानं च करिष्ये। इति सङ्कल्प्य, कृतनियमानुसारेण तत्तदुद्यापनोक्तदानादिकं कृत्वा, महाविष्णुं प्रार्थयेत् इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो। न्यूनं सम्पूर्णतां यातु त्वत्प्रसादाज्जनार्दन॥ तद्व्रतमीश्वरार्पणं कुर्यात्।

॥ विष्णुप्रबोधोत्सवतुलसीविवाहविधिः॥

नवम्यादिदिनत्रये एकादश्यादिदिनपञ्चके कार्तिकशुक्लान्तर्गतविवाहनक्षत्रे वा,इत्याद्यन्यतमकाले अर्धास्तमिते गोधूलिके कार्यः। प्रायः द्वादश्यां सायंसन्ध्याकालव्यापिन्यां प्रबोधोत्सवतुलसीविवाहयोः सङ्क्षेपतः तन्त्रेणानुष्ठानमिति सर्वत्राचारः। अतस्तदनुसारेणैव प्रयोगोऽभिधीयते। द्वादश्यां सायंसन्ध्यावन्दनादिकं विधाय, भूमिं गोमयेनोपलिप्य रङ्गवल्लीभिरलङ्कृतं पीठं इक्षुमण्डपिकायुतं कृत्वा, आचम्य देशकालौ स्मृत्वा, मम समस्त-

पापक्षयपूर्वकविष्णुप्रसादसिध्यर्थं विष्णुप्रबोधोत्सवं सङ्क्षेपतस्तुलसीविवाहं च तन्त्रेण करिष्ये। तदङ्गतया पुरुषसूक्तेन षोडशोपचारैः श्रीमहाविष्णुपूजनं तुलसीपूजनं च करिष्ये। आदौ निर्विघ्नतासिध्यर्थं महागणपतिपूजनं आसनविधिं षडङ्गन्यासान् कलशशङ्खघण्टापूजनं च करिष्ये। गणानांत्वेति गणपतिं सम्पूज्य, वक्रतुण्डेति प्रार्थयेत्। पृथ्वित्व०। अपस०। तीक्ष्णदं०। वामपादेन भूमिं त्रिस्ताडयेत्। यत्पुरुषं० हृदयाय नमः इत्यादिषडङ्गन्यासान् कृत्वा, कलशस्य मु० वरुणं सम्पूज्य, शङ्खादौ० शङ्खं सम्पूज्य, आगमा० घण्टां च सम्पूज्य, अपवित्रः प० पूजासम्भारान् प्रोक्ष्य, ध्यायेत्–सहस्रशी० शान्ताकारं भु० इति विष्णुं ध्यात्वा, ध्यायेच्च तुलसीं देवीं श्यामां कमललोचनाम्। चतुर्भुजां दिव्यरूपां भक्ताभीष्टफलप्रदाम्॥ इति तुलसीं ध्यायामि। पुरुष० श्रीमहाविष्णवे दामोदराय श्रीतुलस्यै देव्यै च नमः॥ आसनं०॥ एतावा० श्रीमहा० पाद्यं०॥ त्रिपादू० श्रीमहा० अर्घ्यं०॥ तस्माद्वि० श्रीमहावि० आचमनीयं०॥ दध्याज्यमधुसंयुक्तं मधुपर्कं मयाऽऽहृतम्। गृहाण सर्वलोकेश दामोदर नमोऽस्तु ते॥ श्रीमहावि० मधुपर्कं स०॥ मधुपर्कानन्तरेण आचमनीयं स०॥ यत्पुरुषे० श्रीमहावि० स्नानं स०॥ सुवासिनीभिः मङ्गलवाद्यघोषपुरःसरं नागवल्लीदलगृहीताभ्यां सुगन्धतैलहरिद्राभ्यां उष्णोदकेन च मङ्गलस्नानं कारयित्वा स्वयं वा दत्वा, कनिक्रद० अभ्यङ्गार्थं मयाऽऽनीतं तैलं पुष्पादिवासितम्। प्रयत्नेनार्जितं शुद्धं स्नानार्थं प्रति०॥ श्रीमहावि० सुगन्धतैलस्नानं०॥ हरिद्रायाः कृतं चूर्णं सतैलं ससुगन्धिकम्। मया निवेदितं साम्बूद्वर्तनं प्रति०॥ हरिद्राचूर्ण-

लेपनं स० ॥ नानातीर्थादाहृतं च तोयमुष्णं मया कृतम् । स्नानार्थं च प्रयच्छामि गृह्यतां परमेश्वर ॥ श्रीमहावि० उष्णोदकस्नानं स० ॥ ततो नीराजनं कार्यम् ॥ आप्याय० श्रीमहावि० पयस्नानं० ॥ दधिक्राव्णो० श्रीमहावि० दधिस्नानं० ॥ घृतंमि० श्रीमहावि० घृतस्नानं० ॥ मधुवाता० श्रीमहावि० मधुस्नानं० ॥ स्वादुःप० श्रीमहावि० शर्करास्नानं० ॥ नाममन्त्राभ्यां पञ्चोपचारपूजां कृत्वा, अभिषेकः, सहस्रशी० अतोदेवाइत्यादिभिः । तंयज्ञं० श्रीमहावि० वस्त्रं, तुलस्यै पीतवस्त्रं स० ॥ तस्माद्य० सं० ॥ श्रीमहाविष्णवे नमः यज्ञोपवीतं० ॥ वस्त्रयज्ञोपवीतानन्तरेण आचमनीयं० ॥ तस्माद्य० ऋ० । श्रीमहावि० चन्दनं० ॥ अक्षताश्च० श्रीमहावि० अक्षतान्० ॥ अहिरिव० हरिद्रां कुङ्कुमं चैव सिन्दूरं कज्जलान्वितम् ॥ सौभाग्यद्रव्यसंयुक्तं गृहा० ॥ श्रीतुलस्यै देव्यै नमः सौभाग्यद्रव्यं० ॥ सौभाग्यदं कङ्कणं ते हस्तशोभाकरं परम् । अनेकरत्नघटितं गृह्यतां परमेश्वरि ॥ कङ्कणं स० ॥ तस्मादश्वा० । श्रीमहावि० पुष्पाणि० ॥ यत्पुरुषं० । श्रीमहावि० धूपमा० । ब्राह्मणो० । श्रीमहावि० दीपं द० । चंद्रमाम० । श्रीमहावि० नैवेद्यं० । मध्येपा० । उत्तरापो० । पूगीफलं म० श्रीमहावि० ताम्बूलं० । हिरण्यग० श्रीमहावि० दक्षिणां० ॥ श्रियेजातः० श्रीमहावि० नीराजनं० । नाभ्याआ० श्रीमहावि० प्रदक्षिणां० । सप्तास्या० श्रीमहा० नमस्कारान्० । यज्ञेनय० श्रीमहावि० मन्त्रपुष्पाञ्जलिं स० ॥ इति पूजां समाप्य, घण्टादिवाद्यघोषेण देवं प्रबोधयेत् ॥ तत्र मन्त्राः—योजागारेत्यादयः । इदंविष्णु० सुरे । ब्रह्मेन्द्ररुद्राग्निकुबेरसूर्यसोमादिभिर्वन्दितवन्दनीय । बुध्यस्व देवेश जगन्निवास

मन्त्रप्रभावेण सुखेन देव ॥ इयं तु द्वादशी देव प्रबोधार्थं विनिर्मिता । त्वयैव सर्वलोकानां हितार्थं शेषशायिना ॥ उत्तिष्ठोत्तिष्ठ गोविन्द त्यज निद्रां जगत्पते । त्वयि सुप्ते जगन्नाथ जगत्सुप्तं भवेदिदम् ॥ उत्थिते चेष्टते सर्वमुत्तिष्ठोत्तिष्ठ माधव ॥ एवमुत्थाप्य । पुष्पाञ्जलिं दद्यात् । चरणंपवित्रं० । गता मेघा वियच्चैव निर्मलं निर्मला दिशः । शारदानि च पुष्पाणि गृहाण मम केशव ॥ श्रीमहा० पुष्पाञ्जलिं स० । आगच्छ भगवन्देव अर्चयिष्यामि केशव । तुभ्यं दास्यामि तुलसीं सर्वकामप्रदो भव ॥ इति सम्प्रार्थ्य, तुलसीसंमुखां विष्णुप्रतिमां कृत्वा मध्ये अन्तःपटं धृत्वा मङ्गलाष्टकानि पठेत् । तानि च–

शुभमङ्गलसावधान ॥ आद्यो ढुण्ढिविनायको गणपतिश्चिन्तामणिःसिद्धिदः सेनाविघ्नपतिश्च वक्रवदनःश्रीपाशपाणिः प्रभुः । आशापाशविनायकः सुखकरो मोदादिकः सद्गणो लोलार्कादिविनायकः प्रतिदिनं कुर्यात्सदा मङ्गलम् ॥ शुभमु० ॥ १ ॥ विश्वात्मा भगवान् चराचरतनुर्विश्वाधिकोऽयं शिवो वेदान्तप्रथितोरुवैभवपदो निःशेषजाड्याहरः । यो गौरीरमणोऽत्र निर्जरवरो विश्वप्रकाशात्मको विध्वस्ताखिलभक्तपातककुलः कुर्यात्सदा मङ्गलम् ॥ शुभमु० ॥ २ ॥ यं वेदा न हि जानते पुरहरं शम्भुं भवानीपतिं विश्वात्मानमनन्तविष्णुविधिभिः संसेव्यपादाम्बुजम् । तं सर्वादिगुरुं मनोज्ञवपुषं गौरीविवाहोत्सुकं तत्पादाम्बुजलोचनान्ममा चिरं भूयात्सदा मङ्गलम् ॥ शुभमु० ॥ ३ ॥ यो देवः श्रुतिशेखरे निगदितो यं भासकं जानते येन भ्राम्यति लोकजालमखिलं यस्मै नमः कुर्वते । यस्मान्नापरमस्ति किञ्चिदपि वै यस्याङ्गमेतज्जगद्यस्मिंस्तिष्ठति-

छति सर्वमेव भुवनं कुर्यात्सदा मङ्गलम् ॥ शुभमु० ॥४॥

गङ्गा सिन्धु सरस्वती च यमुना गोदावरी नर्मदा कावेरी शरयू महेन्द्रतनया चर्मण्वती वेदिका । क्षिप्रा वेत्रवती महासुरनदी ख्याता च या गण्डकी पूर्णाः पूर्णजलैः समुद्रसहिताः कुर्वन्तु वो मङ्गलम् ॥ शुभमङ्ग० ॥ ५ ॥ लक्ष्मीः कौस्तुभपारिजातकसुरा धन्वन्तरिश्चन्द्रमा गावः कामदुघाः सुरेश्वरगजो रम्भादिदेवाङ्गनाः । अश्वः सप्तमुखो विषं हरिधनुः शङ्खोऽमृतं चाम्बुधे रत्नानीह चतुर्दश प्रतिदिनं कुर्वन्तु वो मङ्गलम् ॥ शुभमं० ॥६॥ गङ्गा गोमतिगोपती गणपतिर्गोविन्दगोवर्धनौ गीता गोमयगोरजो गिरिसुता गङ्गाधरो गौतमः । गायत्री गरुडो गया गिरिगुहा गम्भीरगोदावरी गन्धर्वग्रहगोपगोकुलगणाः कुर्वन्तु वो मङ्गलम् ॥ शुभमु० ॥ ७ ॥ वेदाश्चोपनिषद्गणाश्च विविधाः साङ्गाः पुराणान्विता वेदान्ता अपि मन्त्रतन्त्रसहितास्तर्कस्मृतीनां गणाः काव्यालङ्कृतिनीतिनाटकगणाः शब्दाश्च नानाविधाः श्रीविष्णोर्गुणराशिकीर्तनपराः कुर्वन्तु वो मङ्गलम् ॥ शुभलग्नसा० ॥ ८ ॥ तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव । विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥ शुभमङ्गलसा० ॥

ततः अन्तःपटमुदगपसार्य, अक्षतप्रक्षेपं कृत्वा, उभयोः पुष्पमालां समर्प्य, सुवासिनीभिः उभयोर्नीराजनं कारयित्वा, दामोदरहस्ते तुलसीदानं कुर्यात् । अनादिमध्यनिधन त्रैलोक्यप्रतिपादक । इमां गृहाण तुलसीं

विवाहविधिनेश्वर ॥ पार्वतीबीजसम्भूतां वृन्दाभस्मनि संस्थिताम् । अनादिमध्यनिधनां धवलां ते ददाम्यहम् ॥

पयो घटैश्च सेवाभिः कन्यावद्वर्धिता मया। त्वत्प्रियां
॥ ६६ ॥ तुलसीं तुभ्यं दास्यामि त्वं गृहाण भोः॥ देवीं कनकस-
म्पन्नां कनकाभरणैर्युताम्। दास्यामि विष्णवे तुभ्यं ब्रह्म-
लोकजिगीषया॥ मया संवर्द्धितां यथाशक्त्यलङ्कृतां
इमां तुलसीं देवीं दामोदराय श्रीधराय वराय तुभ्यमहं
सम्प्रददे। इति देवपुरतः साक्षतोदकं क्षिपेत्। श्रीमहा-
विष्णुः प्रीयताम्। इमां तुलसीं देवीं प्रतिगृह्णातु भवान्
इति वदेत्। ततो देवहस्तस्पर्शं तुलस्याः कृत्वा, कइदंकस्मा०
इति मन्त्रमन्येन वाचयेत्। यजमानः—त्वं देवि मेऽग्रतो
भूयास्तुलसीदेवि पार्श्वतः। देवि त्वं पृष्ठतो भूयास्त्वद्दाना-
न्मोक्षमाप्नुयाम्॥ मयेयं रोपिता देवी वर्धिता तु त्रिमा-
सिकम्। तुभ्यं विष्णोऽधुना दत्ता आयुष्कीर्तिविवर्धिनी॥
तुलसीदानसाङ्गतासिध्यर्थं इमां दक्षिणां श्रीदामोदराय
वराय तुभ्यमहं सम्प्रददे। इति देवपुरतः दक्षिणां दत्वा,
तुलसीसहितमहाविष्णुं पञ्चोपचारैः सम्पूज्य, महानैवेद्यं
समर्प्य, सुवासिनीभिः नीराजयित्वा, तुलस्यै मङ्गलसूत्रा-
दिसौभाग्यद्रव्याणि समर्प्य, राजाधिराजायप्र० इति मन्त्र-
पुष्पाञ्जलिं समर्पयेत्। श्रीमहाविष्णवे तुलस्यै देव्यै च नमः
बदरीधात्रीतिन्तिणीकपित्थफलानि चणकपत्राणि इक्षुख-
ण्डानि च समर्पयेत्। ततः सपत्नीकः सकुटुम्बः सपरि-
वारः यजमानः चतस्रः प्रदक्षिणाः कुर्यात्। कृतयोः विष्णु-
प्रबोधोत्सवतुलसीविवाहकर्मणोः साङ्गतासिध्यर्थं तत्स-
म्पूर्णफलप्राप्त्यर्थं यथाशक्ति यथाकालं सुवासिनीः ब्राह्म-
णांश्च भोजयिष्ये। नानानामगोत्रान् ब्राह्मणान् गन्धा-
दिभिः पूजयिष्ये, तेभ्यश्च भूयसीं दक्षिणां दातुमहमु-
त्सृजे। यस्य स्मृ०। प्रमादात्०। अनेन यथा ज्ञानेन मया

कृतेन विष्णुप्रबोधोत्सवतुलसीविवाहाख्येन च कर्मणा तुलसीसहितमहाविष्णुः प्रीयताम् ॥

॥ ६७ ॥

॥ कार्तिकशुक्लचतुर्दश्यां विष्णुशिवपूजनविधिः ॥

चतुर्दशी चात्र द्विविधा, केवला वैकुण्ठसंज्ञका च। तत्र केवला त्वरुणोदयव्यापिनी ग्राह्या। तस्यामुपोषणपूर्वकमरुणोदये मणिकर्णिकायां स्नात्वा, बिल्वपत्रादिभिर्विश्वेश्वरं पूजयेत्। एतदनुष्ठानं काश्यामेव कर्तुं युज्यते, नान्यत्र। वैकुण्ठचतुर्दशी तु विष्णुपूजायां निशीथव्यापिनी ग्राह्या। दिनद्वये तद्व्याप्तौ निशीथप्रदोषोभयव्यापिनी ग्राह्या। शिवपूजायां त्वरुणोदयव्यापिनी ग्राह्या। उभयोः स्वातन्त्र्येण पूजनं, नाङ्गाङ्गिभावः॥ अत्र पूजनप्रकारः॥ तत्रैकस्मिन्नेव दिने निशीथारुणोदयोभयव्यापिनी चतुर्दशी, तस्मिन् दिने उभयोस्तन्त्रेणोपवासं कृत्वा, निशीथे आचम्य देशकालौ० मम समस्तपापक्षयपूर्वकमहाविष्णुप्रीत्यर्थं वैकुण्ठचतुर्दशीनिमित्तं तुलसीदलकमलादिभिः श्रीमहाविष्णुपूजनं करिष्ये। शान्ताकारं० विष्णुं ध्यात्वा, श्रीमहाविष्णवे नम इति नाममन्त्रेण पूजां कृत्वा, यथासम्भवम् अष्टोत्तरसहस्रमष्टोत्तरशतं वा तुलसीदलानि समर्पयेत्। उत्तरपूजनं कृत्वा। यस्य स्मृ०। अनेन० पूजनेन श्रीमहाविष्णुः प्रीयताम्। ततः अरुणोदये स्नात्वा, प्रातःसन्ध्यामुपास्य भस्मरुद्राक्षमाला धृत्वा, आचम्य देशकालौ० मम समस्तपापक्षयपूर्वकश्रीशिवप्रीत्यर्थं वैकुण्ठचतुर्दशीनिमित्तं बिल्वदलधत्तूरपुष्पादिभिः श्रीशिवपूजनं करिष्ये। ध्यायेन्नित्यं० शिवं ध्यात्वा श्रीशिवाय नम इति नाममन्त्रेण पूजां कृत्वा

यथासम्भवमष्टोत्तरसहस्रमष्टोत्तरशतं वा बिल्वदलानि समर्प्य पूजां समापयेत् । यस्य स्मृत्या० । अनेन शिवपूजनेन श्रीसाम्बसदाशिवः प्रीयताम् । ततः सूर्योदयोत्तरमवशिष्टं नित्यविधिं विधाय, ब्राह्मणान् सम्भोज्य, स्वयं पारणां कुर्यात् । यदा तु पूर्वदिने अरुणोदये चतुर्दशी परेद्युर्निशीथे चतुर्दशी, तदा पूर्वदिने उपवासपूर्वकमरुणोदये शिवं सम्पूज्य, परदिने उपवासं कृत्वा, निशीथे महाविष्णुं सम्पूज्य, तृतीयदिने पारणां कुर्यात् । अरुणोदयस्तु सूर्योदयात्प्राक् चतुर्घटिकात्मकस्त्रिघटिकात्मको वा बोध्यः ॥

॥ कार्तिकपौर्णमास्यां दीपदानविधिः ॥

प्रातः स्नात्वा नित्यकर्म निर्वर्त्य, आचम्य देशकालौ स्मृत्वा, मम समस्तपापक्षयद्वारा श्रीराधादामोदरप्रीत्यर्थं ब्राह्मणाय दीपदानं करिष्ये । तदङ्गत्वेन दीपपूजनं ब्राह्मण-पूजनं च करिष्ये । दीपदेवताभ्यो नम इत्यनेन गन्धादिभि-र्दीपं पूजयेत् । ततः राधादामोदरस्वरूपिणे ब्राह्मणाय इद-मासनं गन्धाः पान्तु इत्यादिपूजां कुर्यात् । दानमन्त्रः– अग्निर्ज्योती रविर्ज्योतिश्चन्द्रज्योतिस्तथैव च । उत्तमः सर्व-ज्योतीनां दीपोऽयंप्रतिगृह्यताम् ॥ इदं दीपं सधान्यं सफलं दक्षिणासहितं राधादामोदरस्वरूपिणे अमुकशर्मणे ब्राह्म-णाय तु० । प्रति०, प्रति० । अनेन दीपदानाख्येन कर्मणा श्रीराधादामोदरौ प्रीयेताम् ॥

पौर्णमास्यां कृत्तिकायोगे कार्तिकस्वामिदर्शनं कुर्या-त् । तथा च काशीखण्डे–कार्तिक्यां कृत्तिकायोगे यः कुर्यात्स्वामिदर्शनम् । सप्तजन्म भवेद्विप्रो धनाढ्यो वेद-पारगः ॥ इति ॥

॥ त्रिपुरोत्सवविधिः ॥

अस्यामेव पौर्णमास्यां सायङ्काले देवालये त्रिपुराख्य-दीपं प्रज्वालयेत् । पौर्णमासी च सायङ्कालव्यापिनी ग्राह्या । उभयदिने सायङ्कालव्याप्तौ परैव । सायंसन्ध्यां विधाय, देवालयं गत्वा । आचम्य देशकालौ स्मृत्वा, मम अनेकविधदुःखनिवृत्तिपूर्वकशिवलोकप्राप्त्यर्थं श्रीसाम्बसदाशिव-प्रीत्यर्थं शिवपूजनपूर्वकं त्रिपुराख्यदीपप्रज्वालनं करिष्ये । श्रीशिवाय नम इति मन्त्रेण पञ्चोपचारैः शिवं सम्पूज्य, दीपं प्रज्वालयेत् । तत्र मन्त्रः—कीटाः पतङ्गा मशकाश्च वृक्षा जले स्थले ये विचरन्ति जीवाः । दृष्ट्वा प्रदीपं न च जन्म-भागिनो भवन्ति नित्यं श्वपचा हि विप्राः ॥ यस्य स्मृ० । अनेन त्रिपुरोत्सवाख्येन कर्मणा तेन श्रीसाम्बसदाशिवः प्रीयताम् ॥

॥ कार्तिककृष्णाष्टम्यां भैरवपूजनविधिः ॥

अष्टमी प्रदोषव्यापिनी ग्राह्या । दिनद्वये चेत्पूर्वा । मध्याह्नव्यापिनीति केचित् । अस्यां उपोषणं भैरवपूजनं जागरणं च कार्यम् । मध्याह्ने कालोदकतीर्थे स्नात्वा, पितॄन् सन्तर्प्य, पूजां कुर्यात् । आचम्य देश० मम वार्षि-कोत्पन्नविघ्नविनाशनार्थं श्रीकालभैरवप्रीत्यर्थं यथामिलित-द्रव्यैः पूजनमहं करिष्ये । त्र्यम्बक० श्रीकालभैरवाय नम इति नाममन्त्रेण यथासम्भारविस्तरैः पूजनं कार्यम् । यस्य स्मृ० । अनेन पूजनेन श्रीकालभैरवः प्रीयताम् ॥

ततः नवम्यां भैरवाय अष्टौ वटकान् महानैवेद्यं च समर्प्य, अष्टौ ब्राह्मणान् मिष्टान्नेन भोजयित्वा, यथाशक्त्या विशिष्टदक्षिणया ताम्बूलादिना च सन्तोष्य, सुहृद्युतो भुञ्जीत ॥

॥ अथ मार्गशीर्षमासः ॥

शुक्लप्रतिपदमारभ्य षष्ठीपर्यन्तं मल्लारिनवरात्रारम्भः। तत्र यथाकुलाचारेण घटस्थापनादि देवीनवरात्रवत् कार्यम्। म्हाळसासहितमल्लारिमार्तण्डाय नम इति नाममन्त्रेण षोडशोपचारैः पूजनमिति विशेषः ॥

॥ आरती मल्लारिमार्तण्डाचि ॥

जयदेवजयदेवजयशिवमार्तण्डा अरिमर्दनमल्लारीतूं-चिप्रचंडा । जयदे० ॥ १ ॥ जेजुरगडपर्वतशिवलिंगाकार । मृत्युलोकांदूसरेकैलासशिखर । नानापरिची रचनारचिली आपार । तयेस्थली नांदेस्वामीशंकर ॥ जयदे० ॥ २ ॥ मणिमल्लदैत्यप्रबल तेजाहले । नाटोपतीकोणां वरदेंमातलें। त्रिभुवनीत्यानींप्रलयमांडिला । देवगणगंधर्वकांपती त्याला ॥ जयदे० ॥३॥ चंपाषष्ठीदिवसींअवतारधरिसी । मणिमल्लदैत्यांचासंहारकरिसी । चरणीपृष्ठ खड्गवर्मीस्थापिसी । अंतीवरदेदैत्यांमुक्तीपैंदेसी ॥ जयदे० ॥ ४ ॥ मणि-मल्लदैत्यानामेमल्लारी । देवांसंकटपडलेंराहेजेजोरी । अर्धांगींम्हाळसाशोभेसुन्दरी । देवाठावमांगेदासनरहरी ॥ जयदेव० ॥ ५ ॥ घालिन्लोटांगणवं० ॥

शुक्लपञ्चम्यां नागपूजनं श्रावणशुक्लपञ्चमीवत् कार्य-म् । इयं षष्ठीयुता ग्राह्येति विशेषः ॥

॥ शुक्लषष्ठी चम्पाषष्ठी ॥

इयं मुहूर्तत्रयव्यापिनी, रविभौमान्यतरवासरयुता, शततारकावैधृतियुक्ता, तद्वशेन पूर्वा परा वा कार्या। एत-द्योगाभावे त्रिमुहूर्ता परैव ग्राह्या। अस्यां देवताया उत्थापनं सुवासिनीब्राह्मणभोजनं इत्यादि यथाकुलाचारं कार्यम् ॥

॥ अथ पौषमासः ॥

॥ ७१ ॥ तत्रादौ माघस्नानारम्भः । शुक्लैकादशीद्वादशीपौर्णमासीमकरसङ्क्रमणदिनान्यतमदिने कार्यः ॥ अथ प्रयोगः ॥ उक्तकाले देशकालौ सङ्कीर्त्य, मम समस्तपापक्षयद्वारा श्रीमकरमाधवप्रीत्यर्थं माघस्नानं करिष्ये । इति सङ्कल्प्य, मन्त्रं पठेत् । दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च । प्रातःस्नानं करोम्यद्य माघे पापविनाशनम् । मकरस्थे रवौ माघे गोविन्दाच्युत माधव । स्नानेनानेन मे देव यथोक्तफलदो भव ॥ इति पठन् प्रयागादितीर्थानि च स्मरन् मौनेन स्नायात् । ततः सूर्यायार्घ्यमन्त्रः—सवित्रे प्रसवित्रे च परंधाम जले मम । त्वत्तेजसा परिभ्रष्टं पापंयातु सहस्रधा ॥ श्रीसूर्याय इदमर्घ्यं स० । अयं विधिः प्रतिदिनं समानः । समाप्तिस्तु माघपूर्णिमायामेव ॥

॥ अर्धोदयपर्वयोगः ॥

पौषकृष्णचतुर्दश्यां यमतर्पणं नरकचतुर्दशीवत्कार्यम् । पौषकृष्णामायां व्यतीपातश्रवणरविवासरयोगेऽर्धोदयसंज्ञको योगविशेषः । तदुक्तम्—अमार्कपातश्रवणैर्युक्ता चेत्पौषमाघयोः । अर्धोदयः स विज्ञेयः कोटिसूर्यग्रहैःसमः ॥ सोमवारयोगे महोदयो योगः । अत्र स्नानदानादिकरणान्महाफलप्राप्तिः ॥

॥ मकरसङ्क्रान्तिनिमित्तस्नानदानादिविधिः ॥

तत्र सङ्क्रमणादुत्तरत्र विंशतिघटिकाः पुण्यकालः, चत्वारिंशदिति केचित् । रात्रौ सङ्क्रमश्चेदुत्तरदिने पुण्यकालः । आचम्य देशकालौ स्मृत्वा, मम कायिकादिसमस्तपापक्षयार्थं श्रीमकरमाधवप्रीत्यर्थं मकरसङ्क्रमणनिमित्तं

अमुकतीर्थे तिलमिश्रितजलेन तिलोद्वर्तनपूर्वकं स्नानमहं करिष्ये । इति सङ्कल्प्य, विधिवत् स्नायात् ।

अथ तिलपात्रदानविधिः । मकरमासे प्रत्यहं तिलपात्रदाने महाफलम् । षोडशपलप्रमाणं यथाशक्ति वा ताम्रमयपात्रं तिलैः पूरयित्वा, शक्तौ सत्यां सुवर्णयुक्तं कृत्वा, दक्षिणासहितं ब्राह्मणाय दद्यात् । आचम्य देशकालौ स्मृत्वा, मम अशेषत्रिविधपापपरिहारद्वारा श्रीमकरमाधवप्रीत्यर्थं ब्राह्मणाय तिलपात्रदानं करिष्ये । तदङ्गत्वेन ब्राह्मणपूजनं करिष्ये। सूर्यनारायणस्वरूपिणे ब्राह्मणाय इदमासनमित्यादिना ब्राह्मणं सम्पूज्य, स्वस्त्यस्तु । दीर्घमा० । दानमन्त्रः–देवदेव जगन्नाथ वाञ्छितार्थफलप्रद । तिलपात्रं प्रदास्यामि तवाङ्गे संस्थितो ह्यहम् ॥ इदं तिलपात्रदानं सहिरण्यं सदक्षिणाकं अमुकश० । प्रति०, प्रति० । अनेन तिलपात्रदानेन श्रीमकरमाधवः प्रीयताम् ॥

हिरण्यरहिततत्पात्रदाने तु, तिलाः पुण्याः पवित्राश्च सर्वपापहराः स्मृताः । शुक्लाश्चैव तथा कृष्णा विष्णुगोत्रसमुद्भवाः ॥ यानि कानि च पापानि ब्रह्महत्यासमानि च । तिलपात्रप्रदानेन तानि नश्यन्तु मे सदा ॥ इति दानमन्त्रः ॥

पात्ररहिततिलदाने तु, महर्षे गोत्रसम्भूताः काश्यपस्य तिलाः स्मृताः । तस्मादेषां प्रदानेन मम पापं व्यपोहतु ॥ शर्करायुक्ततिलदानेऽप्ययमेव दानमन्त्रः ॥

दधिमन्थदानम् । आचम्य देशका० मम इह जन्मनि जन्मान्तरे च गोमहिष्यादिजन्यसुखादिभवपूर्वकअविच्छिन्नशुभसन्ततिप्राप्तिद्वारा श्रीमकरमाधवप्रीत्यर्थं ब्राह्मणाय दधिमन्थदानमहं करिष्ये । तदङ्गं दधिमन्थपूजनं ब्राह्मण-

पूजनं च करिष्ये । दधिमन्थदेवतायै नम इति पञ्चो-
॥ ७३ ॥ पचारपूजां कृत्वा, आसनादिना विप्रं पूजयेत् ।
स्वस्त्यस्तु । दीर्घं० । इक्षुशलाकया दधि निर्मन्थ्य, दान
मन्त्रः—इक्षुस्थितं तु मृद्भाण्डं दध्ना चेक्षुसमन्वितम् ।
दधिनिर्मन्थसंज्ञं हि ब्राह्मणाय ददाम्यहम् ॥ सवस्त्रफल-
ताम्बूलं दक्षिणाभिश्च संयुतम् । गवादिशुभसन्तानलब्धि-
र्भूयात्सदा मम ॥ इदं दधिमन्थदानं दक्षिणाताम्बूलवस्त्रस-
हितं अमुकश० । तेन श्रीमकरमाधवः प्रीयताम् ।

हीरदीपदानविधिः । अद्य० मकरमाधवप्रीत्यर्थं हीर-
दीपसंज्ञकआधारपात्रसहितदीपद्वयदानं करिष्ये । तदङ्गं
ब्राह्मणपूजनं दीपपूजनं करिष्ये । ब्राह्मणं दीपं च सम्पूज्य,
दानमन्त्रः—स्वच्छगोधूमराशीनां दीपयुग्मं घृतान्वितम् ।
हीरदीपकसंज्ञं तद् दानं सोपस्करं परम् ॥ हीरदीपकवद्वं-
शप्रकाशस्तु सुखप्रदः । हीरदीपकदानेन प्रीणाति दिनकृ-
त्स्वयम् ॥ इदं दीपयुग्मदानं आधारपात्रसहितं सदक्षि० ।
अनेन० ।

घासग्रासदानम् । अद्य० घासग्रासदानं क० । दान-
मन्त्रः—मकरेऽर्के च सम्प्राप्ते उत्तरायणमुच्यते । ग्रासं द-
द्यात्तु या नारी पुत्रपौत्रप्रवर्द्धनम् ॥ तिलगुडसमायुक्तं घा-
सग्रासं च संज्ञकम् । वर्षे वर्षे व्रतं कुर्यात्सौभाग्यश्रीकरं
परम् । इदं घासग्रासदानं सद० । अनेन० ।

सुघटदानम् । अद्य० थँ मकरमा० सुघटदानं क० ।
दानमन्त्रः — सङ्क्रान्ति सुमहाभागे सुघटं रसपूरितम् ।
हरिद्रापूगसंयुक्तमतः शान्तिं प्रयच्छ मे ॥ इदं सुघटदानं
१० अमुकश० । अने० ।

सिद्धस्थालीदानम् । अद्य० मम इ० बन्धुवर्गसुहृज्ज-

न्नब्राह्मणेषु अन्नविवरणपूर्वकभोज्यसिद्धिद्वारा श्रीमकर-माधवप्रीत्यर्थं ब्राह्मणाय पक्वव्यञ्जनसूपादिपूरितभाण्डस-हितं सिद्धस्थालीदानं क०। दानमन्त्रः — अन्नमेव परं लक्ष्मी-रन्नमेव जनार्दनः। अन्नमेवाखिलः प्राणो मम जन्मनि जन्मनि ॥ इदं सिद्धस्थालीदानं व्यञ्जनसूपादिपात्रसहितं सदक्षिणाकं० अमुकश०। अनेन०।

अत्रटितवल्लीदानम्। अद्य० अत्रुटितवल्लीदानं क०। अत्रटवल्लिमन्मे स्यात् सन्ततिर्वल्लिका बहुः। तिलपिष्टकृतं मुष्टिपञ्चकं गुडमिश्रितम्। ददामि च परं भक्त्या तेन तुष्यतु मे रविः ॥ इदं अत्रटितवल्लीदानं०। अनेन०।

वहज्झरीदानम्। अद्य० वहज्झरीदानं क०। प्रवह-न्निर्झरीक्लिन्नं तण्डुलैर्द्रोणसंयुतैः। पूरितं वैणवं पात्रं वस्त्र-ताम्बूलदक्षिणम् ॥ सम्पूजितं द्विजश्रेष्ठ ददामीदं गृहाण भोः। तेन मे सविता देवो वंशवृद्धिं च वाञ्छितम् ॥ इदं वहज्झरीदानं सद० अमुकश०। अनेन०।

ताम्बूलदानम्। अद्य० ताम्बूलदानं क०। ताम्बूलं सुखदं लोके मुखशोभाकरं हि तत्। अरुचिघ्नं सदा मिष्टं ताम्बूलं श्रीकरं ददे ॥ इदं ताम्बूलदानं स० अमुकश०। अनेन०।

शिवगौरीदानम्। अद्य० शिवगौरीदानं क०। गुडगौरीसमाश्लिष्टं नवनीतकृतं शिवम्। पूजितं तत्प्रय-च्छामि दम्पत्योः प्रीतिसिद्धये ॥ इदं शिवगौरीदानं स० अमुक०। अनेन०।

वरहस्तदानम्। अद्य० वरहस्तदानं क०। सर्वे-

ष्टदायकं श्रेष्ठं तिलपिष्टगुडान्वितम् । वरहस्तप्रदानेन वरदोऽस्तु रविर्मम ॥ इदं वरहस्तदानं स० ददे । अनेन० ।

कण्डणदानम् । अद्य पू० सधान्यउलूखलमुसलदानं क० । उलूखलस्थितं धान्यं मुसलैर्घातनिस्तुषम् । सोपस्करं प्रदास्यामि ह्यतः शान्ति० ॥ इदं सधान्यउलूखलमुसलदानं स० अमुक० । अनेन० ।

घरट्टदानम् । अद्य०धान्यसहितघरट्टदानं क० । गोधूमसम्भवं पिष्टं घरट्टेन समन्वितम् । सोपस्करं च मे देवः प्रीणातु कमलापतिः ॥ इदं धान्यसहितघरट्टदानं स० । अने० ।

चुल्लिदानम् । अद्य० धान्यसहितचुल्लिदानं क० । महानसमयं दानं इक्षुदण्डकृतेन्धनम् । सर्वकामोपसहितं क्षुत्तृट्शान्तिकरं परम् ॥ अदित्या तु कृतं पूर्वं सोपचारं सदक्षिणम् । द्रौपदीप्रत्ययकरं महानसमयं ददे ॥ इदं धान्यसहितचुल्लिदानं स० । अनेन० ।

सौभाग्यवायनदानम् । अद्य० सौभाग्यवायनदानं क० । वंशपात्रद्वययुतं वायनं वस्त्रसंयुतम् । मण्डनाद्युपभोगादि दन्तपत्रीकया युतम् ॥ आदर्शादियुतं सम्यक् हरिद्राकुङ्कुमाञ्जनम् । सौभाग्यभूषणैर्युक्तं दास्यामि रवितुष्टये ॥ इदं सौभाग्यदानं स० । अनेन० ॥

रसरङ्गदानम् । अद्य० रसरङ्गदानं क० । रसरङ्गसमायुक्तं कांस्यपात्रद्वयं तथा । रसरङ्गप्रदानेन तेन तुष्यतु मे रविः ॥ इदं रसरङ्गदानं स० । अनेन० ।

अपाक*दानम् । ममेह जन्मनि०च, सर्वगुणोपेतभृत्यमित्रजनयुतगृहप्राप्तिपुत्रपौत्रादिसन्ततिभर्तृवियोगाभा-

* 'आंवा' इति भाषायाम् ।

वसदाऽनुत्तमसुखरूपादिकामनया श्रीमकरमाधवप्रीत्यर्थं अपाकदानं करिष्ये। गणपतिपूजां विधाय, कुलालं वस्त्राद्यैः सम्पूज्य, प्रार्थयेत्—त्वं मे भाण्डानि चित्राणि गुरूणि च लघूनि च। मणिकादीनि शुभ्राणि स्थालीश्च सुमनोहराः॥ घटकान् करकांश्चैव प्रणीताः कुठकानि च। शरावादीनि पात्राणि भाण्डान्युच्चावचानि च॥ अलिञ्जरा तु प्रचयं मन्थनीकटहानि च। एवमन्यच्च यत्किञ्चिच्छुभयोग्यं भवेद् गृहे। सम्पादय महाभाग विश्वकर्मा त्वमेव हि॥ ततः रक्तवस्त्रैरपाकं संछाद्य ब्रह्मणे नम इति नाममन्त्रेण सम्पूज्य, प्रार्थयेत्—अपाक ब्रह्मरूपोऽसि भाण्डानीमानि जन्तवः। प्रदानात्ते प्रजापुष्टिः स्वर्गश्चास्तु ममाक्षयः॥ भाण्डरूपाणि यान्यत्र कल्पितानि मया किल। भूत्वा सत्वानि रूपाणि ह्युपतिष्ठन्तु तानि वै॥ इदं अपाकं नानाभाण्डरचितं विष्णुदैवतं नानानामगोत्रेभ्यो ब्राह्मणेभ्यः सुवासिनीभ्यश्च उत्सृजामि। तेन श्रीमहाविष्णुः प्रीयताम्॥

॥ द्वादशवर्षाणि प्रत्येकवर्षमेकैकरामग्रहणप्रकारः॥

आचम्य देशकालौ सङ्कीर्त्य, श्रीसीतारामचन्द्रप्रीत्यर्थं मकरसङ्क्रान्तिदिनादारभ्य आगामिमकरसङ्क्रमणपर्यन्तं (अमुक) रामनाम्ना सकृदुच्चरितश्रवणपूर्वकं भोजनजलपानादि करिष्ये। आदौ निर्विघ्नतासिद्ध्यर्थं महागणपतिपूजनं तदङ्गब्राह्मणपूजनं च करिष्ये। गणपतिं सम्पूज्य, आसनादिना विप्रं सम्पूजयेत्। ततः ब्राह्मणात् प्रतिवर्षं प्रत्येकं द्वादशवर्षपर्यन्तं नामग्रहणं कार्यम्। यान्तु दे० गणपतिं विसृजेत्।

|| ७७ ||

१ राम ।	७ धनुर्धारिराम ।
२ सीताराम ।	८ मारुतिवल्लभराम ।
३ जानकीजीवनराम ।	९ सीतापतिराम ।
४ पतितपावनराम ।	१० त्राटिकामर्दनराम ।
५ अहिल्योद्धारिराम ।	११ तुलसीत्रिभुवनराम ।
६ दाशरथिराम ।	१२ अयोध्यावासीराम ।

अथोद्यापनप्रकारः। आचम्य देशकालौ सङ्कीर्त्य, श्रीसीतारामप्रीत्यर्थं मया कृतस्य एकवर्षीयमकरसङ्क्रममारभ्य परमकरसङ्क्रमणपर्यन्तं (अमुक) रामनाम्ना सकृदुच्चरितश्रवणपूर्वकभोजनजलपानादि व्रतस्य साङ्गतासिध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं ब्राह्मणाय तण्डुलपूरितताम्रपात्रस्थतिललड्डुकदानमहं क०। तदङ्गत्वेन ब्राह्मणपूजनं क०। आसनादिना विप्रं सम्पूज्य, दानमन्त्रः-तण्डुलैः पूरितं ताम्रपात्रस्थं तिललड्डुकम्। द्विजाय तुभ्यं दास्यामि सीतारामप्रतुष्टये ॥ इदं तण्डुलपूरितताम्रपात्रस्थतिलगुडमिश्रिततिललड्डुकदानं सदक्षिणाकं सताम्बूलं अमुकश०। प्रति०, प्र०। अनेन तिललड्डुकदानाख्येन कर्मणा श्रीसीतारामचन्द्रः प्रीयताम् ॥

॥ अथ माघमासः ॥

॥ तत्र शुक्लचतुर्थ्यां ढुण्ढिराजपूजनम् ॥

चतुर्थी च प्रदोषव्यापिनी ग्राह्या। अस्यां सायङ्काले ढुण्ढिराजं षोडशोपचारैः तिललड्डुकनैवेद्यसमर्पणेन च पूजयेत्। स्वयं च तिलभक्षणं कुर्यात्।

अस्यामेव प्रदोषव्यापिन्यां चतुर्थ्यां कुन्दपुष्पैः शिवं सम्पूज्य, उपवासं नक्तभोजनं वा कुर्यात्। तेन श्रीप्राप्तिर्भवति।

॥ शुक्लपञ्चम्यां वसन्तोत्सवः ॥

पञ्चमी च पूर्वाह्णव्यापिनी ग्राह्या । दिनद्वये तत्सत्वे पूर्वा । अस्यां अभ्यङ्गस्नानं विधाय रतिकामयोः पूजनं कार्यम् ।

॥ रथसप्तम्यां स्नानविधिः ॥

सप्तमी चारुणोदयव्यापिनी ग्राह्या । दिनद्वये चेत्पूर्वा । तस्यां अरुणोदये स्नानं कार्यम् । आचम्य देशकालौ स्मृत्वा, ममेह जन्मनि जन्मान्तरे च सप्तविधपापक्षयार्थं (अमुक) तीर्थे स्नानमहं करिष्ये । स्नानमन्त्रः—यद्यज्जन्मकृतं पापं मया जन्मसु जन्मसु । तन्मे शोकं च रोगं च माकरी हन्तु सप्तमी । एतज्जन्मकृतं पापं यच्च जन्मान्तरार्जितम् । मनोवाक्कायजं यच्च ज्ञाताज्ञातं च यत्पुनः ॥ इति सप्तविधं पापं स्नानान्मे सप्तसप्तिके । सप्तव्याधिसमायुक्तं हर माकरि सप्तमि ॥ इक्षुदण्डेन जलं चालयित्वा सप्तार्कपत्राणि सप्तबदरीपत्राणि च शिरसि निधाय स्नायात् । सूर्यार्घ्यमन्त्रः—सप्तसप्तिवह प्रीत सप्तलोकप्रदीपक । सप्तमीसहितो देव गृहाणार्घ्यं दिवाकर ॥ सप्तमीप्रार्थनामन्त्रः—जननी सर्वलोकानां सप्तमी सप्तसप्तिके । सप्तव्याहृतिके देवि नमस्ते सूर्यमण्डले ॥ इति प्रार्थ्य, नित्यकर्म समाप्य गृहमागच्छेत् ॥

॥ सूर्यपूजनविधिः ॥

रक्तचन्दनेन पीठोपरि सप्ताश्वयुक्तरथारूढं सूर्यं विलिख्य पूजामारभेत ॥ अथ पूजाप्रयोगः ॥ आचम्य देशकालौ स्मृत्वा, ममेह जन्मनि जन्मान्तरे च भर्त्रा सह अखण्डितसुखसौभाग्यपुत्रपौत्रायुरारोग्यैश्वर्याभिवृद्ध्यर्थं श्रीसूर्यनारायणप्रीत्यर्थं रथसप्तम्यां विहितं यथामिलितषोड-

शोपचारद्रव्यैः पुराणोक्तमन्त्रैः रथाश्वारूढश्रीसूर्यनारायणपूजनमहं करिष्ये । तदङ्गं गणपतिपूजनं आसनविधिं कलशघण्टापूजनं च क० । अभीप्सितार्थ० गणपतिं सम्पूज्य, प्रार्थयेत्—वक्रतुण्ड० । पृथ्वित्व० । अपस० । कलशस्य० । आगमार्थं तु० कलशं घण्टां च सम्पूज्य, अपवित्रः पवि० पूजाद्रव्याणि प्रोक्ष्य आत्मानं प्रोक्षेत् । अथ ध्यानम् । रक्ताम्बुजसंस्थितसप्ताश्वरथिनं हिरण्यवर्णं चतुर्भुजम् । पद्मद्वयाभयवरदहस्तं कालचक्रप्रणेतारं सूर्यनारायणं भजे ॥ श्रीसवितारं सूर्यनारायणं ध्यायामि ॥ आगच्छ भगवन् सूर्य मण्डले च स्थिरो भव । यावत्पूजा समाप्येत तावत्त्वं सन्निधो भव ॥ श्रीस०णं आवाहयामि ॥ हेमासनं मया दिव्यं नानारत्नविभूषितम् । आसनं गृह्यतां देव दिवाकर नमोऽस्तु ते ॥ श्रीसवित्रे सूर्यनारायणाय नमः ॥ आसनं० ॥ गङ्गाजलं समानीतं परमं पावनं हि तत् । पाद्यं गृहाण देवेश धामरूप नमोऽस्तु ते ॥ पाद्यं० ॥ भोभोसूर्य महद्रूप ब्रह्मविष्णुस्वरूपिणे । अर्घ्यमञ्जलिना दत्तं गृहाण परमेश्वर ॥ अर्घ्यं० ॥ गङ्गादितीर्थजं तोयं जातिपुष्पैश्च वासितम् । ताम्रपात्रे स्थितं दिव्यं गृहाणाचमनीयकम् ॥ आचमनीयं० ॥ जान्हवीजलमत्यन्तं पवित्रकरणं परम् । स्नानार्थं च मयाऽऽनीतं स्नानं कुरु जगत्पते ॥ स्नानं० ॥ पयो दधि घृतं चैव शर्करा मधुसंयुतम् ॥ स्नानार्थं ते मया दत्तं गृहाण परमेश्वर ॥ पञ्चामृतस्नानं० ॥ गन्धादिपञ्चोपचारपूजां कृत्वा, अभिषेकः । पट्टरक्तयुते देव सूक्ष्मतन्तुविनिर्मिते । इमे वस्त्रे मयाऽऽनीते गृहाण कमलाकर ॥ रक्तवस्त्रयुग्मं स० ॥ नमः कमलहस्ताय विश्वरूपाय ते नमः । उपवीतं मया

दत्तं तद् गृहाण दिवाकर ॥ यज्ञोपवीतं० ॥ कुङ्कुमागरु-कस्तूरीसुगन्धैश्चन्दनादिभिः । रक्तचन्दनयुक्तं तु गन्धं गृह्ण दिवाकर ॥ चन्दनं० ॥ रक्तचन्दनसंमिश्रा अक्षताश्च सुशोभनाः । मया दत्ता गृहाण त्वं वरदो भव भास्कर ॥ अक्षतान् स० ॥ जपाकदम्बकुसुमं रक्तोत्पलमनुत्तमम् । पुष्पाणि गृह्यतां देव सर्वकामप्रदो भव ॥ पुष्पाणि० ॥

॥ अथाङ्गपूजा ॥

१ मित्राय नमः पादौ पूज० ।
२ रवये नमः जङ्घे पू० ।
३ सूर्याय नमः कटी पू० ।
४ भानवे नमः नाभिं पू० ।
५ खगाय नमः हृदयं पू० ।
६ पूष्णे नमः नासिकां पू० ।
७ हिरण्यगर्भायनमःकण्ठं पू० ।
८ मरीचये नमः मुखं पू० ।
९ आदित्याय० नासिकां पू० ।
१० सवित्रे नमः नेत्रे पूज० ।
११ अर्काय नमः ललाटं पू० ।
१२ भास्कराय नमः शिरः पू० ।

वनस्पति० धूपमा० । आज्यं च० दीपं द० । नैवेद्यं गृ० शर्करायुक्तनारिकेलखण्डनैवेद्यं० । आचमनीयं० । करोद्वर्तनं० । इदं फलं० फलं० । पूगीफलं० ताम्बूलं० । हिरण्यगर्भ० दक्षिणां० । चक्षुर्द० नीराजनदीपं० कर्पूरदीपं० । यानि कानि च० प्रदक्षिणां० । नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे । त्रयीमयाय त्रिगुणात्मधारिणे विरिञ्चिनारायणशङ्करात्मने ॥ नमस्कारान्० ॥ एकचक्ररथो यस्य दिव्यः कनकभूषणः । स मे भवतु सुप्रीतः पद्महस्तो दिवाकरः ॥ पुष्पाञ्जलिं० ॥ यस्योदये स्याज्जगतः प्रबोधो यः कर्मसाक्षी भुवनस्य गोप्ता । कुष्ठादिकव्याधिविनाशको यः स भास्करो मे दुरितं निदध्यात् ॥ प्रार्थयामि ॥ ताम्रपात्रेण गन्धाक्षतपुष्पहिरण्योदकेन द्वादशार्घ्यान् दद्यात् ।

१ मित्राय नमः इदमर्घ्यं समर्पयामि ।
२ रवये नमः इद० ।
३ सूर्याय नमः इद० ।
४ भानवे नमः इद० ।
५ खगाय नमः इद० ।
६ पूष्णे नमः इद० ।
७ हिरण्यगर्भाय नमः इद० ।
८ मरीचये नमः इद० ।
९ आदित्याय नमः इद० ।
१० सवित्रे नमः इद० ।
११ अर्काय नमः इद० ।
१२ भास्कराय नमः इद० ।

यस्य स्मृत्या० । अनेन मया कृतेन पूजनेन श्रीसूर्यनारायणः प्रीयताम् ॥

पूजासाङ्गतासिध्यर्थं ब्राह्मणाय सप्तधान्यवायनदानं करिष्ये । तदङ्गत्वेन ब्राह्मणपूजनं करिष्ये । श्रीसूर्य० ब्रा० इदमासनं० । स्वस्त्यस्तु दीर्घं० । तण्डुलैः पूरितं पात्रं हिरण्येन समन्वितम् । रक्तवस्त्रयुगं चैव ब्राह्मणाय निवेदयेत् ॥ इदं सप्तधान्यवायनदानं सदक्षिणाकं० ब्राह्मणाय० ददे । अनेन वाय० सूर्यनारायणः प्रीयताम् ॥

॥ माघशुक्लाष्टम्यां भीष्मतर्पणविधिः ॥

अष्टमी च मध्याह्नव्यापिनी ग्राह्या । दिनद्वये चेत्परा । तस्यां प्रातर्नित्यकर्म समाप्य । आचम्य देशकालौ स्मृत्वा, मम संवत्सरोपात्तदुरितक्षयार्थं पुत्रपौत्राद्यनवच्छिन्नसन्ततिप्राप्त्यर्थं च माघशुक्लाष्टम्यां विहितं भीष्मतर्पणं करिष्ये । प्राचीनावीतिना तिलयुक्तजलेन पितृतीर्थेन द्वाभ्यां मन्त्रान्ते तर्पयेत् । भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः । आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम् ॥ १ ॥ वैयाघ्रपद्यगोत्राय साङ्कृत्यप्रवराय च । अपुत्राय ददाम्येतज्जलं भीष्माय वर्मणे ॥ २ ॥ इति तर्पयित्वा, यज्ञोपवीत्याचम्यार्घ्यं दद्यात् । वसूनामवताराय शन्तनो-

रात्मजाय च । अर्घ्यं ददामि भीष्माय आबालब्रह्मचारिणे ॥ १ ॥ ब्रह्मपुत्र महाभाग शन्तनोः कुलनन्दन । अमोघागर्भसम्भूत गृहाणार्घ्यं नमोऽस्तु ते ॥ इति मन्त्रेण वा । अनेन मया कृतेन तर्पणेन भीष्मः प्रीयताम् । जीवत्पितृकेण तु आप्रकोष्ठात्प्राचीनावीतिना केवलेन जलेन शुक्लतिलयुतेन वा अवश्यं कार्यम् ॥

॥ माघकृष्णचतुर्दश्यां महाशिवरात्रिपूजाविधिः ॥

चतुर्दशी च सतिसम्भवे प्रदोषनिशीथोभयव्यापिनी ग्राह्या, असम्भवे निशीथव्यापिन्येव । एतदतिरिक्ता मासशिवरात्रिस्तु प्रदोषव्यापिनी ग्राह्या । सतिसम्भवे प्रदोषनिशीथोभयव्यापिनी ग्राह्येति सकलसिद्धान्तः ॥

सन्ध्यायां स्नात्वा, शिवपूजागारं संमार्जनरङ्गवल्लीवितानध्वजपुष्पफलतोरणादिभिरलङ्कृत्य, सन्ध्यामुपास्य, धृतभस्मत्रिपुण्ड्ररुद्राक्षमालः पूजागारे पवित्रासने उदङ्मुख उपविश्य, आचम्य प्राणानायम्य, देशकालौ स्मृत्वा, श्रीसाम्बसदाशिवमहारुद्रप्रीत्यर्थं महाशिवरात्रिनिमित्तं (लघुरुद्राभिषेकपूर्वकं रुद्रैकादशिनीअभिषेकपूर्वकं वा) पुरुषसूक्तेन यथामिलितषोडशोपचारद्रव्यैः प्रथमयामे श्रीशिवपूजनं करिष्ये । आदौ निर्विघ्नतासिध्यर्थं महागणपतिपूजनं आसनविधिं शिवपञ्चाक्षरन्यासान् कलशशङ्खघण्टापूजनं च करिष्ये । गणानांत्वेति गणपतिं सम्पूज्य, वक्रतुण्डेति प्रार्थयेत् । पृथ्वित्व० । अपस० । अपक्रा० । तीक्ष्णदं० । वामपादेन भूमिं त्रिस्ताडयेत् । अस्य श्रीशिवपञ्चाक्षरमन्त्रस्य वामदेवऋषिः । अनुष्टुप्छन्दः । श्रीसदाशिवदेवता न्यासे पूजने जपे विनियोगः ।

१ ॐ वामदेवऋषये नमः शिरसि ।
२ ॐ अनुष्टुप्छन्दसे नमः मुखे ।
३ ॐ सदाशिवदेवतायै नमः हृदये ।
४ ॐ ॐ हृदयाय नमः ।
५ ॐ नं शिरसे स्वाहा ।
६ ॐ मं शिखायै वषट् ।
७ ॐ शिं कवचाय हुम् ।
८ ॐ वां नेत्रत्रयाय वौषट् ।
९ ॐ यं अस्त्राय फट् ।

कलशादि सम्पूज्य ॥ अथ ध्यानम् । ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं रत्नाकल्पोज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् । पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥ शुद्धस्फटिकसङ्काशं त्रि० ॥ प्रथमयामे शिवाय नमः शिवं ध्यायामि ॥ सहस्रशी० आवाहनस्थाने पुष्पाञ्जलिं स० ॥ पुरुष० ॐ शिवाय नमः आसनं स० ॥ एतावा० पाद्यं० ॥ त्रिपादू० अर्घ्यं० ॥ तस्माद्वि० आचमनीयं० ॥ यत्पुरुषे० स्नानं० ॥ आप्यायः० पयस्नानं० ॥ दधिक्रा० दधिस्नानं० ॥ घृतंमि० घृतस्नानं० ॥ मधुवाता० मधुस्नानं० ॥ स्वादुः पव० शर्करास्नानं० ॥ कनिक्रद० अभ्यङ्गस्नानं० ॥ उष्णोदकस्नानं० ॥ शिवाय नम इति मन्त्रेण पञ्चोपचारपूजां कृत्वा, एकादशावृत्त्या, एकावृत्त्या वा रुद्रेण, पुरुषसूक्तेन वा, कद्रुद्राय०, तमुष्टुहि०, त्र्यम्ब०, इत्यादिरुद्रसूक्तैर्वा यथासम्भवं चन्दनकर्पूरकेशरादिमिश्रितजलेन अभिषेकं कुर्यात् । अभिषेकान्ते आचमनीयं० ॥ ॐ शिवा० रुद्राक्षमालाभस्मसमर्पणम् । तं यज्ञं० वस्त्रं० ॥ तस्माद्य० सं० यज्ञोपवीतं० ॥ तस्माद्य० ऋ० चन्दनं० ॥ अक्षताश्च सुरश्रेष्ठा

शुभ्रा धूताश्च निर्मलाः । मया निवेदिता भक्त्या गृहाण प० ॥ अक्षतान्० ॥ तस्माद्० माल्यादी० करवीरैर्जा० शिवाय नमः इति मन्त्रेण जातीतगर-धत्तूर-मन्दार-करवीर--द्रोणपुष्प-कमल—कदम्बपुष्प-मालती-चम्पक-शतपत्र--अशोकादिऋतूद्भवपुष्पसमर्पणान्ते अष्टोत्तर-सहस्रं अष्टोत्तरशतं यथासम्भवं वा बिल्वपत्राणि सहस्रनाम्ना पञ्चाक्षरमन्त्रेण वा समर्पयेत् ।

॥ शिवाष्टोत्तरशतनामावलीप्रारम्भः ॥

अद्य०र्थं श्रीसाम्बसदाशिवप्रीत्यर्थं अष्टोत्तरशतनामभिः बिल्वदलसमर्पणं करिष्ये । अमृतोद्भव श्रीवृक्ष महादेवेन पूजित । बिल्वपत्रं सदा तोषात्प्रीयतां मे सदाशिवः ॥ इति सम्प्रार्थ्य, मध्यमानामिकाङ्गुष्ठैरेकैकं चन्दनजलाक्तं स्वाभ्यग्रं न्युब्जमर्पयेत् ॥

---

१ शिवाय नमः ।
२ महेश्वराय नमः ।
३ शम्भवे नमः ।
४ पिनाकिने नमः ।
५ शशिशेखराय नमः
६ वामदेवाय नमः ।
७ विरूपाक्षाय नमः
८ कपर्दिने नमः ।
९ नीललोहिताय० ।
१० शङ्कराय नमः ।
११ शूलपाणये नमः ।
१२ खट्वाङ्गिने नमः ।
१३ विष्णुवल्लभाय० ।
१४ शिपिविष्टाय० ।
१५ अम्बिकानाथाय० ।
१६ श्रीकण्ठाय नमः ।
१७ भक्तवत्सलाय० ।
१८ भवाय नमः ।
१९ शर्वाय नमः ।
२० त्रिलोकेशाय० ।
२१ शितिकण्ठाय० ।
२२ शिवाप्रियाय० ।
२३ उग्राय नमः ।
२४ कपर्दिने नमः ।
२५ कामारये नमः ।
२६ अन्धकासुरसूदनाय० ।
२७ गङ्गाधराय नमः ।
२८ ललाटाक्षाय० ।
२९ कालकालाय० ।
३० कृपानिधये नमः ।
३१ भीमाय नमः ।
३२ परशुहस्ताय० ।
३३ मृगपाणये० ।
३४ जटाधराय नमः ।
३५ कैलासवासिने० ।
३६ कवचिने नमः ।
३७ कठोराय नमः ।
३८ त्रिपुरान्तकाय० ।
३९ वृषाङ्काय नमः ।
४० वृषभारूढाय० ।
४१ भस्मोद्धूलितविग्रहाय नमः ।

४२ सामप्रियाय० ।
४३ स्वरमयाय नमः ।
४४ त्रयोमूर्तये नमः ।
४५ अनीश्वराय० ।
४६ सर्वज्ञाय नमः ।
४७ परमात्मने नमः ।
४८ सोमसूर्याग्निलोचनाय नमः ।
४९ हविषे नमः ।
५० यज्ञमयाय नमः ।
५१ सोमाय नमः ।
५२ पञ्चवक्त्राय० ।
५३ सदाशिवाय० ।
५४ विश्वेश्वराय० ।
५५ वीरभद्राय नमः ।
५६ गणनाथाय० ।
५७ प्रजापतये नमः ।
५८ हिरण्यरेतसे० ।
५९ दुर्धर्षाय नमः ।
६० गिरीशाय नमः ।
६१ गिरिजाय नमः ।
६२ अनघाय नमः ।
६३ भुजङ्गभूषणाय० ।
६४ भर्गाय नमः ।
६५ गिरिधन्वने० ।
६६ गिरिप्रियाय० ।
६७ कृत्तिवाससे० ।
६८ पुरारातये० ।
६९ भगवते नमः ।
७० प्रमथाधिपाय० ।
७१ मृत्युञ्जयाय० ।
७२ सूक्ष्मतनवे नमः ।
७३ जगद्व्यापिने नमः ।
७४ जगद्गुरवे नमः ।
७५ व्योमकेशाय० ।
७६ महासेनजनकाय० ।
७७ चारुविक्रमाय० ।
७८ रुद्राय नमः ।
७९ भूतपतये नमः ।
८० स्थाणवे नमः ।
८१ अहिर्बुध्न्याय नमः ।
८२ दिगम्बराय नमः ।
८३ अष्टमूर्तये नमः ।
८४ अनेकात्मने नमः ।
८५ सात्त्विकाय नमः ।
८६ शुद्धविग्रहाय नमः
८७ शाश्वताय नमः ।
८८ खण्डपरशवे नमः ।
८९ अजाय नमः ।
९० पाशविमोचनाय नमः ।
९१ मृडाय नमः ।
९२ पशुपतये नमः ।
९३ देवाय नमः ।
९४ महादेवाय नमः ।
९५ अव्ययाय नमः ।
९६ हरये नमः ।
९७ पूषदन्तभिदे नमः ।
९८ अव्यग्राय नमः ।
९९ दक्षाध्वरहराय नमः ।
१०० हराय नमः ।
१०१ भगनेत्रभिदे नमः ।
१०२ अव्यक्ताय नमः ।
१०३ सहस्राक्षाय नमः ।
१०४ सहस्रपदे नमः ।
१०५ अपवर्गप्रदाय नमः ।
१०६ अनन्ताय नमः ।
१०७ तारकाय नमः ।
१०८ परमेश्वराय नमः ।

अनेन अष्टोत्तरशतबिल्वदलसमर्पणाख्येन कर्मणा तेन श्रीसाम्बसदाशिवः प्रीयताम् ॥

यत्पुरुषं० धूपमाघ्रा० ॥ ब्राह्मणोस्य० दीपं दर्श० ॥ चंद्रमा० नैवेद्यं० ॥ करोद्वर्तनं० ॥ कूष्माण्डं मातुलिङ्गं च नारिकेलफलानि च । गृहाण पार्वतीकान्त सोमेश प्रति० ॥

नानाफलानि स० ॥ पूगीफ० ताम्बूलं० ॥ हिरण्यग० सुवर्णपुष्पार्थे दक्षिणां० ॥ श्रियेजा० नीराजयित्वा ॥

आरती ॥ लवथवतिविक्राळाब्रह्मांडींमाळा । विषे कंठकाळात्रिनेत्रीज्वाळा । लावण्यसुंदरमस्तकींबाळा तेथूनियांजळवाहेनिर्मळभुळभूळा ॥ जयदेवजयदेवजय श्रीशंकरा । आरतीओवाळूंतुजकर्पुरगौरा । जयदे० ॥ १ ॥ कर्पूरगौरभोळानयनींविशाळा । अर्धांगीपार्वतीसुमनांच्या माळा ॥ विभूतीचे उधळणशितिकंठनीळा । ऐसाशङ्करशोभेउमावेल्हाळा । जयदे० ॥ २ ॥ देवींदैत्यींसागरमंथनपै केलें । तयामाजीअवचिताहलाहलसेउठलें । तेंत्वां असुरपणेंप्राशन केले । नीलकंठनामप्रसिद्धझालें । जयदे० ॥३॥ व्याघ्रांबरफणिवरधरसुंदरमदनारी । पंचाननमनमोहनमुनिजनसुखकारी । शतकोटीचेंबीजवाचेउच्चारी । रघुकुळटिळकरामदासाअन्तरीं । जयदे० ॥ ४ ॥

अष्टोत्तरसहस्रं शतं वा पञ्चात्तरं जपत्वा, स्तोत्रादिकं पठेत् । ततः नामभिः पुष्पाञ्जलीन्दद्यात् ॥

१ ॐ शिवाय नमः ।
२ ॐ रुद्राय नमः ।
३ ॐ पशुपतये नमः ।
४ ॐ नीलकण्ठाय० ।
५ ॐ हरिकेशाय नमः ।
६ ॐ महेश्वराय नमः ।
७ ॐ विरूपाक्षाय नमः ।
८ ॐ पिनाकिने नमः ।
९ ॐ त्रिपुरान्तकाय० ।
१० ॐ शम्भवे नमः ।
११ ॐ शूलिने नमः ।
१२ ॐ महादेवाय नमः ।

नाभ्याआ० प्रदक्षिणां० ॥ सप्तास्या० नमस्कारान्० ॥ यज्ञेन० मन्त्रपुष्पाञ्जलिं स० ॥ मुखवाद्यघोषं च कृत्वा, सतिसम्भवे चामरव्यजनदर्पणादिराजोपचारान्समर्पयेत् । यस्य स्मृ० । अनेन मया कृतेन शिवरात्रौ प्रथमयामपूजनेन

श्रीशिवः प्रीयताम् ॥ यामावशिष्टकालं तत्कथापुराणश्रवणादिना नयेत् । सतिसम्भवे वीणामृदङ्गादिवाद्यघोषगीतनृत्यादि कारयेत् ॥

द्वितीये प्रहरे प्राप्ते, आचम्य देश० महाशिवरात्रौ श्रीशङ्करप्रीत्यर्थं द्वितीययामपूजनमहं करिष्ये । श्रीशङ्कराय नम इति नाममन्त्रः । एतावान् विशेषः, अन्यत्सर्वं प्रथमयामवत् ॥

ततः निशीथे, आचम्य, रात्रीं प्रपद्ये इति मन्त्रद्वयं पठन् रात्रीं सम्प्रार्थ्य, देशकालौ स्मृत्वा, शिवरात्रौ महानिशायां साम्बसदाशिवप्रीत्यर्थं पूजनं करिष्ये । श्रीसाम्बसदाशिवाय नमः इति मन्त्रेण यथासम्भवं विस्तरेण महापूजां कुर्यात् ॥

तृतीययामे प्राप्ते, आचम्य देश० महाशिवरात्रौ श्रीमहेश्वरप्रीत्यर्थं तृतीययामपूजनं करिष्ये । अन्यत्सर्वं पूर्ववत् ॥

चतुर्थप्रहरे प्राप्ते, आचम्य देशका० महाशिवरात्रौ श्रीरुद्रप्रीत्यर्थं चतुर्थयामपूजनं करिष्ये । ॐ रुद्राय नम इति नाममन्त्रः । अन्यत् सर्वं पूर्ववत् । एवं विस्तरेण करणाशक्तौ यथाशक्ति यथाधिकारं पूजाजागरणे कुर्यात् ।

ततःप्रभाते सन्ध्यादि नित्यविधिं निर्वर्त्य, आचम्य देश० श्रीमहारुद्रप्रीत्यर्थं पूजनं करिष्ये । कलशपूजनादिषोडशोपचारैर्देवं सम्पूज्य,गणपतिं विसृजेत् । यान्तु० ततः पूर्वोक्तैः शिवोरुद्रइत्यादि द्वादशनामभिः द्वादशब्राह्मणान् अशक्तौ एकं वा सम्पूज्य, तेभ्यः तिलपक्वान्नपूरितान्द्वादशकुम्भान् एकं वा दत्त्वा दक्षिणां दद्यात् । आचम्य देश० एतत्कर्मपूजासाङ्गतासिध्यर्थं ब्राह्मणाय पक्वान्नपू-

रितकुम्भदानमहं करिष्ये । तदङ्गं ब्राह्मणपूजनं कुम्भपूजनं च करिष्ये । कुम्भे वरुणं ब्राह्मणं च सम्पूज्य । स्वस्त्यस्तु, दीर्घ० । दानमन्त्रः—यत्कृतं मन्त्रतो हीनं यच्च भक्त्या विना कृतम् । यच्च दक्षिणया हीनं पूर्णं कुरु महेश्वर ॥ इदं पक्वान्नपूरितकुम्भदानं सदक्षिणाकं सताम्बूलं धान्यसहितं अमुकश० ब्राह्मणाय तु० । प्रति०, प्र० । तेन श्रीसाम्बसदाशिवः प्रीयताम् । कृतस्य कर्म० तत्सम्पू० (अमुक) सङ्ख्याकान् ब्राह्मणान् सुवासिनीश्च भोजयिष्ये । नानानामगोत्रान् ब्राह्मणान् गन्धादिभिः पूजयिष्ये, तेभ्यश्च भूयसीं दक्षिणां दातुमहमुत्सृजे । यस्य स्मृत्या० । अनेन महाशिवरात्रिनिमित्तपूजनाख्येन कर्मणा श्रीशिवादयः प्रीयन्ताम् ॥

॥ लघुरुद्राभिषेकसङ्कल्पः ॥

पत्न्या सह प्राङ्मुख उपविश्य । आचम्य देशकालौ स्मृत्वा, मम समस्तपापक्षयपूर्वकसकलैश्वर्याद्यभिवृद्धिद्वारा श्रीविश्वेश्वरमहारुद्रप्रीत्यर्थं ब्राह्मणद्वारा लघुरुद्राभिषेकपूर्वकं यथामिलितोपचारद्रव्यैः पुरुषसूक्तेन षोडशोपचारपूजनमहं करिष्ये । तदङ्गं गणपतिपूजनं आसनविधिं शिवपञ्चाक्षरन्यासादि करिष्ये । गणानांत्वेति गणपतिं सम्पूज्य, आसनविध्यादिप्रोक्षणान्तं विधाय, पूर्वोक्तध्यानादिस्नानान्तं कुर्यात् । यजमानः स्वगोत्रप्रवरमुच्चार्य अमुकशर्माहं, ब्राह्मणस्य गोत्रप्रवरमुच्चार्य अमुकशर्माणं ब्राह्मणं अस्मिन् लघुरुद्राभिषेकाख्ये कर्मणि अभिषेककर्तारं त्वां वृणे । वृतोऽस्मि इति विप्रः वदेत् । एवं एकादशब्राह्मणान् वृत्वा, गन्धादिभिस्तान् सम्पूज्य, नमोऽस्त्वनन्तायेति प्रार्थयेत् । ततः अभिषेकः । वस्त्रादिसर्वां पूजां

समाप्य, ब्राह्मणेभ्यः दक्षिणाप्रदानं कुर्यात्। अद्य० थं
 मया ब्राह्मणद्वारा कृतस्य लघुरुद्राभिषेककर्मणः साङ्गतासिध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं ब्राह्मणेभ्यः दक्षिणाप्रदानं करिष्ये। तदङ्गं ब्राह्मणपूजनं करिष्ये। आसनादिना ब्राह्मणं सम्पूज्य। नमोऽस्त्व०। अस्मिन् लघुरुद्रे यथांशेन कृताभिषेकसाङ्गतासिध्यर्थं श्रीविश्वेश्वरस्वरूपिणे ब्राह्मणाय इमां दक्षिणां तुभ्यमहं सम्प्रददे। प्रति०, प्र०। यान्तु देवेति गणपतिं विसृजेत्। कृतस्य लघुरुद्राभिषेककर्मणः साङ्गतासिध्यर्थं तत्सम्पू० एकादश ब्राह्मणान् सुवासिनीश्च भोजयिष्ये। तेभ्यश्च भूयसीं दक्षिणां दातुमहमुत्सृजे। यस्य स्मृत्या०। अनेन लघुरुद्राभिषेकपूर्वकशिवपूजनाख्येन कर्मणा श्रीविश्वे० ॥

॥ अथ फाल्गुनमासः ॥

॥ पौर्णमास्यां होलिकाप्रदीपनपूजनविधिः ॥

पौर्णमासी च प्रदोषव्यापिनी ग्राह्या। दिनद्वये तद्व्याप्तौ समव्याप्तावेकदेशव्याप्तौ वा परैव। अत्र भद्रां त्यक्त्वा प्रदीपनं कार्यम् ॥ अत्रायं विधिः ॥ भूमिं गोमयेनोपलिप्य रङ्गवल्यादिभिरलङ्कृत्य, आचारान्मध्ये वृक्षशाखामारोप्य तदभितः पूर्वसम्पादितानां शुष्ककाष्ठानां गोमयपिण्डानां च राशिं कृत्वा, ग्रामे एकत्रैव होलाप्रदीपनपक्षे तदधिकारी। आचम्य देशकालौ सङ्कीर्त्य, एतद्ग्रामस्थितसर्वजनानां ढुण्ढाराक्षसीप्रीतिद्वारा तत्पीडापरिहारार्थं सर्वारिष्टशान्त्यर्थं च फाल्गुनपौर्णमास्यां होलाप्रदीपनं पुराणोक्तमन्त्रेण यथामिलितोपचारैः पूजनं च
 करिष्ये। पृथक् करणपक्षे, मम सकुटुम्बस्य सपरिवारस्य तुष्टिपुष्टिप्राप्तिद्वारा उल्वणनिरसनपूर्वकढुण्ढाराक्षसीप्री-

तिद्वारा तत्पीडापरिहारार्थं० इत्यादि विशेषः । गणपतिपूजनादिसम्भारप्रोक्षणान्तं कृत्वा, चण्डालसूतिकागृहानीतवन्हिना होलां प्रदीपयेत् । तत्र मन्त्रः—दीपयाम्यद्य ते घोरां चितिं राक्षससत्तमे । हिताय सर्वजगतां प्रीतये पार्वतीपतेः ॥ तस्यां प्रदीप्तायां पूजयेत् । पूजामन्त्रः—असृक्पाभयसन्त्रस्तैः कृता त्वं होलिबालिशैः । अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भव ॥ ढुण्ढाराक्षसीदेव्यै नमः इति नाममन्त्रेण सम्पूज्य, पोलिकादिसहितं समर्पितनैवेद्यं होलिकायां प्रक्षिप्य, फलेन फलितमिति मन्त्रेण नारिकेलबीजपूरादीनि समर्प्य, प्रदक्षिणाः कृत्वा प्रार्थयेत्—आयुर्देहि यशो देहि शिशूनां कुरु रक्षणम् । शत्रवश्च क्षयं यान्तु होलिके पूजिता मया ॥ ततः पात्रे गन्धाक्षतोदकं निधाय विशेषार्घ्यं दद्यात् । तत्र मन्त्रः—होलिके च नमस्तुभ्यं ढुण्ढादेवि विमर्दिनि । सर्वोपद्रवनाशार्थं गृहाणार्घ्यं नमोऽस्तु ते ॥ ढुण्ढाराक्षसीदेव्यै नमः इदं विशेषार्घ्यं स० । यस्य स्मृ० । अनेन यथाज्ञानेन मया कृतेन पूजनेन श्रीढुण्ढाराक्षसीदेवी प्रीयताम् । कृतस्य क० एकं ब्राह्मणं सुवासिनीं च भोजयिष्ये । नानानामगोत्रान् ब्राह्मणान् गन्धादि० । तेभ्यश्च भूयसीं द० ॥

॥ फाल्गुनकृष्णप्रतिपदि धूलिवन्दनविधिः ॥

प्रतिपत् उदयव्यापिनी ग्राह्या । दिनद्वये तथात्वे पूर्वा । तत्र आधिव्याधिपरिहाराय श्वपचं स्पृष्ट्वा स्नायात् । ततः नित्यकर्म विधाय सर्वदुःखोपशान्तये होलिकाविभूतिं वन्दयेत् । तत्र मन्त्रः—वन्दितासि सुरेन्द्रेण ब्रह्मणा शङ्करेण च । अतस्त्वं पाहि नो देवि भूते भूतिप्रदा भव ॥

॥ वसन्तोत्सवविधिः ॥

वसन्तारम्भोत्सवविहितं तैलाभ्यङ्गपूर्वकं मङ्गलस्नानं विधाय रङ्गवल्ल्यादिशोभिते गृहाङ्गणे भद्रपीठे उपविष्टः सुवासिन्या कृतनीराजनः सचन्दनमाम्रकुसुमं प्राश्नीयात्। तत्र मन्त्रः-चूलमग्र्यं वसन्तस्य माकन्दकुसुमं तव। सचन्दनं पिबाम्यद्य सर्वकामार्थसिद्धये ॥ ततः वसन्तोत्सवनिमित्तं यथाशक्ति ब्राह्मणभोजनादि कुर्यात् ॥

॥ अष्टम्यां शीतलाष्टमीपूजाविधिः ॥

फाल्गुनकृष्णाष्टमीमारभ्य ज्येष्ठकृष्णाष्टमीपर्यन्तं प्रतिकृष्णाष्टमीषु शीतलापूजनम् । आचारात् सर्वत्र कुर्वन्ति। अष्टमी च उदयव्यापिनी ग्राह्या, शिष्टाचारात्। अष्टम्यां प्रातः आचम्य देशकालौ सङ्कीर्त्य, मम सर्वोपद्रवशान्तिपूर्वकश्रीशीतलादेवताप्रीत्यर्थं यथामिलितषोडशोपचारद्रव्यैः श्रीशीतलापूजनं करिष्ये । अथ ध्यायेत् । वन्देऽहं शीतलां देवीं रासभस्थां दिगम्बराम् । मार्जनीकलशोपेतां शूर्पालङ्कृतमस्तकाम् ॥ श्रीशीतलादेव्यै नम इति नाममन्त्रेण षोडशोपचारैः पर्युषितान्नमहानैवेद्येन च सम्पूज्य प्रार्थयेत्-शीतले त्वं जगन्माता शीतले त्वं जगत्पिता । शीतले त्वं जगद्धात्री शीतलायै नमो नमः ॥ पूजासाङ्गतासिद्ध्यर्थं यथाशक्ति सुवासिनीः पर्युषितान्नेन भोजयिष्ये । यस्य स्मृत्या० । अनेन मया कृतेन श्रीशीतलादेवता प्रीयताम् । स्वयमपि पर्युषितमन्नं भुञ्जीत । पर्युषितान्ननैवेद्यभोजनादि न सर्वत्र, कुलाचारात् कुत्रचिदस्ति ॥

॥ वारुणीपर्वयोगः ॥

फाल्गुनकृष्णत्रयोदश्यां शततारकानक्षत्रयोगे वारु-

णीसंज्ञा त्रयोदशी । शततारका शनिवासरयुता महावारुणी । शततारकाशनिवासरशुभयोगसहिता महामहावारुणी । अत्र स्नानदानादि ग्रहणवत् कुर्यात् ॥

॥ अथ विशेषव्रतपूजादानादिविधिः ॥

॥ प्रतिमासं व्यतीपाते सुवर्णादिदानविधिः ॥

आचम्य देशकालौ स्मृत्वा, मम समस्तपापक्षयपूर्वकपर्वततुल्यसुवर्णदानफलसमप्राप्तिद्वारा श्रीसूर्यनारायणदेवताप्रीत्यर्थं व्यतीपातयोगमहापर्वनिमित्तं ब्राह्मणाय (अमुक) परिमितसुवर्णदानमहं करिष्ये । तदङ्गत्वेन सूर्यपूजनं ब्राह्मणपूजनं च करिष्ये । सूर्यनारायणाय नम इति मन्त्रेण पूगफले पञ्चोपचारैः सम्पूज्य विप्रं सम्पूजयेत् । सूर्यनारायणस्वरूपिणे ब्राह्मणाय इदमासनमित्यादि । स्वस्त्यस्तु, दीर्घ० । शङ्कुर्ण प्रलम्बोष्ठ लम्बभ्रू दीर्घनासिक । अष्टनेत्र चतुर्वक्त्र विस्तीर्णशतयोजन ॥ १ ॥ व्यतीपात नमस्तेऽस्तु सोमसूर्यसुत प्रभो । दास्यामि दानं यत्किञ्चित्तदक्षयमिहास्तु मे ॥ २ ॥ इदं क्षेत्रं कुरुक्षेत्रं साक्षान्नारायणो द्विजः । गुञ्जामात्रमपि स्वर्णं मेरुतुल्यं तवागमे ॥ ३ ॥ पापं मे नश्यतु क्षिप्रं बहुजन्मार्जितं च यत् । दानेन सन्तु मे प्रीताः सोमसूर्यजनार्दनाः ॥ ४ ॥ हिरण्यगर्भगर्भ० ॥ ५ ॥ इदं यथाशक्ति सुवर्णं दक्षिणासहितं (अमुक) शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । प्रति०, प्रति० । ब्राह्मणस्तु कइदंक० इति कामस्तुतिं पठेत् । अनेन व्यतीपातयोगमहापर्वनिमित्तसुवर्णदानाख्येन कर्मणा तेन श्रीसवितासूर्यनारायणः प्रीयताम् । सुवर्णदानासम्भवे पदार्थाः, फलानि वा, त्रयोदशसङ्ख्याकानि दद्यात् ॥

॥ वसन्तमाधवनिमित्तोदककुम्भदानविधिः ॥

आचम्य देशकालौ सङ्कीर्त्य, मम समस्तपापक्षयार्थं शिवलोकमहीयमानत्वसिद्धिद्वारा श्रीवसन्तमाधवप्रीत्यर्थं ब्राह्मणाय उदकुम्भदानमहं करिष्ये। तदङ्गत्वेन उदकुम्भपूजनं ब्राह्मणपूजनं च करिष्ये। वरुणाय नमः इति नाममन्त्रेण पञ्चोपचारैः सम्पूज्य विप्रं सम्पूजयेत्। वसन्तमाधवस्वरूपिणे ब्राह्मणाय इदमासनमित्यादि। स्वस्त्यस्तु, दीर्घ०। दानमन्त्रः-एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः। अस्य प्रदानात्सकला मम सन्तु मनोरथाः ॥ गन्धोदकयवैर्मिश्रं सान्नं कुम्भं फलान्वितम्। माधवाय प्रदास्यामि ह्यक्षय्यमुपतिष्ठतु ॥ इदं उदकुम्भं सफलं सधान्यं सव्यजनं वसन्तमा० अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। प्रति०, प्र०। दानसाङ्गतासिध्यर्थं इमां द०। अनेन उदकुम्भदानाख्येन कर्मणा तेन श्रीवसन्तमाधवः प्रीयताम् ॥

॥ अधिमासनिमित्तदानविधिः ॥

आचम्य देशकालौ स्मृत्वा, मम अष्टवस्वेकादशरुद्रद्वादशादित्यप्रजापतिवषट्कारात्मकश्रीपरमेश्वरप्रीतिद्वारा सकलमलविशुद्धिसर्वपापक्षयपूर्वकलक्ष्मीसम्पत्तिपुत्रपौत्राद्यभिवृद्धिपृथ्वीदानफलसमफलस्वर्गलोकनिवासप्राप्त्यर्थं मलमासविहितापूपान्नदानं करिष्ये। तदङ्गत्वेन ब्राह्मणपूजनं च करिष्ये। पुरुषोत्तमस्वरूपिणे ब्राह्मणाय इदमासनमित्यादिपूजां कृत्वा,तदग्रे यथाशक्ति सोपस्करापूपान्नं निधाय। स्वस्त्यस्तु, दीर्घ०। दानमन्त्राः—चन्द्रांशुनिर्मलापूपाः शालितण्डुलनिर्मिताः। आहारः सर्वदेवानां ते मे कुर्वन्तु मङ्गलम् ॥ १ ॥ विष्णुरूपी सहस्रांशुः सर्वपापप्रणाशनः।

अपूपान्नप्रदानेन मम पापं व्यपोहतु ॥२॥ यस्य हस्ते गदाचक्रं गरुडो यस्य वाहनम्। शङ्खः करतले यस्य स मे विष्णुः प्रसीदतु ॥ ३ ॥ कलाकाष्ठादिरूपेण निमेषघटिकादिना। यो वञ्चयति भूतानि तस्मै कालात्मने नमः॥४॥ कुरुक्षेत्रमयं देशः कालः पर्वद्विजो हरिः। पृथ्वीसममिदं दानं गृहाण पुरुषोत्तम ॥ ५ ॥ मलानां च विशुध्यर्थं पापप्रशमनाय च। पुत्रपौत्राभिवृध्यर्थं तव दास्यामि भास्कर ॥ ६ ॥ इमान् त्रयस्त्रिंशत्सङ्ख्याकान् घृतपात्रादिसहितान् कांस्यपात्रनिहितान् अपूपान् अमुकश० पुरुषोत्तमस्वरूपिणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। प्रति०। दानसाङ्ग०। प्रतिग्रहीता कामस्तुतिं पठेत्-कइदंक०। कर्तानारायण जगद्बीज भास्करप्रतिरूपक। दानेनानेन पुत्रांश्च सम्पदं चापि वर्धय॥ इति सम्प्रार्थ्य। यस्य स्मृ०। अनेन मलमासविहितअपूपान्नदानाख्येन कर्मणा तेन श्रीपुरुषोत्तमदेवता प्रीयताम्॥ एवं मासपर्यन्तं प्रतिदिनं कुर्यात्। अशक्तौ तु एकस्मिन्नेव दिने कुर्यात्। अधिमासे पौर्णमास्यां द्वादश्यां वापि शक्तितः। व्यतीपातदिने वापि दद्यादन्नं हि भक्तितः॥ इति॥

॥ षोडशफलदानविधिः ॥

आचम्य देशकालौ स्मृत्वा, मम समस्तपापक्षयपूर्वकसकलसौभाग्यस्त्रीपुत्रपौत्रादिअनन्तफलावाप्तये दीयमानफलसमसङ्ख्यवर्षसहस्रावच्छिन्नदेवाङ्गनाभिः सह भोगोत्तराऽनेकसुखावाप्तिकामः ब्राह्मणाय (षोडशसङ्ख्याक) (अथवा अष्टसङ्ख्याक) अमुकफलदानं करिष्ये। तदङ्गब्राह्मणपूजनं क०। आसनादिपूजां कृत्वा,

स्वस्त्यस्तु दीर्घं० । दानमन्त्रः—फलैः षोडश * संयुक्तं स्वर्णधान्यादिसंयुतम् । द्विजवर्य गृहाण त्वं मम सन्तु मनोरथाः ॥ (इदं षोडशफलदानं)(अथवा अष्टफलदानं) सुवर्णधान्यसहितं ताम्बूलफलदक्षिणायुतं वनस्पतिदैवतं अमुकश० । प्रति० । अनेन०फलदानेन तेन श्रीपरमेश्वरः प्रीयताम् । षोडशेभ्यो ब्राह्मणेभ्यः दानपक्षे, मम समस्ता- इत्यारभ्य सुखावासिकामः इत्यन्तमुक्त्वा नानानामगोत्रेभ्यः षोडशसङ्ख्याकेभ्यः सुपूजितेभ्यः ब्राह्मणेभ्यः इमानि षोडश षोडश सङ्ख्याकानि अमुकफलानि एकैकस्मै सगोधूमताम्बूलफलदक्षिणायुतानि वनस्पतिदेवतानि दातुमहमुत्सृजे । शेषं पूर्ववत् ॥

॥ ग्रहणे शुभाशुभफलविचारः ॥

ग्रहणं च जन्मराशौ जन्मनक्षत्रे तत्पूर्वोत्तरनक्षत्रे च जन्मराशितः ४।८।१२ स्थानेषु अशुभम् । २।७।५।९ स्थाने मध्यम् । ३।६।१०।११ स्थाने शुभम् ।

॥ अशुभग्रहणे नागबिम्बदानविधिः ॥

चन्द्रग्रहे रौप्यमयं चन्द्रबिम्बं, सौवर्णं राहुं सर्पाकारं, सूर्यग्रहे सौवर्णं सूर्यबिम्बं, सर्पाकारं राहुं च पलेन तदर्धेन तदर्धेन तदर्धेन वा यथाशक्ति सम्पाद्य, फणायां मौक्तिकं न्यस्य घृतपूरितताम्रपात्रे कांस्यपात्रे वा निधाय दक्षिणायुतं ब्राह्मणाय दद्यात् । अथ प्रयोगः । ग्रहणप्रयुक्तं स्नानजपादिकं कृत्वा, ग्रहणान्ते आचम्य देशकालौ स्मृत्वा, अमुकगोत्रो० अमुकश० मम अमुकजन्मनक्षत्रे तत्पूर्वोत्तरनक्षत्रे वा जन्मराशेः सकाशात्

* अष्टभिः ।

अमुकस्थाने वा (चन्द्र) (सूर्य) ग्रहणसूचितसकलारिष्टनिरसनपूर्वकशुभफलप्राप्त्यर्थं ब्राह्मणाय घृतपूरितताम्रपात्रनिहितरौप्यमयचन्द्रबिम्बसहितसुवर्णमयनागदानं करिष्ये। सूर्यग्रहे तु, सुवर्णमयसूर्यबिम्बसहितसुवर्णमयनागदानमित्यूहः। तदङ्गं नागपूजनं ब्राह्मणपूजनं च करिष्ये। नागं ब्राह्मणं च सम्पूज्य। स्वस्त्यस्तु, दीर्घं०। दानमन्त्रः- तमोमय महाभीम सोमसूर्यविमर्दन। हेमताराप्रदानेन मम शान्तिप्रदो भव॥ विधुन्तुद नमस्तुभ्यं सिंहिकानन्दनाच्युत। दानेनानेन नागस्य रक्ष मां वेधजाद्भयात्॥ २॥ इदं घृतपूर्णताम्रपात्रनिहितरौप्यमयचन्द्रबिम्बसहितसुवर्णमयनागदानं सदक्षिणाकं सफलं सताम्बूलं अमुकश० तुभ्यम०। अनेन बिम्बसहितनागदानाख्येन कर्मणा तेन श्रीपरमेश्वरः प्रीयताम्॥

॥ अथ श्रीसत्यनारायणपूजाविधिः ॥

इन्दुवासरे भृगुवासरे वा सायङ्काले प्रदोषसमये तावत् स्वयमुपोष्य, ब्राह्मणा अमात्यैः सुहृज्जनबन्धुवर्गादिपुत्रपौत्रादिभिः परिवृतो यथाशक्त्युपचारेण श्रीसत्यनारायणं पुजयेत्। कदलीस्तम्भमण्डितं पुष्पमालावलीदीपादिशोभितां मण्डपिकां कृत्वा, मण्डपिकां मध्ये कलशस्थापनं ताम्रमयं मृन्मयं वा तदुपरि पूर्णपात्रे शालिग्रामशिलापूजां कुर्युः। सायङ्काले जलाशयं स्नात्वा, मौनेन गृहमागत्य आसने उपविश्य। आचम्य पवित्रपाणिः प्राणानायम्य, देशकालौ सङ्कीर्त्य, अमुकगोत्रोत्पन्नस्य अमुकशर्मणः मम श्रीसत्यनारायणप्रसादात् (अमुक) कामनावाञ्छितफलप्राप्तिकामः पूर्वसङ्कल्पितपरिपूरणार्थं

गोधूमचूर्णघृतदुग्धशर्कराप्रत्येकं (सपादशेटक) (मित-
॥ ९७ ॥ द्राक्षाखर्जूरीफलपदामवातांबुबीजरम्भैलादि) मिश्रि-
तसंयावपायसादिअपूपदधिक्षीरघृतादिनैवेद्यसहितविवि-
धगन्धपुष्पधूपदीपफलताम्बूलउपचारविशिष्टं श्रीसत्यना-
रायणपूजनं पुरुषसूक्तमन्त्रैः पुराणोक्तमन्त्रैश्च षोडशो-
पचारैः पूजनमहं करिष्ये । आदौ निर्विघ्नतासिध्यर्थं
महागणपतिपूजनं आसनविधिं षडङ्गंन्यासान्कलशपूजनं
शङ्खघण्टापूजनं वरुणपूजनं कथाश्रवणं च करिष्ये ।
गणानां त्वेति गणपतिं सम्पूज्य, वक्रतुण्डेति प्रार्थयेत् ।
पृथिव त्व० । अपस० । अपक्रा० । तीक्ष्णदं० । वामपादेन भूमिं
त्रिस्ताडयेत् । समुद्रवसने दे० । यत्पुरुषेणेति षडङ्गं
न्यासान् कृत्वा, कलशपूजनादिसम्भारप्रोक्षणान्तं कृत्वा,
महीद्यौरित्यादिना पूर्णपात्रनिधानान्तं कृत्वा, वरुणं सम्पू-
ज्य,अथ ध्यायेत्-जलदः श्यामलं चारुचतुर्बाहुगदादिभिः ।
पीताम्बरनवाम्भोजलोचनस्मितशोभितम् । वनमालाम-
धुव्रातचुम्बिताङ्घ्रिसरोरुहम् ॥ ध्यायेत्सत्यं गुणातीतं
गुणत्रयसमन्वितम् । लोकनाथं त्रिलोकेशं कौस्तुभाभरणं
हरिम् ॥ नीलवर्णं पीतवासं श्रीवत्सपदभूषितम् । गोविन्दं
गोकुलानन्दं ब्रह्माद्यैरपि पूजितम् ॥ श्रीसत्यनारायणाय
नमः श्रीसत्यनारायणं ध्यायामि । सहस्रशी० । आगच्छ
भगवन्देव स्थाने चात्र स्थिरो भव । यावत्पूजां करिष्येऽहं
तावत्वं सन्निधो भव ॥ श्रीसत्यनारायणं साङ्गं सपरिवा-
रं सायुधं सशक्तिकं आवाहयामि । पुरुष० । नानारत्नस-
मायुक्तं कार्तस्वरविभूषितम् । आसनं देवदेवेश प्रीत्यर्थं
१२ प्रतिगृ० ॥ आसनं० ॥ एतावा० । नारायण नमस्तेऽस्तु
नरकार्णवतारक । पाद्यं गृहाण देवेश मम सौख्यं विवर्ध-

य ॥ पाद्यं० ॥ त्रिपादू० । व्यक्ताव्यक्तस्वरूपाय हृषीकपतये नमः । मया निवेदितो भक्त्या अर्घोऽयं प्रतिगृ० ॥ अर्घ्यं० ॥ तस्माद्वि० । मन्दाकिन्यास्तु यद्वारि सर्वपापहरं शुभम् । तदिदं कल्पितं देव सम्यगाचम्यतां त्वया ॥ आचमनं० । यत्पुरुषे० । स्नानं गङ्गादिसलिलैर्गृहाण पुरुषोत्तम । अनाथनाथ सर्वज्ञ गीर्वाण प्रणतप्रिय ॥ स्नानं० ॥ पयो दधि घृतं क्षौद्रं सितया च समर्पितम् । स्नानं पञ्चामृतेनाद्य कुरु देव दयानिधे ॥ आप्या० । दधिक्रा० । घृतंमि० । मधुवा० । स्वादुःप० इत्यादिमन्त्रैः पञ्चामृतस्नानं० । स्नानानन्तरेण आचमनीयं० ॥ गन्धादिपञ्चोपचारपूजां कृत्वा, अभिषेकः । तंयज्ञं० । वेदसूक्तसमायुक्ते यज्ञसामसमन्विते । सर्ववर्णप्रदे देव वाससी प्रतिगृह्यताम् ॥ वस्त्रं० ॥ तस्माद्य०सं० । ब्रह्मविष्णुमहेशाननिर्मितं ब्रह्मसूत्रकम् । यज्ञोपवीतदानेन प्रीयतां कमलापतिः ॥ यज्ञोपवीतं० ॥ तस्माद्य०ऋ० । श्रीखण्डं च० चन्दनं० ॥ तस्मादश्वा० । माल्यादीनि० पुष्पाणि० । यत्पुरुषं० । वनस्पति० धूपमा० । ब्राह्मणो० । आज्यं च वर्ति० दीपं द० ॥ चन्द्रमा० । घृतपक्वहविष्यान्नं पायसं च सशर्करम् । नानाविधं च नैवेद्यं विष्णो मे प्रतिगृह्यताम् ॥ नैवेद्यं० ॥ सर्वपापहरं दिव्यं गाङ्गेयं निर्मलं जलम् । आचमनं मया दत्तं गृह्यतां परमेश्वर ॥ आचमनं० ॥ लवङ्गकर्पूरयुतं ताम्बूलं सुरपूजितम् । प्रीत्या गृहाण देवेश मम सौख्यं विवर्धय ॥ ताम्बूलं० ॥ इदं फलं म० फलं० ॥ हिरण्यग० दक्षिणां० ॥ श्रिये जातः०॥ याज्यया यजति० । चतुर्वर्तिसमायुक्तं घृतेन च सुपूरितम् । नीराजनेन सन्तुष्टो भवत्येव जगत्पतिः ॥ नीराजनं० कर्पूरदीपं० ॥ नाभ्याआ० । यानि कानि० प्रदक्षिणां० ॥

॥ ९९ ॥ ससास्या० । अन्यथाश० नमस्कारान्० ॥ यज्ञेनय० । मालती-
मल्लिकापुष्पैर्भोगधैश्च समन्वितम् । पुष्पाञ्जलिं गृहाण त्वं नित्यं भक्तिं प्रयच्छ मे ॥ राजाधिराजायप्र० ॥ मन्त्र-पुष्पाञ्जलिं स०॥ प्रार्थयेत्-प्रणमामि सत्यसन्धं सत्यनारायणं परम् । ममापराधिनो मौढ्यं क्षमस्व त्वं दयानिधे ॥ सुरासुरनरा नागा दुराचाराः कृपालवः । सर्वे त्वदङ्गसम्भूता अपराधान्क्षमस्व मे ॥ यन्मया भक्तियुक्तेन पत्रं पुष्पं फलं जलम् । निवेदितं च नैवेद्यं तद् गृहाणानुकम्पया ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन । यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ अमोघं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम् । हृषीकेशं जगन्नाथं वागीशं वरदायकम् ॥ गुणत्रयं गुणातीतं गोविन्दं गरुडध्वजम् । जनार्दनं जनातीतं जानकीवल्लभं हरिम् ॥ प्रणमामि सदा भक्त्या नारायणमतः परम् । दुर्गमे विषमे घोरे शत्रुभिः परिपीडिते । निस्तारयस्व सर्वेषु तथानिष्टभयेषु च । नामान्येतानि सङ्कीर्त्य ईप्सितं फलमाप्नुयात् ॥ सत्यनारायणं देवं वन्देऽहं कामदं प्रभुम् । लीलया विततं विश्वं येन तस्मै नमो नमः ॥ अष्टोत्तरशतं ॐनमो भगवते वासुदेवाय इति मन्त्रं जप्त्वा, साष्टाङ्गं प्रणम्य । अनेन यथाज्ञानेन यथाशक्त्या कृतपूजनेन तेन श्रीमहाविष्णुः प्रीयताम् । पौराणिकाय पुष्पमालाचन्दनादिभिः सम्पूज्य, कथापुस्तकेषु गन्धादिपूजां कृत्वा कथां शृणुयात् । कथाश्रवणानन्तरं पुनर्देवं पञ्चोपचारैः सम्पूज्य । अनेन० गले वस्त्रं बध्वा साष्टाङ्गं प्रणम्य, सम्प्रार्थ्य, कार्यान्ते पुनः पूजनं मनसि द्रव्यनियमं कुर्यात् । यस्य स्मृ० । कृतस्य क० दम्पतीब्राह्मणान् सुवासिनीश्च भोजयिष्ये ।

॥१००॥ नानानामगोत्रान् ब्राह्मणान् गन्धादि० । तेभ्यश्च भूयसीं दक्षिणां दातुमहमुत्सृजे । पौराणिकाय वस्त्रं दक्षिणां च दत्वा आशिषो गृह्णीयात् । ततः सुहृज्जनैः सार्धं संघावप्रसादं भुञ्जीयात्, दासदासीभ्योऽन्यानपि देयः । ब्राह्मणसुवासिनीभिः सह भुञ्जीयात् । परेद्युः गणपतिवरुणौ विसृजेत् । यान्तुदेव० ॥

अथ कथा ॥ व्यास उवाच ॥ एकदा नैमिषारण्ये ऋषयः शौनकादयः ॥ पप्रच्छुर्मुनयः सर्वे सूतं पौराणिकं खलु ॥ १ ॥ ऋषय ऊचुः । व्रतेन तपसा किंवा प्राप्यते वाञ्छितं फलम् ॥ तत्सर्वं श्रोतुमिच्छामः कथयस्व महामुने ॥ २ ॥ सूत उवाच ॥ नारदेनैव सम्पृष्टो भगवान् कमलापतिः ॥ सुरर्षये यथैवाह तच्छृणुध्वं समाहिताः ॥ ३ ॥ एकदा नारदो योगी परानुग्रहकाङ्क्षया ॥ पर्यटन् विविधान् लोकान् मर्त्यलोकमुपागतः ॥ ४ ॥ ततो दृष्ट्वा जनान्सर्वान्नानाक्लेशसमन्वितान् ॥ नानायोनिसमुत्पन्नान् क्लिश्यमानान् स्वकर्मभिः ॥ ५ ॥ केनोपायेन चैतेषां दुःखनाशो भवेद् ध्रुवम् । इति सञ्चिन्त्य मनसा विष्णुलोकं गतस्तदा ॥ ६ ॥ तत्र नारायणं देवं शुक्लवर्णं चतुर्भुजम् । शङ्खचक्रगदापद्मवनमालाविभूषितम् ॥ ७ ॥ दृष्ट्वा तं देवदेवेशं स्तोतुं समुपचक्रमे ॥ नारद उवाच ॥ नमो वाङ्मनसातीतरूपायानन्तशक्तये ॥ ८ ॥ आदिमध्यान्तहीनाय निर्गुणाय गुणात्मने ॥ सर्वेषामादिभूताय भक्तानामार्तिनाशिने ॥ ९ ॥ श्रुत्वा स्तोत्रं ततो विष्णुर्नारदं प्रत्यभाषत ॥ श्रीभगवानुवाच ॥ किमर्थमागतोऽसि त्वं किं ते मनसि वर्तते ॥ १० ॥ कथयस्व महाभाग तत्सर्वं कथयामि ते ॥ नारद उवाच ॥ मर्त्यलोके जनाः सर्वे नानाक्लेशस-

मन्विताः ॥ नानायोनिसमुत्पन्नाः पच्यन्ते पापकर्मभिः ॥ ११ ॥ तत्कथं शमयेन्नाथ लघूपायेन तद्वद ॥ श्रोतुमिच्छामि तत्सर्वं कृपास्ति यदि ते मयि ॥ १२ ॥ श्रीभगवानुवाच ॥ साधु पृष्टं त्वया वत्स लोकानुग्रहकाङ्क्षया ॥ यत्कृत्वा मुच्यते मोहात्तच्छृणुष्व वदामि ते ॥ १३ ॥ व्रतमस्ति महत्पुण्यं स्वर्गे मर्त्ये च दुर्लभम् ॥ तव स्नेहान्मया वत्स प्रकाशः क्रियतेऽधुना ॥ १४ ॥ सत्यनारायणस्यैव व्रतं सम्यग्विधानतः ॥ कृत्वा सद्यः सुखं भुक्त्वा परत्र मोक्षमाप्नुयात् ॥ १५ ॥ तच्छ्रुत्वा भगवद्वाक्यं नारदो मुनिरब्रवीत् ॥ नारद उवाच । किं फलं किं विधानं च कृतं केनैव तद् व्रतम् ॥ १६ ॥ तत्सर्वं विस्तराद् ब्रूहि कदा कार्यं हि तद् व्रतम् ॥ दुःखशोकादिशमनं धनधान्यप्रवर्धनम् ॥ १७ ॥ सौभाग्यसन्ततिकरं सर्वत्र विजयप्रदम् ॥ यस्मिन् कस्मिन् दिने मर्त्यो भक्तिश्रद्धासमन्वितः ॥ १८ ॥ सत्यनारायणं देवं यजेच्चैव निशामुखे ॥ ब्राह्मणैर्बान्धवैश्चैव सहितो धर्मतत्परः ॥ १९ ॥ नैवेद्यं भक्तितो दद्यात्सपादं भक्तिसंयुतम् ॥ रम्भाफलं घृतं क्षीरं गोधूमस्य च चूर्णकम् ॥ २० ॥ अभावे शालिचूर्णं वा शर्करा च गुडस्तथा । सपादं सर्वभक्ष्याणि चैकीकृत्य निवेदयेत् २१ ॥ विप्राय दक्षिणां दद्यात्कथां श्रुत्वा जनैः सह ॥ ततश्च बन्धुभिः सार्धं विप्रांश्च प्रतिभोजयेत् ॥ २२ ॥ प्रसादं भक्षयेद्भक्त्या नृत्यगीतादिकं चरेत् ॥ ततश्च स्वगृहं गच्छेत्सत्यनारायणं स्मरन् ॥ २३ ॥ एवं कृते मनुष्याणां वाञ्छासिद्धिर्भवेद् ध्रुवम् ॥ विशेषतः कलियुगे लघूपायोऽस्ति भूतले ॥ २४ ॥

॥ इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायणव्रतकथायां प्रथमोऽध्यायः ॥ १ ॥

सूत उवाच ॥ अथान्यत्सम्प्रवक्ष्यामि कृतं येन पुरा द्विज ॥ कश्चित्काशीपुरे रम्ये ह्यासीद्विप्रोऽतिनिर्धनः ॥ १ ॥ क्षुत्तृड्भ्यां व्याकुलो भूत्वा नित्यं बभ्राम भूतले । दुःखितं ब्राह्मणं दृष्ट्वा भगवान् ब्राह्मणप्रियः ॥ २ ॥ वृद्धब्राह्मणरूपस्तं पप्रच्छ द्विजमादरात् ॥ किमर्थं भ्रमसे विप्र महीं नित्यं सुदुःखितः ॥ ३ ॥ तत्सर्वं श्रोतुमिच्छामि कथ्यतां द्विजसत्तम ॥ ब्राह्मण उवाच ॥ ब्राह्मणोऽतिदरिद्रोऽहं भिक्षार्थं वै भ्रमे महीम् ॥ ४ ॥ उपायं यदि जानासि कृपया कथय प्रभो । वृद्धब्राह्मण उवाच । सत्यनारायणो विष्णुर्वाञ्छितार्थफलप्रदः ॥ ५ ॥ तस्य त्वं पूजनं विप्र कुरुष्व व्रतमुत्तमम् ॥ यत्कृत्वा सर्वदुःखेभ्यो मुक्तो भवति मानवः ॥ ६ ॥ विधानं च व्रतस्यापि विप्रायाभाष्य यत्नतः ॥ सत्यनारायणो वृद्धस्तत्रैवान्तरधीयत ॥ ७ ॥ तद्व्रतं सङ्करिष्यामि यदुक्तं ब्राह्मणेन वै ॥ इति सञ्चिन्त्य विप्रोऽसौ रात्रौ निद्रां न लब्धवान् ॥ ८ ॥ ततः प्रातः समुत्थाय सत्यनारायणव्रतम् ॥ करिष्य इति सङ्कल्प्य भिक्षार्थमगमद् द्विजः ॥ ९ ॥ तस्मिन्नेव दिने विप्रः प्रचुरं द्रव्यमाप्तवान । तेनैव बन्धुभिः सार्द्धं सत्यस्य व्रतमाचरत् ॥ १० ॥ सर्वदुःखविनिर्मुक्तः सर्वसम्पत्समन्वितः ॥ बभूव स द्विजश्रेष्ठो व्रतस्यास्य प्रभावतः ॥ ११ ॥ ततःप्रभृति कालं च मासि मासि व्रतं कृतम् ॥ एवं नारायणस्येदं व्रतं कृत्वा द्विजोत्तमः ॥ १२ ॥ सर्वपापविनिर्मुक्तो दुर्लभं मोक्षमाप्तवान् । व्रतमस्य यदा विप्राः पृथिव्यां सङ्करिष्यति ॥ १३ ॥ तदैव सर्वदुःखं च मनुजस्य विनश्यति । एवं नारायणेनोक्तं नारदाय महात्मने ॥ १४ ॥ मया तत्कथितं विप्राः किमन्यत्कथयामि वः ॥ ऋषय ऊचुः ॥ तस्माद्वि-

प्राच्छुतं केन पृथिव्यां चरितं मुने ॥ तत्सर्वं श्रोतुमिच्छामः
॥१०३॥ श्रद्धास्माकं प्रजायते ॥१५॥ सूत उवाच ॥ शृणुध्वं मुनयः
सर्वे व्रतं येन कृतं भुवि ॥ एकदा स द्विजवरो यथाविभ-
वविस्तरैः ॥ १६ ॥ बन्धुभिः स्वजनैः सार्धं व्रतं कर्तुं समु
द्यतः ॥ एतस्मिन्नन्तरे काले काष्ठक्रेता समागमत् । १७ ॥
बहिः काष्ठं च संस्थाप्य विप्रस्य गृहमाययौ ॥ तृष्णया
पीडितात्मा च दृष्ट्वा विप्रं कृतव्रतम् ॥ १८ ॥ प्रणिपत्य
द्विजं प्राह किमिदं क्रियते त्वया ॥ कृते किं फलमाप्नोति
विस्तराद्वद मे प्रभो ॥ १९ ॥ विप्र उवाच ॥ सत्यनाराय-
णस्येदं व्रतं सर्वेप्सितप्रदम् ॥ तस्य प्रसादान्मे सर्वं धनधा-
न्यादिकं महत् ॥२०॥ तस्मादेतद् व्रतं ज्ञात्वा काष्ठक्रेताति-
हर्षितः ॥ पपौ जलं प्रसादं च भुक्त्वा स नगरं ययौ
॥ २१ ॥ सत्यनारायणं देवं मनसा इत्यचिन्तयत् ॥ काष्ठं
विक्रयतो ग्रामे प्राप्यते चाद्य यद्धनम् ॥ २२ ॥ तेनैव
सत्यदेवस्य करिष्ये व्रतमुत्तमम् ॥ इति सञ्चिन्त्य मनसा
काष्ठं धृत्वा तु मस्तके ॥ २३ ॥ जगाम नगरे रम्ये धनिनां
यत्र संस्थितिः ॥ तद्दिने काष्ठमूल्यं च द्विगुणं प्राप्तवानसौ
॥ २४ ॥ ततः प्रसन्नहृदयः सुपक्वं कदलीफलम् ॥ शर्करा-
घृतदुग्धं च गोधूमस्य च चूर्णकम् ॥२५॥ कृत्वैकत्र सपादं
च गृहीत्वा स्वगृहं ययौ ॥ ततो बन्धून्समाहूय चकार
विधिना व्रतम् ॥२६॥ तद्व्रतस्य प्रभावेण धनपुत्रान्वितो-
ऽभवत् । इहलोके सुखं भुक्त्वा चान्ते सत्यपुरं ययौ ॥२७॥
॥ इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायणव्रतकथायां
द्वितीयोऽध्यायः ॥ २ ॥

सूत उवाच ॥ पुनरग्रे प्रवक्ष्यामि शृणुध्वं मुनिसत्तमाः ॥
पुरा चोल्कामुखो नाम नृपश्चासी[illegible]हामतिः ॥ १ ॥

जितेन्द्रियः सत्यवादी ययौ देवालयं प्रति ॥ दिने दिने
धनं दत्त्वा द्विजान्सन्तोषयत्सुधीः ॥२॥ भार्या तस्य प्रमु-
ग्धा च सरोजवदना सती ॥ भद्रशीला नदीतीरे सत्यस्य
व्रतमाचरत् ॥ ३ ॥ एतस्मिन्नन्तरे तत्र साधुरेकः समा-
गतः ॥ वाणिज्यार्थं बहुधनैरनेकैः परिवारितः ॥४॥ नावं
संस्थाप्य तत्तीरे जगाम नृपतिं प्रति ॥ दृष्ट्वा स व्रतिनं भूपं
पप्रच्छ विनयान्वितः ॥ ५ ॥ साधुरुवाच ॥ किमिदं कुरुषे
राजन्भक्तियुक्तन चेतसा ॥ प्रकाशं कुरु तत्सर्वं श्रोतुमि-
च्छामि साम्प्रतम् ॥ ६ ॥ राजोवाच॥ पूजनं क्रियते साधो
विष्णोरतुलतेजसः ॥ व्रतं च स्वजनैः सार्धं पुत्राद्यावाप्ति-
काम्यया ॥ ७ ॥ भूपस्य वचनं श्रुत्वा साधुः प्रोवाच साद-
रम् ॥ सर्वं कथय मे राजन्करिष्येऽहं तवोदितम् ॥ ८ ॥
ममापि सन्ततिर्नास्ति ह्येतस्माज्जायते ध्रुवम् ॥ ततो निवृ-
त्य वाणिज्यात्सानन्दो गृहमागतः ॥ ९ ॥ भार्यायै कथितं
सर्वं व्रतं सन्ततिदायकम् ॥ तदा व्रतं करिष्यामि यदा मे
सन्ततिर्भवेत् ॥ १० ॥ इति लीलावतीं प्राह पत्नीं साधुः
स सत्तमः ॥ एकस्मिन्दिवसे तस्य भार्या लीलावती सती
॥ ११ ॥ भर्तृयुक्ताऽऽनन्दचित्ताऽभवद्धर्मपरायणा ॥ गर्भि-
णी साऽभवत्तस्य भार्या सत्यप्रसादतः ॥ १२ ॥ दशमे
मासि वै तस्याः कन्यारत्नमजायत ॥ दिने दिने सा ववृधे
शुक्लपक्षे यथा शशी ॥ १३ ॥ नाम्ना कलावति चेति तन्ना-
मकरणं कृतम् ॥ ततो लीलावती प्राह स्वामिनं मधुरं वचः
॥१४॥ न करोषि किमर्थं वै पुरा सङ्कल्पितं व्रतं ॥
साधुरुवाच ॥ विवाहसमये त्वस्याः करिष्यामि व्रतं प्रिये
॥१५॥ इति भार्यां समाश्वास्य जगाम नगरं प्रति ॥ ततः
कलावती कन्या ववृधे पितृवेश्मनि ॥१६॥ दृष्ट्वा कन्यां ततः

साधुर्नगरे सखिभिः सह ॥ मन्त्रयित्वा द्रुतं दूतं प्रेष-
यामास धर्मवित् ॥ १७ ॥ विवाहार्थं च कन्यायाः वरं श्रेष्ठं
विचारय ॥ तेनाज्ञप्तश्च दूतोऽसौ काञ्चनं नगरं ययौ
॥ १८ ॥ तस्मादेकं वणिक्पुत्रं समादायागतो हि सः ॥
दृष्ट्वा तु सुन्दरं बालं वणिक्पुत्रं गुणान्वितम् ॥ १९ ॥
ज्ञातिभिर्बन्धुभिः सार्धं परितुष्टेन चेतसा ॥ दत्तवान् साधुः
पुत्राय कन्यां विधिविधानतः ॥२०॥ ततो भाग्यवशात्तेन
विस्मृतं व्रतमुत्तमम् ॥ विवाहसमये तस्यास्तेन रुष्टोऽभव-
त्प्रभुः ॥ २१ ॥ ततः कालेन नियतो निजकर्मविशारदः ॥
वाणिज्यार्थं ततः शीघ्रं जामातृसहितो वणिक् ॥ २२ ॥
रत्नसारपुरे रम्ये गत्वा सिन्धुसमीपतः ॥ वाणिज्यमकरो-
त्साधुर्जामात्रा श्रीमता सह ॥ २३ ॥ तौ गतौ नगरे रम्ये
चन्द्रकेतोर्नृपस्य च ॥ एतस्मिन्नेव काले तु सत्यनारायणः
प्रभुः ॥ २४ ॥ भ्रष्टप्रतिज्ञमालोक्य शापं तस्मै प्रदत्तवान् ॥
दारुणं कठिनं चास्य महद् दुःखं भविष्यति ॥ २५ ॥ एक-
स्मिन्दिवसे राज्ञो धनमादाय तस्करः ॥ तत्रैव चागतश्चौ-
रो वणिजौ यत्र संस्थितौ ॥२६॥ तत्पश्चाद्धावकान् दूतान्
दृष्ट्वा भीतेन चेतसा ॥ धनं संस्थाप्य तत्रैव स तु शीघ्र-
मलक्षितः ॥ २७ ॥ ततो दूताः समायाताः यत्रास्ते सज्ज-
नो वणिक् ॥ दृष्ट्वा नृपधनं तत्र बद्ध्वाऽऽनीतौ वणि-
क्सुतौ ॥ २८ ॥ हर्षेण धावमानाश्च ऊचुर्नृपसमीपतः ॥
तस्करौ द्वौ समानीतौ विलोक्याज्ञापय प्रभो ॥ २९ ॥
राज्ञाऽऽज्ञप्तास्ततः शीघ्रं दृढं बद्ध्वा तु तावुभौ ॥ स्थापि-
तौ द्वौ महादुर्गे कारागारेऽविचारतः ॥३०॥ मायया सत्यदे-
१५ वस्य न श्रुतं कैस्तयोर्वचः ॥ अतस्तयोर्धनं राज्ञा गृहीतं
चन्द्रकेतुना ॥३१॥ तच्छापाच्च तयोर्गेहे भार्या चैवातिदुःखि-

ता ॥ चौरेणापहृतं सर्वं गृहे यच्च स्थितं धनम् ॥ ३२ ॥
आधिव्याधिसमायुक्ता क्षुत्पिपासातिदुःखिता ॥ अन्नचि-
न्तापरा भूत्वा बभ्राम च गृहे गृहे ॥ कलावती तु कन्या-
पि बभ्राम प्रतिवासरम् ॥ ३३ ॥ एकस्मिन्दिवसे जाता
क्षुधार्ता द्विजमन्दिरम् ॥ गत्वाऽपश्यद् व्रतं तत्र सत्यना-
रायणस्य च ॥ ३४ ॥ उपविश्य कथां श्रुत्वा वरं प्रार्थितव-
त्यपि । प्रसादभक्षणं कृत्वा ययौ रात्रौ गृहं प्रति ॥ ३५ ॥
माता कलावतीं कन्यां कथयामास प्रेमतः ॥ पुत्रि रात्रौ
स्थिता कुत्र किं ते मनसि वर्तते ॥ ३६ ॥ कन्या कला-
वती प्राह मातरं प्रति सत्वरम् ॥ द्विजालये व्रतं मातर्दृष्टं
वाञ्छितसिद्धिदम् ॥ ३७ ॥ तच्छ्रुत्वा कन्यकावाक्यं
व्रतं कर्तुं समुद्यता ॥ सा तदा तु वणिग्भार्या सत्यनाराय-
णस्य च ॥ ३८ ॥ व्रतं चक्रे सैव साध्वी बन्धुभिः स्वजनैः
सह ॥ भर्तृजामातरौ क्षिप्रमागच्छेतां स्वमाश्रमम् ॥ ३९ ॥
अपराधं च मे भर्तुर्जामातुः क्षन्तुमर्हसि । व्रतेनानेन तु-
ष्टोऽसौ सत्यनारायणः पुनः ॥ ४० ॥ दर्शयामास स्वप्नं
हि चन्द्रकेतुं नृपोत्तमम् ॥ बन्दिनौ मोचय प्रातर्वणिजौ
नृपसत्तम ॥४१॥ देयं धनं च तत्सर्वं गृहीतं यत्त्वयाधुना ॥
नो चेत्त्वां नाशयिष्यामि सराज्यं धनपुत्रकम् ॥ ४२ ॥
एवमाभाष्य राजानं ध्यानगम्योऽभवत्प्रभुः ॥ ततः प्रभात-
समये राजा च स्वजनैः सह ॥ ४३ ॥ उपविश्य सभामध्ये
प्राह स्वप्नं जनं प्रति ॥ बद्धौ महाजनौ शीघ्रं मोचयद्वौ
वणिक्सुतौ ॥ ४४ ॥ इति राज्ञो वचः श्रुत्वा मोचयित्वा
महाजनौ ॥ समानीय नृपस्याग्रे प्राहुस्ते विनयान्विताः
॥ ४५ ॥ आनीतौ द्वौ वणिक्पुत्रौ मुक्तौ निगडबन्धनात् ॥
ततो महाजनौ नत्वा चन्द्रकेतुं नृपोत्तमम् ॥ ४६ ॥ स्मर-

न्तौ पूर्ववृत्तान्तं नोचतुर्भयविह्वलौ ॥ राजा वणिक्सुतौ वीक्ष्य वचः प्रोवाच सादरम् ॥ ४७ ॥ दैवात्प्राप्तं महद्दुःखमिदानीं नास्ति वै भयम् ॥ तदा निगडसंत्यागं क्षौरकर्माद्यकारयत् ॥ ४८ ॥ वस्त्रालङ्कारकं दत्वा परितोष्य नृपश्च तौ ॥ पुरस्कृत्य वणिक्पुत्रौ वचसाऽतोषयद् भृशम् ॥ ४९ ॥ पुराऽऽनीतं तु यद् द्रव्यं द्विगुणीकृत्य दत्तवान् । प्रोवाच तौ ततो राजा गच्छ साधो निजाश्रमम् ॥ ५० ॥ राजानं प्रणिपत्याह गन्तव्यं त्वत्प्रसादतः ॥ इत्युक्त्वा तौ महावैश्यौ जग्मतुः स्वगृहं प्रति ॥ ५१ ॥

॥ इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायणव्रतकथायां तृतीयोऽध्यायः ॥ ३ ॥

सूत उवाच ॥ यात्रां तु कृतवान् साधुर्मङ्गलायनपूर्विकाम् । ब्राह्मणेभ्यो धनं दत्त्वा तदा तु नगरं ययौ ॥ ॥ १ ॥ कियद् दूरे गते साधौ सत्यनारायणः प्रभुः ॥ जिज्ञासां कृतवान् साधो किमस्ति तव नौ स्थितम् ॥ २ ॥ ततो महाजनौ मत्तौ हेलया च प्रहस्य वै ॥ कथं पृच्छसि भो दण्डिन् मुद्रां नेतुं किमिच्छसि ॥ ३ ॥ लतापत्रादिकं चैव वर्तते तरणौ मम ॥ निष्ठुरं च वचः श्रुत्वा सत्यं भवतु ते वचः ॥ ४ ॥ एवमुक्त्वा गतः शीघ्रं दण्डी तस्य समीपतः ॥ कियद् दूरे ततो गत्वा स्थितः सिन्धुसमीपतः ॥ ५ ॥ गते दण्डिनि साधुश्च कृतनित्यक्रियस्तदा ॥ उत्थितां तरणिं दृष्ट्वा विस्मयं परमं ययौ ॥ ६ ॥ दृष्ट्वा लतादिकं चैव मूर्छितो न्यपतद् भुवि ॥ लब्धसंज्ञो वणिक्पुत्रस्ततश्चिन्तान्वितोऽभवत् ॥ ७ ॥ तदा तु दुहितुः कान्तो वचनं चेदमब्रवीत् ॥ किमर्थं क्रियते शोकः शापो दत्तश्च दण्डिना ॥ ८ ॥ शक्यते तेन सर्वं हि कर्तुं चात्र

न संशयः। अतस्तच्छरणं यामो वाञ्छितार्थो भविष्यति॥
॥ ९ ॥ जामातुर्वचनं श्रुत्वा तत्सकाशं गतस्तदा ॥ दृष्ट्वा
च दण्डिनं भक्त्या नत्वा प्रोवाच सादरम् ॥ १० ॥
क्षमस्व चापराधं मे यदुक्तं तव सन्निधौ ॥ एवं पुनः पुन-
र्नत्वा महाशोकाकुलोऽभवत् ॥ ११ ॥ प्रोवाच वचनं
दण्डी विलपन्तं विलोक्य च ॥ मा रोदीः शृणु मद्वाक्यं
मम पूजाबहिर्मुखः ॥ १२॥ ममाज्ञया च दुर्बुद्धे लब्धं दुःखं
मुहुर्मुहुः ॥ तच्छ्रुत्वा भगवद्वाक्यं स्तुतिं कर्तुं समुद्यतः
॥ १३ ॥ साधुरुवाच ॥ त्वन्मायामोहिताः सर्वे ब्रह्माद्या-
स्त्रिदिवौकसः ॥ न जानन्ति गुणान् रूपं तवाश्चर्यमिदं
प्रभो ॥१४॥ मूढोऽहं त्वां कथं जाने मोहितस्तव मायया ॥
प्रसीद पूजयिष्यामि यथाविभवविस्तरैः ॥ १५ ॥ पुरा
वित्तं च तत्सर्वं त्राहि मां शरणागतम् ॥ श्रुत्वा भक्ति-
युतं वाक्यं परितुष्टो जनार्दनः ॥ १६ ॥ वरं च वाञ्छितं
दत्त्वा तत्रैवान्तर्दधे हरिः ॥ ततो नौकां समारुह्य दृष्ट्वा
वित्तप्रपूरिताम् ॥१७॥ कृपया सत्यदेवस्य सफलं वाञ्छितं
मम ॥ इत्युक्त्वा स्वजनैः सार्द्धं पूजां कृत्वा यथाविधि
॥ १८ ॥ हर्षेण चाभवत्पूर्णः सत्यदेवप्रसादतः । नावं
संयोज्य यत्नेन स्वदेशगमनं कृतम् ॥ १९ ॥ साधुर्जामा-
तरं प्राह पश्य रत्नपुरीं मम ॥ दूतं च प्रेषयामास निज-
वित्तस्य रक्षकम् ॥ २० ॥ दूतोऽसौ नगरं गत्वा साधु-
भार्यां विलोक्य च ॥ प्रोवाच वाञ्छितं वाक्यं नत्वा
बद्धाञ्जलिस्तदा ॥ २१ ॥ निकटे नगरस्यैव जामात्रा
सहितो वणिक् ॥ आगतो बन्धुवर्गैश्च वित्तैश्च बहुभिर्युतः
॥२२॥श्रुत्वा दूतमुखाद्वाक्यं महाहर्षवती सती॥ सत्यपूजां
ततः कृत्वा प्रोवाच तनुजां प्रति ॥ २३ ॥ व्रजामि शीघ्र-

मागच्छ साधुसंदर्शनाय च ॥ इति मातृवचः श्रुत्वा व्रतं कृत्वा समाप्य च ॥ २४ ॥ प्रसादं च परित्यज्य गता सापि पतिं प्रति । तेन रुष्टः सत्यदेवो भर्तारं तरणिं तथा ॥२५॥ संहृत्य च धनैः सार्द्धं जले तस्यावमज्जयत् ॥ ततः कलावती कन्या न विलोक्य निजं पतिम् ॥ २६ ॥ शोकेन महता तत्र रुदती चापतद् भुवि ॥ दृष्ट्वा तथाविधां नावं कन्यां च बहुदुःखिताम् ॥ २७ ॥ भीतेन मनसा साधुः किमाश्चर्यमिदं भवेत् ॥ चिन्त्यमानाश्च ते सर्वे बभूवुस्तरिवाहकाः ॥ २८ ॥ ततो लीलावती कन्यां दृष्ट्वा सा विह्वलाभवत् ॥ विललापातिदुःखेन भर्तारं चेदमब्रवीत् ॥ २९ ॥ इदानीं नौकया सार्द्धं कथं सोऽभूदलक्षितः ॥ न जाने कस्य देवस्य हेलया चैव सा हृता ॥ ३० ॥ सत्यदेवस्य माहात्म्यं ज्ञातुं वा केन शक्यते ॥ इत्युक्त्वा विललापैव ततश्च स्वजनैः सह ॥ ३१ ॥ ततो लीलावती कन्यां क्रोडे कृत्वा रुरोद ह ॥ ततः कलावती कन्या नष्टे स्वामिनि दुःखिता ॥ ३२ ॥ गृहीत्वा पादुकां तस्यानुगन्तुं च मनो दधे ॥ कन्यायाश्चरितं दृष्ट्वा सभार्यः सज्जनो वणिक् ॥ ३३ ॥ अतिशोकेन सन्तप्तश्चिन्तयामास धर्मवित् ॥ हृतं वा सत्यदेवेन भ्रान्तोऽहं सत्यमायया ॥ ३४ ॥ सत्यपूजां करिष्यामि यथाविभवविस्तरैः ॥ इति सर्वान्समाहूय कथयित्वा मनोरथम् ॥ ३५ ॥ नत्वा च दण्डवद् भूमौ सत्यदेवं पुनः पुनः ॥ ततस्तुष्टः सत्यदेवो दीनानां परिपालकः ॥ ३६ ॥ जगाद वचनं चैनं कृपया भक्तवत्सलः ॥ त्यक्त्वा प्रसादं ते कन्या पतिं द्रष्टुं समागता ॥ ३७ ॥ अतोऽदृष्टोऽभवत्तस्याः कन्यकायाः पतिर्ध्रुवम् ॥ गृहं गत्वा प्रसादं च भुक्त्वा साऽऽयाति चेत्पुनः ॥ ३८ ॥

लब्धभर्त्री सुता साधो भविष्यति न संशयः ॥ कन्यका
तादृशं वाक्यं श्रुत्वा गगनमण्डलात् ॥ ३९ ॥ क्षिप्रं तदा
गृहं गत्वा प्रसादं च बुभोज सा ॥ सा पश्चात्पुनरागत्य
ददर्श स्वजनं पतिम् ॥४०॥ ततः कलावती कन्या जगाद
पितरं प्रति ॥ इदानीं च गृहं याहि विलम्बं कुरुषे कथम्
॥ ४१ ॥ तच्छ्रुत्वा कन्यकावाक्यं सन्तुष्टोऽभूद्वणिक्सुतः ॥
पूजनं सत्यदेवस्य कृत्वा विधिविधानतः ॥ ४२ ॥
धनैर्बन्धुगणैः सार्धं जगाम निजमन्दिरम् ॥ पौर्णमास्यां
च सङ्क्रान्तौ कृतवान्सत्यपूजनम् ॥ ४३ ॥ इहलोके
सुखं भुक्त्वा चान्ते सत्यपुरं ययौ ॥ ४४ ॥

॥ इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायणव्रत-
कथायां चतुर्थोऽध्यायः ॥ ४ ॥

सूत उवाच ॥ अथान्यच्च प्रवक्ष्यामि श्रृणुध्वं मुनिस-
त्तमाः ॥ आसीत्तुङ्गध्वजो राजा प्रजापालनतत्परः ॥१॥
प्रसादं सत्यदेवस्य त्यक्त्वा दुःखमवाप सः ॥ एकदा स
वनं गत्वा हत्वा बहुविधान्पशून् ॥ २ ॥ आगत्य वटमूलं
च दृष्ट्वा सत्यस्य पूजनम् ॥ गोपाः कुर्वन्ति सन्तुष्टा भक्ति-
युक्ताः सबान्धवाः ॥ ३ ॥ राजा दृष्ट्वा तु दर्पेण न गतो न
ननाम सः ॥ ततो गोपगणाः सर्वे प्रसादं नृपसन्निधौ ॥४॥
संस्थाप्य पुनरागत्य भुक्त्वा सर्वे यथेप्सितम् ॥ ततः
प्रसादं सन्त्यज्य राजा दुःखमवाप सः ॥५॥ तस्य पुत्रशतं
नष्टं धनधान्यादिकं च यत् ॥ सत्यदेवेन तत्सर्वं नाशितं
मम निश्चितम् ॥ ६ ॥ अतस्तत्रैव गच्छामि यत्र देवस्य
पूजनम् ॥ मनसा तु विनिश्चित्य ययौ गोपालसन्निधौ
॥ ७ ॥ ततोऽसौ सत्यदेवस्य पूजां गोपगणैः सह ॥ भक्ति-

श्रद्धान्वितो भूत्वा चकार विधिना नृपः ॥ ८ ॥ सत्यदेवप्रसादेन धनपुत्रान्वितोऽभवत् ॥ इहलोके सुखं भुक्त्वा चान्ते सत्यपुरं ययौ ॥ ९ ॥ य इदं कुरुते सत्यव्रतं परमदुर्लभम् ॥ शृणोति च कथां पुण्यां भक्तियुक्तां फलप्रदाम् ॥ १० ॥ धनधान्यादिकं तस्य भवेत्सत्यप्रसादतः ॥ दरिद्रो लभते वित्तं बद्धो मुच्येत बन्धनात् ॥ ११ ॥ भीतो भयात्प्रमुच्येत सत्यमेव न संशयः ॥ ईप्सितं च फलं भुक्त्वा चान्ते सत्यपुरं व्रजेत् ॥ १२ ॥ इति वः कथितं विप्राः सत्यनारायणव्रतम् ॥ यत्कृत्वा सर्वदुःखेभ्यो मुक्तो भवति मानवः । १३ ॥ विशेषतः कलियुगे सत्यपूजा फलप्रदा ॥ केचित्कालं वदिष्यन्ति सत्यमीशं तमेव च ॥ १४ ॥ सत्यनारायणं केचित्सत्यदेवं तथापरे ॥ नानारूपधरो भूत्वा सर्वेषामीप्सितप्रदः ॥ १५ ॥ भविष्यति कलौ सत्यव्रतरूपी सनातनः ॥ श्रीविष्णुना धृतं रूपं सर्वेषामीप्सितप्रदम् ॥ १६ ॥ य इदं पठते नित्यं शृणोति मुनिसत्तमाः ॥ तस्य नश्यन्ति पापानि सत्यदेवप्रसादतः ॥ १७ ॥ व्रतं यैस्तु कृतं पूर्वं सत्यनारायणस्य च ॥ तेषां त्वपरजन्मानि कथयामि मुनीश्वराः ॥ १८ ॥ शतानन्दो महाप्राज्ञः सुदामा ब्राह्मणो ह्यभूत् ॥ तस्मिञ्जन्मनि श्रीकृष्णं ध्यात्वा मोक्षमवाप ह ॥ १९ ॥ काष्ठभारवहो भिल्लो गुहराजो बभूव ह ॥ तस्मिञ्जन्मनि श्रीरामं सेव्य मोक्षं जगाम वै ॥ २० ॥ उल्कामुखो महाराजो नृपो दशरथोऽभवत् ॥ श्रीरङ्गनाथं सम्पूज्य श्रीवैकुण्ठं तदागमत् ॥ २१ ॥ धार्मिकः सत्यसन्धश्च साधुर्मोरध्वजोऽभवत् ॥ देहार्धं क्रकचैश्छित्वा दत्वा मोक्षमवाप ह ॥ २२ ॥ तुङ्गध्वजो महाराजः स्वायम्भुरभवत्किल ॥

सर्वान् भागवतान् कृत्वा श्रीवैकुण्ठं तदाऽगमत् ॥ २३ ॥

॥ इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायणव्रत-
कथायां पञ्चमोऽध्यायः ॥ ५ ॥

॥ इति श्रीसत्यनारायणकथा समाप्ता ॥

॥ अथ बुधाष्टमीव्रताङ्गपूजाविधिः ॥

शुक्लाष्टम्यां बुधवारयुतायां बुधाष्टमीव्रतं कार्यम्। चैत्रे मासि आषाढादिचतुर्षुमासेषु च सन्ध्यायां च बुधाष्टमीव्रतं न कार्यम्। अष्टमी च परविद्धा नवमीयुता ग्राह्या। तस्यां प्रातः नद्यादौ स्नात्वा, नित्यकर्म निर्वर्त्य, तज्जलेन नवं घटं पूरयित्वा, गृहमागत्य भूमिं गोमयेनोपलिप्य, रङ्गवल्लीभिरलङ्कृत्य, पीठं संस्थाप्य, तदुपरि धान्यं निधाय, अष्टदलं विरच्य, तदुपरि आनीतघटं पञ्चरत्नसहितं ब्राह्मणद्वारा महीद्यौरित्यादिना पूर्णपात्रनिधानान्ते पीतवस्त्रोपरि यथाशक्ति सुवर्णनिर्मिताम् अधिदेवतामत्यधिदेवतासहितां बुधप्रतिमां संस्थाप्य पूजामारभेत ॥ अथ पूजाप्रयोगः ॥ आचम्य देशकालौ स्मृत्वा, मम इह जन्मनि जन्मान्तरे च बाल्याद्यारभ्य कर्मणा मनसा वाचा जानताऽजानता वा परस्वाद्यपहृतिदोषपरिहारार्थं पुत्रपौत्रादिसकलमनोरथसिद्ध्यर्थं श्रीबुधप्रीत्यर्थं बुधाष्टमीव्रताङ्गभूतं यथामिलितषोडशोपचारद्रव्यैः पुराणोक्तमन्त्रैः श्रीबुधपूजनं करिष्ये। तदङ्गं गणपतिपूजनं कलशपूजनं घण्टापूजनं च करिष्ये। गणपतिपूजनादिसम्भारप्रोक्षणान्तं कृत्वा, ध्यायेत्—चतुर्बाहुं ग्रहपतिं सुप्रसन्नमुखं बुधम्। ध्यायेऽहं शङ्खचक्रासिपाशहस्तमिलाप्रियम् ॥ श्रीबुधाय नमः बुधं ध्यायामि। पीतमाल्याम्बर-

धर कर्णिकारसमद्युते। गृहाण पूजां भगवन् समागत्य गृहेश्वर॥ मध्ये, श्रीबुधाय नमः बुधं साङ्गं सपरिवारं सायुधं सशक्तिकं आवाहयामि। तद्दक्षिणे, नारायणाय नमः नारायणं आ०। तदुत्तरतः, विष्णवे नमः विष्णुं आ०। इलापते नमस्तेऽस्तु निशेशप्रियसूनवे। हेमसिंहासनं देव गृहाण प्रीतये मम॥ आसनं०। शीतलोदकमानीतं सुपुष्पसरिदुद्भवम्। पाद्यं गृहाण देवेश ममाद्यपरितुष्टये॥ पाद्यं०। तारासुत नमस्तेऽस्तु सततं भगवत्प्रिय। गृहाणार्घ्यं गृहपते नानाफलसमन्वितम्॥ अर्घ्यं०। सुगन्धद्रव्यसंयुक्तैः शुद्धैः स्वादुसरिज्जलैः। आचम्यतां निशानाथ नन्दनप्रीतये मम॥ आचमनीयं०। पयोदधिघृतैश्चैव मधुशर्करसंयुतैः। पञ्चामृतैस्तथा देव स्नानं तत्स्वीकुरु प्रभो॥ पञ्चामृतस्नानं०। वासितं गन्धकर्पूरैर्निर्मितं जलमुत्तमम्। स्नानाय ते मया भक्त्या दीयते व्रतसिद्धये॥ स्नानं०। श्रीबुधाय नम इति नाममन्त्रेण पञ्चोपचारपूजां कृत्वाऽभिषेकः। पीतवस्त्रद्वयं देवराज वंशकर प्रभो। उर्वशीनाथ जनक गृहाण प्रीतये सदा॥ पीतवस्त्रद्वयं०। यज्ञोपवीतकं सूत्रं त्रिगुणं त्रिदशप्रिय। मम पाशविनाशार्थं गृहाण प्रीतये बुध॥ यज्ञोपवीतं०। आचमनीयं०। हरिचन्दनकस्तूरीकर्पूरादिसमन्वितम्। गन्धं भगवते तुभ्यमिलानाथ नमोऽस्तु ते॥ चन्दनं०। अक्षताश्च० अक्षतान्०। माल्यादीनि० पुष्पाणि०।

॥ अथाङ्गपूजा ॥

१ बुधाय नमः पादौ पूज०।	३ तारकाय० कटी पू०।
२ सोमपुत्राय० जानुनी पू०।	४ राजपुत्राय० उदरं पू०।

५ इलाप्रियाय० हृदयं पू०।	९ पीतवर्णाय० मुखं पू०।
६ कुमाराय० वक्षस्थलं०।	१० ज्ञानाय० नेत्रे पू०।
७ पुरूरवसःपित्रे बाहू पू०।	११ बुधाय० मूर्धानं पू०।
८ सोमसुताय०स्कन्धौ पू०।	१२ सोमसूनवे०सर्वाङ्गं पू०।

वनस्पति० धूपमा०। आज्यं च० दीपं द०। नैवेद्यं गृह्यतां० नैवेद्यं०। उत्त०, मुख०, हस्त०, करो०। पूगीफलं मह० ताम्बूलं०। इदं फलं० फलं०। हिरण्यगर्भ० दक्षिणां०। चन्द्रादित्यौ० कर्पूरदीपं०। प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम्। सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम्॥ नमस्कारान्०। यानि कानि० प्रदक्षिणां०। उर्वश्याश्च पतिर्यस्तु यः पुरूरवसः पिता। ग्रहमध्ये सुरूपो यो बुधो नः सम्प्रसीदतु॥ प्रार्थयामि॥ अर्घ्यदानविधिः॥ सौवर्णे राजतताम्रपात्रान्यतमपात्रं गन्धपीताक्षतपुष्पगुडमिश्रितजलपूरितं कृत्वा भूमौ जानुनी निधाय विशेषार्घ्यं दद्यात्। तत्र मन्त्रः--उर्वश्याः श्वशुरो यस्तु यः पुरूरवसः पिता। यो ग्रहाणामधिपतिर्बुधो नः सम्प्रसीदतु॥ श्रीबुधाय० इदं विशेषार्घ्यं०। यस्य स्मृत्या०। अनेन मया कृतेन पूजनेन श्रीबुधः प्रीयताम्॥ अथ वायनदानविधिः॥ पूजासाङ्गतासिध्यर्थं ब्राह्मणपूजनं वायनदानं च करिष्ये। गन्धाः पान्तु०। स्वस्त्यस्तु, दीर्घ०। इलापते नमस्तेऽस्तु शशाङ्कप्रिय नन्दन। वायनस्यास्य दानेन मम सम्पत्प्रदो भव। इदं वायनदानं अमुकशर्मणे ब्राह्मणाय बुधप्रीत्यर्थं तुभ्यमहं सम्प्रददे। प्रति०। दानसां०। अनेन०॥

॥ अथ बुधाष्टमीव्रतकथाप्रारम्भः॥

श्रीकृष्ण उवा०॥ बुधाष्टमीव्रतं भूप वक्ष्यामि शृणु पाण्डव। येन चीर्णेन नरकं नरः पश्यति न क्वचित्॥

युधिष्ठिर उवा० ॥ बुधाष्टमीव्रतं किं तत् कस्मात्पापाच्च
मुञ्चति। तत्सर्वं वद निश्चित्य मम देव दयानिधे ॥ श्रीकृष्ण
उवा० ॥ पुरा कृतयुगस्यादौ इलो राजा बभूव ह । बहुभृ-
त्यसुहृन्मित्रैर्मन्त्रिभिः परिवारितः ॥ जगाम हिमवत्पार्श्वं
महादेवेन शापितम् । योऽस्यां प्रविशते भूमौ स स्त्री भवति
निश्चितम् ॥ स राजा मृगयाऽऽसक्तः प्रविष्टस्तद्रुमावनम् ।
एकाकी हयमारूढः क्षणात्स्त्रीत्वं जगाम ह ॥ सा बभ्राम वने
शून्ये पीनोन्नतपयोधरा । क्वाऽहं कस्य कुतः प्राप्ता न सा
बुध्यत किञ्चन ॥ ददर्श तां बुधस्तन्वीं रूपौदार्यगुणान्वि-
ताम् । अष्टम्यां बुधवारे च तस्यास्तुष्टो बुधग्रहः ॥ ददौ
गृहाश्रमं रम्यमात्मीयं रूपतोषितः । पुत्रमुत्पादयामास
योऽसौ ख्यातः पुरूरवाः ॥ चन्द्रवंशकरो राजा आद्यः सर्व-
महीभृताम् । ततःप्रभृति पूज्येयं साष्टमी बुधसंयुता ॥
सर्वपापप्रशमनी सर्वोपद्रवनाशिनी । अथान्यदपि ते वच्मि
धर्मराज कथानकम् ॥ १० ॥ कृष्ण उवा० ॥ आसीद्राजा
विदेहायां निमिर्नाम स वैरिभिः । सङ्ग्रामे निहतो राजा
तस्य भार्यातिनिर्धना ॥ ऊर्मिला नाम बभ्राम महीं बाल-
कसंयुता । अवन्तिनगरं प्राप्य ब्राह्मणस्य निकेतने ॥ चका-
रोदरपूत्यर्थं नित्यं कण्डनपेषणे । हृत्वा सा सप्तगोधूमा-
न्ददौ बालकयोस्तदा ॥ कारुण्यात्पुत्रवात्सल्यात्क्षुधां
सम्पीड्यमानयोः । कालेन बहुना साध्वी पञ्चत्वमगमत्तदा ॥
पुत्रस्तस्या विदेहायां गत्वा स्वपितुराश्रमे । उपविष्टः सत्य-
योगाद् बुभुजे गामनाकुलाम् ॥ अन्विष्य धर्मराजेन सा
कन्या निमिवंशजा । शामला नाम चार्वङ्गी सर्वलक्षणसं-
युता ॥ गान्धर्वेणोपयित्वा च नीता स्वनगरं प्रति । तामु-
वाच वरारोहां धर्मराजः स्वकां प्रियाम् ॥ वहस्व सर्वव्यापारं

श्यामले त्वं गृहे मम। कुरुष्व सर्वभृत्यानां दानशिक्षां यथो-
 चिताम् ॥ किं त्वेते प्रवराः सप्त कीलकैरतियन्त्रिताः।
कदाचिदपि नोद्घाट्यास्त्वया वैदेहिनन्दिनि ॥ एवमस्त्विव-
ति वै प्रोक्ता निजकर्म चकार ह। ततो भुक्त्वा बुधस्याग्रे
बान्धवैः प्रीतिपूर्वकम् ॥ २० ॥ तावदेव हि भोक्तव्यं या-
वत्सा कथ्यते कथा। कदाचिद्व्याकुली भूत्वा धर्मराज वि
देहजा ॥ उद्घाटयित्वा प्रवरं ददर्श जननीं स्वकाम्। प-
च्यमानां च रुदतीं भीषणैर्यमकिङ्करैः॥ लीलयाऽऽक्षिप्य ते
बध्वा तप्ततैलेषु सा पुनः। तथैव तलकां बध्वा पीडिता सा
मनस्विनी॥ द्वितीये नरके तद्वत्तां ददर्श स्वमातरम्। यन्त्रे
निष्पीड्यमाना सा शिलायां लोष्टकेन च॥ तृतीये प्रवरे त-
द्वत्तामेव च ददर्श सा। करिभिः पीड्यमाना सा घण्टायुक्तश्च
कल्पितैः॥ श्वभिश्चतुर्थे प्रवरे भीषणैर्दारुणाननैः। अभक्ष्य-
भक्षणाद्यैश्च क्रन्दन्तीं तां पुनः पुनः॥ पञ्चमे प्रवरे भूमौ कण्ठे
पादेन ताडिताम्। संदंशैर्घनपातैश्च छिद्यमानां सहस्रशः॥
षष्ठे तामिक्षुयन्त्रस्थां मस्तके मुद्गराहताम्। सम्पीड्यमा-
नामनिशं सुभृशं दारुखण्डवत् ॥ सप्तमे प्रवरे चैव कृमि-
रूपैः सुदारुणैः। दृष्ट्वा तथागतां तां तु मातरं दुःखकर्षि-
ताम्॥ श्यामला म्लानवदना किञ्चिन्नोवाच भामिनी। कि-
मर्थं म्लानवदना तिष्ठसि त्वमनिन्दिते ॥ ३० ॥ कारणं
तत्र मे ब्रूहि किञ्चिन्नोद्घाटितास्त्वया। एते प्रवरकाः सप्त
निषिद्धा ये पुरा मया ॥ इत्युक्ता श्यामला प्राह भर्तारं
विनयान्विता। किं नु पापं कृतं राजन् मम मात्रा सुदा-
रुणम् ॥ येनेत्थं विविधैर्घोरैर्बाध्यते बहुशस्त्वया। इत्युक्तः
प्रियया प्राह तां यमः प्रहसन्निव ॥ तव मात्रा सुतस्नेहा-
द् गोधूमा वै हृताः किल। किं न जानासि तद्भद्रे येन

पृच्छसि मामिह ॥ ब्रह्मस्वं प्रणयाद्भुक्तं दहत्यासप्तमं कुलम् । तदेव कृमिरूपेण क्लिशत्यासप्तमं कुलम् ॥ गोधूमास्त इमे भूत्वा कृमिरूपाः सुदारुणाः । ये पुरा ब्राह्मणगृहे हृतास्ते त्वत्कृते तया ॥ जानाम्येतदहं सर्वं यत्तो मात्रा कृतं पुरा ॥ श्यामलोवा० ॥ तथापि त्वां समासाद्य देवं जामातरं विभुम् ॥ मुच्यते तेन पापेन यथा त्वमधुना कुरु । तच्छ्रुत्वा चिन्तयाविष्टश्चिरं ध्यात्वा जगाद ताम् ॥ धर्मराजः सुखासीनः प्रियां प्राणहरेश्वरीम् । इतस्त्वं सप्तमेऽतीते जन्मनि ब्राह्मणी शुभा ॥ आसीत्तस्मिन् तदा सङ्गात्सखीनां पर्युपोषिता । बुधाष्टमी तु सम्पूर्णा यथोक्तफलदायिनी ॥ ४० ॥ तस्याः पुण्यं ददस्व त्वं यदि सत्यं ममाग्रतः । तेन मुच्येत नरकात्ते माता पापसङ्घकृत् ॥ तच्छ्रुत्वा त्वरितं स्नात्वा ददौ पुण्यं त्रिवाचकम् । स्वमात्रे श्यामला तुष्टा तेन मोक्षं जगाम सा ॥ ऊर्मिला रूपसम्पन्ना दिव्यदेहावरांशुका । विमानवरमारूढा दिव्यमाल्याम्बरावृता ॥ भर्तुः समीपे स्वर्गस्था दृश्यतेऽद्यापि सा जनैः । बुधस्य पार्श्वे नभसि निमिराजसमीपगा ॥ विस्फुरन्ती महाराज बुधाष्टम्याः प्रभावतः । युधिष्ठिर उवा० ॥ यद्येवं प्रवरा कृष्ण तिथिर्वै तु बुधाष्टमी ॥ तस्या एव विधिं ब्रूहि यदि तुष्टोऽसि माधव ॥ श्रीकृष्ण उवा० ॥ शृणु पाण्डव यत्नेन बुधाष्टम्या विधिं शुभम् ॥ यदा यदा सिताष्टम्यां बुधवारो भवेद्यदि । तदा तदा हि सा ग्राह्या एकभक्ता जनैर्नृभिः ॥ स्नात्वा नद्यां तु पूर्वाह्णे गृहीत्वा करकं नवम् । जलपूर्णं लसद्रत्नैः कृत्वानर्घ्यैः समन्वितम् ॥ पूजयेच्च गृहं नीत्वा बुधमेकं क्रमेण तु । एकमाषसुवर्णेन तदर्धार्धेन वा पुनः ॥ कारयेद् बुधरूपं तु स्वशक्त्या ... प्रयत्नतः । अङ्ग-

ष्ठमात्रं पुरुषं चतुर्बाहुं सुलक्षणम् ॥ ५० ॥ पद्ममध्येऽव्रणं कुम्भं पूजयेत्सिततण्डुलैः। हेमपात्रे च संस्थाप्य पीतवस्त्र-युगेन च ॥ वस्त्रोपरि स्थितं देवं पीतवस्त्राक्षतादिभिः। पञ्चामृतेन संस्नाप्य तत्तन्मन्त्रैः क्रमेण तु ॥ नैवेद्यं गुग्गुलं धूपं दशाङ्गेन सुगन्धितम्। पायसैर्घृतपूपैश्च मोदकाशोक-वर्तिकैः ॥ फलैश्च विविधैश्चैव शर्कराभिर्गुडैः शुभैः। ततः पुष्पाक्षतैः पीतैर्वक्ष्यमाणैश्च नामभिः ॥ नमो बुधाय पादौ तु सोमपुत्राय जानुनी। तारकाय कटी चैव राजपुत्राय चोदरम् ॥ इलाप्रियाय हृदयं कुमारायेति वक्षसि। बाहू पुरूरवः पित्रे अंसौ सोमसुताय च ॥ मुखं तु पीतवर्णाय ज्ञानाय च स्तनद्वयम्। मूर्धानं तु बुधायेति एषु स्थानेषु पूजयेत् ॥ सौवर्णं राजतं ताम्रं पात्रमादाय शोभनम्। गन्धपुष्पाक्षतैः पीतैर्गुडमिश्राम्बुपूरितैः ॥ जानुभ्यामवनिं गत्वा तेन चार्घ्यं निवेदयेत्। उर्वश्याः श्वशुरो यस्तु यः पुरूरवसः पिता ॥ यो ग्रहाणामधिपतिर्बुधो नः सम्प्रसीदतु। वरांश्च विष्णुना दत्तान्सकलान्नः प्रसीदतु ॥ ६० ॥ मन्त्रे-णानेन दत्वार्घ्यं जप्त्वा मन्त्रमिमं बुधः। प्रथमे मोदकान् दद्याद् द्वितीये फेणिकास्तथा ॥ तृतीये घृतपूर्णं च चतुर्थे व-टकांस्तथा। पञ्चमे मण्डकान्दद्यात्षष्ठे सोहालिकास्तथा ॥ अशोकवर्तिका चैव सप्तमे मासि कारयेत्। अष्टमे शर्करा-मिश्रैः खाण्डवैश्च युधिष्ठिर ॥ विप्राय वायनं दद्याद् व्रती भोजनमाचरेत्। एवं क्रमेण कर्तव्यं बुधाष्टम्यां युधिष्ठिर ॥ बान्धवैः सह मित्रैश्च भोक्तव्यं प्रीतिपूर्वकम्। सौम्यमा-ख्यानकं शृण्वन्नरकेभ्यो विमुच्यते ॥ सोमात्मजात्मकम-शेषसुखप्रदं तं यः पूजयेत्सकलनीरयुतं च कुम्भम्। पक्वान्नपात्रसहितं सहिरण्यवस्त्रं पश्यत्यसौ यमपुरीं न

कदाचिदेव ॥ ६६ ॥ इति श्रीभविष्योत्तरपुराणे बुधाष्टमीव्रतकथा समाप्ता ॥

॥ हस्तगौरीव्रताङ्गपूजाविधिः ॥

यस्मिन्दिवसे हस्तनक्षत्रे सूर्यस्तद्दिनमारभ्य चतुर्दशदिनपर्यन्तं पूजनं कार्यम् । आचम्य देशकालौ सङ्कीर्त्य, मम इह जन्मनि जन्मान्तरे च अखण्डसौभाग्यप्राप्तये पुत्रपौत्रराज्यकामनया हस्तगौरीव्रताङ्गत्वेन यथामिलितषोडशोपचारद्रव्यैः पुराणोक्तमन्त्रेण श्रीगौरीमहेश्वरप्रीत्यर्थं हेरम्बशम्भुसहितगजगौरीपूजनं च करिष्ये । तदङ्गत्वेन गणपतिपूजनं आसनविधिं कलशघण्टापूजनं च करिष्ये । महागणपतये नमः इति मन्त्रेण गणपतिं सम्पूज्य वक्रतुण्डेति प्रार्थयेत् ॥ आसनविधिः ॥ पृथिव त्वया० । अपसर्पं० । अपक्रा० । कलशंपूजनादिसम्भारप्रोक्षणान्तं कृत्वा, ध्यायेत्–हस्तगौरीं सदा वन्दे हृदये भक्तवत्सलाम् । शिवाङ्गार्धस्थितामेकदन्तपुत्रेण शोभिताम् ॥ ध्यायामि ॥ आगच्छ भो हस्तगौरि ऐरावतगजोपरि । शम्भुनात्र गणेशेन पार्षदैः स्वसखीगणैः ॥ हेरम्बं शम्भुं गौरीं साङ्गां सपरिवारां सायुधां सशक्तिकां आवाहयामि ॥ आवाहनं० ॥ आसने स्वर्णरत्नाढ्ये सर्वशोभासमन्विते । उपविश्य जगन्मातः प्रसादाभिमुखी भव ॥ गजगौर्याद्यावाहितदेवताभ्यो नमः। आसनं० ॥ इदं गङ्गाजलं सम्यक् सुवर्णकलशे स्थितम् । पाद्यार्थं ते प्रयच्छामि क्षालयामि पदाम्बुजे ॥ पाद्यं० ॥ गन्धपुष्पाक्षतारक्तपुष्पैस्तोयं समन्वितम् । सुवर्णपात्रे सर्वाङ्गी गृहाणार्घ्यं नमोऽस्तु ते ॥ अर्घ्यं० ॥ कर्पूरैलामृगमदैः सुवासैरुपशोभितम् । आचम्यतां महादेवि शिशिरं विमलं जलम् ॥

आचमनं० ॥ नदीनदसमुद्भूतं पवित्रं निर्मलं जलम् । स्नानार्थं ते प्रयच्छामि प्रसीद जगदम्बिके ॥ स्नानं० ॥ पञ्चामृतेन स्नपनं करिष्ये भक्तवत्सले । पयो दधि घृतं चैव माक्षिकं शर्करायुतम् ॥ पञ्चामृतस्नानं० ॥ मन्दाकिन्याः समानीतं हेमाम्भोरुहवासितम् । स्नानार्थं ते मयाऽऽनीतं गृहाण जगदम्बिके ॥ शुद्धोदकस्नानं० ॥ नाममन्त्रेण पञ्चोपचारपूजां कृत्वा अभिषेकः ॥ अभिषेकान्ते आचमनं० ॥ कौशेयं वसनं दिव्यं कञ्चुक्या च समन्वितम् । उपवस्त्रेण संयुक्तं गृहाण परमेश्वरि ॥ वस्त्रं० ॥ मृत्युञ्जय नमस्तेऽस्तु त्राहि मां भवसागरात् । ब्रह्मसूत्रं सोत्तरीयं गृहाण परमेश्वर ॥ यज्ञोपवीतं० ॥ आचमनं० ॥ इदं गन्धं महद्दिव्यं कुङ्कुमेन समन्वितम् । विलेपनं मया दत्तं गृहाण वरदा भव ॥ चन्दनं० ॥ अक्षताश्च सु० अक्षतान् स० ॥ कज्जलं चैव सिन्दूरं हरिद्राकुङ्कुमानि च । भक्त्यार्पितं मया गौरि सौभाग्यं च गृहाण भोः ॥ सौभाग्यद्रव्याणि सम० ॥ नानाविधानि माल्यानि सुगन्धीनि शिवप्रिये । गृहाण सुमनानीत प्रसादाभिमुखी भव ॥ पुष्पाणि स० ॥ धूपं मनोहरं दिव्यं सुगन्धं सुमनोहरम् । दशाङ्गसहितं देवि धूपं मे प्रतिगृह्यताम् ॥ धूपम्मा० ॥ दीपं तमोहरं ज्योत्स्नं ज्ञानसम्बोधकं सदा । दीपं गृहाण मातस्त्वमपराधशतापहे ॥ दीपं द० ॥ नानाविधानि भक्ष्याणि व्यञ्जनानि शिवप्रिये । गृहाण देवि नैवेद्यं सुखदं सर्वदेहिनाम् ॥ नैवेद्यं० ॥ गङ्गोदकं समानीतं मयाऽऽचमनहेतवे । तेनाचम्य महादेवि वरदा भव चण्डिके ॥ मध्ये आचमनं० ॥ करोद्वर्तनं० ॥ रम्भाफलं दाडिमं च मातुलिङ्गं च खर्जुरम् । नारीकेरं च जम्बीरं फलान्येतानि गृह्यताम् ॥

फलानि० ॥ पूगीफलमिति ताम्बूलं० ॥ हिरण्यगर्भ० दक्षिणां० ॥ नीराजयामि देवेशि कर्पूराद्यैश्च दीपकैः । गृहाण मङ्गलान्दीपान् वरदा भव शोभने ॥ नीराजनं द० । कर्पूरदीपं द० ॥ यानि कानि च० प्रदक्षिणाः० ॥ नानाविधानि दिव्यानि बिल्वपत्रयुतानि च । दूर्वाङ्कुरैः संयुतानीत्यञ्जलिस्थानि गृह्यताम् ॥ मन्त्रपुष्पं० ॥ अपराधस० नमस्कारः ॥ यस्य स्मृ० प्रार्थनां० ॥ अनेन हस्तगौरीपूजनाख्येन कर्मणा श्रीगौर्यादिदेवताः प्रीयन्ताम् । अद्य० पूजासाङ्गतासिध्यर्थं ब्राह्मणाय (अमुक) पक्वान्नवायनदानं करिष्ये । तदङ्गब्राह्मणपूजनं करिष्ये । आसनादिना विप्रं सम्पूज्य, वायनदानमन्त्रः-उपायनमिदं तुभ्यं० इदं त्रयोदशसङ्ख्याकं अपूपपक्वान्नवायनदानं धान्यदक्षिणाताम्बूलसहितं सघृतं (अमुकशर्मणे) ब्राह्मणाय तुभ्यमहं सम्प्रददे । प्रति०, प्र० । अनेन वायनदानेन श्रीगौरीदेवता प्रीयताम् ॥

॥ अथ हस्तगौरीव्रतकथाप्रारम्भः ॥

कुन्त्यां वनादुपेतायां करिणापुरमुत्तमम् । मानितायां नरेन्द्रेण तनयैः पञ्चभिः सह ॥ तस्याः कुशलमन्वेष्टुमाजगाम स माधवः । अभिवन्द्य सुखासीनं देवदेवं जनार्दनम् ॥ उवाच कुन्ती सानन्दा सम्यक् प्रश्नमिदं वचः । कुन्त्युवाच । धन्यास्मि कृतकृत्यास्मि सनाथास्मि परन्तप ॥ अहं सम्भाविता यस्मात्त्वया यदुकुलेश्वर । यदि मे सुप्रसन्नोऽसि तदाचक्ष्व व्रतं प्रभो ॥ यद्विधानात् सुखं राज्यं प्राप्नुयां तनयैः सह । कृष्ण उवा० । कुन्ति ते कथयिष्यामि व्रतानामुत्तमं व्रतम् ॥ यत्कृत्वा सुखसन्तानधनधान्यसमन्विता । विधूय दुष्कृता पुण्या सपुत्रा राज्य-

माप्स्यसि ॥ हस्तगौरीव्रतं भद्रे कुरुष्व स्वस्थमानसा । यत्कृत्वा भक्तिभावेन लभ्यते वाञ्छितं फलम् ॥ कुन्त्युवाच ॥ यदुक्तं ते व्रतं नाथ विधानं तस्य कीदृशम् । केन पूर्वं कृतं वीर तन्मे ब्रूहि जनार्दन । श्रीकृष्ण उवा० । कैलासशिखरे पूर्वं हस्तसंस्थे दिवाकरे ॥ दिवा प्रस्वपिता गौरी स्वप्ने शम्भुं ददर्श ह । अर्धदेहं वृषार्धेन अर्धचन्द्रकलान्वितम् ॥ प्रबुद्धा सा तदा गौरी शिवसन्निधिमागमत् । प्रणम्य देवदेवेशमिदमाह शुचिस्मिता ॥ देव खण्डितदेहोऽयं स्वप्ने दृष्टस्तव प्रभो । किमिदं तन्ममाचक्ष्व तप्यते मानसं मम ॥ ईश्वर उवा० ॥ देवि पूर्वं निषिद्धोऽस्ति हस्तरिक्तगते रवौ । स्वापस्सुविहितो तत्र दृष्टं तस्य फलं त्वया ॥ शृणु देवि त्वयानेन खण्डितोऽहं विलोकितः । त्वयाऽऽरब्धव्रतं देवि ममाराधनकाम्यया ॥ अपूर्णं च त्वया त्यक्तं मम नापि समर्पितम् । अपूर्णव्रतभावेन दृष्टोऽहं तादृशस्त्वया ॥ तत्कुरुष्वाधुना देवि हस्तगौरीव्रतं शुभे । येन पूर्णव्रता नारी सम्पूर्णव्रततामियात् ॥ लभते सर्वसम्पत्तिं पुत्रपौत्रसुखानि च । देव्युवा० । आरभ्यते व्रतं नाथ विधानेन महेश्वर ॥ आरम्भोऽस्य कदा कार्यः को विधिः कस्य पूजनम् । ईश्वर उवाच । यस्मिन्नहनि हस्तर्क्षे उदयं प्राप्यते रविः ॥ तस्मिन् कुर्यात् प्रयत्नेन सौवर्णं कुञ्जरोत्तमम् । काञ्चनी प्रतिमा गौर्या हेरम्बस्य हरस्य च ॥ तस्योपरि निधातव्या सर्वालङ्कारभूषिता । अन्वहं काञ्चनैः पुष्पैः पूजा मुक्ताफलैः शुभैः ॥ नैवेद्यैश्चन्दनैश्चैव शृणुयात्प्रत्यहं कथाम् । दिने चतुर्दशे प्राप्ते सुस्नाता शुचिमानसा ॥ शुक्लवस्त्रधरा दान्ता भानवेऽर्घ्यं निवेद्य च । पूजागृहे सुसंलिप्ते स्थापयेत्प्रतिमां

शुभाम् ॥ स्वर्णभाजनयुग्मं च पक्वान्नैः पाचितैः शुभैः । सार्द्धत्रयोदशमितैर्नैवेद्यमुपकल्पयेत् ॥ फलमूलानि चान्यानि शुभानि समुदाहरेत् । पूजयेत्स्वर्णकुसुमैः पुष्पैश्चान्यैः सुगन्धिभिः ॥ देवीं चन्दनपुष्पैश्च तथा पत्राक्षतैः शुभैः । ध्यायेच्च हृदये गौरीं हरहेरम्बसंयुताम् ॥ दक्षिणां च ततो दत्वा नत्वा देवीं विसर्जयेत् । सार्धत्रयोदशशतं दीपिकाः श्रद्धयान्विताः ॥ पतिव्रत्यै स्त्रियै दद्यात्तावतीः स्वयमाहरेत् । व्रतं समाचरेदेवं यावद्वर्षं त्रयोदश ॥ स्वर्णभाजनयुग्मं च प्रतिवर्षं विसर्जयेत् । ततश्चतुर्दशे वर्षे तदुद्यापनमाचरेत् ॥ हेरम्बशम्भुगौरी च काञ्चनी गजपृष्ठके । पूर्वोक्तविधिना पूज्या वासराणि त्रयोदश ॥ चतुर्दशदिने प्राप्ते संयुता प्रातरुत्थिता । कृतोपवासनियमा सुस्नाता शुद्धवेश्मनि ॥ स्थापयित्वा ततो देवीं नक्तं कुर्यात्ततोऽर्चनम् ।सप्तविंशतिपात्राणि पूर्वोक्तेन विधानतः॥पूर्वोक्तमेव पक्वान्नं विन्यसेच्च पृथक् पृथक् । अन्यानि फलमूलानि पक्वान्नानि च कल्पयेत् ॥ धूपदीपाक्षतैः पुष्पैश्चन्दनैर्वरवाससा । भक्त्या समर्चयेद् देवीं प्रतिमां प्रतिपादयेत् ॥ स्वं कथं पूजयामीति मा त्वं चित्ते कथां कुरु । अनादिव्रतमेतद्धि नात्र कार्या विचारणा ॥ देव्युवा० ॥ सौवर्णी प्रतिमां हस्तिपात्रपुष्पाणि कल्पयेत् । यस्या न शक्तिः सा नारी कथं कुर्याद् व्रतं विभो ॥ ईश्वर उवा० । अशक्तौ मृद्गजः कार्यः प्रतिमा चापि मृन्मयी । पात्राणि वैणवान्येव पुष्पाणि ऋतुजानि च ॥ अक्षतैस्तण्डुलैश्चैव श्रद्धया फलमाप्यते । श्रीकृष्ण उवाच । ततश्चक्रे व्रतं गारी ह्यलभद्वाञ्छितं फलम् । पूर्णव्रता च सा जाता भाग्यसौभाग्यसंयुता । त्वमप्येतद् व्रतं कुन्ति कुरु श्रद्धा-

समन्विता ॥ अथ हस्तिव्रतं कुन्ती साभिमानाऽकरोद्
व्रतम्। गांधारी चापि तच्छ्रुत्वा चक्रे तद्व्रतमादरात् ॥
तस्याः पुत्रशतैश्चापि आनीता शुभमृत्तिका । कृत्वा
वारणगां गौरीं सपुत्रां सशिवां तथा॥ व्रतं त्वरितमारेभे
निशाम्य च विषादिनी। तच्छ्रुत्वा शोकसन्तापो कुन्त्या-
ऽभून्मानसो ज्वरः ॥ कुन्ती वाक्यमुवाचेदं गान्धारी
पुण्यकारिणी। यस्याः पुत्रशतं शक्तं शासने वर्तते सदा ॥
मम पञ्चसुतास्तेऽपि न शक्ताः क्वापि कर्मणि। श्रुत्वा
तदर्जुनः प्राह मा मातर्विमना भव ॥ किं मृदः प्रतिमा
कार्या त्वरया समुपाहरेत्। साक्षादिह हरं गौरिं ऐराव-
तमिभाननम् ॥ कृत्वा तं पूजनं मातः सम्यक् फलमवा-
प्स्यति। इत्युक्त्वा त्वरितं पार्थो गङ्गातीरं समाहितः॥
तत्र तुष्टाव गौरीशं सूक्तैः स्तुतिसमीरितैः । तस्य
तुष्टोऽभवच्छम्भुः समायाचे वरं ततः॥ अर्जुन उवा० ॥
देवदेव गजासीनगौरीहेरम्बसंयुतः। गृहाण पूजामागत्य
मम मातुर्गृहे भव ॥ तथेत्युक्त्वा हरस्तस्य तद्विधो हर
आगतः। साष्टाङ्गं प्रणता गौरीं कुन्ती पूजामथाकरोत् ॥
पञ्चोपचारैः सम्पूज्य नैवेद्यादिभिरुत्तमैः। तुष्टा च भक्ति-
भावेन सा गौरी च ततोऽब्रवीत् ॥ कुन्ति ते परितुष्टास्मि
वरं वरय सुव्रते। कुन्त्युवा० । देहि मे सर्वसम्पत्तिं
सर्वसौख्यं सदोत्सवम् ॥ प्रयच्छ मम पुत्राणां सदा राज्य-
मनामयम्। ममास्त्वव्याहता भक्तिस्त्वयि जन्मनि जन्मनि॥
व्रतमेतत्तु यः कुर्यात्तव लोकमवाप्स्यति। न दारिद्र्यं न
वैधव्यं न शोको नापि दुष्कृतम् ॥ कृच्छ्रं नापद्गतमिदं
कदाचित्सम्भविष्यति । तथेत्युक्त्वा ततो गौरी सग-
जान्तरधीयत ॥ एतद् व्रतं सकलदुःखविनाशदुःखं

सौभाग्यराज्यफलसाधनमाचरन्त्यः । या योषितः सुखमनन्तमिहोपभुज्य गौरीसमीपमुपयान्ति हि देहनाशे ॥ ५३ ॥ इति श्रीभविष्योत्तरपुराणे हस्तगौरीकथा समाप्ता ॥

॥ प्रदक्षिणानुष्ठानविधिः ॥

॥ विष्णुप्रतिमादितुलसीवृक्षादिगवादीनाम् अयं सङ्कल्पः ॥

आचम्य देशका० मम इह जन्मनि जन्मान्तरे च अखण्डितसौभाग्यपुत्रपौत्र आयुरोग्यऐश्वर्याद्यभिवृध्यर्थं मनोरथसङ्कल्पपरिपूरणार्थं (अमुकदेवता) प्रीत्यर्थं (लक्षसङ्ख्या सहस्रसङ्ख्यया वा) प्रदक्षिणाऽनुष्ठानमहं करिष्ये । तदङ्गनिर्विघ्नतासिध्यर्थं महागणपतिपूजनं तत्साक्षिभूतं ब्राह्मणवर्णनं करिष्ये। गणेशपूजां कृत्वा वक्रतुण्डेति प्रार्थयेत्। अनया पूजया विघ्नहर्ता महागणपतिः प्रीयताम्। यजमानः अमुकशर्माहं (विप्रः पठेत्) अमुकप्रवरान्वित अमुकगोत्रोत्पन्नं अमुकशर्माणं ब्राह्मणं अद्यप्रभृति (अमुक) अनुष्ठानपर्यन्तं प्रतिदिनं सदस्यं त्वां वृणे, वृतोऽस्मि इति विप्रः। गन्धाः पातु इत्यादिना ब्राह्मणं सम्पूज्य, गणपतिं विसृज्य यान्तुदे० ॥

प्रतिदिने अयं सङ्कल्पः । आचम्य देशका० पूर्वसङ्कल्पितसङ्ख्यापरिपूरणार्थं अद्य (अमुक) सङ्ख्याप्रदक्षिणाऽनुष्ठानमहं क० । गणपतिस्मरणादिनित्यपूजाविधिं कृत्वा नमस्कुर्यात् । यथावधिसङ्ख्यासङ्कल्पिततत्तद्देवताविष्णुप्रतिमादितुलसीवृक्षादिगवादीनां च प्रदक्षिणां कृत्वा, ततः देवं पञ्चोपचारैः सम्पूज्य, प्रार्थयेत्-यानि कानि च पापानि जन्मा० । अन्यथा० । मन्त्रहीनं० । आवाहनं न०। अनेन (अमुक) सङ्ख्याप्रदक्षिणानु-

ष्ठानाख्येन कर्मणा श्री (अमुक) देवता प्रीयताम् । लक्षसङ्ख्याप्रदक्षिणासमाप्तिस्तु महापूजां कृत्वा, अनेन सदस्यसाक्षित्वेन मया कृतेन (अमुकदेवता) लक्षसङ्ख्याप्रदक्षिणानुष्ठानाख्येन कर्मणा (अमुक) देवता प्रीयताम् । कृतस्य कर्मणः साङ्गतासिध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं सदस्याय ब्राह्मणाय दक्षिणाप्रदानं क० । नमोऽस्त्व० । इदं यथाशक्ति सुवर्णनिष्क्रयद्रव्यं सदस्याय ब्राह्मणाय तुभ्यमहं सम्प्रददे । प्रति० । अनेन दक्षिणाप्रदानाख्येन कर्मणा तेन श्री (अमुक) देवता प्रीयताम् । अन्तरितसङ्कल्पः—अद्य० अन्तरितसङ्ख्यापरिपूरणार्थं अमुकदेवताप्रीत्यर्थं अद्य (अमुक) सङ्ख्याप्रदक्षिणां क० । शेषं पूर्ववत् ॥

॥ तुलसीबिल्वदूर्वाअनेकजातीयपुष्पसमर्पणे
अयं सङ्कल्पः ॥

आचम्य देशका० मम इ० सकलमनेप्सितकामनासिध्यर्थं (श्रीसिद्धिबुद्धिसहितश्रीमहागणपतिप्रीत्यर्थं (चातुर्मास्यनिमित्तं) (लक्षसङ्ख्या) दूर्वाङ्कुरार्पणं करिष्ये । द्रव्यान्तरे तु दूर्वास्थाने तत्तद्द्रव्योल्लेखः कर्तव्यः। आसनविध्यादिकलशपूजनादिसम्भारप्रोक्षणान्तं कृत्वा, देवं सम्पूज्य, दूर्वाङ्कुरानर्पयेत् सहस्रनाम्नैः नाममन्त्रैर्वा । अर्पणान्ते पञ्चोपचारैः देवं सम्पूज्य, प्रार्थयेत्- अन्यथा श० । यस्य स्मृ० । अनेन (अमुक) सङ्ख्यादूर्वाङ्कुरार्पणाख्येन कर्मणा श्रीमहागणपतिः प्रीयताम् । सहस्रनामवाचकाय ब्राह्मणाय दक्षिणात्वेन तुभ्यमहं सम्प्रददे । प्रति०,प्र० । कृतस्य०साङ्गता तु ब्राह्मणभोजनं कुर्यात् ।

प्रतिदिने अयं सङ्कल्पः। पूर्वसङ्कल्पितसङ्ख्यापरिपूरणार्थं अद्य (अमुक) सङ्ख्यादूर्वाङ्कुरार्पणं करिष्ये। एवं पञ्चोपचारैः पूजां कुर्यात्। आद्यन्तः। शेषं पूर्ववत्॥

॥ वर्तिकाप्रज्वालनसङ्कल्पः॥

आचम्य देशकालौ सङ्कीर्त्य, मम इह० च पुत्रपौत्राद्यनवच्छिन्नसन्तत्यभिवृद्ध्यर्थं (अमुक) देवताप्रीत्यर्थं (अमुकसङ्ख्याऽमुक) वर्तिकाप्रज्वालनं करिष्ये। गणपतिपूजनादिदेवं सम्पूज्य वर्तिका प्रज्वालयेत्। तत्र मन्त्रः—कीटाः पतङ्गा मशकाश्च वृक्षा जले स्थले ये विचरन्ति जीवाः॥ दृष्ट्वा प्रदीपं न च जन्मभागिनो भवन्ति नित्यं श्वपचा हि विप्राः॥ यस्य स्मृ०। अनेन (अमुक) वर्त्तिकाप्रज्वालनाख्येन क० (अमुक) देवता प्रीयताम्। गणपतिं विसृजेत्। समाप्तिस्तु सुवर्णनिर्मितवर्तिकासह रौप्यमयदीपेन ब्राह्मणाय दद्यात्। साङ्गता तु कृतस्य० यथाशक्ति ब्राह्मणान् दम्पतीन् सुवासिनींश्च भोजयिष्ये। यस्य स्मृ०। अनेन (अमुकसङ्ख्याऽमुकवर्त्तिका) प्रज्वलनाख्येन कर्मणा (अमुकदेवता) प्रीयताम्॥

॥ सोमवतीपूजाविधिः॥

सोमवती अमावास्या श्राद्धेऽपराह्णव्यापिनी ग्राह्या। पूजायां तु पूर्वाह्णव्यापिन्यपि। अथ पूजाविधिः। आचम्य। अश्वत्थमूलमासिञ्चेत्तोयेन बहुना सदा। कुलानामयुतं तेन तारितं स्यान्न संशयः॥ इति मन्त्रेण अश्वत्थमूलं सिञ्चेत्। सूत्रेण वेष्टयेद्भक्त्या गन्धपुष्पाक्षतैः सह। अशेषं हर मे पापं वृक्षराज नमोऽस्तु ते॥ इति मन्त्रेण त्रिसूत्रेण त्रिवारं संवेष्टयेत्॥ आचम्य देशकालौ सङ्कीर्त्य, मम इह जन्मान्तरे च सकलपापक्षयार्थं पुत्रपौत्राद्यभिवृद्धि-

जन्मजन्मनि अवैधव्यसन्ततिचिरजीवितपरमसौभाग्यप्राप्त्यर्थं स्वीकृत्यसोमवत्यमावास्याव्रताङ्गभूतं अश्वत्थमूलं यथामिलितषोडशोपचारद्रव्यैः पुराणोक्तमन्त्रैः श्रीलक्ष्मीनारायणपूजनमहं करिष्ये। तदङ्गगणपतिपूजनं कलशघण्टापूजनं च करिष्ये। गणपतिपूजनादिसम्भारप्रोक्षणान्तं कृत्वा, ध्यायेत्–शान्ताकारं भु०। पीताम्बरधरं देवं शङ्खचक्रगदाधरम्। किरीटिनं चतुर्बाहुं वनमालाविभूषितम्॥ श्रीलक्ष्मीनारायणाभ्यां नमः लक्ष्मीनारायणौ ध्यायामि॥ विश्वव्यापक विश्वेश कृपया दीनवत्सल। मयोपपादितां पूजां गृहाणेमां हि माधव॥ आवाहयामि॥ सूर्यकोटिप्रभानाथ सर्वव्यापिन् रमापते। आसनं कल्पितं भक्त्या गृहाण पुरुषोत्तम॥ आसनं०॥ नारायण जगद्व्यापिन् जगदानन्दकारक। विष्णुक्रान्तादिसंयुक्तं गृह्ण पाद्यं मयार्पितम्॥ पाद्यं०॥ फलगन्धाक्षतैर्युक्तं पुष्पपूगसमन्वितम्॥ अर्घ्यं गृहाण भगवन् विष्णो सर्वफलप्रद॥ अर्घ्यं०॥ कर्पूरैलालवङ्गादिशीतलं सलिलं प्रभो। रमारमण कृष्ण त्वमाचम्यं प्रतिगृह्यताम्॥ आचमनीयं०॥ गङ्गा कृष्णा गौतमी च कावेरी च शतह्रदा। ताभ्य आनीतसुखदं स्नानार्थं प्रतिगृह्यताम्॥ स्नानं०॥ पयो दधि घृतं चैव शर्करा मधुसंयुतम्। पञ्चामृतं मयाऽऽनीतं स्नानार्थं प्रति०॥ पञ्चामृतस्नानं०। मन्दाकिन्याः समानीतं हेमाम्भोरुहवासितम्। तोयमेतद् गन्धयुक्तं स्नानार्थं प्रति०॥ गन्धोदकस्नानं०॥ अभ्यङ्गार्थं मयाऽऽनीतं तैलं पुष्पादिवासितम्। प्रयत्नेनार्जितं शुद्धं स्नानार्थं प्र०॥ अभ्यङ्गस्नानं० उष्णोदकस्नानं०॥ गन्धादिपञ्चोपचारपूजां कृत्वा अभिषेकः। पीतवासस्त्वयि विभो मया यत्समुदाहृतम्।

वासःप्रीत्या गृहाणेदं पुरुषोत्तम केशव ॥ वस्त्रं०॥ उपवीतं सोत्तरीयं मया दत्तं सुशोभनम् । विश्वमूर्त्ते गृहाणेदं नारायण जगत्पते ॥ यज्ञोपवीतं० ॥ केयूरकटकं चैव सर्वाभरणभूषितम् । सर्वालङ्कारसंयुक्तं गृहाण परमेश्वर ॥ अलङ्कारान्० ॥ आभरणं० सौभाग्यद्रव्यं० ॥ मलयाचलसम्भूतं घनसारं मनोहरम् । विलेपनं सुरश्रेष्ठ चन्दनं प्रति० ॥ चन्दनं० ॥ अक्षताश्च सु० अक्षतान्० । तुलसीजातिकमलमल्लिकाचम्पकानि च । पुष्पाणि हर गोविन्द गृहा० ॥ पुष्पाणि स० ॥

॥ अथाङ्गपूजा ॥

१ अश्वत्थाय०पादौ पूज०।	९ गोविन्दाय नमः कण्ठं पू०
२ नारायणाय० गुल्फौ पू०।	१० रामाय नमः मुखं पू०।
३ विष्णवे नमः जानुनी पू०।	११ जगदोद्धाराय० नेत्रे०।
४ ब्रह्मणे नमः उरू पू०।	१२ कल्किने नमः कर्णौ पू०।
५ महेश्वराय० कटी पू०।	१३ वासुदेवाय न० ललाटंपू०
६ कमलनाभाय०नाभिं पू०।	१४ माधवाय नमः शिरःपू०।
७ दामोदराय० उदरं पू०।	१५ हरये नमः सर्वाङ्गं पू०।
८ वृक्षराजाय० हृदयं पू०।	

दशाङ्गो गुग्गुलोद्भूतः सुगन्धश्च मनोहरः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृ० ॥ धूपमा०॥ त्वं ज्योतिः सर्वदेवानां तेजसां तेज उत्तमम्। आत्मज्योतिः परंधाम दीपोऽयं प्र०॥ दीपं० ॥ भक्ष्यभोज्यं लेह्यपेयं चोष्यं खाद्यं मयाऽऽहृतम्। प्रियं ते परमेशस्य दत्तं मे स्वीकुरु प्रभो ॥ नैवेद्यं० ॥ मध्येपानीयं० । उत्तरापोशनं० । हस्तप्र० । मुखप्र० । करोद्वर्तनार्थे चं० ॥ कदलीनारिकेलादि भक्त्या-

ऽऽनीतं जगत्प्रभो । नानाफलानि दिव्यानि गृहा० ॥ फलं स० ॥ पूगीफलं म० ताम्बूलं स० । हिरण्यगर्भं० दक्षिणां० । त्वद्भासा भासते लोकः कोटिसूर्यसमप्रभ । नीराजयिष्ये त्वां विष्णो कृपां कुरु मयि प्रभो ॥ आर्तिक्यदीपं द० ॥ कर्पूरनिर्मितं देव स्वर्णपात्रे निवेदितम् । नीराजनं मया भक्त्या गृहा० ॥ कर्पूरदीपं० ॥ मया कायेन मनसा वाचा जन्मशतार्जितम् । पापं प्रशमय श्रीश प्रदक्षिणपदे पदे ॥ प्रदक्षिणां० ॥ व्यक्ताव्यक्तस्वरूपाय सृष्टिस्थित्यन्तकारणे । आदिमध्यान्तरहित विष्टरश्रवसे नमः ॥ नमस्कारान् स० ॥ मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे । अग्रतः शिव-रूपाय अश्वत्थाय नमो नमः ॥ पुष्पाञ्जलिं स० ॥ नमस्ते देवदेवेश नमस्ते धरणीधर । नमस्ते पद्मनाभाय अश्वत्थाय नमो नमः ॥ अमायै च नमस्तुभ्यं सोमायै च नमो नमः । सौभाग्यं देहि मे नित्यं वृक्षराजाय ते नमः ॥ प्रार्थयामि ॥ गन्धपुष्पाक्षतैर्युक्तं जलं ते दक्षिणान्वितम् । विशेषार्घ्यं मया दत्तं सङ्कटान्मां निवारय ॥ श्रीलक्ष्मीनारायणाभ्यां नमः इदं विशेषार्घ्यं स० ॥ आवाहनं न० ॥ यस्य स्मृ० ॥ अनेन मया कृतेन पूजनेन श्रीलक्ष्मीनारायणौ प्रीयेताम् । अद्य पू० थं अमासोमवतीव्रताङ्गभूतं श्रीअश्वत्थनारायण-प्रीत्यर्थं (अमुकद्रव्यसहिताः) अष्टोत्तरशतप्रदक्षिणाः करिष्ये । मूलतो ब्रह्म० इतिमन्त्रेण १०८प्रदक्षिणाः कुर्यात् । ततः अद्य० त्यर्थं पूजासाङ्गतासिध्यर्थं ब्राह्मणाय सौभा-ग्यवायनदानं करिष्ये । तदङ्गत्वेन ब्राह्मणपूजनं क० । आसनादिना विप्रं सम्पूज्य । स्वस्त्यस्तु दी० । अमासो-मव्रतस्यास्य सम्पूर्णफलहेतवे । वायनं द्विजवर्याय सहि-रण्यं ददाम्यहम् ॥ इदं सौभाग्यवायनदानं अमुकश० ।

प्रतिगृ० प्रति० । दानसाङ्गतासिध्यर्थं इमां दक्षि० । अनेन वायनदानाख्येन कर्मणा श्रीलक्ष्मीनारायणौ प्रीयेताम् ॥

॥ प्रतिदिनं धर्मार्थउदकदानविधिः ॥

आचम्य देशका०र्थं उदकदानफलप्राप्तिद्वारा श्रीवसन्तमाधवप्रीत्यर्थं प्रतिदिनं मासपर्यन्तं ब्राह्मणगृहे उदकदानं करिष्ये । प्रथमदिने तदङ्गउदकपूरितघटपूजनं ब्राह्मणपूजनं च करिष्ये । उदकुम्भदेवताभ्यो नमः गन्धादिपूजां कृत्वा, विप्रं सम्पूज्य, वसन्तमाधवस्वरूपिणे ब्राह्मणाय इदमासनमित्यादिपूजां कृत्वा । स्वस्त्यस्तु, दीर्घ० । प्रत्यहं धर्मघटको वस्त्रं संवेष्टिताननः । ब्राह्मणस्य गृहे देयः शीतामलजलः शुचिः ॥ इदं उदकुम्भदानं अमुकशर्म० ब्राह्मणाय तु० । प्रतिगृ० प्रति० । अनेन श्रीवसन्तमाधवः प्रीयताम् । मासपर्यन्तं ब्राह्मणगृहे उदकुम्भाः देयाः । समाप्तिस्तु कृतस्य कर्मणः साङ्गतासिध्यर्थं तत्सम्पूर्णफलप्राप्तिद्वारा श्रीवसन्तमाधवप्रीत्यर्थं ब्राह्मणाय सोदकुम्भदानं करिष्ये । पूर्वसङ्कल्पस्थाने अयं सङ्कल्पः । शेषं पूर्ववत् ॥

॥ प्रपादानसङ्कल्पः ॥

आचम्य देशका० र्थं प्रपादानफलप्राप्तिपितृतृप्तिद्वारा पितृरूपिवसन्तमाधवप्रीत्यर्थं अद्यप्रभृति (अमुकमास) (अथवा अमुकदिन) पर्यन्तं (यथाशक्त्योपचारेण) प्रपादानं करिष्ये । स्थापितउदकुम्भेभ्यः गन्धादिना सम्पूज्य । अथ यथाशक्त्योपचारप्रकारः—प्रपा कार्या

च वैशाखे देवे देया गलन्तिका । उपानव्यजनच्छत्रसूक्ष्मवासांसि चन्दनम् ॥ १ ॥ जलपात्राणि देयानि तथा पुष्पगृहाणि च । यानि कानि विचित्राणि द्राक्षारम्भाफलान्यपि ॥ २ ॥ ददाति यो हि मेषादौ सक्तूनम्बुघटार्पितान् । पितॄनुद्दिश्य विप्राय सर्वपापैः प्रमुच्यते ॥३॥ वैशाखे यो घटं पूर्णं सभोज्यं वै द्विजन्मने । ददाति सुरराजेन्द्र स याति परमां गतिम् ॥ ४ ॥ प्रपादाने महत्फलम् ॥

॥ इति प्रातिवर्षिकपूजाकथासङ्ग्रहे

द्वितोयो भागः समाप्तः ॥

इदं पुस्तकं घैसासोपान्हहरिशर्मतनुजनुषा वेदाचार्यविनायकशर्मणा स्वीयघैसासगुरुजीवेदपाठशालाद्वारा प्रकाशितम् ।

शके १९०७, सन १९८६

Due date of Re